चतुर्थाह्नकभाष्यं

114/14

१० ॥श्रीगणेशाय नमः॥ यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥ पंचमे मंडले प्रथमेनुवाके पूर्वमष्टौ सूक्ता
१ नि व्याख्यातानि॥ ॥त्वामग्ने हविष्मंत इति सप्तर्चं नवमं सूक्तं आत्रेयस्य गयस्यार्षं सप्तमी पंचम्यौ पंक्ती शिष्टाः पंक्त्यंतं तस्य च सूक्तस्येति परिभा
षया अनुष्टुभः। अग्निर्देवता। तथा चानुक्रम्यते॥ त्वामग्ने गयोंत्या पंचम्यौ पंक्ती इति प्रातरनुवाके आश्विनशस्त्रे च एतदादिके द्वे सूक्ते॥ तथैव
सूत्रितं॥ ॥त्वामग्ने हविष्मंतो देवं मर्तास ईळते॥ मन्ये त्वा जातवेदसं स हव्या वक्ष्यानुषक्॥ ६॥ तत्रैषा प्रथमा॥ त्वामग्ने हविष्मंत इति॥ हे
अग्ने त्वां देवं दीप्यमानं हविष्मंतः होमसाधनद्रव्यसमेताः। मर्तासो मर्त्याः। ईळते स्तुवंति। अहं च जातवेदसं जातमुत्पन्नं चराचरं भूतजातं
वेत्तीति जातवेदाः॥ अथवा जातानि स्थावरजंगमात्मकानि। एनं विदुरिति जातवेदाः। यद्वा वेद इति धननाम जातं सर्वं वेदो धनं यस्यासौ जातवे
दाः॥ एवंविधं त्वा त्वां मन्ये स्तौमि। मनिरत्र स्तुत्यर्थे वर्त्तते। धातूनामनेकार्थत्वात् स त्वं हव्या हवनसाधनानि हवींषि आनुषक् निरंतरं तथा
आनुषक्तं यथा तथा वक्षि वहसि। हविष्मंतः। हविः शब्दः औणादिक इसन् प्रत्ययांतत्वात् प्रत्ययस्वरेणांतोदात्तः। तदस्यास्तीति मतुप्। पदसं
ज्ञाया अपवादत्वेन तसौ मत्वर्थ इति भसंज्ञायां रुत्वाभावः। मतुप्जसोरनुदात्तत्वात् प्रत्ययस्वर एव शिष्यते। अच्प्रत्ययांतत्वाद्देवशब्दोंतोदात्तः। राम
मृङ् प्राणत्यागे। असिहसिमृङि स्यादिना तन्। मृ गुणः। मर्तः। जसेरसुक्। मर्तासः। निघातः। ईळते। ईळ स्तुतौ। अदादित्वाच्छपो लुक्। आत्मनेपदेषु १

ननः धेरत्वं अत उकारस्याध्येतः संप्रसारणप्राप्ते लकारः लसार्वधातुकानुदात्तत्वेन धातुस्वरे प्राप्ते आह मिकोनिघातः मन्ये अयनो निपातादाद्युदात्तत्वं त्वायुषिमि
न्प्रणेम दिक्रु प्रत्ययांतो युष्म छंदः प्रत्ययस्वरेणांतोदात्तः त्वमावेकवचन इतिमपर्यंतस्य त्वादेशः अद्वितीयायां चेत्याकारः एकादेश उदात्तेनोदात्त इत्ये
कादेशो प्युदात्त एव त्वामो द्वितीयायाइति त्वादेशः स्थानिवद्भावेनांतोदात्तत्वे प्राप्ते अनुदात्तं सर्वमपादादाविति अनुदात्तत्वं। जातवेदसं। जनी प्रादुर्भा
वे रुः। त्विदितो निष्ठायामिती ट्प्रतिषेधः जनसनखनां सञ्झलोरित्यात्वं प्रत्ययस्वरेणांतोदात्तत्वं। वेदसूशब्दोप्यसुन्प्रत्ययांतत्वादाद्युदात्तः कर्मधारयपक्षे
समासांतोदात्तापवादेन तत्पुरुषे तुल्यार्थत्यादिना पूर्वपदप्रकृतिस्वरे प्राप्ते कृदुत्तरपदप्रकृतिस्वरत्वं। तदपवादत्वेन गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं
चेति पूर्वपदप्रकृतिस्वरत्वं। बहुव्रीहिपक्षे बहुव्रीहौ प्रकृत्या पूर्वपदमिति हि यावत् महतीत्यस्मिन्नर्थे पदइत्यनुवर्तमाने छंदसि चेति यः नपुंसकत्वा
छेरादेशः शो ः छंदसि बहुलमिति लोपः प्रत्ययलक्षणेन नुमादीर्घनलोपौ प्रत्ययस्वरेणांतोदात्तः वक्षिवह प्रापणे सिप् बहुलं छंदसीति शप
पोलुक्। ढत्वकत्वषत्वानि सिपः पित्वादनुदात्तत्वेन धातुस्वरेणाद्युदात्तत्वे प्राप्ते निघातः अन्न पूर्वस्य पंजेः क्षिपूर्णकारलोपः कुत्वं च धात्वादेः सकारस्य उ
पसर्गात्सुनोतीत्यादिना षत्वं दीर्घः छांदसः कृदुत्तरपदप्रकृतिस्वरत्वं॥ ॥ अथ द्वितीया॥ अग्निर्होतादास्वतः क्षयस्य वृक्तबर्हिषः। स यज्ञासः श्चरं
तियं सं वाजासः श्रवस्यवः॥ यमाग्निं यज्ञासः सर्वे यज्ञाः संचरंति। संहिताः गच्छंति श्रवस्यवः यजमानस्य प्रभूतां कीर्तिं संपादयंतो वाजासो हवींषिय

ऋ०भा०
२
मग्निं संचरंति प्राप्नुवंति एवंविधो होताग्निर्दास्वत॰ हविः॰ प्रक्षेपणादिदानवत॰ वृक्तबर्हिषः॰ वृक्तानि छिन्नानि बर्हींषि दर्भा येनासौ वृक्तबर्हिषस्तस्य क्षीयंति निव
संत्यस्मिन् स्वर्गसाधनफलानीति क्षयः॰ तस्य यजमानस्य यागार्थं होता देवानामाह्वाता भवति दास्वत॰ दाञ् दाने॰ असुन् प्रत्ययांत॰ मतुप्॰ अदुपधत्वा
द्वत्वं धातुस्वरेणाद्युदात्त॰ एव क्षी निवासगत्योः क्षयो निवास इत्याद्युदात्तः वृक्तं वृजी वर्जने वर्जनमत्रोपचाराच्छेदनं निष्ठाप्रत्ययस्वरेणांतोदात्त॰ बहुव्रीहित्वात्पूर्व
पदप्रकृतिस्वरत्वं यज्ञ आ॰ यज याचने इत्यादिना नङ् प्रत्ययांतोदात्त॰ चरंति चर गति भक्षणयोः॰ अदुपदेशाल्लसार्वधातुकानुदात्तत्वं यद्वृत्तान्नित्यमि
ति निघाताभावः॰ वृजेर्घञ्॰ वाज॰ कर्षात्वत इत्यंतोदात्त॰ छांदसत्वात् ङि नित्यादिर्नित्यमित्याद्युदात्त॰ थवस्य च॰ छंदसि परेच्छायामिति क्यच् क्याच्छंदसीत्युप
त्ययः॰ प्रत्ययस्वरेणांतोदात्तः॥ अथ चैतीया॥ ॥उत स्म यं शिशुं यथा नवं जनिष्टारणी॥ धर्तारं मानुषीणां विशामग्निं स्वध्वरं॥ उत स्म अपि च मानुषी
णां मनोर्जातानां विशां विशंति गर्भाशयमिति विशः॰ प्रजाः॰ तासां धर्तारं आहारादिपाकद्वारेण शरीरधातूनां पोषकं स्वध्वरं शोभनयज्ञं यमग्निं अरणी
द्वे अरणी नवं नूतनं शिशुं यथा अपत्यमिव जनिष्ट अजनिषातां अरणी प्रजानां पोषणार्थं चिरं वमग्निं असृजेतामित्यर्थः॰ शिशुः शो तनूकरणे आदेच उ
त्यादिना आत्वं शा॰ किः सन्वच्च इति कि प्रत्ययः॰ सन्वद्भावाद् द्विर्भावः॰ अभ्यासस्य ह्रस्वश्च सन्यत इतीत्वं आतो धातोरित्याकारलोपः॰ निधान्चेतानिताः अस्मा राम
त्स्वात्मिन्दिस्यनुवर्तते निसाद्याद्युदात्त॰ यथा यथेति पादांत इति सर्वानुदात्त॰ जनिष्ट जनी प्रादुर्भावे लुङ् छांदसत्वाद्वचनव्यत्ययः॰ अरणी ऋगतो अर्तिसृ २

सृधृधमाम्यश्यवितृभ्यो निरिति निः प्रत्ययाद्युदात्तः आभ्यामग्निं गच्छत्यग्निरित्यरणी कथमपादानार्थे ओणादिको निः ताभ्यामन्यत्रोणादयनियमात् भी
मादित्वाद्धि धंमानुषीणाम् मनोर्जातावञ्यतौ षुक्चेत्यञ्प्रत्ययः षुगागमश्च ञ्नित्यादिर्नित्यमित्याद्युदात्तत्वं विशां विश प्रवेशने कर्त्तरि क्विप्सावेकाचइति
विभक्तेरंतोदात्तत्वं हिंसार्थस्य ध्वरतेः पचाद्यच् नञ्विद्यते ध्वरो यागहिंसा यस्मिन्नित्यध्वरः बहुव्रीहिस्वरापवादत्वेन नञ्सुभ्यामित्यंतोदात्तः ॥ ॥
॥ अथ चतुर्थी ॥ ॥ उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणां ॥ पुरू यो दग्धासि वनाग्ने पशुर्न यवसे ॥ उत स्म अपि च ह्वार्याणां कुटिलं गच्छतां सर्पाणां। य
द्वा। आस्कंदितादिगतिविशेषेण वक्रगमनानां अश्वानां पुत्रो न पुत्र इव बालसर्प इव अशिक्षितबालाश्वइव दुर्गृभीयसे दुःखेन गृह्यसे अग्ने यस्त्वं पुरू
पुरूणि वनानि दग्धासि दाहको भवसि कथमिव यवसे तृणे पशुर्न पशुरिव। अयमर्थः अत्यंतक्षुधार्त्तः पशुः तृणविषये विसृष्टः सन् यथा सर्वं भक्षय
ति तद्वदित्यर्थः दुर्गृभीयसे ग्रह उपादाने। यक् ऋकवई उ इत्यनुवृत्तौ बहुलं छंदसीतीडागमः ग्रहिज्येत्यादिना संप्रसारणं हृग्रहोर्भश्छंदसीति भकारः नि
घातः ह्वार्याणां ह्वृ कौटिल्ये ऋहलोर्ण्यत् आदिर्ञ्णितिः तित्स्वरितमिति स्वरितत्वं पुरु पॄ पालनपूरणयोः पॄभृदिव्यपॄधिगृधिभ्य इति कुप्रत्ययः उदोष्ठ्यपू
र्वस्येत्युत्वं प्रत्ययस्वरेणांतोदात्तः असि यद्वृत्तान्नित्यमिति न निघातः ॥ ॥ अथ पंचमी ॥ ॥ अध स्म यस्यार्चयः सम्यक् संयंति धूमिनः ॥ यदीमह त्रितो दि
व्युप ध्मातेव धमति शिशीते ध्मातरी यथा ॥ ॥ अध स्म अपि च धूमिनः धूमवतो यस्याग्नेरर्चयः अर्चींषि सम्यक् शोभनं संयंति सर्वतः प्राप्नुवंति त्रितः त्रिषु स्था
नेषु ततो व्याप्तः वीलिस्था। नानिवातीति दिवि अंतरिक्षे यत् यदा ईमयं आत्मानः उप धमयति उपवर्धते तदा ज्वालाः सर्वतो निर्गच्छंतीत्यर्थः कथमिव ध्माते

च०भा० क्कर्मारइव कर्मारो यथा भस्त्रादिभिरग्निं संवर्धयति तद्वत्स्वात्मानं वर्धयतीत्यर्थः किंच ध्मातरिय यथा ध्मातः समीपे विद्यमानोऽग्निः अग्निस्तेन ध्मायमानः स

३ आत्मानं शिशीते तीक्ष्णीकरोति तद्वत् स्वयमेव स्वात्मानं तीक्ष्णीकरोतीत्यर्थः अहेति पादपूरणः यत्तिङ्गतो यद्वृत्तयोगान्निघाताभावः धमति ध्मा शब्दाग्नि

संयोगयोः पाघ्रादिना धमादेशः पूर्ववन्निघाताभावः शिशीते शो तनूकरणे व्यत्ययेनात्मनेपदं श्नाविसनुवर्तमाने बहुलं छंदसीति विकरणस्य श्लुः आदे

च उपदेशो शितीत्यात्वं श्ला विति द्विर्वचनं बहुलं छंदसीत्यभ्यासस्येत्वं उभे अभ्यस्तमित्यभ्यस्तसंज्ञायां अतई हत्यघोरितीत्वं तिङ उत्तरत्वान्निघाताभावः॥

॥ अथ षष्ठी॥ ॥ तवाहमग्न ऊतिभिर्मित्रस्य च प्रशस्तिभिः॥ द्वेषोयुतो न दुरिता तुर्याम मर्त्यानां॥ ॥ हे अग्ने अहं मित्रस्य सर्वेषां मित्रभूतस्य तव ऊतिभिः

युष्मत्कर्तृकरणैः युष्मत्संशस्तिभिः च अस्मत्कृतैस्तोत्रैश्च मर्त्यानां शत्रुभूतानां मनुष्याणां दुरिता दुरितानि तत्कर्तृकाणि पापसाधनकर्माणि द्वेषोयुतो न द्वेषयुक्तो

नृशत्रून् इव तुर्याम तरेयं अयमर्थः स्वइक्षणे स्वसंबंधिकृतिभिश्च बाह्याभ्यंतरशत्रून् तरेयमित्यर्थः ऊतिभिः अवरक्षणे क्तिन् ज्वरत्वरश्रिव्यवमवामुपधा

याश्चेत्यूठ् ऊतियूतिजूतिसातिहेतिकीर्तयश्चेत्यंतोदात्तो निपातितः प्रशस्तिभिः शंस स्तुतौ क्तिन् कृदुत्तरपदप्रकृतिस्वरापवादत्वेन तादौ च निति कृत्यतौ इति ग

तेः उदात्तत्वं। द्वेषोयुतः द्विष अप्रीतौ भावे असुन् प्रत्ययः यु मिश्रणे कर्तरि क्विप् कृदुत्तरपदप्रकृतिस्वरत्वं तुर्याम तॄ प्लवनतरणयोः प्रार्थनायां लिङ् यासुट्

लिङः सलोपोनंत्यस्येति सकारलोपः बहुलं छंदसीति उणो लुक् ऋत उदोष्ठ्यपूर्वस्य बहुलं छंदसीत्युत्वं यासुडाममस्य उदात्तत्वात् शेषनिघातः अपादादावि राम

ति प्रतिषेधान्निघाताभावः॥ अथ सप्तमी॥ ॥ तन्नो अग्ने अभी नरो रयिं सहस्व आभर॥ स क्षेपयत्स पोषयद्भुवद्वाजस्य सातय उतैधि पृत्सु नो वृधे॥ ॥ ३

हे अग्ने सहस्वः॰ बलवन् नरः॰ हविषो नेतारः॰ नो अस्माकं तं रयिं लोके प्रसिद्धं पश्वादिलक्षणं धनं अभ्याभर आभिमुख्येन आहर पूर्वोक्तः॰ सोग्निः॰ क्षेपयत् अस्म
दीयान् शत्रून् क्षेपयन् सोग्निः॰ पोषयत् तं अस्मान् पोषयन् तु वाजस्य सातये अन्नस्य लाभाय भुवत् भवतु उत अपि च हे अग्ने पृत्सु पृतनासु युद्धेषु नोऽस्माकं वृ
धे समृद्धये एधि भव संग्रामे शत्रुविजयार्थं सत्त्वं समृद्धिं कुर्वित्यर्थः॰ सहस्वः॰ सह मर्षणे असुन् सह इत्यनेन सहो बलं मतुप्॰ मादुपधाया इति वत्वं मतुव
सोरुः॰ संबुद्धौ छंदसीति रुत्वं आमंत्रितस्य चेति निघातः॰ क्षेपयत् क्षिप प्रेरणे णिजंतात् लुङि इतश्च लोपः॰ लेटोडाटावित्यडागमः॰ आ पुगुणायादेशौ पररूप
त्वं च पोषयत् पुष पुष्टौ भुवत् भू सत्तायां भूसुवोस्तिङीति गुणप्रतिषेधः॰ उवङ् एधि अस भुवि घ्वसोरेद्धावभ्यासलोपश्चेत्येत्वं तस्यासिद्धत्वात् धुड्भ्यश्चेति हे
र्धिरिति धिरादेशः निघातः॰ पृत्सु पद्दन्नो इत्यादिना शब्दस्य पृदादेशः॰ सावेकाचो विभक्तिरुदात्तत्वं॥ ॥इति चतुर्थस्य प्रथमे प्रथमो वर्गः॥ २६॥ अग्न
ओजिष्ठमिति सप्तर्चं द्वादशं सूक्तं ऋष्यादि विनियोगश्च पूर्ववत् चतुर्थी सप्तम्यौ पंक्ती अग्न ओजिष्ठमंत्या चतुर्थीत्यनुक्रांतं तत्र प्रथमा॥ ॥अग्न
ओजिष्ठमाभर द्युम्नमस्मभ्यमध्रिगो॥ प्र नो राया परीणसा रत्सि वाजाय पथी॥ ॥हे अग्ने ओजिष्ठं बलवत्तमं द्युम्नं शोभते कटकमुकुटादिरूपेण
सर्वत्र प्रकाशत इति द्युम्नं धनमस्मभ्यं आभर आहर हे अध्रिगो अधृतगमन अधृतमप्रतिहतं गमनं यस्येत्यस्य धृताः॰ अनिवारिता गावो रश्मयो यस्येति
वा अधृतगुः॰ अध्रिगुः॰ तस्य संबोधनं॰ अस्मान् परीणसा परितो व्यापकेन राया धनेन प्रकर्षेण वाजय वाजायान्नलाभाय पंथां पंथानं अन्नस्य मत्समीप
प्राप्तिसाधनं मार्गं रात्सि विलिख कुर्वित्यर्थः॰ ओजिष्ठं उज आर्जवे उर्जवलोपश्चेत्यसुन् उवलोपश्च गुणः॰ ओजः॰ तदस्यास्तीत्यर्थे अस्मायामेधास्रजो विनिः॰

ऋ०भा० अतिशायिने इष्टश्रवि अततेर्लुङ्कटेरीति टिलोपः णित्वादाद्युदात्तः द्युम्नं द्युतदीप्तावित्यस्माद्धातोः सुम्न द्युम्न निम्न इत्यादिना कप्रत्ययः मकारश्चांतादेशो निपात्य
४ तेप्रत्ययस्वरेणांतोदात्तः अध्रिगो अधृतगा ह्रस्य अध्रि आदेशः गोस्त्रियोर्ह्रस्वो उपसर्जनह्रस्वत्वं आमंत्रितस्य निघातः परीणसा परीणसकोटिल्ये अत्र व्याप्त्यर्थः
धातूनामनेकार्थत्वात् अस्मात् संपदादिलक्षणो भावे क्विप् परितः तं संव्यापनं यस्य तथोक्तं उपसर्गादसमासेपीति णत्वं अत्र प्रापणक्रियया युक्तस्य परे
र्णः से ति प्रतिरुपसर्ग संज्ञा नास्ति यत्क्रियायुक्ताः प्रादयः तं प्रति गत्युपसर्गसंज्ञा इति न्यायात् अतः कथं णत्वं एवं तर्हि उपसर्गाद्बहुलमिति वचनात् सो णत्वं भ
विष्यति निपातस्य चेति पूर्वपदस्य दीर्घः बहुव्रीहौ प्रकृत्येति पूर्वपदप्रकृतिस्वरत्वं । रक्षि रद विलेखने भौवादिकः बहुलं छंदसीति छपो लुक् पादादित्वान्निघा
ताभावः पंथां द्वितीयैकवचने इतोत्सर्वनामस्थाने इत्यत्वं नकारलोपश्छांदसः पथिमथोः सर्वनामस्थाने इत्याद्युदात्तत्वं ॥ ॥ अथ द्वितीया ॥ ॥ त्वं नो अग्ने अद्भुत क्रत्वा
दक्षस्य मंहना ॥ त्वे असुर्यं१ मारुहत् क्राणा मित्रो न यज्ञियः ॥ ॥ हे अग्ने अद्भुत सामर्थ्यातिशयेन सर्वेषामाश्चर्यभूत त्वं नोस्माकं क्रत्वा कर्मणा अस्मत्कृतेन य
ज्ञादिव्यापारेण प्रीतः सन् दक्षस्य बलस्य धनस्य वा मंहना मंहनाम दाने कुर्विति शेषः यतः कारणात् त्वे त्वयि असुर्यं असुरघ्नं बलं आरुहत् आरूढं अतः मित्रो न सूर्य
इव यज्ञियः यज्ञार्हस्त्वं क्राणा यज्ञं च यातुकरक्षसापनोदनलक्षणं निकर्माणि कुर्वाणो भव अद्भुत आमंत्रितस्य आद्युदात्तत्वं क्रत्वा डुकृञ् करणे कृञः कतु
रिति कतुप्रत्ययः ककारो गुणवृद्धिप्रतिषेधार्थः यणादेशः क्रतुः कर्म तृतीयैकवचने जसादिषु वा वचनमिति वचनात् नाभावाभावः दक्षस्य दक्ष गतिहिंसन राम
योः दक्ष्यंते हिंस्यंते शत्रवोनेनेति दक्षं बलं करणाधिकरणयोश्चेति घञ् ञित्वादाद्युदात्तः महना मंहतिर्दानकर्मा सुपां सुलुगित्याकारादेशः वे सुपां सुलु ४

गित्याम्निाङः से आदेशस्तु बादेशत्वादनुदात्तः। त्वशब्दः। प्रत्ययस्वरेणांतोदात्तः। एकादेश उदात्तेनोदात्त इत्येकादेशस्योदात्तत्वं। आरुहत् रुह धातोः। लुङि कृमृ
दृरुहिभ्यश्छंदसीति च्लेरङादेशः। ङित्वाद्गुणाभावः। काण्वाडुक्तमिकरणे आनन्नुबकुलंछंदसीति विकरणस्य लुक्। यृणादेशस्तु पांसुलुगित्यत्र चितइत्यंतो
दात्तः। क्षयः। क्षियः। यज्ञमर्हतीत्यस्मिन्नर्थे यज्ञर्त्विग्भ्यां घखञाविति घः। प्रत्ययस्वरेणांतोदात्तः॥ ॥ अथ तृतीया॥ ॥ त्वंनो अग्न एषांगयं पुष्टिंच वर्धय॥ ये स्तोमे
भिः। प्रसूरयो नरो मघान्यानशुः॥ ॥ हे अग्ने त्वं एषां नः। त्वत्स्तावकानामस्माकं गयं गम्यते निवासायेति गयो गृहं गीयते श्रूयते इति वा गयो धनं पुष्टिं च ग
वादिविषयां पुष्टिं च वर्धय आपयय। ये लोके प्रसिद्धाः। सूरयो लब्धवर्णा नराः। स्तोतारो मनुष्याः। स्तोमेभिः। स्तोमैः। स्तोत्रैर्मघानि मंहनीयानि गवादिधनानि यथा
आनशुः। प्राप्नुवन् तद्द्वयमपीत्यर्थः। गयं गृहपक्षे गमेर्यश्च प्यादयश्चेति यत्प्रत्ययांतो मकारलोपश्च निपात्यते धनपक्षे गायतेरस्मि घः प्रत्ययो ह्रस्वत्वं यतो ना
वद्रत्याद्युदात्तत्वं पुष्टिं पुष पुष्टौ स्त्रियां क्तिन् छांदसमाद्युदात्तत्वं। स्तोमेभिः। बहु स्सूक्तौ। आनिश्कस्तु इत्यादिना मनुगुण। नित्त्वादाद्युदात्तः। आनशुः। अशूव्या
प्तौ लिट् द्विर्वचने हलादिशेषः। अत आदेरित्यात्वं अश्नोतेश्चेति निगागमः। निघातः॥ ॥ अथ चतुर्थी॥ ॥ ये अग्ने चंद्रते गिरः शुंभंत्यश्वराधसः॥ शुष्मेभिः
शुष्मिणो नरो दिवश्चिद्येषां बृहत्सुकीर्तिर्बोधति त्मना॥ ॥ हे अग्ने चंद्र सर्वेषां प्राणिनां आल्हादकर ये नराः। ते गिरः। त्वत्संबंधिस्तोत्ररूपा वाचः। शुंभंति शो
भनाः कुर्वंति ते अश्वराधसः। अश्वधना भवंति एतेन सर्वसमृद्धिरुपलक्ष्यते किंच शुष्मिणः। बलवंतः। संतः। शुष्मेभिः। शुष्मैः। स्वकीयैर्बलैः। सत्वैः। शत्रुशोषकै
भवंति येषां त्वत्संबंधिनं स्तवं कुर्वतां दिवश्चित् आकाशादपि बृहत् महती सुकीर्तिर्भवति सर्वदिगंतरावर्तिनी कीर्तिर्भवतीत्यर्थः। एवंविधं त्वां गयः। त्मना आत्मना

च०भा०
५

स्वयमिवबोधतिबोधयतीत्युषर्भुत्। उषर्भुच्छब्दोनुदात्तादिः। पादादित्वान्निघाताभावः। लसार्वधातुकानुदात्तत्वे शपस्तेसतिशिष्टत्वाद्विकरणस्वरएव। अध्वराधसः। अ
ध्वत्याक्षो अशिशृषीत्यादिनाकन्। अध्वंतिर्या प्रात्यध्वानमित्यध्वः। निलादाद्युदात्तः। राधसा धसं सिद्धो अस्तुर्बुधवितिसाधयतीति अनेननधर्मोदानितिराधो धनं बहु
व्रीहिलासर्वपदप्रकृतिस्वरत्वं। हहतहह अहिहिद्धो शान्ड़ऊपोलोपश्छांदसः। प्रत्ययस्वरः। बोधति बुध अवगमने। ऽर्यताल्। शपिकृतेतस्यछांदस्युभयथेतिसा
र्वधातुकसंज्ञायांणिलोपः। यद्वृत्तान्नित्यमितिनिघाताभावः। धातुस्वरेणांतोदात्तः। मनामं नेषाञ्ज्ञादेरालमनइत्याकारलोपः॥ ॥अथपंचमी॥ ॥नवस्ये
अग्ने अर्चयोभ्राजंतोयंतिधृष्णुया॥ परिज्मानोनविद्युतः। स्वानोरथोनवाजयुः॥ ॥हे अग्ने धृष्णुया धृष्णवः। अत्यंतप्रगल्भाः। भ्राजंतः। दीप्यमानाः। एतेप्र
सिद्धाः। तव अर्चिषः। त्वदीयारश्मयः। यंतिसर्वतोगच्छंति। कथमिवपरिज्मानः। परिगंच्छः। सर्वतोव्याप्ताः। विद्युतोन अचिरप्रभाइव अनेनप्रकारेणातिशयउक्तः। स्वा
नः। शब्दायमानः। रथोनरथइव अनेनार्चिषांस्वनाधिक्यमुक्तं वाजयुर्न अन्नकामइव अन्नार्थेयुद्धेषुशत्रुविजयायपयथाप्रवर्ततेतद्वदित्यर्थः। अनेन आकूतिवि
षयोभिलाषउक्तः। यंतिइणगतौ। धृष्णुया अिधृषाप्रागल्भ्ये अ सिगृधिधृषीत्यादिना क्नुः। प्रत्ययः। आदितश्चेतीट्प्रतिषेधः। बहुवचनेसुपांसुलुगित्यादि
नायाजादेशः। चितइत्यंतोदात्तत्वं परिज्मानः। अजअजगतौपरिपूर्वाद्धातोः। अन्येभ्योपिदृश्यतइतिमनिप्। अकारलोपश्छांदसः। निहादाद्युदात्तः। वाजयुः। वा
जआत्मनइच्छतीतिक्यच्। नश्छंदस्यपुत्रस्येतिईत्वदीर्घयोः प्रतिषेधः। क्याच्छंदसीत्युप्रत्ययः॥ ॥५॥ अथषष्ठी॥ ॥नूनो अग्नऊतयेसबाधसश्चरातये॥ अस्मा
कासश्चसूरयोविश्वा आशास्तरीषणि॥ ॥हे अग्नेनोस्माकंनुक्षिप्रंऊतयेरक्षायैभवसबाधसश्चदारिद्र्यनिमित्तबाधसहितस्यचरातयेधनानांदानायभवकिं
अ

राम
५

च अस्माकासः अस्माकाः पुत्रमित्रादयः सूरयः स्तोतारः विश्वाः सर्वा आशाः दिशः तरीषणि तासां तरणे क्षमा भवंतु अथवा आशाः कामा अयमर्थः स्वाभि
लषितप्रदेशाः समस्तवस्तुसंपादनं कुर्वंत्वित्यर्थः सबाधः बाधेरसुन् बाधस्तेन सह वर्त्तत इति सबाधः वोपसर्जनस्येति सहस्य सभावः कृदुत्तरपदप्रकृतिस्वरत्वं रा
तयः रा दाने क्तिन् मंत्रे वृषेषपचमनविदभूवीरा उदात्त इति क्तिन उदात्तः अस्माकासः तस्मिन्नणि च युष्माकास्माकाविति अणि कृते अस्माकादेशः छांदसत्वादणो
लोपः बहुवचने असुगागमः षष्ठीबहुवचनेऽमध्योदात्तत्वे च दृष्टत्वात्तथाविधमादेशं अत्रापि कृतवानाचार्यः विश्वाः विशः अशिपृषीत्यादिना क्विन् नित्त्वादाद्यु
दात्तः तरीषणि तॄ प्लवनतरणयोः अस्मात् म्यामिषिन् इनीनू बहुवचने नलोपाभावः अंतोदात्तः छांदसः ॥ ॥ अथ सप्तमी ॥ ॥ त्वं नो अग्ने अंगिरस्तुत स्तवान आ भ
र ॥ होतर्विभ्वासहं रयिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे ॥ ॥ हे अग्ने अंगिरः कार्यकारणयोरभेदोपचारात् अंगिरसः प्रकृतिभूतोप्यग्निः अंगिरा इत्यु
च्यते हे अंगिरः पूर्वैर्महर्षिभिः स्तुतः स्तव नः इदानींतनैश्च स्तूयमानस्त्वं विभ्वासहं महतामप्यभिभवितारं अभिभवहेतुत्वादभिभवितृ धनं मुच्यते रयिं धनं नो
स्माकं आ भर आहर हे होतः देवानामाह्वातः स्तोतृभ्यो नोस्मभ्यं तवसे स्तोतुं सामर्थ्यं च प्रयच्छ उतापि च पृत्सु युद्धेषु नोस्माकं वृधे समृद्धये एधि भव स्तवानः ष्टुञ्
स्तुतौ शानच् विकरणव्यत्ययेन शप्रत्ययः आद्युदात्तः विभ्वासहं संहितायां विभूनामिति षष्ठीबहुवचनस्य सुपामित्यादिना आकारादेशः तत्पुरुषे कृति बहुलमि
ति षष्ठ्या अलुक् पूर्वपदकारोक्तः विपूर्वाद्भवतेरगागमे अन्येषामपि दृश्यत इति दीर्घत्वं मत्वा अवग्रहं कुर्वंति कृदुत्तरपदप्रकृतिस्वरत्वं स्तवसे ष्टुञ् स्तुतौ तुमर्थे असे
प्रत्ययः नित्त्वादाद्युदात्तः ॥ ८ ॥ इति चतुर्थस्य प्रथमे द्वितीयो वर्गः ॥ ॥ जनस्य गोपा इति षळृचमेकादशं सूक्तं आत्रेयस्य सुतंभरस्यार्षं जागतमाग्नेयं तथा चा

च॰भा॰
६

नुक्रांतं॥ जनस्य षड्डुतं भरो जागतमिति प्रातरनुवाके आश्विनशस्त्रे चास्य सूक्तस्य विनियोगः। जनस्य गोपा साम ग्रं ऋं तायव इति॥ ॥तत्र प्रथमा॥ ॥जनस्य गोपा
अजनिष्ट जागृविरग्निः सुदक्षः सुविताय नव्यसे॥ घृतप्रतीको बृहता दिविस्पृशा द्युमद्वि भाति भरतेभ्यः शुचिः॥ ॥जनस्य गोपाः गोपायिता रक्षिता जागृवि
जागरणशीलः सदा प्रबुद्धः सुदक्षः सुबलः सर्वैः श्लाघनीयबलः सोग्निः नव्यसे नवतराय सुविताय लोकानां कल्याणाय अजनिष्ट जातः घृतप्रतीकः घृते
न प्रज्वलितांगः बृहता महता दिविस्पृशा अभ्रंलिहेन तेजसा युक्तः शुचिः शुद्धः एवंविधोग्निः भरतेभ्यः ऋत्विग्भ्यः तदर्थं द्युमत् दीप्तिमत् यथा भवति त
था विभाति प्रकाशते गोपाः गुपू रक्षणे आय प्रत्ययः गोपायते क्विप् परत्वादतो लोपः अत्र परत्वादप्युक्तलोपे कृते वर्णाश्रयत्वात् प्रत्ययलक्षणाभावेन यलोपो
न स्यात् तल्लोपो व्योर्वलीति प्रथमं लोपग्रहणात् तल्लोपकात्य लोप एव भवति लोपाजादेशस्य लोपविधिं प्रति न स्थानिवद्भावः प्रत्ययस्वरः जागृविः जागृ निद्राक्ष
ये जॄसृस्तृजागृभ्यः क्विन्निति क्विन्प्रत्ययः जाग्रोविचिण्णल्ङित्सु इति प्रतिषेधात् गुणाभावः नित्त्वादाद्युदात्तः सुदक्षः आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदा
त्तत्वं सुविताय तन्वादीनां छंदसि बहुपसंख्यानमिति सोरुवङादेशः सूपमानात् क्त इत्युत्तरपदांतोदात्तत्वं नव्यसे नवशब्दादातिशायने ईयसुन्प्रत्ययः
इकारलोपश्छांदसः अतो लोपः आद्युदात्तः दिविस्पृशा अहृष्ट्यां उपसंख्यानमिति अलुक् कृदुत्तरपदप्रकृतिस्वरत्वं द्युमत् ह्रस्वनुड्भ्यां मतुबिति ङ्स्वा
त्तस्य मतुपः अंतोदात्तत्वं॥ ॥अथ द्वितीया॥ ॥यज्ञस्य केतुं प्रथमं पुरोहितमग्निं नरस्त्रिषधस्थे समीधिरे॥ इंद्रेण देवैः सरथं स बर्हिषि सीदन्नि होता
यजथाय सुक्रतुः॥ ॥नरः ऋत्विजः यज्ञस्य यागस्य केतुं ज्ञापकं पुरोहितं यजमानेः पुरस्कृतं इंद्रेण देवैश्च सरथं तेषां मान्यत्वात् समानरथं अग्निं

राम
६

सधस्थे त्रिस्थाने विहारप्रदेशे प्रथमं समीधिरे समिंधंत सुक्रतुः शोभनकर्मा होता देवानामाह्वाता सोग्निर्बर्हिषि बर्हिर्युक्ते तस्मिन् स्थाने यजथाय यज्ञाय निषीद
त प्रतिष्ठितो भवदिति यावत् केतुं कित ज्ञाने औणादिकस्तु प्रत्ययः अंतोदात्तः पुरोहितं पुरो अव्ययमिति गतिसंज्ञायां गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं त्रिषधस्थे
आहवनीयादिलक्षणेन त्रिप्रकारेण स्थानेन सह तिष्ठतीति त्रिषधस्थः कप्रत्ययः सधमादस्थयोश्छंदसीति सधादेशः कृदुत्तरपदप्रकृतिस्वरत्वं सीदत् सदे
पाघ्रादिना सीदादेशः बहुलं छंदस्यमांङ्योगेपीत्यडभावः पादित्वान्निघाताभावः यजथाय यजेरोणादिकः अथप्रत्ययः प्रत्ययस्वरेणांतोदात्तः॥ ॥
॥अथ तृतीया॥ ॥असंमृष्टो जायसे मात्रोः शुचिर्मंद्रः कविरुदतिष्ठो विवस्वतः॥ घृतेन त्वावर्धयन्नग्न आहुत धूमस्ते केतुरभवद्दिवि श्रितः॥ ॥हे अग्ने
मात्रोररण्योः स्वजनननिमित्तत्वादरणी मातराविस्युच्येते ताभ्यां असंमृष्टः अबाधित एव जायसे प्रादुर्भूतो भवसि मंद्रः सर्वैः स्तुत्यः कविः क्रांतः सर्वत्र था
सः अथ वामे धावी शुचिस्त्वं विवस्वतः अग्निहोत्राद्यर्थं गृहे विशेषेण वसतो यजमानात् उदतिष्ठः उदितो भवः पूर्वमहर्षयः त्वां घृतेन अवर्धयन्नृत्विग्मि
नयन् हे आहुत आहुतिभिर्हुत तेतव दिवि श्रितं अंतरिक्षे श्रियो व्याप्तः धूमः केतुः प्रज्ञापको भवत् अग्न्यनुमापकत्वात् धूमस्य मात्रोः उदात्तयणो हल्पूर्वादि
ति विभक्तेरुदात्तत्वं मंद्रः मदि स्तुतिमोदमदस्वप्नकांतिगतिषु। अत्र स्तुत्यर्थात् स्फायितंचीत्यादिना रक् अंतोदात्तः कविः कमेर्विन्न सर्वधातुभ्य इन्निति प्रत्य
यः बाहुलकान्मकारस्य वत्वं रेफलोपश्च व्यत्ययेनांतोदात्तत्वं उदतिष्ठः उत्स्थाद्भ्यः कर्मवाचिन स्थिष्ठते रात्मनेपदाभावः विवस्वतः विपूर्वात् वसतेः संपदादि
लक्षणो भावे क्विप् तदस्यास्तीति मतुप् मादुपधायाश्चेति वत्वं मतुपोनुदात्तत्वाद्धातुस्वरः॥ ॥अथ चतुर्थी॥ ॥अग्निर्नो यज्ञमुप वेतु साधुयाग्निं नरो वि भरंते गृहे

ऋ०भा०
७

गृहे॥ अग्निर्दूतो अभवद्धव्यवाहनोऽग्निं वृणाना वृणते कविक्रतुं॥ ॥साधुया सर्वपुरुषार्थानां साधकः॥ अग्निर्नोयज्ञं अस्मदीयं यागं प्रति उप वेतु आगच्छतु नरः॥
मनुष्याः॥ गृहे गृहे अनुगृहं अग्निं विभरंते विहरंति विहरणं कुर्वंतीत्यर्थः॥ हव्यवाहनः॥ हव्यानां हविषां वोढा अग्निः दूतः देवानां दूतो भवत् वृणानाः॥ संभजमानाः
संतः कविक्रतुं क्रांतयज्ञं अग्निं वृणते संभजंते साधुया सुपां सुलुगित्यादिना विभक्तेर्यादेशः॥ ॥अथ पंचमी॥ ॥तुभ्येदमग्ने मधुमत्तमं वचस्तुभ्यं मनी
षा इयमस्तु शं हृदे॥ त्वां गिरः सिंधुमिवावनीर्महीरा पृणंति शवसा वर्धयंति च॥ ॥हे अग्ने तुभ्यं तुभ्यं त्वदर्थं मधुमत्तमं अत्यंतं मधुरं इदं वचः॥ क्रियते हृ
दे हृदि शं सुखं कुर्वती इयं मनीषा स्तुतिः॥ तुभ्यमस्तु गिरः॥ स्तुतिरूपा वाचः॥ त्वां आ पृणंति पूरयंति शवसा बलेन वर्धयंति च कथमिव महीर्महत्यः॥ अव
नीः॥ अवन्यो नद्यः सिंधुमिव समुद्रमिव॥ ॥अथ षष्ठी॥ ॥त्वामग्ने अंगिरसो गुहा हितमन्वविंदंछिश्रियाणं वनेवने॥ स जायसे मथ्यमानः सहो मह
त्वामाहुः सहसस्पुत्रमंगिरः॥ ॥हे अग्ने अंगिरस ऋषयः॥ गुहा गुहायां हितं निहितं निरूढं वनेवने वृक्षे वृक्षे शिश्रियाणं आश्रितं त्वा॥ अन्वविंदन् अल
भंत महत् महता सहः॥ सहसा बलेन युक्तः॥ स त्वं मथ्यमानो जायसे। हे अंगिरः॥ अंगिरसां प्रकृतिभूतं त्वा सहसस्पुत्रमाहुः॥ शिश्रियाणं श्रिञ् सेवायां लिट्॥ का
नच् आपेश्लुः श्लाविति द्विर्वचनं इयङादेशः॥ चित्वादंतोदात्तः॥ ॥इति चतुर्थस्य प्रथमे तृतीयो वर्गः॥ ॥प्राग्नये बृहत इति षळृचं द्वादशं सूक्तं सुतंभरस्यार्षं
त्रैष्टुभमाग्नेयं॥ प्राग्नय इत्यनुक्रांतं॥ प्रातरनुवाके आग्नेये क्रतौ त्रैष्टुभे छंदसि आश्विनशस्त्रे चेदं सूक्तं विनियुक्तं सूत्रितं च प्राग्नये बृहते प्रवो धस इति॥ राम
॥तत्र प्रथमा॥ ॥प्राग्नये बृहते यज्ञियाय ऋतस्य वृष्णे असुराय मन्म॥ घृतं न यज्ञ आस्ये सुपूतं गिरं भरे वृषभाय प्रतीचीं॥ ॥बृहते सामर्थ्यातिशयेन म ७

त अस्माकासः॥ अस्माकाः॥ पुत्रमित्रादयः॥ सूरयः॥ स्तोतारः॥ विश्वाः॥ सर्वा आशाः॥ दिशः॥ तरीषणि तासां तरणे क्षमा भवंतु अथवा आशाः॥ कामा अयमर्थः॥ स्वाभि
लषित प्रशस्त समस्तवस्तुसंपादनं कुर्वंत्वित्यर्थः॥ सबाधः॥ बाधैरसुरबाधैः सह वर्तंत इति सबाधः॥ वोपसर्जनस्येति सहस्य सभावः॥ कृदुत्तरपदप्रकृतिस्वरत्वे
तयेरादाने क्तिन्सर्वे ऋषिपचपतमनविदभूवीराउदात्त इति अंतोदात्तः॥ अस्माकासः॥ तस्मिन्नणि च युष्माकास्माकाविति अणि कृते अस्माकादेशः छांदसत्वादणो
लोपः॥ बहुवचने असुगागमः॥ षष्ठीबहुवचनेमध्योदात्तत्वे च वृद्धस्वाच्च तथाविधमादेशं अत्रापि कृतवानाचार्यः॥ विश्वाः॥ दिशः॥ अशिपृषीत्यादिना क्विन्नंत्वादाद्यु
दात्तः॥ तरीषणि तृ प्लवनतरणयोः अस्मात् मिथिन्नित्यादिना नीत् बहुवचने लोपाभावः॥ अंतोदात्तः॥ छांदसः॥ ॥अथ सप्तमी॥ ॥त्वं नो अग्ने अंगिरः स्तुत स्तवान आ भ
र॥ होतर्विभ्वासहं रयिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे॥ ॥हे अग्ने अंगिरः॥ कार्यकारणयोरभेदोपचारात् अंगिरसः प्रकृतिभूतोऽग्निः॥ अंगिरा इत्यु
च्यते हे अंगिरः॥ पूर्वैर्महर्षिभिः स्तुतः॥ स्तवनः॥ इदानींतनैश्च स्तूयमानस्त्वं विभ्वासहं महतामप्यभिभवितारं अभिभवहेतुत्वादभिभवितृ धनमुच्यते रयिं धनं नो
ऽस्माकं आभर आहर हे होतः देवानामाह्वातः स्तोतृभ्यो नोऽस्मभ्यं तवसे स्तोतुं सामर्थ्यं च प्रयच्छ उत अपि च पृत्सु युद्धेषु नोऽस्माकं वृधे समृद्धये एधि भव स्तवानः॥ स्तू
स्तुतो ज्ञानविकर्मकीयप्रत्ययेन सप्रत्ययः॥ आद्युदात्तश्च विभ्वासहं संहितायां विभूनामिति षष्ठीबहुवचनस्य सुपामित्यादिना आकारादेशः॥ तत्पुरुषे कृतिबहुलमि
ति षष्ठ्या अलुक् पदकाराश्च विपूर्वात् भवतेरगागमे अन्येषामपि दृश्यत इति दीर्घत्वं मत्वा अवग्रहं कुर्वंति कृदुत्तरपदप्रकृतिस्वरत्वं तवसे स्तौतेस्तोतुमर्थे असे
प्रत्ययः॥ नित्वादाद्युदात्तः॥ ॥८॥ ॥इति चतुर्थस्य प्रथमे द्वितीयो वर्गः॥ ॥जनस्य गोपा इति षळृचमेकादशं सूक्तं आत्रेयस्य सुतंभरस्यार्षं जागतमाग्नेयं तथा चा

हुतेयज्ञियाययज्ञार्हायऋतस्योदकस्यवृष्णेवर्षित्रेक्षतमित्युदकनामसुपाठात् असुरायबलवते असैरोणादिउरप्रत्ययः वृषभायकामानांवर्षित्रेअग्नये
मन्मज्ञानसाधनंप्रतीचीं अभिमुखींगिरंस्तुतिरूपांवाचंप्रभरेप्रणयामिकथमिवसुपूतंसम्यक्पूतं आस्येपहुतंयज्ञेघृतंनघृतमिव आस्येप्रहुतंघृतं
यथाप्रीतिकरंभवतितथाप्रीतिकरींस्तुतिमित्यर्थः॥ ॥अथद्वितीया॥ ॥ऋतंचिकित्वऋतमिच्चिकिद्ध्यृतस्यधारा अनुतृन्धिपूर्वीः॥ नाहंयातुंसह
सानद्वयेनऋतंसपाम्यरुषस्यवृष्णः॥ ॥ऋतंस्तोत्रंहेचिकित्वोजानन्नू अग्नेत्वंऋतंमयाक्रियमाणमिदंस्तोत्रंचिकिद्धिजानीहिकितज्ञानेलुङ्होत्या
दिः लोटिरूपंइदितिपूरणार्थः ऋतमितिपदस्यपरस्मिन्नामंत्रितेविद्यमानेपि आदित्सत्वात्सरांगवद्भावाभावः किंचपूर्वीः बह्वीः ऋतस्योदकस्यधाराः तेस्यपो
षणार्थंउत्पादयितुंअनुतृन्धिमेधानत्रुविध्यसहसाबलेनयुक्तोहंयातुंकर्मणांनाशकरींहिंसांनसपामिनकरोमीतियावत्द्वयेनचसत्यानृताभ्यांयर्किं
चिद्वैदिकंकृत्स्नंनसपामिषपसमवायेइतिधातुः किंतुअरुषस्यअरोचमानस्यवृष्णःकामानांवर्षितुः तवऋतंस्तोत्रमेवसपामि॥ ॥अथतृती
या॥ ॥कयानोअग्नऋतयन्नृतेनभुवोनवेदाउचथस्यनव्यः॥ वेदामेदेवऋतुपाऋतूनांनाहंपतिंसनितुरस्यरायः॥ ॥हेअग्नेऋतयन्सर्वप्राणिनां
जीवनहेतुमुदकंकुर्वन्त्वंकयाकेनापिऋतेनसत्येनक्रियमाणेनकर्मणानःउचथस्यअस्मदीयस्यस्तोत्रस्यनवेदाःभुवः नव्यः स्तुत्यः ऋतूनांऋतु
पाः द्वितीयऋतुब्राह्मणानुवादकः देवोद्योतमानोग्निः मेमांवेदवेत्तुसनितुर्भजमानस्यास्यममरायः पश्वादिलक्षणस्यपतिंस्वामिनंतमग्निमहंनजानामि
भुवः॥ष्टसत्तायांलिङर्थेलिड्याडागमःउवङ्नदेशः नवेदाः ननवेत्तीतिविग्रहःअस्मिन्नर्थेवर्ततेकथमेतल्लभ्यतेनिपातनात्द्विनञ्पूर्वस्यास्तुत्यर्थातस्य

ऋ० भा०

६

वेदेरेकस्य नलोपो ऽस्य प्रकृतिभावश्च स्कंदस्वामिना निपातितः शालिना तु नूश्राएनपादिति सूत्रेण वेत्तीत्येतस्मिन्नर्थे निपातितः अस्यार्थस्यानुपपन्नत्वा
त्स्कंदस्वामिपक्ष एवाश्रीयते ॥ ॥ अथ चतुर्थी ॥ ॥ के ते अग्ने रिपवे बंधनासः के पायवः सनिषंत द्युमंतः ॥ के धासिमग्ने अनृतस्य पांति क आसतो वचसः
संति गोपाः ॥ ॥ हे अग्ने ते रिपवे त्वदीयस्य शत्रोः बंधनासो बंधकाः स्युः ते त्वत्तं बुधिनस्ते पुरुषाः के कीदृशाः सामर्थ्यातिशयादेवंविधा इति केनापि ज्ञा
तुं न शक्यं तदित्यर्थः के पायवो जनानां रक्षितारः द्युमंतो दीप्तिमंतः सनिषंत दीनेभ्यो धनं प्रयच्छंति त्वदीयाः के कीदृशाः ये अनृतस्यासत्यस्यासत्य
स्य धासिं धारकं जनं पांति रक्षंति ते त्वदीया जनाः के संति न केपीत्यर्थः ये असतो दुष्टस्याभिशापादिलक्षणस्य वचसो गोपाः गोपायितारो रक्षितारः ते
त्वदीयाः के संति न केपीत्यर्थः अथवा ये के जनाः रिपोर्बंधकाः ये के पायवो रक्षितारः सनिषंत धनं प्रयच्छंति द्युमंतः ये के अनृतस्यासत्यस्य धासिं धा
रकं जनं पांति अनृतजनं न रक्षंति ये के असतः अभिशापादिलक्षणात्वचसो गोपाः गोपायितारः संति ते सर्वे त्वदीयाः त्वदुपासकाः ॥ अथ पंचमी ॥ ॥
सखायस्ते विषुणा अग्न एते शिवासः संतो अशिवा अभूवन् ॥ अधूर्षत स्वयमेते वचोभिर्ऋजूयते वृजिनानि ब्रुवंतः ॥ ॥ हे अग्ने तव सखायः स्तो
तारो विषुणाः विप्रकीर्णाः सर्वत्र व्याप्ताः एते पूर्वमशिवाः परानिष्टादि कुर्वाणाः त्वत्परिचर्यां त्यजंतो ऽभद्राः संतः इदानीं त्वत्परिचर्यां कुर्वंतः शिवासः शिवा आद्याः
अभूवन् किं च ये ऋजूयते ऋजु सम्यगाचरते षिमह्यं वचोभिः असाधूक्तिभिः वृजिनानि कुटिलानि ब्रुवंतः एते मम सपत्नाः स्वयमेवाधूर्षत अहिंस्यं राम
तधूर्वते हिंसाकर्मण इदं रूपं ॥ ॥ अथ षष्ठी ॥ ॥ यस्ते अग्ने नमसा यज्ञमीट्ट ऋतं स पात्यरुषस्य वृष्णः ॥ तस्य क्षयः पृथुरा साधुरेतु प्रसर्स्राणस्य नहुषस्य ९

ऋ०भा० स्तुत्याय वेदिरयं मननेन समानार्थः। मनिश्चस्तुतिकर्मा यत्रासेयत्रात्विने पूर्व्याय मुख्याय तस्मै अग्नये गिरं स्तुतिं प्रभरे प्रणयानि॥ ॥अथ द्वितीया॥ ॥ऋतेन

१० ऋतं धरुणं धारयन्त यज्ञस्य शाके परमे व्योमन्। दिवो धर्मन् धरुणे सेदुषो नॄञ्जातैरजातां अभि ये ननक्षुः॥ ॥ये यजमानाः। दिवो द्युलोकस्य धरुणे विधा

रके धर्मन् यज्ञे सेदुषः आसीनान् नॄन् आजाता देवान् जातैर्मनुष्यैः ऋत्विग्भिः अभिननक्षुः। अभिप्राप्नुवन्ति ते यजमानाः यज्ञस्य धरुणं धारकं ऋतं स

त्यरूपमग्निं शाके कर्मणि निमित्ते परमे उत्कृष्टे व्योमन् स्थाने उत्तरवेद्यां ऋतेन सत्येन धारयन्त धारयन्ति॥ ॥अथ तृतीया॥ ॥अंहोयुवस्तन्वस्तन्वते वि

वयो महद्दुष्टरं पूर्व्याय॥ स संवतो नवजातस्तुतुर्यात् सिंहं न क्रुद्धमभितः परि ष्ठुः॥ ॥ये यजमानाः पूर्व्याय मुख्यायास्मै अग्नये महत् अधिकं दुष्ट

रं राक्षसैर्दुःप्रापं वयः हविरूपमन्नं प्रयच्छन्ति ते यजमानाः तन्वः स्वाः तनूः अंहोयुवः अंहसां वियोजिकाः वितन्वते विस्तारयन्ति। नवजातः। सोऽग्निः

संवतः संगतान् शत्रून् तुतुर्यात् तरतु किं च अभितः सर्वतो वर्तमानाः शत्रवः मां परिवर्जयित्वा स्थुः तिष्ठेयुः। कथमिव मृगाः। क्रुद्धं सिंहं न सिंहमिव॥ ॥

॥अथ चतुर्थी॥ ॥मातेव यद्भरसे पप्रथानो जनंजनं धायसे चक्षसे च। वयोवयो जरसे यद्दधानः परि त्मना विषुरूपो जिगासि॥ ॥पप्रथानः। सर्वत्र

प्रथमानो यत्त्वं माता इव जननीव जनंजनं सर्वं जनं भरसे बिभर्षि किं च धायसे धारणाय चक्षसे दर्शनाय च सर्वैः प्रार्थ्यसे यत्त्वं यद्दधानो धार्यमाणो

भवसि तदा वयोवयः। सर्वमन्नं जरसे जरयसि अपि च विषुरूपो नानारूपः सन् त्मना आत्मना परि जिगासि सर्वभूतानि परिगच्छसि॥ ॥अथ पञ्चमी॥ ॥ राम

वाजो नु ते शवसस्पात्वन्तमुरुं दोघं धरुणं देव रायः। पदं न तायुर्गुहा दधानो महो राये चितयन्नत्रिमस्पः॥ ॥हे देव द्योतमानरूपाग्ने उरुं पृथुं दोघं कामा १०

नां दोग्धारं रायो धरुणं धारकं वाजो ह विलक्षणमन्नं ते त्वदीयस्य शवसो बलस्यान्तं समाप्तिं संपूर्तिं तु अद्य पातु रक्षतु तायुः। तस्करस्तायुः। स्तेनः नाम पदं न पदमि

व आत्मीयं मार्गमिव गुहा गुहायां दधानः आत्मनः आवृण्वन् प्रकाशं निदधानः। महो महते राये धनाय धनलाभार्थं चितयन् सन्मार्गं प्रकाशयन् अत्रिमस्पः। अ

त्रिमृषिं अपीणय। आप्यायय स्पृ पालन पूरणयोः स्पृ प्रीणनपालनयोरिति धातुः॥ ॥इति चतुर्थस्य प्रथमे सप्तमो वर्गः॥ ॥बृहद्वय इति पञ्च

र्चं द्वितीयं सूक्तं आत्रेयस्य पुरोरार्षं अन्त्या पङ्क्तिः शिष्टा अनुष्टुभः। अग्निर्देवता तथा चानुक्रान्तं बृहत्पूरुः पञ्चान्त्या पङ्क्तिरिति। प्रातरनुवाके आग्नेये क्रतौ आनुष्टुभे छ

न्दसि आश्विने शस्त्रे वेदमादीनि दश सूक्तानि चतुर्थं न। वर्जितानि आदितस्त्रिषु सूक्तेषु अन्त्या मुक्त्वा इतरेतरथा च सूत्रितं बृहद्वय इति दशानां चतुर्थं नवमं उद्ध

रेत् उत्तमा वा दित स्वयाणामिति॥ ॥तत्रेयं प्रथमा॥ ॥बृहद्वयो हि भानवेऽर्चा देवायाग्नये। यं मित्रं न प्रशस्तिभिर्मर्तासो दधिरे पुरः॥ ॥यज्ञेभानवे दीप्तिमते

अग्नये बृहत् महते वयः यो हविरूपं अन्नं दीयते हि अतस्त्वमपि देवाय द्योतमानायाग्नये वयः अर्चं प्रयच्छ मर्तासो मनुष्याः यमग्निं मित्रं न सखायमिव प्रश

स्तिभिः प्रकृष्टाभिः स्तुतिभिः पुरो दधिरे पुरस्कुर्वन्ति॥ ॥अथ द्वितीया॥ ॥स हि द्युभिर्जनानां होता दक्षस्य बाह्वोः। वि हव्यमग्निरानुषग्भगो न वारमृण्व

ति॥ ॥यो अग्निर्हव्यं हविः देवेषु आनुषक् आनुपूर्व्येण करोति बाह्वोर्भुजयोः दक्षस्य बलस्य द्युभिः दीप्तिभिर्युक्तः। सोऽग्निर्जनानां यजमानानां होता देवानामाह्वा

ता भवति भगो न सूर्य इव वारं वरणीयं धनमृण्वति विक्षेपेण प्रयच्छति मनुष्येषु॥ ॥अथ तृतीया॥ ॥अस्य स्तोमे मघोनः सख्ये वृद्धशोचिषः। विश्वा यस्मि

न्तुविष्वणि समर्ये शुष्ममादधुः॥ ॥मघोनो मघवतो धनवतः वृद्धशोचिषः वृद्धानि शोचींषि तेजांसि यस्यासौ वृद्धशोचिः तस्य एवंविधस्यास्याग्नेः स्तोमे

ऋ॰भा॰ स्तोत्रेसख्येवस्यामनुविश्वइवबहुत्वादर्थेस्वामिनियस्मिन्नग्नौविश्वासुपांसुलुगितिडादेशः॥विश्वेसर्वेऋत्विजःशुष्मबलंहविर्भिःस्तोत्रैश्चसमादधुःसम्यगाद
११ धति॥ ॥अथचतुर्थी॥ ॥अधाह्यग्नएषांसुवीर्यस्यमंहना॥तमिद्यह्वंनरोदसीपरिश्रवोबभूवतुः॥ ॥हेअग्नेअधअथएषामस्माकंयजमानानांसुवीर्यस्य
सर्वैःस्पृहणीयस्यबलस्यमंहनामहनायदानायभवमहतिर्दानकर्मारोदसीद्यावापृथिव्यौयह्वंनमहान्तंसूर्यमिव॥श्रवःसर्वैःश्रवणीयंतमित्तमग्निमेवपरि
बभूवतुःपरिगृह्णीतः॥ ॥अथपंचमी॥ ॥नूनएहिवार्यमग्नेगृणानआभर॥येवयंयेचसूरयःस्वस्तिधामहेसचोतैधिपृत्सुनोवृधे॥ ॥हेअग्नेगृणानः
स्तूयमानःसन्नुक्षिप्रंएहियज्ञंप्रत्यागच्छआगत्यचनोऽस्मभ्यंवार्यंवरणीयंधनमाभरसंपादययेवयंयजमानाःयेचसूरयःस्तोतारःसचाहविभिःसहिताउ
भयेवयंस्वस्तिस्तोत्रंधामहेकुर्मः॥उतापिचपृत्सुपृतनासुनोऽस्माकंवृधेसमृद्धयेएधिभव॥ ॥इतिचतुर्थस्यप्रथमेसप्तमोवर्गः॥ ॥आयज्ञैरितिपंचर्चंतृती
यंसूक्तंआत्रेयस्यपूरोरार्षंआग्नेयमंत्यापंक्तिःशिष्टाःपञ्चांतंपरिभाषयाअनुष्टुभः॥आयज्ञैरितित्र्यंत्यावर्ज्यंप्रातरनुवाकाश्विनशस्त्रयोर्बृहदुक्थइत्यादि
त्रासूक्तमध्येविनियोगउक्तः॥ ॥तत्रेयंप्रथमा॥ ॥आयज्ञैर्देवमर्त्यइत्थातव्यांसमूतये॥अग्निंकृतेस्वध्वरेपूरुरीळीतावसे॥ ॥हेदेवमर्त्यःमनुष्यःऋ
त्विक्इत्थाइत्थंतव्यांसंसततेजोभिःप्रवृद्धंअग्निंकृतयेतर्पणाययज्ञैःस्तोत्रैराह्वयतिकिंचपूरुर्मनुष्यःस्तोताकृतेस्वध्वरेशोभनेकृतेतमग्निंअवसेरक्षणाय
ईळीतस्तौति॥ ॥अथद्वितीया॥ ॥अस्यहिस्वयशस्तरआसाविधर्मन्मन्यसे॥तंनाकंचित्रशोचिषंमंद्रंपरोमनीषया॥ ॥हेविधर्मन्विविधधर्मायस्या राम
सोविधर्मास्तोतातस्यसंबोधनंहेस्तोतःस्वयशस्तरःसुयशास्त्वंमनीषयाआप्रकृष्टबुद्ध्यासाधनेनतंप्रसिद्धंअस्यअग्नेःआस्ये ११

नमस्कृता॥अग्निंहव्यायवोळ्हवे॥ ॥शश्वंतोबहवःस्तोतारःतंदेवमग्निंईळतेस्तुवंतियाचंतेवापुरुषार्थंकीदृशाआत्तघृतस्रुताघृतंक्षरंत्यास्रुचासहिताःकिम
र्थंस्तुवंतिहव्यायहवनार्थंचरुपुरोडाशादिलक्षणंहविर्वोळ्हवेवोढुं॥ ॥अथचतुर्थी॥ ॥अग्निर्जातोअरोचतघ्नन्दस्यूञ्ज्योतिषातमः॥अविंदद्गाअपःस्वः॥ ॥
जातःअरण्योर्मथनेनप्रादुर्भूतोऽग्निःदस्यून्यज्ञविघ्नकारिणःशत्रून्घ्नन्हिंसन्ज्योतिषास्वेनतेजसातमःघ्नन्अरोचतअदीप्यतकिंचगाःअपःउदका
निस्वःसूर्यंचअविंदत्अवेदयत्॥ ॥अथपंचमी॥ ॥अग्निमीळेन्यंकविंघृतपृष्ठंसपर्यत॥वेतुमेशृणवद्धवं॥ ॥हेजनाःईळेन्यंस्तुत्यंकविंक्रांतदर्शिनं
घृतपृष्ठंदीप्तोपरिभागंअग्निंसपर्यतपूजयतसोऽग्निर्मेहवंमदीयमाह्वानंवेतुकामयतांशृणवत्शृणोतुच॥ ॥अथषष्ठी॥ ॥अग्निंघृतेनवावृधुःस्तोमेभि
र्विश्वचर्षणिं॥स्वाधीभिर्वचस्युभिः॥ ॥ऋत्विजःविश्वचर्षणिंविश्वस्यद्रष्टारंस्वाधीभिःशोभनाध्यानैःवचस्युभिःस्तुतिकामैर्देवैःसमेतमग्निंघृतेनस्तो
मेभिःस्तोमैःस्तोत्रैःवावृधुःअवर्धयंत॥ ॥इतिचतुर्थस्यप्रथमेषष्ठोवर्गः॥ ॥पंचमेमंडलेसप्तमोऽनुवाकः॥ ॥अष्टमेऽनुवाकेद्वादशसूक्तानि॥तत्रप्रवेध
सइतिपंचर्चंप्रथमंसूक्तंआंगिरसस्यधरुणस्यार्षंत्रैष्टुभमाग्नेयं॥अत्रानुक्रमणिका॥प्रवेधसेपंचांगिरसोधरुणइति॥प्रातरनुवाकेआग्नेयेक्रतौत्रै
ष्टुभमाग्नेयंत्रैष्टुभंछंदसिसूक्तंविनियुक्तं॥प्रवेधसेकवयेत्वंनोअग्नेवरुणस्यविद्वानिति॥ ॥तत्रेयंप्रथमा॥ ॥प्रवेधसेकवयेवेद्यायगिरंभरेयशसेपूर्व्याय॥
घृतप्रसत्तोअसुरःसुशेवोरायोधर्ताधरुणोवस्वोअग्निः॥ ॥योऽग्निर्घृतप्रसत्तःहवीरूपेणघृतेनचप्रसन्नःअसुरोबलवान्सुशेवःशोभनंसेवंसुखंयस्य
सोसुशेवःशेवमितिसुखनामसुपाठात्रायोधनस्यधर्तापोषकःधरुणःहविषांधारकःवस्वःवासकोऽग्निर्भवति॥वेधसेविधात्रेकवयेक्रांतदर्शिनेवेद्याय

च० भा० वसंवंधिनं यज्ञं तन्वन्तु ॥ ॥ अथ चतुर्थी ॥ ॥ त्वमग्ने सप्रथा असि जुष्टो होता वरेण्यः ॥ त्वया यज्ञं वि तन्वते ॥ ॥ हे अग्ने जुष्टः सर्वदा प्रीतः वरेण्यः सर्वैर्वरणीयः
होता त्वं सप्रथाः सर्वतः पृथुरसि भवसि ॥ तथा ह यास्कः सप्रथाः सर्वतः पृथुरसि किं च सर्वे यजमानाः त्वया साधनेन यज्ञं वितन्वते ॥ ॥ अथ पंचमी ॥ ॥ त्वाम
९ ग्ने वाजसातमं विप्रा वर्धंति सुष्टुतं ॥ स नो रास्व सुवीर्यं ॥ ॥ हे अग्ने विप्रा मेधाविनः स्तोतारः जनानां वाजसातमं वाजोन्नं तद्दंतं सुष्टुतं पूर्वैर्महर्षिभिः सम्यक्
स्तुतं त्वां वर्धंति स्तोत्रैर्वर्धयंति ॥ स त्वं नो अस्मभ्यं सुवीर्यं सर्वैः श्लाघनीयं बलं रास्व देहि ॥ ॥ अथ षष्ठी ॥ ॥ अग्ने नेमिरराँ इव देवांस्त्वं परिभूरसि ॥ आ राधश्चित्र
मृंजसे ॥ ॥ हे अग्ने त्वं देवानुपरि भूरसि स्वतेजसा परिभवसि कथमिव नेमिः प्रकाशमानः चक्रस्य बाह्यो वलयः अरानिव नाभ्यार्पितान् सूक्ष्मान् स्थास
कानीव किं च त्वं चित्रं नानाविधं राधः राध्नुवंति साधयंत्यनेन पुरुषार्थानिति राधो धनं आ ऋंजसे स्तोतृभ्यः प्रसाधयः धननामसु पाठात् राधो धनमित्युक्तं ॥
॥ इति चतुर्थस्य प्रथमे पंचमो वर्गः ॥ ॥ अग्निं स्तोमेनेति षळृचं चतुर्दशं सूक्तं सुतंभरस्यार्षं गायत्रमाग्नेयं अग्निं स्तोमेनेत्यनुक्रमणिका प्रातरनुवाका
श्विनशास्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः ॥ ॥ तत्र प्रथमा ॥ ॥ अग्निं स्तोमेन बोधय समिधानो अमर्त्यं ॥ हव्या देवेषु नो दधत् ॥ ॥ हे स्तोतः अमर्त्यं अमरण
धर्माणं अग्निं स्तोमेन स्तोत्रेण बोधय स्वाभिलषितार्थसिध्यये प्रबोधय योग्निः समिधानः स्तोत्रैः सम्यक् प्रकाशमानः स नो हव्या अस्माभिर्दीयमानानि
हव्यानि हवींषि देवेषु दधत् निदधातु ॥ ॥ अथ द्वितीया ॥ ॥ तमध्वरेष्वीळते देवं मर्ता अमर्त्यं ॥ यजिष्ठं मानुषे जने ॥ ॥ मर्ताः मनुष्याः देवं द्योतमानममर्त्यं अम राम
रणधर्माणं मानुषे मनुष्यसंबंधिनि जने लोके यजिष्ठं यष्टृतममग्निं अध्वरेषु सप्ततंतुषु ईळते स्तुवंति ॥ ॥ अथ तृतीया ॥ ॥ तं हि शश्वंत ईळते स्रुचा देवं घृ ९

शेषः॥ ॥हे अग्ने यो मनुष्यः यत्तं यजनीयं ते त्वां नमसा स्तोत्रेण इद्धे स्तोति यद्वा ते तुभ्यं यज्ञं यागं नमसा अन्नरूपेण हविषा ईट्टे यजति अस्मिन्पक्षे यजेर्बहुलं छं
दसीति संप्रसारणं सवर्णदीर्घः मकारस्य दकारश्च यः अरुषस्य रोचमानस्य हव्यस्य कामानां वर्षितुरपेः ऋतं स्तोत्रं पाति रक्षति तस्य यजमानस्य गृहं पृथु वि
स्तीर्णं भवति पश्वादिलक्षणैः धनैः संपूर्णं भवतीत्यर्थः॥ सप्रसर्स्राणस्य प्रकर्षेण परिचर्यां गच्छतः॥ नहुषस्य मनुष्यस्य साधुः कामानां साधकः शेपः पु
त्रः एति आगच्छति भवतीत्यर्थः॥ ॥इति चतुर्थस्य प्रथमे चतुर्थो वर्गः॥ ॥अर्चंतस्त्वेति षड्ऋचं त्रयोदशं सूक्तं सुतंभरस्यार्षं गायत्रमाग्नेयं अनुक्रांतं च। अर्चं
तो गायत्रं त्विति शातरनुवाके आग्नेये क्रतौ गायत्रे छंदसि आश्विने शस्त्रे इदमादिके द्वे सूक्ते सूत्रितं च। अर्चंतस्त्वेति सूक्ते इति आहवनीयोपस्थाने त्वमग्ने स
प्रथा असीत्येका सूत्रितं च। सूत्रं ऊर्जस्तु मत्यावाजवत्या त्वमग्ने सप्रथा असीति चेति अश्वमेधे पौष्णेष्टौ त्वमग्ने सप्रथा असीति प्रथमाज्यभागानुवाक्या
त्वमग्ने सप्रथा असि सोमयास्त्वमयो भुवः सद्वं नाविति॥ ॥तत्र प्रथमा॥ ॥अर्चंतस्त्वा हवामहे अर्चंतः समिधीमहि। अग्ने अर्चंत ऊतये॥ ॥हे अग्ने त्वां अ
र्चंतः पूजयंतो वयं हवामहे आह्वयामः अर्चंतः स्तुवंतो वयं ऊतये रक्षणाय यथा वा त्वां समिधीमहि समिद्भिः संदीपयामः॥ अर्चंत इति तृतीयं पदमादराति
शयार्थं॥ ॥अथ द्वितीया॥ ॥अग्नेः स्तोमं मनामहे सिध्रमद्य दिविस्पृशः॥ देवस्य द्रविणस्यवः॥ ॥द्रविणस्यवः द्रविणं धनमिच्छंतो वयं दिविस्पृशः सूर्य
रूपेण आकाशं व्याप्नुवंतो देवस्य द्योतमानस्याग्नेः सिध्रं पुरुषार्थानां साधकं स्तोमं स्तोत्रं अद्यास्मिन्नहनि मनामहे ब्रूमः॥ ॥अथ तृतीया॥ ॥अग्निर्जुषत नो
गिरो होता यो मानुषेष्वा॥ स यक्षद्दैव्यं जनं॥ ॥होता देवानामाह्वाता योग्निर्मानुषेषु आवसति सोग्निर्नोस्माकं गिरः स्तुतीः जुषत सेवतां सोग्निर्दैव्यं जनं दे

ऋ०भा०
१२

रूचेनातिथिः॥ ॥विश्वानि यो अमर्त्यो हव्या मर्तेषु रण्यति॥ पुरुप्रियः बहुप्रियः विप्रः यजमाने धनस्य निवेदयिता कः। यजमानानां गृहान् प्रति तिथिषु अभ्येतीत्यतिथिः
तथा हयास्कः। अतिथिरभ्यतितो गृहान् भवत्यभ्येति तिथिषु परकुलानीति वा परगृहाणीति वेति एवंविधोऽग्निः शतस्त्ववेतस्तूयते अमर्त्यो अमरणधर्मा योऽग्निः मर्ते
षु मनुष्येषु यजमानेषु स्थितानि विश्वानि सर्वाणि हव्या हव्यानि हवींषि रण्यति कामयते॥ ॥अथ द्वितीया॥ ॥द्वितायमृक्तवाहसे स्वस्य दक्षस्य मंहना॥ इंदुं
सधत्त आनुषक्स्तोता चित्ते अमर्त्य॥ ॥हे अग्ने द्वितीया द्वितपु नायमृक्तवाहसे मृक्तं शुद्धं हविर्देवेभ्यो वहतीति शापयतीति मृक्तवाहाः तस्मै स्वस्य आत्मीय
स्य दक्षस्य बलस्य धनस्य धनस्य वा मंहना मंहनाय दानाय भव हे अमर्त्य निसानपत कारणान्तवतुभ्यं स मृक्तवाहाः आनुषक् सर्वदा अनुषक्तमिंदुं सोमं
धत्ते धारयति स्तोता चित्स्तोता भवति॥ ॥अथ तृतीया॥ ॥तं वो दीर्घायुशोचिषं गिरा हुवे मघोनां॥ अरिष्टो येषां रथो व्यश्वदावन्नीयते॥ ॥हे अग्ने दीर्घायुशो
चिषं दीर्घगमनदीप्तिं वं तं प्रजायां वहुवचनं तो मघोनो धनिनो हव्ये गिरा स्तोत्रेण हुवे आह्वयामि हे अश्वदावन् हे अश्वानां दातः येषां धनिनां रथः युद्धेषु अरि
ष्टः शत्रुभिरहिंसितो वीयते विगच्छति॥ ॥अथ चतुर्थी॥ ॥चित्रा वा येषु दीधितिरासन्नुक्था पांति ये॥ स्तीर्णं बर्हिः स्वर्णरे श्रवांसि दधिरे परि॥ ॥येषु जनेषु
चित्रा नानाविधा दीधितिः॥ यज्ञविषया क्रिया भवति ये आसन् आस्ये उक्था उक्थानि स्तोत्राणि पांति रक्षंति ते जना लिभि स्तीर्णमास्तीर्णं स्वबर्हिः पर्युपरि अश्रवांसि
अन्नानि हवींषि स्वर्णरे स्वर्गं यजमानं नयतीति स्वर्नरो यज्ञः तस्मिन् दधिरे निधीयंते॥ ॥अथ पंचमी॥ ॥ये मे पंचाशतं ददुरश्वानां सधस्तुति॥ द्युमदग्ने महि
श्रवो बृहत्कृधि मघोनां नृवदमृत नृणां॥ ॥ये मघवानो दातारो मे मह्यं सधस्तुति स्तुत्या सहितं तत्स्तोत्र समनंतरं अश्वानां पंचाशतं ददुः हे अमृत अग्ने त्वं ते राम १२

षां मघोनां नृणां द्युमत् दीप्तिमत् महि महत् प्रवृद्धं नृवत् परिचारकमनुष्ययुक्तं श्रवोन्नं कृधि कुरु देहीत्यर्थः॥ ॥इति चतुर्थस्य प्रथमे दशमो वर्गः॥ ॥अभ्यव
स्वा इति पंचर्चं पंचमं सूक्तं। अत्रेयमनुक्रमणिका अभ्यवस्वा वव्रिर्गायत्र्यावनुष्टुभौ विराड्रूपेति। आत्रेयो वव्रिर्ऋषिः। प्रथमाद्वितीये गायत्र्यौ तृतीया चतुर्थ्यौ
नुष्टुभौ पंचमी विराड्रूपा एकादशिनस्त्रयोष्टकश्च विराड्रूपेति॥ ॥तत्रेयं प्रथमा॥ ॥अभ्यवस्थाः प्रजायंते प्र वव्रेर्वव्रिश्चिकेत॥ उपस्थे मातुर्वि चष्टे॥ ॥वव्रेः
रूपेः अभितन्तरोत्तरमवस्था अवस्था भनादेशाः प्रजायंते तादृशीः वव्रिर्हविषां संभक्ता सोऽग्निः प्रचिकेत प्रजानीयात् ज्ञात्वा वा पनयतीति भावः योऽग्निर्मातुः पृ
थिव्या उपस्थे समीपे स्थितं पदार्थजातं विचष्टे पश्यति॥ ॥अथ द्वितीया॥ ॥जुहुरे वि चितयंतो निमिषं नृम्णं पांति॥ आ दृळ्हां पुरं विविशुः॥ ॥ये विचितयंतः त
व प्रभावं जानंतो जनाः त्वा अनिमिषं सर्वदा जुहुरे यज्ञार्थं त्वामाह्वयंति आह्वय च नृम्णं तव बलं हविर्भिः स्तोत्रैश्च पांति रक्षंति ते दृढां शत्रुभिः साधयितुमशक्यां
पुरं पुरीं आविविशुः प्रविशंति॥ शतं पूर्भिरायसीभिर्निपाहीति निगमः॥ ॥अथ तृतीया॥ ॥आ श्वैत्रेयस्य जंतवो द्युमद्वर्धंत कृष्टयः॥ निष्कग्रीवो बृहदुक्थ
एना मध्वा न वाजयुः॥ ॥जायंत इति जंतवः कृष्टयो मनुष्या ऋत्विजः मध्वा न मधुनेव एना एनया स्तुत्या यद्दानकारणार्थं मधुना च श्वैत्रेयस्य अग्नेरमंतरिक्षे
तत्र भवस्य वैद्युतस्याग्नेः द्युमत् दीप्तिमत् बलं आ वर्धंत अभिवर्धयंति किंविधाः कृष्टयः निष्कग्रीवः निष्केण सुवर्णेनालंकृतग्रीवाः व्यत्ययेनैकवचनं बृहदु
क्थः बृहत्स्तोत्रं वाजयुः अन्नकामाः॥ ॥अथ चतुर्थी॥ ॥प्रियं दुग्धं न काम्यमजामि जाम्योः सचा॥ घर्मो न वाजजठरोऽदब्धः शाश्वतो दभः॥ ॥जाम्योर्द्यावापृथि
व्योः सखा सहायभूतोऽग्निः दुग्धं न पय इव काम्यं कामनीयं अजामि दोषरहितं प्रियमस्मदीयं स्तोत्रं शृणोतु किंविधोऽग्निः घर्मो न प्रवर्ग्य इव वाजजठरः वाजो

ऋ० भा०
१३

त्वं जठरे यस्य स घर्मो यथा हव्येनाज्येन पयसा वा आसिक्तो वा जठरे ॰ तद्वद्घृष्विर्जठर इत्यर्थः ॰ । अदब्धः ॰ शत्रुभिः ॰ स्वयमहिंसितः ॰ धृष्वतः ॰ आध्वनो नित्यः । द
भः ॰ शत्रूणां हिंसकः ॰ ॥ ॥ अथ पंचमी ॥ ॥ क्रीळन्नो रश्म आ भुवः ॰ सं भस्मना वायुना वेविदानः ॰ ॥ ता अस्य सन्धृषजो न तिग्माः सुसंशिता वक्ष्यो वक्षणेस्थाः ॥
॥ हे रश्मे रश्मिवन्न अग्ने क्रीळन् वनेषु क्रीडन् भस्मना स्वकार्येण भस्सितेन वायुना प्रेरके पामकृता च संवेविदानः ॰ सम्यग्जायमानः ॰ त्वं नोस्माकं आ भुवः ॰ अभिमुखो
भव वक्षणेस्थाः ॰ वक्षणे वह्नौ स्थिताः वक्ष्यः ॰ हविर्वहन्तीति वक्ष्यो ज्वालाः ॰ सुसंशिताः ॰ सुतीक्ष्णाः ॰ धृषजः ॰ शत्रूणां घर्षिकाः ॰ ताः ॰ ज्वालाः ॰ अस्य यजमानस्य
मम न तिग्माः ॰ न तीक्ष्णाः ॰ सन्तु सन्तु अस्तु लेट्रूपं ॥ ॥ इति चतुर्थस्य प्रथमे एकादशो वर्गः ॥ ॥ यमग्न इति चतुर्ऋचं षष्ठं सूक्तं अत्रेः आर्षं प्रयस्वत नामार्षं आग्ने
यं आद्या पङ्क्तिः ॰ शिष्टा अनुष्टुभः ॰ तथा चानुक्रांतं यमग्ने चतुष्कं प्रयस्वन्तः पङ्क्त्यन्तं ह्यादि ॥ प्रातरनुवाक आश्विन शस्त्रे चोक्तो विनियोगः ॰ अत्रेश्चतुर्विंशस्यऽह
न्नि द्वितीयेह्नी दंसूक्तं आज्यशस्त्रं सूचितं च ॥ यमग्ने वाजसातमेति द्वितीयेह्न्याज्यमिति ॥ ॥ तत्र प्रथमा ॥ ॥ यमग्ने वाजसातम त्वं चिन्मन्यसे रयिं ॥ तं नो गीर्भिः
श्रवाय्यं देवत्रा पनया युजं ॥ ॥ हे अग्ने हे वाजसातम अत्यन्तमन्नदत्वं यं रयिं धनं अस्माभिर्दीयमानं हविरूपं धनं मन्यसे बुध्यसे चिदिति पादपूरणः ॰ श्रवस्यं श्रवणी
यं प्रशस्यं गीर्भिः स्तुतिभिर्युजं युक्तं नोस्मदीयं हविर्लक्षणं धनं तं देवत्रा देवेषु पनय प्रापयेत्यर्थः ॥ ॥ द्वितीया ॥ ॥ ये अग्ने नेरयन्ति ते वृद्धा उग्रस्य शवसः ॥ अप द्वे
षो अप ह्वरोन्यव्रतस्य सश्चिरे ॥ ॥ हे अग्ने ये जनाः ॰ वृद्धाः ॰ पश्वादिलक्षणैर्धनैः ॰ समृद्धाः ॰ संतः ॰ ते तुभ्यं न ईरयन्ति हवींषि न प्रयच्छन्तीति ते उग्रस्य अधिकेन शवसो बले
न अन्नेन वा अपनीयबला न्हीना भवन्तीत्यर्थः ॰ किं च अन्यव्रतस्य अन्यद्वेदिकाद्भिन्नं व्रतं कर्म यस्य तस्यासुरस्य द्वेषः ॰ स्वं बाधिन विरोधं ह्वरो हिंसां च अ

राम
१३

श्रासा आस्येन वा चा मन्यसे त्वोषिषि किं विशिष्टमग्निं नाकं सुखं अकं दुःखं न विद्यते यस्य सः ॰ तं चित्रशोचिषं चित्रतेजसं मंद्रं स्तुत्यं परः ॰ परस्तात् स्थितं ॥ ॥ अथ तृती
या ॥ ॥ अस्य वासा उ अर्चिषा य आयुक्त तुजा गिरा ॥ दिवो न यस्य रेतसा बृहच्छोचन्त्यर्चयः ॰ ॥ ॥ यो अग्निः तुजा जगद्रक्षणसमर्थेन बलेन गिरा स्तुत्या आयुक्त
संबद्धो भवत् दिवो न द्योतमानस्यादित्यस्येव यस्याग्नेः रेतसा प्रभया कृत्स्नं जगद्व्याप्तं यस्याग्नेर्बृहत् बृहन्त अर्चयो दीप्तयः ॰ शोचन्ति प्रकाशन्ते अस्यैव खल्वग्नेर
र्चिषा प्रभया सचादित्यः ॰ अर्चिष्मान् भवति ॥ उ इति पूरणः ॥ ॥ अथ चतुर्थी ॥ ॥ अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ ॥ अधा विश्वासु हव्योग्निर्विक्षु प्रशस्यते ॥
॥ विचेतसः ॰ सुमतयः ऋत्विजः दस्मस्य दर्शनीयस्याग्नेः क्रत्वा कर्मणा यज्ञादिना वसु वसूनि धनानि रथे आदधति हव्यः यज्ञार्थमाह्वातव्यः ॰ सोग्निः अध अथन
स सनन्तरमेव विश्वासु सर्वासु विक्षु प्रजासु प्रशस्यते स्तूयते ॥ ॥ अथ पंचमी ॥ ॥ नूनं न इद्धि वार्यमासा सचन्त सूरयः ॰ ॥ ऊर्जो नपादभिष्टये पाहि शग्धि स्वस्तय उतै
धि पृत्सु नो वृधे ॥ ॥ हे अग्ने नोस्मभ्यं वार्यं वरणीयं धनं नूनं क्षिप्रं प्रयच्छ इद्धीति पूरणो यतः सूरयः स्तोतारः त्वत्सकाशात् आसा आस्येन स्तोत्रेण सचन्त धनं लभन्ते
किं च हे ऊर्जो नपात् अन्नस्य न पातयितः ॰ बलस्य पुत्र वा अभिष्टये अभीष्टेन महं अन्नं प्रयच्छेति शेषः ॰ पाहि अस्मान् आपद्भ्यो रक्ष स्वस्तये क्षेमाय पश्वादिलक्षण
स्य धनस्य क्षेमार्थं शग्धि त्वां याचे य त्वयेन मध्यम ॰ शक्तो भवेति वा हे अग्ने उतापि च पृत्सु पृतनासु नो वृधे समृध्ये एधि भव ॥ ॥ इति चतुर्थस्य प्रथमे द्वादशो वर्गः ॰ ।
॥ प्रातरग्निरिति पञ्चर्चं चतुर्थं सूक्तं अत्रेयं मनुक्रमणिका प्रातर्पंच वा हाद्धित इति सूक्त वा हा इति विशेषणाविशिष्टः ॰ आत्रेयो द्वित ऋषिः ॰ पङ्क्त्यन्तं ह्यादि ह्याद्य
दस्यापि सूक्तस्य पञ्चमी पङ्क्तिः पङ्क्त्यन्तं परिभाषया शिष्टा अनुष्टुभः ॰ उक्तो विनियोगः ॰ प्रातरनुवाकाश्विनशस्त्रयोः ॰ ॥ ॥ तत्रेयं प्रथमा ॥ ॥ प्रातरग्निः ॰ पुरुप्रियो विश

षसश्चिरे आत्मानं प्रापयंति॥ ॥तृतीया॥ ॥होतारं त्वा वृणीमहेग्ने दक्षस्य साधनं॥ यज्ञेषु पूर्व्यं गिरा प्रयस्वंतो हवामहे॥ ॥हे अग्ने प्रयस्वंतो अन्नवंतः॥ एत
त्नामका वयं दक्षस्य बलस्य साधकं साधयितारं त्वां होतारं देवानामाह्वातारं वृणीमहे किं च यज्ञेषु पूर्व्यं मुख्यं त्वां गिरा स्तुतिरूपया वाचा हवामहे स्तुमः॥ चतुर्थी॥ ॥
इत्था यथा त ऊतये सहसावं दिवेदिवे॥ राय ऋताय सुक्रतो गोभिः ष्याम सधमादो वीरैः स्याम सधमादः॥ ॥हे सहसावन्बलवन्नग्ने दिवेदिवे अन्वहं वयं ते
तव ऊतये रक्षणाय यथा स्याम तथा इत्था इत्थं कुरु हे सुक्रतो राये धनाय ऋताय यज्ञाय च यथा स्याम तथा कुरु किं च वयं गोभिः सधमादः सह माद्यंतः स्या
म वीरैः पुत्रैश्च सधमादः सह माद्यंतः स्याम तथा कुरु॥ ॥चतुर्थस्य प्रथमे द्वादशो वर्गः॥ ॥मनुष्वदिति चतुर्ऋचं सप्तमं सूक्तं आत्रेयस्य सस्यार्षं मनुष्वत्स
स इत्यनुक्रमणिका पंक्त्युत्तं हेति पूर्वत्रोक्तत्वादिदमादीनि त्रीणि सूक्तानि पंक्त्यंतानि शिष्टा अनुष्टुभः अग्निर्देवता प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियो
गः॥ ॥तत्रेयं प्रथमा॥ ॥मनुष्वत्त्वा नि धीमहि मनुष्वत्सं इधीमहि॥ अग्ने मनुष्वदंगिरो देवान्देवयते यज॥ ॥हे अग्ने त्वा त्वां मनुष्वत् मनुरिव निधीमहि म
नुः शब्दोऽत्र मनुष्यपर्यायः नभोंगिरो मनुषां चेत्येकपदसंख्यानमिति भसंज्ञायां रुत्वाभावः मनुष्वत् मनुरिव त्वा समिधीमहि समिद्धिः संदीपयामः हे अंगिर अंगा
रात्मकाग्ने देवयते देवकामाय यजमानाय मनुष्वत् मनवे मनोरपत्याय इव देवान्यज॥ ॥अथ द्वितीया॥ ॥त्वं हि मानुषे जनेग्ने सुप्रीत इध्यसे॥ स्रुचस्त्वा
यंत्यानुषक्सुजात सर्पिरासुते॥ ॥हे अग्ने त्वं मानुषे जने मनुष्यलोके सुप्रीतः स्तोत्रैः सुष्ठु प्रीतः सन्निद्ध्यसे दीप्यसे स्रुचो हविर्भिः संपूर्णा आनुषक् आ
नुषक्तं यथा भवति तथा त्वां यंति प्राप्नुवंति हे सुजात हे सर्पिरासुते घृतयुक्तान्नेति॥ ॥अथ तृतीया॥ ॥त्वां विश्वे सजोषसो देवासो दूतमक्रत॥ सपर्यंतस्त्वा कवे

ऋ०भा० २४

यज्ञेषु देवमीळते॥ ॥सजोषसः सह प्रियमाणाः विश्वे सर्वे देवासो देवाः त्वां दूतं अक्रत अकुर्वन् अतः कारणात् हे कवे क्रांतदर्शिन् देवं द्योतमानं त्वां सपर्यंतः परि
चरंतो यजमानाः यज्ञेषु ईळते देवानाह्वातुं याचंते॥ ॥अथ चतुर्थी॥ ॥देवं वो देवयज्ययाग्निमीळीत मर्त्यः॥ समिद्धः शुक्र दीदिह्यृतस्य योनिमासदः
ससस्य योनिमासदः॥ ॥मर्त्यो मनुष्यः देवं द्योतमानमग्निं अयं वः त्वां देवयज्यायै देवयागार्थं ईळितस्तोतुमर्हति हे शुक्र शुक्ल विभ्रन् समिध्यद्विभिर्दी॰ पू
द्धं सन् दीदिहि दीप्यस्व ऋतस्य सत्यभूतस्य ससस्य ऋषभेमयोनिं कारणं स्वर्गसाधनं यज्ञस्थानं आसदः देवतारूपेणासीद आदरातिशयद्योतनार्थं
पुनर्वचनं॥ ॥इति चतुर्थस्य प्रथमे त्रयोदशो वर्गः॥ ॥प्रविश्वसामन्निति चतुर्ऋचं पंचमं सूक्तं आत्रेयो विश्वसामा ऋषिः चतुर्थी पंक्तिः शिष्टा अनुष्टुभः अ
ग्निर्देवता तथा चानुक्रांतं प्रविश्वसामन्विश्वसामेति उक्तो विनियोगः॥ प्रातरनुवाकाश्विनशस्त्रयोः॥ ॥तत्रेयं प्रथमा॥ ॥प्रविश्वसामन्नत्रिवदर्चा पावकशोचि
षे॥ यो अध्वरेष्वीड्यो होता मंद्रतमो विशि॥ ॥हे विश्वसामन् ऋषे संबोधनमेतत् त्वं अत्रिवत् अत्रिरिव पावकशोचिषे शोधकदीप्तये तस्मै अग्नये प्रार्चय प्रगाय
यो अग्निः अध्वरेषु ईड्यः सर्वैर्यजमानैः स्तुत्यः होता वा देवानामाह्वाता विशि जनेषु मंद्रतमः स्तुत्यतमः॥ ॥अथ द्वितीया॥ ॥न्य१ग्निं जातवेदसं दधाता देवमृत्वि
जं॥ प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः॥ ॥हे यजमानाः जातवेदसं जातप्रज्ञं जातधनं वा देवं द्योतमानं ऋत्विजं ऋतुयष्टारं अग्निं नि दधात निधत्त किंच
देवव्यचस्तमः देवानामाधतमो यज्ञो यज्ञसाधनं अस्माभिर्दीयमाना हविः आनुषक् यथा भवति तथा अद्यास्मिन्नहनि तमग्निं प्रैतु गच्छतु॥ ॥अथ तृतीया॥ ॥
चिकित्विन्मनसं त्वा देवं मर्तास ऊतये॥ वरेण्यस्य तेवस इयानासो अमन्महि॥ ॥हे अग्ने चिकित्विज्ञानं मनो यस्यासौ चिकित्विन्मनाः तं देवं त्वां इया

राम २४

नास॰ उपगन्तारो मर्त्या सो मनुष्या वयं ऊतये रक्षणार्थं वरेण्यस्य संभजनीयस्य ते तव अवस॰ अवसे तर्पणाय अमन्महि स्तुम॰॥ ॥अथ चतुर्थी॥ ॥अग्ने
चिकिध्यस्य न इदं वच॰ सहस्य॥ तं त्वा सुशिप्र दंपते स्तोमैर्वर्धंत्यत्रयो गीर्भि॰ शुंभंत्यत्रय॰॥ ॥हे अग्ने हे सहस्य सहसो बलस्य पुत्र नो अस्मदीयं अस्य इदं परि
वरणं इदं वचनं स्तोत्रं चिकिद्धि जानीहि हे सुशिप्र शोभने शिप्रे हनू नासिके वा यस्य सो सुशिप्र॰ तस्य संबोधनं सुशिप्र सुहनो दंपते गृहपते तं त्वा अत्रयो ऽत्रि
पुत्राः स्तोमै॰ स्तोत्रैः वर्धंति विवर्धयंति अत्रयो गीर्भि॰ शुंभंत्यलंकुर्वंति॥ ॥इति चतुर्थस्य प्रथमे चतुर्दशो वर्ग॥१४॥ ॥अग्ने सहंतमिति चतुर्ऋचं नवमं सूक्तं॥ अ
त्रानुक्रमणिका अग्ने चत्वा विश्वचर्षणिरिति द्युम्न ऋषि॰॥ चतुर्थी पंक्तिः आद्यास्तिस्रो ऽनुष्टुभ॰ अग्निर्देवता प्रातरनुवाकाश्विनशस्त्रयो॰ इदं सूक्तं॰ पा
तिसादृको विनियोग॰॥ ॥तत्रेयं प्रथमा॥ ॥अग्ने सहंतमा भर द्युम्नस्य प्रासहा रयिं॥ विश्वा यश्चर्षणीरभ्यासा वाजेषु सासहत्॥ ॥हे अग्ने प्रसह प्रकृष्टेन बले
न सहंतं शत्रूनभिभवंतं रयिं पुत्रं द्युम्नस्य द्युम्नाय मम ऋषये आभर आहर चतुर्थ्यर्थे षष्ठी एतदेव विवृणोति यः पुत्र॰ आसा आस्येन स्तोत्रेण युक्त॰ सन् वाजेषु युद्धे
षु अभि आभिमुख्येन गतान् विश्वाः सर्वान् चर्षणी मनुष्यान् शत्रून् सासहत् अभिभवति॥ ॥अथ द्वितीया॥ ॥तमग्ने पृतनाषहं रयिं सहस्व आभर॥ त्वं हि सत्यो अ
द्भुतो दाता वाजस्य गोमत॰॥ ॥हे अग्ने सहस्व॰ हे बलवन् पृतनासहं पृतना॰ सेना अभिभवितारं रयिं पुत्रं त्वमाभर आहर त्वं हि सत्य॰ सत्यभूत॰ अद्भुतो महान् गोमतः
गोभिर्युक्तस्य वाजस्यान्नस्य दाता॥ ॥अथ तृतीया॥ ॥विश्वे हि त्वा सजोषसो जनासो वृक्तबर्हिष॰॥ होतारं सद्मसु प्रियं व्यंति वार्या पुरु॥ ॥हे अग्ने सजोषस॰ सह
प्रीयमाणा॰ वृक्तबर्हिषो लूनबर्हिषो विश्वे सर्वे जना॰ ऋत्विज॰ सद्मसु यज्ञगृहेषु होतारं देवानामाह्वातारं प्रियं सर्वेषां प्रीतिकरं त्वां पुरु पुरूणि वार्या वरणीयानि ध

नानि शीतियाचंते॥ ॥अथ चतुर्थी॥ ॥सद्दिष्ठा विश्वचर्षणिरभिमातिः सहो दधे॥ अग्न एषु क्षयेष्वा रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि॥ ॥हे अग्ने सः लो
केषु प्रसिद्धो विश्वचर्षणिः सर्वस्य द्रष्टा अभिमातिषाट् शत्रूणां हिंसकः सहो बलं दधे धारयतु हि स्मेति पूरणौ हे शुक्र शोचिष्मन् त्वं नोस्मदीयेषु क्षयेषु गृहेषु रेवत् धनयु
क्तं यथा भवति तथा दीदिहि दीपयस्व हे पावक पापानां शोधकाग्ने त्वं द्युमत् दीप्तियुक्तं च दीदिहि दीपयस्व॥ ॥इति चतुर्थस्य प्रथमे पंचदशो वर्गः॥ ॥अग्ने
त्वं न इति चतुर्ऋचं दशमं सूक्तं॥ अत्रानुक्रमणिका॥ अग्ने त्वं गौपायना लोपायना बंधुः सुबंधुः श्रुतबंधुर्विप्रबंधुश्चैकर्चा द्विपदमिति॥ विंशातिका
द्विपदाविराजः इदं सूक्तं तत्राग्निर्देवता महापितृयज्ञे आहवनीयं प्रतिगच्छंत ऋत्विज इदं सूक्तं जपेयुः तथा च सूत्रितं अथैनमभिसमायंति माप्रगामाग्ने
त्वं न इति जपंत इति दशरात्रे षष्ठेहनि तृतीयसवने मैत्रावरुणस्य अग्ने त्वमिति द्वे तं त्वा शोचिष्ठेत्येका एवं मिलितो द्विपद ऋचः शस्यो विषयः तथैव सूत्रितं अग्ने
त्वं नो अंतम अग्ने भव वसुषामिधेति॥ ॥तत्रेयं प्रथमा द्वितीये॥ ॥अग्ने त्वं नो अंतम उत त्राता शिवो भवा वरूथ्यः॥ वसुरग्निर्वसुश्रवा अच्छा नक्षि द्युमत्तमं र
यिं दाः॥ ॥हे अग्ने वरूथ्यः वरणीयः संभजनीयः यद्वा वरूथ्ये परिधिभिर्वृतः त्वं नोस्माकमंतमोंतिकतमो भव उतापि च त्राता रक्षकः शिवः सुखकरश्च भ
व वसुर्वासको अग्निः सर्वेषामग्रणीः वसुश्रवाः ख्यातान्नः त्वं अच्छ आभिमुख्येन नक्षि अस्मान् व्याप्नुहि द्युमत्तमं अतिशयेन दीप्तिमत्तरं रयिं पश्वादिलक्षणं
धनं दाः अस्मभ्यं देहि॥ ॥अथ तृतीया॥ चतुर्थी॥ ॥स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्॥ तं त्वा शोचिष्ठ दीदिवः सुम्नाय नूनमीमहे
सखिभ्यः॥ ॥हे अग्ने स त्वं नोस्मान् बोधि बुध्यस्व हवमस्मदीयमाह्वानं श्रुधि शृणु अघायतः अघमिच्छतः समस्मात् सर्वस्मात् जनात् नोस्मान् उरु

रुध्यरक्षांहे शोचिष्ठ अतिशयेन दीप्त दीदिवः स्वतेजोभिर्दीप्यमानाग्ने तं त्वां सुम्नाय सुखाय सुम्नमिति सुखनाम तदर्थं सखिभ्यः समानख्यातिभ्यः पुत्रेभ्यः तदर्थं
नूनं ईमहे याचामहे ॥ ॥ इति चतुर्थस्य प्रथमे षोडशो वर्गः ॥ ॥ अच्छा वो अग्निमिति नवर्चमेकादशं सूक्तं ॥ अत्रानुक्रमणिका ॥ अच्छा वो नव वसूयव आनु
ष्टुभमिति आत्रेया वसूयवो नामान ऋषयः अनुष्टुप् मंडलादिपरिभाषया अग्निर्देवता प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥ प्रातःसवने अच्छावाक
वदस्वेत्युक्ते अच्छा वो अग्निमवस इत्यृचमनुब्रूयात् तथा सूत्रितं अच्छा वो अग्निमवस इत्यृचमन्वाहेति ॥ ॥ तत्रेयं प्रथमा ॥ ॥ अच्छा वो अग्निमवसे देवं गासि
स नो वसुः ॥ रासत्पुत्र ऋषूणामृतावा पर्षति द्विषः ॥ ॥ हे वसूयवः वो यूयं देवमग्निं अवसे रक्षणाय अच्छ गासि अभिप्रगायत स्तुत अग्निर्होतार्थं यज
मानानां गृहे वासयिता सोऽग्निर्नोऽस्मभ्यं रासत् कामान्ददातु ऋषूणां ऋषीणां पुत्रः ऋषिभिर्मथनेन जनितत्वात् पुत्र इत्युपचर्यते ऋतवा ऋतवान् सत्यवा
न् उदकवान् वा सोऽग्निर्द्विषः अस्माकं शत्रून् पर्षति पारयतु ॥ ॥ अथ द्वितीया ॥ ॥ स हि सत्यो यं पूर्वे चिद्देवासश्चिद्यमीधिरे ॥ होतारं मंद्रजिह्वमित्सु
दीतिभिर्विभावसुं ॥ ॥ पूर्वे चित् पूर्वे महर्षयः होतारं देवानामाह्वातारं मंद्रजिह्वं हविषां प्रदानेन देवानां मादयित्री जिह्वा यस्य सः तं यद्वा मोदनजिह्वं।
तथा च यास्कः मंद्रजिह्वं मंदनजिह्वं मोदनजिह्वमिति वा शोभनदीप्तिर्युक्तं विभावसुं प्रभाधनं यमग्निं ईधिरे समेधत तं देवासश्चित् देवा अपि यमग्निमी
धिरे समेधत स अग्निः सत्यो भवति सः सप्रसवो भवति इत्यर्थः ॥ ॥ अथ तृतीया ॥ ॥ स नो धीती वरिष्ठया श्रेष्ठया च सुमत्या ॥ अग्ने रायो दिदी
हि नः सुवृक्तिभिर्वरेण्य ॥ ॥ सुवृक्तिभिः स्तुतिभिः स्तूयमानः वरेण्य वरणीय हे अग्ने स त्वं वरिष्ठया वरतमेन श्रेष्ठया अतिशयेन प्रशस्येन सनो

ऋ॰ भा॰ १६

धीती धीस्या अस्मदीयेन परिचरणात्मकेन कर्मणा सुमत्या सुमतिरिति च वा स्त्रनुच्यते शास्त्रेण च प्रीतः सन् रायो धनानि नोऽस्मभ्यं दीदिहि देहि ॥ ॥
॥ अथ चतुर्थी ॥ ॥ अग्निर्देवेषु राजत्यग्निर्मर्त्येष्वाविशन् ॥ अग्निर्नो हव्यवाहनोऽग्निं धीभिः सपर्यत ॥ ॥ यो अग्निर्देवेषु देवानां मध्ये राजति दीप्यते रूपे
ण प्रकाशते योऽग्निर्मर्त्येषु मनुष्येषु आविशन् नोऽस्माकं हव्यवाहनो भवति अस्मदीयेषु यज्ञेषु देवतार्थं हव्यानां वोढा भवति हे यजमाना तमग्निं
धीभिः स्तुतिभिः सपर्यत परिचरत ॥ ॥ पुत्रकामेष्ट्यां अग्निस्तुविश्रवस्तममिति द्वे स्विष्टकृतो याज्यानुवाक्ये इति सूत्रितं च ॥ अग्निस्तुविश्रवस्तम
मिति द्वे संयाज्ये इति ॥ ॥ अथ पंचमी ॥ ॥ अग्निस्तुविश्रवस्तमं तुविब्रह्माणमुत्तमं ॥ अतूर्तं श्रावयत्पतिं पुत्रं ददाति दाशुषे ॥ ॥ अग्निस्तुविश्रवस्त
ममतिशयेन बहुकं तं तुविब्रह्माणं बहुस्तोत्रं उत्तमं उत्कृष्टं अतूर्तं शत्रुभिरहिंसितं श्रावयति विख्यातं करोति पतीन् पालयितॄन् पितॄन् इति
स्वकर्मणा पितॄणां प्रख्यापक इति श्रावयत्पतिं तथाविधं पुत्रं दाशुषे हवींषि दत्तवते यजमानाय ददाति ददातु ॥ ॥ इति चतुर्थस्य प्रथमे सप्तदशो व
र्गः ॥ ॥ अग्निर्ददाति सत्पतिं सासाह यो युधा नृभिः ॥ अग्निरत्यं रघुष्यदं जेतारमपराजितं ॥ ॥ अग्निर्ददाति यः पुत्रः युधा युद्धेन नृभिः परि
जनैः ससाह शत्रून् अभिभवति सत्पतिं सतां पालयितारं तथाविधं पुत्रं अग्निर्ददाति अस्मभ्यं ददातु किं चाग्निः रघुष्यदं रघु लघुः स्यदो ज
वोपस्यन्तं जेतारं शत्रून् अपराजितं शत्रुभिः अत्यं अतति सततं गच्छतीत्यत्यः अश्वस्तं ददातु ॥ ॥ अग्न्यमेधे पौष्ट्यामिष्टौ स्विष्टकृतो याज्या सूत्रितं च ॥ राम
तद्वाहिष्ठं तदग्नय इति संयाज्ये इति सेषा सप्तमी ॥ ॥ यद्वाहिष्ठं तदग्नये बृहदर्च विभावसो ॥ महिषीव त्वद्रयिस्त्वद्वाजा उदीरते ॥ ॥ वाहिष्ठं वोढृतमं य १६

त्सो ऽयं तदग्न्ये क्रियते ॥ अतो हे विभावसो प्रभाधनाग्ने बृहत्बहु त्वं धनं च अर्वं च अस्मभ्यं प्रयच्छ कथमस्यान्नधनप्रदातृत्वमित्यपेक्षायामाह यतः त्वत् त्वत्तः सका
शात् महिषीमहतीरापृथ्व्यनं उदीरते उच्छति वाजा अन्नानि च त्वत् उदीरते उच्छति इवेति पूरणः ॥४॥ ॥ अथ पंचमी ॥ ॥ तव द्युमंतो अर्चयो ग्रावेवोच्यते बृहत् ॥
उतो ते तन्यतुर्यथा स्वानो अर्त त्मना दिवः ॥४॥ ॥ हे अग्ने तव अर्चयः रश्मयो द्युमंतो दीप्तिमंतो भवंति बृहत् महत् त्वं ग्रावेव उच्यते स्तूयसे ऽनागि च त्मनो आ
त्मना दिवो द्योतमानस्य तेनव स्वानः शब्दः तन्यतुर्यथा मेघगर्जितमिव अर्त उच्छति ॥ ॥ अथ नवमी ॥ ॥ एवाँ अग्निं वसूयवः सहसानं ववंदिम ॥ स नो विश्वा अति
द्विषः पर्षन्नावेव सुक्रतुः ॥४॥ ॥ वसुयवो वसुकामा वयं सहसानं अस्माकं बलमाचरंतमग्निं ववंदिम स्तुमः सुक्रतुः शोभनकर्मा सो ऽग्निः नो ऽस्मान् अति द्विषः श
त्रून् अति पर्षत् अतिपारयतु कथमिव नावेव साधनेन सिंधुमिव ॥ ॥ इति चतुर्थस्य प्रथमे ऽष्टाद्द्वाविंशो वर्गः ॥४॥ ॥ अग्ने पावक इति नव चं द्वादशं सूक्तं वसूयव ऋषयः
गायत्री छंदः अग्निर्देवता तथा चानुक्रांतं अग्ने गायत्रमिति प्रातरनुवाके आग्नेये क्रतौ गायत्रे छंदसि आश्विनशस्त्रे चेदं सूक्तं सूत्रितं च ॥ अग्ने पावक इति त्व
इति सूक्ते इति ॥ आधाने द्वितीयामिष्टौ प्रथमस्य हविषो याज्या सूत्रितं च स नः पावक दीदिवोग्ने पावक रोचिषेति ॥ ॥ तत्रेयं प्रथमा ॥ ॥ अग्ने पावक रोचिषा
मंद्रया देव जिह्वया ॥ आ देवान्वक्षि यक्षि च ॥ ॥ हे पावक शोधक रोचिषा स्वदीप्त्या मंद्रया देवानां मादयित्र्या जिह्वया च हे देव द्योतमानाग्ने देवानावक्षि यक्ष्यार्थं
मावह यक्षि च तानायज ॥ ॥ अथ द्वितीया ॥ ॥ तं त्वा घृतस्नवीमहे चित्रभानो स्वर्दृशं ॥ देवाँ आ वीतये वह ॥ ॥ हे घृतस्नो घृतस्य प्रेरक यद्वा घृतेन जनित हे चि
त्रभानो चित्रा नानाविधा भानवो रश्मयो यस्य स तथोक्तः चित्रभानुः तस्य संबोधनं स्वर्दृशं सर्वद्रष्टारं तं त्वां ईमहे याचामहे अतो वीतये हविषां भक्षणाय देवानावह ॥

चं० भा०
२१

॥ अथ तृतीया ॥ ॥ वीतिहोत्रं त्वा कवे द्युमंतं समिधीमहि ॥ अग्ने बृहंतमध्वरे ॥ ॥ हे कवे क्रांतदर्शिन्नग्ने वीतिहोत्रं कांतयज्ञं यद्वा प्रिययज्ञं द्युमंतं दीप्तिमंतं बृहंतं
महांतं त्वां अध्वरे यज्ञे समिधीमहि समिद्भिः संदीपयामः ॥ ॥ अथ चतुर्थी ॥ ॥ अग्ने विश्वेभिरा गहि देवेभिर्हव्यदातये ॥ होतारं त्वा वृणीमहे ॥ ॥ हे अग्ने वि
श्वेभिः सर्वैर्देवेभिः देवैः सह त्वं हव्यदातये हविषां दात्रे यजमानाय तदर्थं आ गहि यज्ञं प्रत्यागच्छ यतः होतारं देवानामाह्वातारं त्वां वृणीमहे प्रार्थयामहे ॥
॥ अथ पंचमी ॥ ॥ यजमानाय सुन्वत आग्ने सुवीर्यं वह ॥ देवैरा सत्सि बर्हिषि ॥ ॥ हे अग्ने सुन्वते अभिषवं कुर्वते यजमानाय सुवीर्यं शोभनं बलं आवह प्रा
पय किंच देवैः सह बर्हिषि यज्ञे आसत्सि आसीदसि ॥ ॥ इति चतुर्थस्य प्रथमे एकोनविंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ समिधानः सहस्रजिदग्ने धर्माणि पुष्य
सि ॥ देवानो दूत उक्थ्यः ॥ ॥ हे सहस्रजित् सहस्रस्य जेतः अग्ने समिधानः हविर्भिः समिध्यमानः उक्थ्यः प्रशस्यः त्वं देवानां दूतः सन् धर्माणि नः कर्मा
णि यज्ञादिक्रियाः पुष्यसि पोषयसि ॥ ॥ अथ सप्तमी ॥ ॥ न्य१ग्निं जातवेदसं होत्रवाहं यविष्ठ्यं ॥ दधाता देवमृत्विजं ॥ ॥ हे यजमानाः जातवेदसं जातानि
भूतानि वेत्तीति जातवेदास्तं होत्रवाहं होत्रस्य यज्ञस्य वोढारं यविष्ठ्यं युवतमं देवं द्योतमानं ऋत्विजं ऋतौ यष्टारं अग्निं नि दधात निधत्त ॥ ॥ अथाष्टमी ॥ ॥
॥ प्र यज्ञ एत्वानुषगद्या देवव्यचस्तमः ॥ स्तृणीत बर्हिरासदे ॥ ॥ अद्यास्मिन्नहनि देवव्यचस्तमः देवैर्द्योतमानैः स्तोतृभिः व्याप्ततमो यज्ञो यज्ञसाधनं हविरानुष
क् अनुषक्तं यथा भवति तथा प्रैतु देवान् गच्छतु हे ऋत्विजः आसदे अग्नेरासादनार्थं बर्हिः स्तृणीत ॥ ॥ अथ नवमी ॥ ॥ एदं मरुतो अश्विना मित्रः सीदंतु वरुणः ॥
देवासः सर्वया विशा ॥ ॥ मरुतो मरुद्गणः अश्विनौ देवानां भिषजौ मित्रः सूर्यो वरुणश्च देवासः एते सर्वे देवाः सर्वया विशा समस्तेन स्वीयेन परिजनेन सार्धं

राम
२१

च·भा°
१९

छाय अत्यंतं स्तूयमानाय ते तुभ्यं नवतमीं सुमतिं स्तुतिं चकानः कामयमानः त्रसदस्युरपि इदं गृहाण इदं गृहाण इति मां प्रार्थितवान्॥ ॥अथ चतुर्थी॥ ॥यो म इति प्रवोचत्य
श्वमेधाय सूरये॥ दददृचा सनिं यते ददन्मेधामृतायते॥ ॥यो भिक्षमाणः अर्थी सूरये प्रेरकाय धनानां दात्रे अस्मै अश्वमेधाय राजर्षये मह्यं देहीति प्रवोचत् प्रब्रवीति यो
श्वमेधं धनानि भिक्षत इत्यर्थः ऋचा मे स्तोत्रेण सह यते आत्मनः समीपं गच्छते तस्मै अर्थिने अश्वमेधः सनिं धनं ददत् ददाति हे अग्ने ऋतायते यज्ञमिच्छते तस्मै
अश्वमेधाय मेधां यज्ञविषयां प्रज्ञां ददत् देहि॥ ॥अथ पंचमी॥ ॥यस्य मा परुषाः शतमुद्धर्षयंत्युक्षणः॥ अश्वमेधस्य दानाः सोमा इव त्र्याशिरः॥ ॥यस्य
येन अश्वमेधस्य अश्वमेधेन दानाः दत्ताः परुषाः कामानां पूरकाः शतमुक्षणः उक्षाणो बलीवर्दाः मां उद्धर्षयंति उत्कर्षेण हर्षयंति हे अग्ने ते उक्षाणः त्र्याशि
रः दधिसक्तुपयोरूपाशिस्त्र्याशिरः आधिश्रयणसाधनभूता येषां ते त्र्याशिरः सोमा इव तत्प्रीणनाय भवंतु॥ ॥अथ षष्ठी॥ ॥इंद्राग्नी शतदाव्न्यश्वमे
धे सुवीर्यं॥ क्षत्रं धारयतं बृहद्दिवि सूर्यमिवाजरं॥ ॥हे इंद्राग्नी शतदाव्नि शतमपरिमितमर्थिभ्यो धनं ददाति शतदावा तस्मिन् अश्वमेधे राजर्षौ सुवीर्यं शोभ
नवीर्यसहितं बृहत् महत् अजरं जरारहितं क्षत्रं धनं धारयतं नि धारयतं कथमिव दिव्यंतरिक्षे सूर्यमिव॥ ॥इति चतुर्थस्य प्रथमे सप्तविंशोध्यायः॥ ॥समिद्धो अ
ग्निरिति षळृचं चतुर्दशं सूक्तं। अत्रेयमनुक्रमणिका॥ समिद्धो विश्ववारात्रेयी त्रिष्टुप् जगती त्रिष्टुबनुष्टुब्गायत्र्याविति। अत्रिगोत्रोत्पन्ना विश्ववारा नामिकास्य
सूक्तस्य ऋषिः आद्या तृतीये त्रिष्टुभौ द्वितीया जगती चतुर्थ्यनुष्टुप् अंत्ये गायत्र्यौ अग्निर्देवता सूक्तस्य विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥समिद्धो अग्नि राम
र्दिवि शोचिरश्रेत्प्रत्यङ्ङुषसमुर्विया वि भाति॥ एति प्राची विश्ववारा नमोभिर्देवाँ ईळाना हविषा घृताची॥ ॥समिद्धः सम्यग्दीप्तः अग्निः दिवि द्योतमानेंतरिक्षे १९

शोचिस्तेजः अश्रेत् श्रयति तथा उषसं प्रत्यङ् उषसमभिमुखः सन् उर्विया उरु विस्तीर्णं विभाति विशेषेण भ्राजते नमोभिः स्तोत्रैः देवान् इंद्रादीन् ईळाना स्तुवती
हविषा पुरोडाशादिलक्षणेन युक्तया घृताची घृताच्या स्रुचा सहिता विश्ववारा सर्वमपि पापरूपं वारयित्री एतन्नामिका प्राची प्राङ्मुखी सती एति एवंभूतम
ग्निं प्रतिगच्छति॥ ॥अथ द्वितीया॥ ॥समिध्यमानो अमृतस्य राजसि हविष्कृण्वंतं सचसे स्वस्तये॥ विश्वं स धत्ते द्रविणं यमिन्वस्यातिथ्यमग्ने नि च धत्त इत्पुरः॥
॥हे अग्ने समिध्यमानः समिध्यमानस्त्वं अमृतस्योदकस्य राजसि ईशिषे तथा हविष्कृण्वंतं पुरोडाशादि हविष्कर्तारं यजमानं स्वस्तये अविनाशाय सचसे सेवसे
किं स यं यजमानं इन्वसि गच्छसि स यजमानः विश्वं समस्तं द्रविणं पश्वादिलक्षणं धनं धत्ते धारयति अपि च हे अग्ने आतिथ्यं अतिथिरूपस्य तव योग्यं हविः पु
रः तव पुरस्तात् नि धत्ते च स्थापयति॥ ॥पवित्रेष्ट्यां स्विष्टकृतोग्नेः शर्धेति याज्या सूत्रितं हि जुष्टो दमूना अग्ने शर्ध महते सौभगायेति संयाज्ये इति साके
मेधेषु मरुद्भ्यः क्रीडिभ्यः पुरोडाशं सप्तकपालं इत्यत्राप्येषैव स्विष्टकृतो याज्या सूत्रितं च॥ जुष्टो दमूना॰ अग्ने शर्ध महते सौभगायेति संयाज्ये इति॥ ॥
सैषा तृतीया॥ ॥अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि संतु॥ सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि॥ ॥हे अग्ने त्वं महते प्रभूताय सौ
भगाय अस्माकं शोभनधनत्वाय शर्ध शत्रून् सहस्व तथा तव संबंधीनि द्युम्नानि धनानि तेजांसि वा उत्तमानि उत्कृष्टानि संतु भवंतु हे अग्ने संजास्पत्यं जाः जा
या च पतिश्च जायापती तयोः कर्म जास्पत्यं तत् सुयमं सुष्ठु नियमनोपेतं अन्योन्यं संश्लिष्टमित्यर्थः समा कृणुष्व सम्यक् कुरुष्व अपि च शत्रूनात्मन इच्छतो
सपत्नानां महांसि तेजांसि अभितिष्ठ आक्रमस्व॥ ॥अथ चतुर्थी॥ ॥समिद्धस्य प्रमहसोग्ने वंदे तव श्रियं॥ वृषभो द्युम्नवाँ असि समध्वरेष्विध्यसे॥ ॥हे अ

ऋ०भा० ग्नेसमिद्धस्यप्रवृद्धस्यप्रमहसःप्रकृष्टतेजसःस्तवसंबंधिनींश्रियंदीप्तिंवंदेअहंयजमानःस्तौमिवृषभःकामानांवर्षितात्वंद्युम्नवानसिधनवान्भवसिअध्व
१९ रेषुयज्ञेषुसमिध्यसेसम्यग्दीप्यसे॥ ॥दर्शपूर्णमासयोःसमिद्धोअग्नआहुतेतिद्वेसामिधेन्यौसूत्रितंच॥ ॥समिद्धोअग्नआहुतदेवान्यक्षिस्वध्वर॥
त्वंहिहव्यवाळसि॥५॥ इतिसैषापंचमी॥ समिद्धोअग्नइति॥ हेआहुतयजमानैरासमंताद्धुतहेस्वध्वरशोभनयज्ञोपेतहेअग्नेसमिद्धःसम्यग्दीप्तस्त्वंदेवा
न्द्योतमानानिंद्रादीनयक्षयजस्वहियस्मात्कारणात्।हेअग्नेत्वंहव्यवाळसिहव्यानांवोढाभवसिअतःकारणात्देवान्यजस्वेतिसंबंधः॥ अथषष्ठी॥ ॥
आजुहोतादुवस्यताग्निंप्रयत्यध्वरे॥ वृणीध्वंहव्यवाहनं॥ ॥हेऋत्विजोयूयंअध्वरेस्मदीययागेप्रयतिप्रवृत्तेसतिहव्यवाहनंहविषांवोढारमेतन्नामकमग्निं
आजुहोतआसमंताज्जुहोततथादुवस्यतपरिचरतवृणीध्वंसंभजध्वंचहव्यवाहननामकस्यैवाग्नेर्देवतासंबंधायजमानैर्वरणीयत्वंचतैत्तिरीयेसमाम्ना
तंत्रयोवाअग्नयोहव्यवाहनोदेवानांकव्यवाहनःपितॄणांसहरक्षाअसुराणांतएतर्ह्याशंसंतेमांवरिष्यतेमामितिवृणीध्वंहव्यवाहनमित्याहयएवदेवानां
तंवृणीतइति॥ ॥इतिचतुर्थस्यप्रथमेद्वाविंशोवर्गः॥ ॥त्र्यर्यमेतिपंचदशर्चंपंचदशंसूक्तं॥ अत्रानुक्रमणिका॥ त्र्यर्यमापंचोनागौरिवीतिःशाक्त्यऐंद्र
मुग्नानायदेशानसोवापादइतिशाक्तिगोत्रोत्पन्नोगौरिवीतिनामऋषिः॥ अनुक्तत्वात्त्रिष्टुप्इंद्रोदेवतामंडलादिपरिभाषयानिवृत्तत्वात्उग्नानायस्सहस्ये
तिपादओशनसः॥ ऐंद्रोवाआभिप्लविकेतृतीयेहनिमरुत्वतीयेएतत्त्रिविधानं।तृतीयस्यत्र्यर्यमायोजातएवेतिमध्यंदिनइति॥ ॥तत्रप्रथमा॥ ॥त्र्यर्यमा राम
मनुषोदेवतातात्रीरोचनादिव्याधारयंत॥ अर्चंतित्वामरुतःपूतदक्षास्त्वमेषामृषिरिंद्रासिधीरः॥ ॥मनुषोमनोःसंबंधिनिदेवतातादेवतातौयज्ञेत्रीणि १९

मिदंबर्हिःसीदंतुआसीदंतु॥ ॥इतिचतुर्थस्यप्रथमेविंशोवर्गः॥ ॥अनस्वंतेतिषळृचंत्रयोदशंसूक्तं॥ अत्रानुक्रमणिका॥ अनस्वंतापड्त्रैवृष्ण्यःपौरुकुत्स्योदौ
र्त्र्यरुणत्रसदस्यूराजानौभारतश्चाश्वमेधोयात्विस्रोनुष्टुभोमामात्मनेदद्यादितिसर्वास्वर्धर्चेचित्संत्यैंद्राग्नीइति॥ त्रिवृष्णस्यपुत्रःत्र्यरुणःपुरुकुत्सस्यपुत्रस्त्रस
दस्युर्भरतस्यपुत्रोश्वमेधःएतेत्रयोपिराजानःसंभूयास्यसूक्तस्यऋषयःपद्यात्रिरेवऋषिःआद्यास्तिस्रस्त्रिष्टुभःचतुर्थाद्यास्तिस्रोनुष्टुभःषष्ठीद्राग्नीदेवत्याशि
ष्टाःपंचाग्नेय्यःविनियोगोलैंगिकः॥ ॥तत्रेयंप्रथमा॥ ॥अनस्वंतासत्पतिर्मामहेमेगावाचेतिष्ठोअसुरोमघोनः॥ त्रैवृष्णोअग्नेदशभिःसहस्रैर्वैश्वानरत्र्यरु
णश्चिकेत॥ अत्रीराजर्षीणांदानमग्नेःपुरतोनेनसूक्तेनावर्णयत्।हेवैश्वानरविश्वेषांनराणांनेतःअग्नेसत्पतिःसतांपालयिताचेतिष्ठोज्ञातृतमःअसुरोबल
वान्मघोनःमघवान्प्रथमार्थेङसिःत्रैवृष्णःत्रिवृष्णस्यपुत्रःअरुणःत्र्यरुणइतिएतन्नामाराजर्षिःअनस्वंताअनसाशकटेनसंयुक्तौगावागावौअनडु
होगावौहिरण्यादीनांचादशभिःसहस्रैःसहइमेमह्यंमहोमहिदानेसराजर्षिःचिकेतसर्वैर्जनैरनेनदानेनज्ञायते॥ ॥अथद्वितीया॥ ॥योमेशताचविंशतिं
चगोनांहरीचयुक्तासुधुरादादाति॥ वैश्वानरसुष्टुतोवावृधानोग्नेयच्छत्र्यरुणायशर्म॥ ॥यःअरुणःशतानिसुवर्णानांगोनांगवांविंशतिंचयुक्तारथेनयुक्तौ
सुधुरासुष्ठुधुरंवहंतौहरीअश्वौचमेमह्यंददाति॥ हेवैश्वानरअग्नेसुष्टुतःअस्माभिःसम्यक्स्तुतःवावृधानोहविर्भिर्वर्धमानःत्वंतस्मैत्र्यरुणायशर्मसुखं
यच्छप्रयच्छ॥ ॥अथतृतीया॥ ॥एवातेअग्नेसुमतिंचकानोनविष्ठायनवमंत्रसदस्युः॥ योमेगिरस्तुविजातस्यपूर्वीर्युक्तेनाभित्र्यरुणोगृणाति॥ ॥यःत्र्य
रुणस्तुविजातस्यबहुप्रसस्यमेपूर्वीःबह्वीःगिरःस्तुतीःशक्तासीतःसनयुक्तेनमनसाअभिगृणातिइदंगृहाणेदंगृहाणेतितथामीब्रवीतीतिएवंहेअग्नेनवि

ऋ०भा० मंत्रेघसंक्षरेत्यादिना चेर्लोपः। बहुलं छंदस्यमाङ्योगेपीत्यडभावः। इंद्रः जिगर्त्ति गिरंतमाछादयंतीश्वसंतं भयार्थमाभासं कुर्वंतं दानवं दनोः पुत्रं वृत्रं अपजगुराणः।
२० आच्छादनाद्विमोचयन् प्रतिप्रतिगत्य अवहन् अवहतवान्॥ ॥अथपंचमी॥ ॥अध क्रत्वा मघवंतुभ्यं देवा अनु विश्वे अददुः सोमपेयं॥ यत्सूर्यस्य हरितः पतं
तीः पुरः सतीरुपरा एतशे कः॥ अधापि च हे मघवन् धनवन्निंद्र क्रत्वा क्रतुना त्वदीयेन कर्मणा विश्वे सर्वे देवा द्योतमाना अध्यादयः। तुभ्यं त्वदर्थं सोमपेयं
सोमपानं अनुपूर्वेण दत्तवंतः ततः प्रभृतींद्रो देवेभ्यः सर्वेभ्योधिको भवदित्यर्थः। तथा च श्रूयते॥ समहान् भूत्वा देवता अब्रवीदुद्धारं मउद्धरते त्यादि
ना हे इंद्र यत् यस्त्वं पतंतीरागच्छंतीः पुरः सतीः। पुरस्ताद्भवंतीः। सूर्यसंबंधिनीः हरितो वडवाः। उपरा उपरताः। मंदगतीः। एतशोपे तन्नाम्न्याख्याय ऋषये अकः। अ
कार्षीः एतशो हि स्वभावेन सूर्येण सहस्पर्धामकरोदिति यावत्। तथा च निगमांतरे॥ प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिंद्रइति॥ ॥इतिचतुर्थ
स्य प्रथमे त्रयोविंशो वर्गः॥ ॥अथषष्ठी॥ ॥नव यदस्य नवतिं च भोगान् साकं वज्रेण मघवा विवृश्चत्॥ अर्चंतींद्रं मरुतः सधस्थे त्रैष्टुभेन वचसा बाध
तद्यां॥ ॥यद्यदा मघवा धनवानिंद्रः अस्येत्यनेन शंबर उच्यते अस्य शंबरस्य संबंधीनि नवसंख्याकानि च भोगान् पुराणि भोगानित्यंतोदात्तः पुरव
चनः। साकं युगपदेव वज्रेण विवृश्चत् यदवृश्चत् अभिनत् तदा मरुतः। सधस्थे सहस्थाने युद्धे वास्थितमिंद्रं त्रैष्टुभेन त्रिष्टुप्छंदस्केन वचसा वाग्रूपेण स्तो राम
त्रेणार्चंति अस्तुवन् इंद्रः एवं स्तुतः सन् द्यां मरुद्भिः प्रयुज्यमानेन मंत्रेण दीप्तं शंबराख्यमसुरं बाधतापि पीडे॥ ॥अथसप्तमी॥ ॥सखा सख्ये अपच
त् तूयमग्निरस्य क्रत्वा महिषा त्री शतानि॥ त्री साकमिंद्रो मनुषः सरांसि सुतं पिबद्वृत्रहत्याय सोमं॥ ॥सखा इंद्रस्य मित्रभूतोग्निः महिषा महिषा २०

णां पचस्रां त्रीणि शतानि शतसंख्याकानि सख्ये सख्युः मित्रभूतस्यास्येंद्रस्य क्रत्वा कर्मणा निमित्तभूतेन तूयं क्षिप्रं अपचत् पपाव किंचेंद्रः पर
मैश्वर्ययुक्तः मनुषो मनोः संबंधीनि त्रीणि सरांसि पूर्णानि अत्रसरः शब्देन पूतभृदाधवनीयद्रोणकलशाः संज्ञानि पात्राण्युच्यंते तेषु स्थितं सुतमभिषुतं
सोमं साकं युगपदेव वृत्रहत्याय वृत्रहननाय पिबत् पपौ॥ ॥अथाष्टमी॥ ॥त्री यच्छता महिषाणामघो मास्त्री सरांसि मघवा सोम्यापाः। कारं न विश्वे अह्व
न्त देवा भरमिंद्राय यदहिं जघान॥ ॥हे इंद्र त्वं यद्यदा त्री त्रयाणि शतानि शतसंख्याकानां महिषाणां पशूनां मांसानि अघः भक्षितवानसि घस्ले र्लुङ्रूपं य
दा च मघवा धनवांस्त्वं सोम्या सोममयानि त्रीणि सरांसि पात्राणि अपाः पीतवानसि यद्यदा इंद्रोहिं वृत्रं जघान हतवान् तदा विश्वे सर्वे देवाः। भरं सोमपानेना
दिना पूर्णमिंद्रायेंद्रं युद्धार्थं अह्वंत आह्वयंतः। तत्र दृष्टांतः॥ कारं न स्वामिनः कर्मकारमिव तद्वत् उशनस्तोमे उशनायत्सहस्यैरिति मरुत्वतीयसू
क्त सुरवीयाः स्तुतिं च॥ उशनस्तोमेनागरंगीर्णमिव आत्मानं मन्यमानो यज्ञेतोशनाय त्सहस्यैरयातमिति॥ ॥तत्रैषा नवमी॥ ॥उशना यत्सहस्यैर
यातं गृहमिंद्र जूजुवानेभिरश्वैः। वन्वानो अत्र सरथं ययाथ कुत्सेन देवैरवनोर्ह शुष्णं॥ ॥यद्यदा हे इंद्र त्वं उशना काव्यश्च समानमेकं रथं सह
स्यैरभिभवनशीलैः जूजुवानेभिः जुवानैर्गच्छद्भिरश्वैः। कुत्सस्य गृहं अयातं आगच्छतं तदा हे इंद्र त्वं अस्मिन् काले वन्वानः। शत्रून् हिंसन् कुत्से
न देवैश्च सरथं समानमेकं रथं ययाथ जगंथ किंच शुष्णमेतन्नामानमसुरं अवनोर्ह अहिंसीः। खलु॥ ॥अथदशमी॥ ॥प्रान्यच्चक्रमवृहः। सूर्यस्य
कुत्सायान्यद्वरिवो यातवेकः। अनासो दस्यूंरमृणो वधेन नि दुर्योण आवृणङ्मृध्रवाचः॥ ॥हे इंद्र पूर्वं द्विचक्रस्य सूर्यस्य अन्यदेकं चक्रं प्रावृहः प्र

ऋ॰ भा॰ यच्चक्रकर्यं अन्यदेकं चक्रं कुत्साय कुत्सस्य वरिवो धनं यातवे प्राप्तुं अकः किंच अनासः आस्यरहितान् आस्यशब्देन शब्दो लक्ष्यते अशब्दान् मूकान् दस्यून् अ
सुरान् वधेनायुधेन वज्रेण अमृणाः॥ अहिंसीः दुर्योणे संग्रामे मृध्रवाचः हिंसितवाचो मिद्ध्यान् असुरान् अवृणक् नितरां छिन्नवानसि अवृणो न्यवृणगिति
२१ द्विरुक्तिरादरार्था॥ ॥इति चतुर्थस्य प्रथमे चतुर्विंशो वर्गः॥ ॥अथैकादशी॥ ॥सोमासस्त्वा गौरिवीतेरवर्धन्नरंधयो वैदथिनाय पिप्रुं॥ आ त्वामृजिश्वा सख्या
य चक्रे पचन्पक्तीरपिबः सोममस्य॥ ॥हे इंद्र गौरिवीतेः एतन्नामकस्य मंत्रद्रष्टुर्मम संबंधिनः सोमासः त्वा त्वां अवर्धन् वर्धयंतु वैदथिनाय
विदथिनः पुत्राय ऋजिश्वनाम्ने पिप्रुं एतन्नामकं असुरं अरंधयः वशमनयः हे इंद्र ऋजिश्वनामाक ऋषिः सख्याय तव सखित्वाय पक्तीः पक्तव्या
नि पुरोडाशादीनि पचन् पाकं कुर्वन् त्वा त्वां आ चक्रे अभिमुखी चकार किं च त्वं अस्य ऋजिश्वनः संबंधिनं सोमं अपिबः अपाः॥११॥ दशमेहनि मरुत्व
तीयशस्त्रेण नवग्वास इति सूक्तमुखीयाः सूचितं॥ नवग्वासः सुतसोमास इंद्रं सखायाय यत्र सखिभिर्नवग्वैरिति निविद्धानीये याज्ये इति॥ ॥तत्रैषा
द्वादशी॥ ॥नवग्वासः सुतसोमास इंद्रं दशग्वासो अभ्यर्चंत्यर्कैः॥ गव्यं चिदूर्वमपिधानवंतं तं चिन्नरः शशमाना अप व्रन्॥ नवग्वासः सत्रया
गमनुतिष्ठंतो ये नवभिर्मासैः समाप्य गताः ते नवग्वाः दशभिर्मासैः समाप्य गतास्ते दशग्वाः एते उभयविधा अंगिरसः सुतसोमासः अभिषुतसोमा
संतः इंद्रं अर्कैः अर्चनीयैः स्तोत्रैः अभ्यर्चंति अभिष्टुवंति तथा शशमानाः स्तुवंतः नरो नेतारो अंगिरसः अपिधानवंतं बलेनासुरेणाच्छादितवंतं तं चिद्गुप्त राम
प्रसिद्धमपि गव्यं चित् गोसंबंधिनमपि ऊर्वं समूहं अपव्रन् अपावृण्वन्॥ ॥पालिक्ली नाम्न्येकाहे मरुत्वतीय निष्केवल्ययोरुक्थमुखीये कथो नु त इत्याद्ये ऋ २१

अर्यमा अर्यमाणि यानि तेजांसि संति त्रीणि त्रीणि रोचनारोचमानानि वाय्वग्निसूर्यात्मकानि दिव्यादिव्यानि अंतरिक्षे भवानि तानि तेजांसि अधारयंत मरुतो धारयं
ति धृतदक्षाः शुचिव्रता मरुतः त्वा त्वां अर्चंति स्तुवंति हे इंद्र धीरः धीमान् त्वं एषां मरुतां ऋषिरसि द्रष्टा भवसि॥ ॥अथ द्वितीया॥ ॥अनु यदीं मरुतो मंदसानमार्च
न्निंद्रं पपिवांसं सुतस्य॥ आदत्त वज्रमभि यदहिं हन्नपो यह्वीरसृजत्सर्तवा उ॥ ॥यद्यदा मरुतः मंदसानं तृप्यंतं सुतस्याभिषुतस्य सोमं पपिवांसं पीतवंतं इं
मेनमिंद्रं अन्वार्चन् अन्वचंत स्तुवन् तदेंद्रः वज्रमादत्त आददे ततो यद्यदा अहिं वृत्रं अभिहन् आभिहतवान् तदा यह्वीर्महतीरपः वृत्रेण निरुद्धान्युदकानि सर्तवैसे
र्तवे सर्तुं गंतुं असृजत् निरोधान्मुमुचत्॥ ॥अथ तृतीया॥ ॥उत ब्रह्माणो मरुतो मे अस्येंद्रः सोमस्य सुषुतस्य पेयाः॥ तद्धि हव्यं मनुषे गा अविंददहन्नहिं
पपिवां इंद्रो अस्य॥ ॥उतापि च हे ब्रह्माणो बृहंतो हे मरुतो यूयमिंद्रश्च सुसुतस्य सुष्ठु अभिषुतस्य मे मदीयस्य सोमस्य इमं सोमं द्वितीयार्थे षष्ठी पेयाः पिब
त पिबत इंद्रश्चाल्लिंगमध्यमबहुवचनस्यैकवचनं तद्धि तत्खलु हव्यं युष्माभिः पीतं सोमात्मकं हविः मनुषे मनुष्याय यजमानाय गाः धेनूः वृत्रविलक्षण
न्युदकानि वा अविंदत् वेदयति यजमानं गाः लंभयतीत्यर्थः किं चास्य इमं सोमं पपिवान् पीतवानिंद्रः अहिं वृत्रं अहन् अवधीत्॥ ॥अथ चतुर्थी॥ ॥आदोद
सी वितरं विष्कभायत्संविव्यानश्चिद्भियसे मृगं कः॥ जिगर्तिमिंद्रो अपजर्गुराणः प्रति श्वसंतमव दानवं हन्॥ ॥इंद्रः परमैश्वर्ययुक्तः आत् सोमपानानंतरं॥ ना
रोदसी द्यावापृथिव्यौ वितरं अतिशयेन आसुं चेद्वदसीति वैस्तारपि कृते अमु प्रत्ययः विष्कभायत् विस्तभ्नात् चलनरहिते अकरोत् संविव्यानश्चित् संवृण्वा
नः संगच्छमानो वेंद्रः व्येतेर्वा संचरकर्मणो वेते गतिकर्मणो रूपं च दिस्वेत्यस्यार्थे वर्तते मृगं मृगवत् स्फुरायमाणं वृत्रं भियसे भयाय कः अकार्षीत् करोतेर्लुङि

ऋ॰भा॰ ऽर्वीपोड्वां सूक्तं अत्रानुक्रमणिका कस्य बभ्रुरर्द्धलं त्रयोदशत्रराजा नारुणस्तद्रुतिबभ्रुः स्तुतिः अनुक्रान्ता त्रिष्टुप् इंद्रो देवता ऋणंचय नामराजापि कश्चित्स्तूयते

22 अतः सोऽपि देवता तीव्रसोमाख्यस्यैकाहस्य मरुत्वतीयशस्त्रे इदं सूक्तं निविद्धानं सूत्रितं च तीव्रसोमेनान्नाद्यकामः ॥ ॥ तत्र प्रथमा ॥ ॥ कस्य वीरः को अपश्यदिंद्रं

सुखरथमीयमानं हरिभ्यां ॥ यो राया वज्री सुतसोममिच्छन्तदोको गंता पुरुहूत ऊती ॥ ॥ वज्रिवज्रवान् पुरुहूतो बहुभिराहूतो य इंद्रः राया दर्शनेन धनेन सह

सुतसोममिच्छन् अभिषुतसोमं यजमानमन्विच्छन् ऊती ऊत्यै रक्षायै तत् तस्य यजमानस्य ओकः गृहं गंता गंता भवति वीरो विक्रान्तः सः इंद्रः क्व कुत्र विद्यते

सुखरथं शोभनाक्षद्वारो रथो यस्य सः सुखरथः तं सुखं खनतिर्लिखतिर्भूमिमिति वा सुखं तादृग्रथे सुहितं खेभ्यः खं पुनः खनतेरिति यास्कः हरिभ्यां

स्ववाहनाभ्यामश्वाभ्यां ईयमानं गच्छन्तमिंद्रं को अपश्यत् कश्चिद्ददर्श ॥ ॥ अथ द्वितीया ॥ ॥ अवाचचक्षं पदमस्य सस्वरुग्रं निधातुरन्वायमिच्छन् ॥ अपृच्छ

मन्यां उत ते म आहुरिंद्रं नरो बुबुधाना अशेम ॥ अस्येंद्रस्य पदं स्थानं अवाचचक्षं अहमवाङ्मुखं अदर्शं सस्वः स्वान्तर्हितं उग्रं उद्गूर्णं किं च इच्छन्निंद्रमन्वि

च्छन् अहं निधातुः स्वं स्थापयितुः अस्येंद्रस्य पदमन्वायं अन्वगमं अन्यानुत अन्यानपि विदुषो विप्रान् इंद्रमपृच्छं पृष्टवानस्मि पृष्टास्ते मे मह्यं इंद्रमाहुः

किमाहुरिति उच्यते नरो यज्ञानां नेतारो बुबुधानाः बुध्यमानाः वयं अशेम इंद्रं प्राप्तवन्तः स्म यद्यपींद्रो विद्यते तथापि दुर्लभश्चेदनुप्रयन्तश्च इति बुबु

समानस्तत्स्वभावमपृच्छं पृष्टेश्च सुलभ इंद्रः कथं ईदृशः एषोऽर्थः ऋत्विग्भिः अपदिस्यर्थः ॥ ॥ अथ तृतीया ॥ ॥ प्र नु वयं सुते या ते कृतानींद्र ब्रवाम यानि

नो जुजोषः ॥ वेददविद्वाञ्छृणवच्च विद्वान्वहतेऽयं मघवा सर्वसेनः ॥ ॥ हे इंद्र ते त्वदीयानि कृतानि कर्माणि संति नु अद्य वयं स्तोतारः सुते सोमे अभिषुते सति ता राम 22

नि कर्माणि प्र ब्रवाम प्रकर्षेण वदाम त्वमपि नोऽस्मदर्थं यानि कर्माणि जुजोषः असेवथाः तानि कर्माणि अविद्वान् इतः पूर्वमजानन् जनः वेदत् जानातु शृणवच्च

शृणुयाच्च यद्वा विद्वान् पुरुषः शृणोतु अजानन्तमपि जनं श्रावयेच्च सर्वसेनः सर्वाभिः सेनाभिर्युक्तः मघवा धनवानिंद्रः विद्वान् जानन् अयमिंद्रः जानन्तः शृ

ते ऋग एवं तच्छ्रुतान् जनान् प्रतिवहते अस्येंद्रस्य तेन तत्पेन कर्त्तुं प्रत्ययं प्रापयति ॥ ॥ अथ चतुर्थी ॥ ॥ स्थिरं मनश्चकृषे जात इंद्र वेषीदेको युधये भूयसश्चित् ॥

अश्मानं चिच्छवसा दिद्युतो वि विदो गवामूर्वमुस्रियाणां ॥ ॥ हे इंद्र जातः उत्पन्नमात्र एव त्वं स्थिरं बलं नरहितं मनः निश्चितं च कृषे चकर्थ सर्वान् बलिष्ठान्

जेयमिति इदृशं तथा हे इंद्र एकः इत्त असहाय एव त्वं युधये युद्धाय भूयसश्चित् बहुतरानपि राक्षसादीन् वेषि अवेः आगमः किं च अश्मानं वितगवामा

वरकं पर्वतमपि शवसा बलेन विदिद्युतः व्यभिनः किं च उस्रियाणां क्षीरमुत्सारयंतीनां गवां धेनूनां ऊर्वं समूहं विदः अवेदयः अलभयः ॥ ॥ अथ पंचमी ॥ ॥

परो यत्त्वं परम आजनिष्ठाः परावति श्रुत्यं नाम बिभ्रत् ॥ अतश्चिदिंद्रादभयंत देवा विश्वा अपो अजयद्दासपत्नीः ॥ ॥ हे इंद्र परस्तात् उपरिष्टात् स्थितः

परमः उत्कृष्टतमः त्वं परावति दूरेऽक्षं श्रवणीयं नामधेयं बिभ्रत् धारयन् आजनिष्ठाः आसमन्तादजायथाः शेषः परोक्षकृतः अतश्चित् अत आरभ्यैव

देवाः द्योतमाना अभयन्त इंद्रादेव भयं प्राप्नुवन् विश्वाः अपः सर्वाण्युदकानि इंद्रः अजयत् वशीचक्रे कीदृशीः दासपत्नीः दासो वृत्रः पालयिता यासां

पाता इति ॥ ॥ इति चतुर्थस्य प्रथमे षड्विंशो वर्गः ॥ २६ ॥ अथ षष्ठी ॥ ॥ तुभ्येदेते मरुतः सुशेवा अर्चंत्यर्कं सुन्वंत्यंधः ॥ अहिमोहानमप आशयानं

प्र मायाभिर्मायिनं सक्षदिंद्रः ॥ ॥ एते मरुतः महतः ध्वनिं चरंतीति मरुतः स्तोतारः सुशेवाः शेवमिति सुखनाम तत् शोभनं सुखं येषां ते सन्तः स्तोत्रेण

च० भा० मनःसुखमुत्पादयंत इत्यर्थः॥ हे इंद्र तुभ्य इत्तुभ्यमेव अर्कं अर्चनीयं स्तोत्रं अर्चंति स्तुवंति कुर्वंतीत्यर्थः। अंधः सोमलक्षणमन्नं सुन्वंति अभिषवं कुर्वंति इं
२३ द्रः परमैश्वर्ययुक्तः मायाभिः स्वकीयाभिः शक्तिभिः अहिं वृत्रं प्रसक्षत् अभ्यभवत् कीदृशं ओहानं देवान् बाधमानं अपः उदकानि आशयानं आवृत्य शयनं
कुर्वंतं मायिनं कपटवंतमिति॥ ॥अथ सप्तमी॥ ॥विषू मृधो जनुषा दानमिन्वन्नहन्गवा मघवन्त्संचकानः॥ अत्रा दासस्य नमुचेः शिरो यदवर्तयो मन
वे गातुमिच्छन्॥ ॥हे मघवन् धनवन्निंद्र संचकानः अस्माभिः स्तूयमानस्त्वं संपूर्वकः कानतिः शाब्दकमानस्य लडर्थे लिटि रूपं दानं देवानां संबाधकं वृत्र
मसुरं गवा वज्रेण इन्वन् प्रेरयन् हिंसन् जनुषा जन्मना मृधः तदनुचरान् राक्षसादीन् शत्रून् सुष्टु व्यहन् विजघंथ इंद्रस्यासुराजन्म आरभ्य शत्रुत्व
इत्यर्थः॥ ॥हे इंद्र त्वं अत्रास्मिन्युधे मनवे नमुचिना प्रहृतगोधनाय मह्यं गातुं सुखमिच्छन् अभिलषन् नमुचेरेतन्नामकस्य उपक्षपयितुरसुरस्य संबं
धि शिरः ग्रीवं यद्यदा अवर्तयः अच्छैत्सीः तदा शत्रून्विजघंथ पूर्वेण संबंधः॥ ॥अथाष्टमी॥ ॥युजं हि मामकृथा आदिदिंद्र शिरो दासस्य नमुचेर्म
थायन्॥ अश्मानं चित्स्वर्यं वर्तमानं प्र चक्रियेव रोदसी मरुद्भ्यः॥ ॥हे इंद्र त्वं स्वर्यं स्वरेण सहितं वर्त्तमानं भ्रमंतं अश्मानं चित् मेघमिव स्थितं दासस्य
उपक्षपयितुर्नमुचेरसुरस्य शिरः मथायन् चूर्णयन् आदित् अनंतरमेव मां युजं सखायं अकृथाः हि चकर्थ खलु तदानीं मरुद्भ्यः स्वसहायेभ्यः रोद
सी द्यावापृथिव्यौ चक्रियेव चक्रे इव आस्थां उपसर्गश्रुतेर्योग्यक्रियाध्याहारः॥ ॥अथ नवमी॥ ॥स्त्रियो हि दास आयुधानि चक्रे किं मा करन्नबला अस्य राम
सेनाः॥ अंतर्ह्यख्यदुभे अस्य धेने अथोप प्रैद्युधये दस्युमिंद्रः॥ ॥दासः उपक्षपयिता नमुचिरसुरः स्त्रियः स्त्रीः आयुधानि युद्धसाधनानि चक्रे हि क्र २३

चोस्तृवितंच॥ कथो नु ते परि चराणि विद्वानिति द्वे इति॥ ॥तत्रैषा त्रयोदशी॥ ॥कथो नु ते परि चराणि विद्वान्वीर्या मघवन्या चकर्थ॥ या चो नु नव्या कृणवः श
विष्ठ प्रेदु ता ते विदथेषु ब्रवाम॥ हे मघवन् धनवन्निंद्र या यानि वीर्या वीर्याणि चकर्थ चकृषे अहं तानि वीर्याणि विद्वान् जानन् ते तुभ्यं कथो नु कथं नु परिचराणि प
रिचर्यां करवाणि हे शविष्ठ बलवत्तम इंद्र या चो यानि चैव नव्या नव्यानि नूतनानि वीर्याणि कृणवः कुर्याः ते त्वदीयानि तानि वीर्याणि विदथेषु यज्ञेषु प्रेदु
ब्रवाम प्रवदाम॥ ॥अथ चतुर्दशी॥ ॥एता विश्वा चकृवाँ इंद्र भूर्यपरीतो जनुषा वीर्येण॥ या चिन्नु वज्रिन्कृणवो दधृष्वान्न ते वर्ता तविष्या अस्ति तस्याः॥
हे इंद्र अपरीतः शत्रुभिरपरिगतस्त्वं जनुषा जन्मना सिद्धेनात्मीयेन वीर्येण बलेन भूरि भूरीणि बहूनि एता एतानि प्रत्यक्षेणोपलभ्यमानानि भुवनजातानि
चकृवान् कृतवानसि हे वज्रिन् वज्रवन्निंद्र दधृष्वान् सपत्नान् धर्षयन् त्वं नु क्षिप्रं या चित् विश्वानि कृणवः ते त्वदीयस्य तस्याः तविष्याः तस्य बलस्य वर्त्तानि
वारयिता न कोप्यस्ति॥ ॥अथ पंचदशी॥ ॥इंद्र ब्रह्म क्रियमाणा जुषस्व या ते शविष्ठ नव्या अकर्म॥ वस्त्रेव भद्रा सुकृता वसूयू रथं न धीरः स्वपा अतक्षं॥
॥हे शविष्ठ बलवत्तम महत्तम वा इंद्र ब्रह्मेति निगमः ते तुभ्यं या यानि स्तोत्राणि नव्या नूतनानि अद्यतनानि वयं अकर्म अकुर्म हे इंद्र क्रियमाणा अस्माभिः क्रियमा
णानि ब्रह्म ब्रह्माणि तानि स्तोत्राणि जुषस्व सेवस्व धीरो धीमान् स्वपाः शोभनकर्मा वसूयुः धनकामोहं वस्त्रेव वस्त्राणीव भद्राणि भजनीयानि सुकृता सुष्ठु कृ
तानि स्तोत्राणि रथं न रथमिव अंतरिक्षं अकरवं स्तोत्राण्युपहारवत् श्रेष्ठानीत्यभिप्रायेण वस्त्रनिदर्शनमुक्तं॥ रथदृष्टांतस्तु आगमनसाधनत्वप्रतिपादना
य स्तोत्राणि स्वीकृत्य समह्य धनं प्रत्ययच्छेत्यर्थः॥ ॥इति चतुर्थस्य प्रथमे पंचविंशो वर्गः॥ ॥क१स्य वीर इति पंचदशर्चं षोडशं सूक्तं॥ क१स्य वीर इति पंचदशा

ऋ॰भा॰ २४

प्रयच्छंतीत्यर्थः। नरो नृणां मध्ये नृतमस्य ऋणंचयस्य एतन्नामके राज्ञा प्रयतानि दत्तानि इमानि मघानि गोरूपाणि धनानि वयं प्रत्यग्रभीष्म प्रतिगृहीतवंतः स्म
पूजार्थे बहुवचनं॥ ॥अथ त्रयोदशी॥ ॥सुपेशसं माव सृजंत्यस्तं गवां सहस्रै रुशमासो अग्ने। तीव्रा इंद्रममंदुः सुतासो अक्तोर्व्युष्टौ परितक्म्यायाः॥ ॥
हे अग्ने रुशमासः। रुशमाः ऋणंचयस्य किंकराः सुपेशसं सुरूपमलंकारादिभिः सत्कृतं मां अस्तं गृहं गवां धेनूनां सहस्रैः सह अवसृजंति
प्रापयंति स्म। तदनंतरमेव तीव्राः रसवंतः सुतासः लब्धबहुधनेन मया अभिषुताः सोमाः परितक्म्यायाः तमसा अभिभूतानि परितः तकनानि गच्छंतीति परि
तक्म्या तस्याः। अक्तोः रात्रेः व्युष्टौ व्युच्छने सति उषःकाल इत्यर्थः। इंद्रं ममंदुः अमादयन् बभ्रुः गवां प्राप्त्यानंतरमविलंबितमेव सोमेनेजे इत्यर्थः॥ ॥अ
थ चतुर्दशी॥ ॥औच्छत्सा रात्री परितक्म्या याँ ऋणंचये राजनि रुशमानां। अत्यो न वाजी रघुरज्यमानो बभ्रुश्चत्वार्यसनत्सहस्रा॥ ॥रुशमानां रुश
मनाम्नां जनानां राजनि प्रभौ ऋणंचये एतत्संज्ञके तस्मिन् समीप एव या रात्रिः परितक्म्या परितो गंत्री भवति सा रात्रि औच्छत् व्युष्टाभवत् अत्यः सतत
गामी वाजी न अश्व इव रघुः शीघ्रगामी अज्यमानः प्रेर्यमाणः बभ्रुः एतन्नामक ऋषिः चत्वारि चतुःसंख्याकानि सहस्रा सहस्राणि धनानि असन
त् अलभत॥ ॥अथ पंचदशी॥ ॥चतुःसहस्रं गव्यस्य पश्वः प्रत्यग्रभीष्म रुशमेष्वग्ने। घर्मश्चित्तप्तः प्रवृजे य आसीदयस्मयस्तम्वादाम विप्राः॥ ॥हे
अग्ने वयं रुशमेषु एतत्संज्ञकेषु जनेषु गव्यस्य गवां समूहस्य पश्वः पशोः पशूनां जातावेकवचनं चतुःसहस्रं चत्वारि सहस्राणि प्रत्यग्रभीष्म प्रतिगृहीत
वंतः स्मः प्रवृंजे प्रवृंजनार्थं तप्तः संतप्तः शोभनवर्णो घर्मश्चित् महावीर इव अयस्मयः अयोमयः हिरण्मयः कलशः आसीत् अभवत् तमु दोहनार्थं क

राम २४

लशं च विप्रा मेधाविनो वयं रुशमेषु आदाम अदत्तवंतः॥ ॥इति चतुर्थस्य प्रथमे द्वाविंशो वर्गः॥ ॥२९॥ इंद्रो रथायेति त्रयोदशर्चं सप्तदशं सूक्तं। ॥अवस्युनामा
त्रेय ऋषिः त्रिष्टुप् छंदः इंद्रो देवता। उग्रमयातमिति पादस्योः कुत्सोशनसो विकल्पेन देवता। इंद्राकुत्सा वहमाना इत्यस्या इंद्रः कुत्सश्च तथा चानुक्रां
तं॥ इंद्रो रथाय सप्तोनावस्युरुग्रमिति कौत्सो शानसो वा पादो परैंद्राकौत्सीति। विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥इंद्रो रथाय प्रवतं कृणोति यमध्य
स्थान्मघवा वाजयंतं। यूथेव पश्वो व्युनोति गोपा अरिष्टो याति प्रथमः सिषासन्॥ ॥मघवा धनवानिंद्रः वाजयंतमन्नमिच्छंतं यं रथं अध्यस्थात् अधितिष्ठ
ति तस्मै रथाय प्रवतं प्रवणं मार्जितं कृणोति करोति अपि च गोपाः गोपालः पश्वो यूथेव पशोः पशूनां यूथानि यथा व्युनोति प्रेरयति तथा शत्रुसेन्यानि प्रेर
यति। अरिष्टः शत्रुभिः स्वयमहिंसितः प्रथमो देवानां मुख्यः इंद्रः सिषासन् शत्रुधनानीच्छन् याति निगच्छति॥ ॥अथ द्वितीया॥ ॥आ प्र द्रव हरिवो मा वि
वेनः पिशंगराते अभि नः सचस्व। नहि त्वदिंद्र वस्यो अन्यदस्त्यमेनांश्चिज्जनिवतश्चकर्थ॥ ॥हे हरिवः हरिवन्निंद्र त्वं आ अस्मानभिमुखं प्र द्रव प्रकर्
षेणागच्छ किं तु मा विवेनः वेनतिः कांतिकर्मा अस्मासु विगतकामो मा भूः किंच हे पिशंगराते हिरण्मयरूपेण इंद्र नः अस्मानभि सचस्व अभिसेवस्व। अपि च हे इंद्र
वस्यो वसीयः श्रेयस्करं त्वत् त्वत्तः अन्यन्न ह्यस्ति अन्यद्वस्तुजातं नास्ति। अमेनांश्चित् अमेनाः स्त्रीवाची अपगतस्त्रीकांश्च जनिवतः जायावतश्च
कर्थ करोषि॥ ॥अथ तृतीया॥ ॥उद्यत्सहः सहस आजनिष्ट देदिष्ट इंद्र इंद्रियाणि विश्वा। प्राचोदयत्सुदुघा वव्रे अंतर्वि ज्योतिषा संववृत्वत्तमोवः॥ ॥
यद्यदा सहः सूर्यसंबंधितेजः सहसः तेजः संबंधिनस्तेजः उदाजनिष्ट उपरिष्टात् उद्बभूव तदा इंद्रः विश्वा विश्वानि सर्वाणि इंद्रियाणि धनानि दे

ऋ० भा० द्वियमिति धनामैतत् देदिष्ट यजमान यो दिव्राति वज्रेण निवारको पर्वते अंतर्मध्ये बलेन निरुद्धाः सुदुघाः सुखदोग्ध्रीः गाः प्राचोदयत् प्रेरयत् ज्योतिषा तेजसा
संवृत्वन् से वरणशीलं तमः विवः निवारितवान् ॥ ॥ अथ चतुर्थी ॥ ॥ अनवस्ते रथमश्वाय तक्षन् त्वष्टा वज्रं पुरुहूत द्युमंतं ॥ ब्रह्माण इंद्रं महयंतो अर्कैरव
२५ र्धयन्नहये हंतवा उ ॥ ॥ हे पुरुहूत बहुभिराहूतेंद्र ते त्वदीयं रथं अश्वाय अश्वाभ्यां संयोगार्हं अनवः अनवो मनुष्याः ऋभवः तक्षन् अतक्षन् त्वष्टा कुर्वन् त्वष्टाय
त्वदीयं वज्रं द्युमंतं दीप्तिमंतमकरोत् उत अपि च महयंतः इंद्रं पूजयंतः ब्रह्माणो अंगिरसः परिदृढा मरुतो वा अहये अहिं वृत्रं हंतवे हंतुं अर्कैः स्तोत्रैरवर्ध
यन् वर्धितवंतः ॥ ॥ अथ पंचमी ॥ ॥ वृष्णे यत्ते वृषणो अर्कमर्चानिंद्र ग्रावाणो अदितिः सजोषाः ॥ अनश्वासो ये पवयोऽरथा इंद्रेषिता अभ्यवर्तंत दस्यून् ॥
॥ हे इंद्र यद्यदा वृषणः सेचनसमर्था मरुतः वृष्णे कामानां वर्षित्रे ते तुभ्यं अर्कं स्तोत्रं अर्चान् अस्तुवन् कुर्वन्नित्यर्थः तदा दितिः अदीनाः पवनयुक्तयः
ग्रावाणो अभिषवपाषाणाः संगता बभूवुरिति शेषः अनश्वासः अश्ववर्जिताः अरथाः रथहीनाः इंद्रेषिताः इंद्रप्रेषिताः पवयः पवमागच्छंतो ये मरु
तः दस्यून् शत्रून् अभ्यवर्तंत अभिभूतान् कुर्वंतो वर्तंते स्म ते मरुतः अर्चानिति संबंधः ॥ ॥ इति चतुर्थस्य प्रथमे एकोनत्रिंशो वर्गः ॥ ॥ २९ ॥ अथ षष्ठी ॥
॥ प्र ते पूर्वाणि करणानि वोचं प्र नूतना मघवन्या चकर्थ ॥ शक्तीवो यद्विभरा रोदसी उभे जयन्नपो मनवे दानुचित्राः ॥ ॥ हे इंद्र त्वदीयानि पूर्वाणि पुरा
तनानि करणानि कर्माणि प्रवोचं प्रब्रवीमि हे मघवन् धनवन्निंद्र यायानि कर्माणि चकर्थ कृतवानसि तानि प्रवोचमिति संबंधः हे शक्तिवः शक्तिमन् शक्ति राम
वज्रं कर्मवान् हे इंद्र यत् त्वं उभे रोदसी द्यावापृथिव्यौ जयन् वशी कुर्वन् अपः उदकानि मनवे मनुष्याय विभराः विविधं बिभर्षि कीदृशीः दानुचित्राः चित्र २५

तवान् खलु ः इंद्रेण सह योद्धुं प्रहितवानित्यर्थः अस्यासुरस्य संबंधिन्यः अबला स्त्रीरूपाः सेना मामां किं करन् किं कुर्युरिति मन्यमानः इंद्रः तासां मध्ये
धेनः पणयित्र्यो सुरूपः तस्मै है स्त्रियो अंतरख्यात् हि गृहमध्ये निदधे रक्षत् अथानंतरमिंद्रः दस्युं नमुचिं युधाय उपपेत् उपप्रागच्छत् ॥ ॥ अथ दशमी ॥ ॥ सम
त्रगावोभितो नवंतेहेह वत्सैर्वियुता यदासन् ॥ सं ता इंद्रो असृजदस्य शाकैर्यदीं सोमासः सुषुता अमंदन् ॥ ॥ यदा गावः वत्सैः वियुता आसन् वियुक्ता अ
भवन् अत्रास्मिन्काले अभितः सर्वतो नमुचिना पहृता गावः इहेह इह चेह च सर्वतः समनवंत अत्यंतमगच्छन् यद्यदा सुषुताः बभ्रुनाम्ना ऋषिणा सुषु
अभिषुताः सोमासः सोमाः ईमेनमिंद्रं अमंदन् अमादयन् तदा इंद्रः शाकैः शक्तैः मरुद्भिः सहस्य बभ्रोः संबंधिनीः नमुचिना पहृता गाः समसृज
त् वत्सैः सह समयोजयत् ॥ ॥ इति चतुर्थस्य प्रथमे सप्तविंशो वर्गः ॥ ॥ २७ ॥ अथैकादशी ॥ ॥ यदीं सोमा बभ्रुधूता अमंदन्नरोरवीद्वृषभः सादनेषु ॥ पु
रंदरः पपिवाँ इंद्रो अस्य पुनर्गवामददादुस्रियाणां ॥ ॥ यद्यदा बभ्रुधूताः बभ्रुणाभिषुताः सोमाः ईमेनं इंद्रं अमंदन् अमादयन् तदा वृषभः कामानां व
र्षितेंद्रः सदनेषु युद्धेषु अरोरवीत् अत्यर्थं शब्दमकरोत् पुरंदरः पुरां दारयिता अस्य इमं सोमं पपिवान् पीतवानिंद्रः पुनः उस्रियाणां क्षीरमुत्स्राविणीनां
गवीनां गवां गाः अददात् बभ्रवे ददौ ॥ ॥ अथ द्वादशी ॥ ॥ भद्रमिदं रुशमा अग्ने अक्रन्गवां चत्वारि ददतः सहस्रा ॥ ऋणंचयस्य प्रयता मघानि प्रत्यग्र
भीष्म नृतमस्य नृणां ॥ रुशमा इति कश्चिज्जनपदविशेषः अत्र रुशमशब्देन तत्रत्या जना उच्यंते रुशमाः ऋणंचयनाम्ना राज्ञा किंकराः हे अग्ने भद्रं कल्या
णमिदं कर्म अक्रन् अकुर्वन् कीदृशाः गवां धेनूनां चत्वारि चतुःसंख्यायुक्तानि सहस्राणि ददतः मह्यं प्रयच्छंतः राज्ञा हिदीयमानानि राजपुरुषा एव

वो अजगन्नवस्य॰॥ विश्वेते अत्र मरुतः॰ सखाय इंद्र ब्रह्माणि तविषीमवर्धन्॥ ॥ कविश्चिदसत्तोपि अवस्युरेव नाम कश्चमंत्रद्रष्टा वा तस्य वा यर्विरेगनयु
क्तानुसंयुक्तान् सयुजः श्रितः सुष्टुयोजनीयानश्वान् अजगन् आप्नोत् अवस्यो सखायः॰ विश्वे सर्वे मरुतो बहवः स्तोतारः॰ हे इंद्र अत्रास्मिन् लोके ते त्व
दीयां तविषीं बलं ब्रह्माणि अन्नानि॰ स्तोत्रैरवर्धन् अवर्धयन्॥ ॥ इति चतुर्थस्य प्रथमे त्रिंशो वर्गः॥ ३०॥ ॥ अथैकादशी॥ ॥ सूरश्चिदित्यर्थं परितक्म्यायां
पूर्वं करद् उपरं जूजुवांसं॥ भरच्चक्रमेतशः॰ संरिणाति पुरोदधत्सनिष्यति क्रतुं नः॰॥ ॥ इंद्रः परितक्म्यायां संग्रामे परितो गच्छंत्यस्यां भयमिति तक्म्यासं
ग्रामः॰ एतशाख्येन ऋषिणा सह योद्धुः॰ सूरश्चित् सूर्यस्यापि संबंधिनं जूजुवांसं वेगेन गच्छंतं रथं उपरं उपरतव्यापारं पूर्वं करत् पुराकरोत् एतशः॰
एतशाय विभक्तिव्यत्ययः॰ इंद्रः पूर्वं हि चक्रस्य रथस्य एकं चक्रं भरत् अहरत् स इंद्रः तेन चक्रेण असुरान्॰ संरिणाति हिनस्ति अपि च पुरोदधत् अस्मान्
पुरस्कुर्वन् नो अस्मदीयं क्रतुं यज्ञं सनिष्यति संभजतु॥ ॥ अथ द्वादशी॥ ॥ आयं जना अभिचक्षे जगामेंद्रः सखायं सुतसोममिच्छन्॥ वदन् ग्रावाव वेदिं
भ्रियाते यस्य जीरमध्वर्यवश्चरंति॥ ॥ हे जनाः॰ अभिचक्षे युष्माकमभिद्रष्टुं अयमिंद्रः॰ सखायं स्तोतारं सुतसोमं अभिषुतसोमं यजमानं इच्छन् अभि
लक्ष्य आजगाम आगच्छति अध्वर्यवः॰ यस्य ग्रावा जीरं क्षेपणं प्रेरणं॰ चरंति कुर्वंति स ग्रावा सोमाभिषवपाषाणः॰ वदन् शब्दं कुर्वन् भ्रियाते भ्रियते॥
॥ अथ त्रयोदशी॥ ॥ ये चाकनंत चाकनंत नू ते मर्ता अमृत मो ते अंह आरन्॥ वावंधि यज्यूंरुत तेषु धेह्योजो जनेषु येषु ते स्याम॥ ॥ हे इंद्र धनार्थिनो
जनास्त्वां चाकनंत अकामयंत पुनश्च ते नु क्षिप्रमेव त्वां चाकनंत कामयंते हे अमृत अमरणशील इंद्र मर्ता मरणधर्माणस्ते जनाः॰ अंहो अनर्थं मो आरन् मा

गमन् मो इति निपातसमुदायो मेत्येकनिपातार्थे वर्तते तान् अपि त्वं यज्यून् यजमानान् ववंधि संभजस्व येषु जनानां मध्ये वयं स्तोतारः॰ ते त्वदीयाः स्याम भवा
म हे इंद्र त्वं तेषु ओजो बलं धेहि॥ ॥ इति चतुर्थस्य प्रथमे एकत्रिंशो वर्गः॥ ३१॥ ॥ अदर्दरुत्समिति द्वादशर्चमष्टादशं सूक्तं गातुनामात्रेयस्यार्षं त्रिष्टु
ब्छंदः॰ इंद्रो देवता तथा चानुक्रांतं अदर्दद्वादश गातुरिति गतो विनियोगः॥ ॥ तत्र प्रथमा॥ ॥ अदर्दरुत्समसृजो वि खानि त्वमर्णवान्बद्बधानाँ अरं
णाः॥ महांतमिंद्र पर्वतं वि यद्वः सृजो वि धारा अव दानवं हन्॥ ॥ हे इंद्र त्वं उत्सं उत्स्यंदमानं मेघं अदर्दः विदारितवानसि तदनंतरं खानि मेघस्योदकानि
निर्गमनद्वाराणि व्यसृजः॰ विशेषेण सृष्टवानसि किंच बद्बधानान् बाधमानान् अर्णवान् उदकवतो मेघान् अरम्णाः॰ विसर्जयसि क्षरयसीत्यर्थः॰ अरम्णा
विसर्जनकर्मा हे इंद्र यत्त्वं यदिति लिंगव्यत्ययः॰॥ महांतं प्रभूतं पर्वतं मेघं विवः॰ विवृतवानसि धाराः॰ अपां विसृजः॰ विसृष्टवानसि अपि च दानवं
नो पुत्रं वृत्रमसुरं यद्वा उदकस्य दातारं मेघं वा अवहन् अभिहतवानसि॥ अत्र निरुक्तं॥ उदकद्वोत्स्यंदनाद्वोनत्तेर्वा स्यात् व्यसृजो अस्य खानि त्वमर्णवान् अर्ण
स्वत एतानि त्यादि॥ ॥ अथ द्वितीया॥ ॥ त्वमुत्साँ ऋतुभिर्बद्बधानाँ अरंह ऊधः पर्वतस्य वज्रिन्॥ अहिं चिदुग्र प्रयुतं शयानं जघन्वाँ इंद्र तविषीमधत्थाः॥
हे वज्रिन् वज्रवन्निंद्र त्वं ऋतुभिः॰ ऋतुषु वृष्टिकालेषु बद्बधानान् प्रतिबध्यमानान् मेघान् प्रतिबंधनादमोचय इति शेषः॰ अपि च पर्वतस्य मेघस्य संबंधि
ऊधः जलं अरंह अगमयः॰ हे उग्र उद्गूर्णबलेंद्र प्रयुतं मुग्धं शयानं जले शयानं जले शयनं कुर्वंतं अहिं चिद् वृत्रं च जघन्वान् हतवानसि हे इंद्र त्वं तविषीं
बलं अधत्थाः अधारयः॰ त्वं वधानंतरं इंद्रो लोके प्रख्यातो भवतीत्यर्थः॰ ॥ ॥ अथ तृतीया॥ ॥ त्यस्य चिन्महतो निर्मृगस्य वधर्जघान तविषीभिरिंद्रः॥

ऋ०भा०

२७

य एक इद्द प्रतिर्मन्यमान आदस्मादन्यो अजनिष्ट तव्यान्॥ ॥निर्जघानायुधं शाकोवृत्रेण क्षिप्तमोजसा वृत्रस्य गात्राद अन्यो न्यः॥ प्रादुर्भूतो महासुरः॥
वृत्रं पूर्वं निहत्येंद्रो द्वितीयं शुष्णसंज्ञकं पुनर्जघानेंद्र इति पराभिः॥ कीर्तयत्यृषिरितींद्रो महतः॥ प्रभूतस्य मृगस्य मृगवच्छीघ्रगामिनः॥ त्यस्य चित्तस्य वृ
त्रस्य संबंधि वधरायुधं तविषीभिः॥ स्वकीयैर्बलैर्निर्जघान निः॥ शेषेणावधीत्। एक इत् असहाय एव अप्रति प्रतिद्वंद्विरहितः॥ मन्यमानः॥ आत्मानं योद्धारमिति
शेषः॥ आतूतदानीं अस्मात्तव्यान्प्रवृद्धतरोन्योसुरः॥ अजनिष्ट प्रादुरभूत्॥ ॥अथ चतुर्थी॥ ॥त्यं चिदेषां स्वधया मदंतं मिहो नपातं सुवृधं तमोगां॥
वृषप्रभर्मा दानवस्य भामं वज्रेण वज्री निजघान शुष्णं॥ ॥एषां प्राणिनां स्वधयान्नेन मदंतं मोदमानं सर्वप्राणिनामन्नं स्वयमेव भुंजानं मिहः॥ सेचन
समर्थस्य मेघस्य नपातं पातारं रक्षितारं अत्र नपाच्छब्दः॥ पातरि वर्तते प्राणो वै तनूनपात्स हि तन्वः॥ पातीति ब्राह्मणं॥ सुवृधं प्रवृद्धं तमोगां तमसि अंधकारे ग
च्छंतं संचितं तं च वृत्रं निजघानेति शेषः॥ वृषप्रभर्मा वर्षणशीलस्य मेघस्य प्रहर्ता वज्री वज्रवानिंद्रः॥ वज्रेण स्वकीयेनायुधेन दानवस्य दनुजस्य
भामं। अनेकोधवाचिभामशब्देन क्रोधादुत्पन्नः॥ शुष्णासुरो लक्ष्यते। तं शुष्णमसुरं निजघान हतवान्॥ ॥अथ पंचमी॥ ॥त्यं चिदस्य क्रतुभिर्निषत्त
ममर्मणो विददिदस्य मर्म। यदीं सुक्षत्र प्रभृता मदस्य युयुत्संतं तमसि हर्म्ये धाः॥ ॥अमर्मणो मर्महीनमात्मानं मन्यमानस्यास्य वृत्रस्य निषत्तं नि
षण्णं चित्तत्यत्तदेष लिंगव्यत्ययः॥ मर्म प्राणस्थानं यत्र स्थाने विद्धो म्रियते तन्मर्मेत्युच्यते। अस्य वृत्रस्य क्रतुभिः॥ प्रज्ञानैः॥ इंद्रस्त्वं विददविदत् अज्ञासीरे राम
वयदा हे सुक्षत्र सुबलेंद्र त्वं मंदस्य मादकस्य सोमस्य प्रभृतौ प्रभृतौ संभरणे सति युयुत्संतं योद्धुमिच्छंतं ईमिनं वृत्रं हर्म्ये हारके तमसि धाः॥ न्यदधाः वृत्रः २७

दानाः॥ ॥अथ सप्तमी॥ ॥तदिन्नु ते करणं दस्म विप्राहिं यद्घ्नन्नोजो अत्रामिमीथाः॥ शुष्णस्य चित्परि माया अगृभ्णाः प्रपित्वं यन्नप दस्यूंरसेधः॥ ॥हे
दस्म दर्शनीय विप्र मेधाविन्निंद्र त्वं अत्रास्मिंल्लोके अहिं वृत्रमसुरं घ्नन् हिंसन् यदोजो यद्बलं अमिमीथाः॥ प्रकाशितवानसि तदिन्नु तत्खलु ते तव करणी
कर्म विद्यते अपि च शुष्णस्य चित्तन्नामकस्याप्यसुरस्य संबंधिनीः॥ मायाः॥ वंचनाः॥ पर्यगृभ्णाः॥ परिगृहीतवानसि हे इंद्र त्वं प्रपित्वं संग्रामं समीपय
न् गच्छन् दस्यून् असुरान् अपासेधः॥ अपबाधथाः॥ ॥अथाष्टमी॥ ॥त्वमपो यदवे तुर्वशायारमयः सुदुघाः पार इंद्र॥ उग्रमयातमवहो ह कुत्सं
सं ह यद्वामुशनारंत देवाः॥ ॥हे इंद्र त्वं पारे नदीनां तीरे प्रवृद्ध इति शेषः॥ सुदुघाः॥ ॐषधिवनस्पतीन् सुष्ठु दुहंतीः अप उदकानि यदवे यदुनामकाय
राज्ञे तुर्वशाय एतन्नामकाय राज्ञे च अरमयः॥ रमितवानसि हे इंद्र युवां त्वं कुत्सश्चेति शेषः॥ उग्रं उद्गूर्णं शुष्णं आयातं अगच्छतं तदनंतरं त्वं शुष्णं हत्वा कु
त्समवहो ह स्वगृहं प्रापितवानसि खलु यद्यदा वां युवामिंद्राकुत्सौ उशना भार्गवो देवाश्च समरंत सह संभेजिरे खलु॥ ॥अथ नवमी॥ ॥इंद्राकुत्सा व
हमाना रथेना वामत्या अपि कर्णे वहंतु॥ निः षीमद्भ्यो धमथो निः षधस्थान्मघोनो हृदो वरथस्तमांसि॥ ॥हे इंद्राकुत्सा इंद्राकुत्सौ रथेन वहमानौ वहमा
नौ उह्यमानौ वां युवां अत्याः अश्वाः कर्णे दृश्यते आ तिरुणाति करोतीति कर्णः॥ स्तोता यजमानो वा तत्समीपे पातियावत् आवहंतु आसमंताद्वहंतु कामं वहंतु यु
वामपि अद्भ्यः अप्सु प्रविष्टं सीमेनं असुरं निर्धमथः॥ अबाधेथां सीमिति शुष्णासुरो बुध्निस्थः॥ परामृश्यते। सधस्थात् स्वकीयात्स्थानान्निरबाधेथां मघोनो
मघवतो हविष्मतो यजमानस्य हृदो हृदयात् तमांसि अज्ञानरूपाणि पापानि वरथो निरयथः॥ ॥अथ दशमी॥ ॥वातस्य युक्तान्सुयुजश्चिदश्वान्कविश्चिदे

दर्पादरहितं अमत्रं अमात्रं परिमाणरहितं ऋष्वं महांतं हिंसितवाजिंद्रियं तं भाभिभूतमित्यर्थः ॥ वृत्रं न्यवृणक् नितरामहिंसीत् तस्माज्जायमानाद्द्यावाभीषो
मो निरक्रामतां प्राणापानौ वायुरेन तदजहितामिति तैत्तिरीयकं ॥ ॥ अथ नवमी ॥ ॥ को अस्य शुष्मं तविषीं वरात एको धना भरते अप्रतीतः ॥ इमे चिदस्य
ज्रयसो नु देवी इंद्रस्यौजसो भियसा जिहाते ॥ ॥ अस्य इंद्रस्य संबंधिनी शुष्मं शोषणीं तविषीं बलं को वराते निवारयेत् शुष्मं इत्यस्य स्त्रीलिंगविशेष
णत्वेपि नियतलिंगत्वात् पुल्लिंगत्वमेव अप्रतीतः केनाप्यप्रतिगत इंद्रः एको असहाय एव धना धनानि शत्रूणां वसूनि भरते बिभर्ति हरते वा देवी देव्यौ
द्योतमाने इमे चित् इमे एव द्यावापृथिव्यौ ज्रयसो वेगतो अस्य इंद्रस्य संबंधिन ओजसो बलात् उद्भूतेन भियसा भयेन नु क्षिप्रं जिहाते गच्छतः चलत
इत्यर्थः ॥ ॥ अथ दशमी ॥ ॥ न्यस्मै देवी स्वधितिर्जिहीत इंद्राय गातुरुशतीव येमे ॥ सं यदोजो युवते विश्वमाभिरनु स्वधाव्ने क्षितयो नमंत ॥ ॥ स्वधि
तिः स्वेन धृता देवी द्योतमाना द्यौः अस्मा इंद्राय नि जिहीते नीचत्वेन याति गातुर्भूमिः उशतीव कामयमाना योषिदिव इंद्राय येमे आत्मानं नियच्छ
ति यथेष्टमात्मानं विनियोक्तुं योग्या भवतीत्यर्थः यद्यदा इंद्रः विश्वं समस्तं ओजो बलं आभिः प्रजाभिः सं युवते संयोजयति इंद्रः स्वकीयं बलं सर्वासु
प्रजासु निहितवानित्यर्थः अनु आनुकूल्येन वर्तमानाः क्षितयो मनुष्याः क्षितय इति मनुष्यनाम एतत् स्वधाव्ने बलवदिंद्राय नमंत स्वैन मंति प्रह्वीभ
वंति ॥ ॥ अथैकादशी ॥ ॥ एकं नु त्वा सत्पतिं पांचजन्यं जातं शृणोमि यशसं जनेषु ॥ तं मे जगृभ्र आशसो नविष्ठं दोषा वस्तोर्हवमानास इंद्रं ॥ ॥ हे इंद्र

त्वां एकं मुख्यमेव जनेषु सर्वेषु मनुष्येषु मध्ये अहं मंत्रद्रष्टा शृणोमि ऋषिमुखेभ्यः कीदृशं सत्पतिं सतां पालकं पांचजन्यं पंचजनेभ्यो मनुष्येभ्यो हि
तं जातं मुख्यं त्वं यशसं यशायुक्तं दोषा क्षपायां वस्तो वासरे च हवमानाः सकलस्तवंतः आशसः कामानां शंसमानाः मेमदीयाः प्रजाः नविष्ठं अतिशयेन स्तुत्यं
तमिंद्रं जगृभ्रे स्तुत्वा स्वीकुर्वंतु ॥ ॥ अथ द्वादशी ॥ ॥ एवा हि त्वामृतुथा यातयंतं मघा विप्रेभ्यो ददतं शृणोमि ॥ किं ते ब्रह्माणो गृहते सखायो ये त्वाया निद
धुः काममिंद्र ॥ ॥ एवएव मुक्तेन प्रकारेण हि ऋतुथा काले यातयंतं जंतून् प्रेरयंतं हे इंद्र त्वां विप्रेभ्यः स्तोतृभ्यः मघा मघानि धनानि ददतं यच्छंतं शृ
णोमि निशामयामि तत् स्तुषे व प्रतिभाति हे इंद्र त्वाया त्वयि ये स्तोतारः कामं स्वकीयाभिलाषं निदधुः न्यक्षिपन् ब्रह्माणो गृहंतः ते त्वदीयाः सखायः स्तोता
रः किं गृहते लभंते किंशब्दः कुत्सितार्थः स्वकीयाभिलाषप्राप्तिविलंबनादेवमुक्तवानित्यर्थः ॥ ॥छ॥ ॥ इति चतुर्थस्य प्रथमे त्र्यस्त्रिंशो वर्गः ॥ ॥ ३३ ॥
॥छ॥ ॥ पंचमे मंडले द्वितीयोनुवाकः ॥ ॥छ॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ॥छ॥ ॥
॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणामात्येन विरचिते माधवीये वेदार्थप्र
काशे ऋक्संहिताभाष्ये चतुर्थाष्टके प्रथमोध्यायः ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥ ॥छ॥ ॥

०॥ चतुर्थाष्टके प्रथमोध्यायः॥

इंद्रस्य भयात् तमसि प्रविश्यादित्यर्थः॥ ॥अथ षष्ठी॥ ॥त्यं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानं॥ तं चिन्मंदानो वृषभः सुतस्योच्चैरिंद्रो
अपगूर्या जघान॥ ॥सुतस्याभिषुतेन सोमेन मंदानो मोदमानः वृषभः कामानां वर्षितेंद्रः उच्चैरूर्ध्वं अपगूर्य वज्रमुद्यम्य त्यं चित्तमेव वृत्रं जघा
न वधीत् कीदृशं इंद्राख्यमंतरिक्षलोके कत्सुखकरं पयो यस्य तं शयाने अप्सु शयनं कुर्वंतं असूर्ये सूर्यरहिते तमसि अंधकारे वावृधानं तं चिदिति पुनर्वच
नं पूरणार्थं॥ ॥इति चतुर्थस्य प्रथमे द्वात्रिंशो वर्गः॥ ३२॥ ॥अथ सप्तमी॥ ॥उद्यदिंद्रो महते दानवाय वधर्यमिष्ट सहो अप्रतीतं॥ यदीं वज्र
स्य प्रभृतौ ददाभ विश्वस्य जंतोरधमं चकार॥ ॥महते प्रभूताय दानवाय वृत्रासुराय सहः शत्रूणामभिभवितृ अप्रतीतं केनाप्यप्रतिगतं व
धर्यं वधं उद्यमिष्ट उदयच्छत् यद्यदा वज्रस्य प्रभृतौ प्रहरणे सति हय्यहो भर्त्सनीति भ त्वं ईमेनं वृत्रं ददाभ अहिंसीत् तदा विश्वस्य सर्वस्य जंतोः
प्राणिनः अधमं नीचं चकार अकरोत्॥ ॥अथाष्टमी॥ ॥त्यं चिदर्णं मधुपं शयानमसिन्वं वव्रं मह्याददुग्रः॥ अपादमत्रं महता वधेन नि दुर्यो
ण आवृणङ्मृध्रवाचं॥ ॥उग्र उद्गूर्णबल इंद्रो महीत् त्यं चित्तमेव वृत्रं आददे प्रत्यग्रहीत् कीदृशं अर्णं गंतारं जलं मेघं वा आवृत्य शयाने श
यनं कुर्वंतं स्थितवंतमित्यर्थः मधुपं मधुनो भसः पातारं पालयितारं असिन्वं सपत्नानां क्षेप्तारं अस्य तेरिदं रूपं वव्रं रूपं एवं तं सर्वमथाच्छादयंतं
सइमांल्लोकानाहरणो हि इमांल्लोकानाहरणो तद्वृत्रस्य वृत्रत्वमिति॥ तैत्तिरीयकं तदनंतरमिंद्रः दुर्योणे संग्रामे महता प्रभूतेन वधेन वज्रेण अपा

ऋ॰भा॰ यमसेस्मेषि॰॥ ॥हेऋघमहन्नूहेइंद्र यत्सुपोलोपः॰ येअस्मदस्मत्तः॰ लङ्केऽप्योन्येअयुक्तासः॰ त्वयाअसंयुक्ताः॰॥ असन्नअभवन्नू ब्रह्मपरिवृढं कर्मत
इच्छितानातेनराक्षोल दीयानभवंतिअतोस्मद्यज्ञमभ्यागंतुंतं प्रसिद्धं रथंअतिष्ठहे वज्रहस्तेंद्र। देवस्त्वष्टः॰ स्वयं रथमारोढुमिच्छ यद्वदं आयमसेनि
३० यमसेतमधितिष्ठ॥ ॥अथचतुर्थी॥ ॥पुरूयत्तइंद्रसंत्युक्थागवेचकर्थोर्वरासुयुध्यन्। ततक्षेसूर्याय चिदोकसिस्वेवृषासमत्सुदासस्यनामचित्॥
॥हेइंद्रतेतवयद्यदास्वभूतानिपुरुपुरूणि बहूनिउक्थाउक्थानिशस्त्राणिसंतिउर्वरासुसस्यपितासु भूमिषु निमित्तभूतासुगवेवृष्ट्युदकाययु
ध्यन्जलप्रतिबंधकान्संहरन्चकर्थकरोषिभेदनंकुरुषेतिसूर्यायसूर्यस्यस्वेस्वकीयेओकसिस्थानेवृषावर्षितासन्ततक्षेसंपादयसिसमत्सुसं
ग्रामेषुदासस्यवृष्टिप्रतिबंधकर्तुरेतन्नामकस्यासुरस्यनामचित्नामापितनक्षेनाशयसीत्यर्थः॥ ॥अथपंचमी॥ ॥वयंतेतइंद्रयेचनरःश
र्धोजज्ञानायाताश्चरथाः। अस्मांजगम्यादहिशुभ्रसत्वाभगोनहव्यःप्रभृथेषुचारुः॥ ॥हेइंद्रयेचनरः॰ कर्मणांनेतारःऋत्विग्यजमानाःवयं
स्मतेवयंतेत्वदीयाः॰ ईदृशावयंशर्धोबलंजज्ञानाः॰ उत्पादयंतःस्तुतिभिः॰ यानाश्चहोतुंसांशाप्ताश्चरथाःरंहरणशीलाश्चकिंबहुअहिशुभ्रअहि राम
रयनातसर्वतोव्याप्तिबलेंद्रत्वदनुग्रहात्हव्यस्तुत्यःप्रतिभटैराक्षातयावाचारुःसंगतासत्वाभृत्यादिःप्रभृतेषुसंग्रामेषुयज्ञेषुवाअस्मान्जगम्यो ३०
गच्छतुआगच्छतुभगोनभगइवहव्यश्चारुः॰ भगदेवोयथास्मत्सहायःआगच्छतितथाभृत्यादिरागच्छेदित्यर्थः॥ ॥इतिचतुर्थस्यद्वितीयेप्रथमोवर्गः॥
॥अथषष्ठी॥ ॥पपृक्षेण्यमिंद्रत्वेह्योजोनृम्णानिचनृतमानोअमर्तः॥ सनएनींवसवानोरयिंदाःप्रार्यस्तुषेतुविमघस्यदानं॥ ॥हेइंद्रपपृक्षेण्यंसंप

र्काहंपूज्यंवाओजोबलंत्वेहित्वयिस्थितुत्वदधीनमित्यर्थः॥ नृतमानोनृत्यन्नमर्तोअमरणधर्मासत्वंवसवानः॰ आछादयन्स्वतेजसाजगत् नृम्णानिनृम
णानिद्रविणानिवक्ष्यमाणरयिपक्षयाचशब्दःएनीरणवर्णोश्वेतवर्णोरयिंधनंदाः॰ देहिअहंचअर्यईश्वरस्यतुविमघस्यचप्रभूतधनस्यचदानंप्रस्तुषे
स्तौमि॥ ॥अथसप्तमी॥ ॥एवानइंद्रोतिभिरवपाहिगृणतःशूरकारून्। उतत्वचंददतोवाजसातौपिप्रीहिमध्वःसुषुतस्यचारोः॥ ॥हेशूरइंद्रएवनोस्मान्
गृणतः॰ स्तुवतःकारून्कर्मकृन्ऋत्विजः॰ ऊतिभिःरक्षणैः॰ अवपाहिपालयउतापिचवाजसातौसंग्रामेत्वचंआछादकंरूपंददतःप्रयच्छतः॰ सुषुतस्यचा
रोर्मनोहरस्यमध्वः॰ सोमस्यपिप्रीहिप्रीणयात्मानंद्वितीयार्थेषष्ठीउक्तलक्षणंसोमंपिबेत्यर्थः॥ अथवातृतीयार्थेषष्ठीउक्तलक्षणेनसोमपानेनप्रीणय॥
॥अथाष्टमी॥ ॥उतत्येमापौरुकुत्स्यस्यसूरेस्त्रसदस्योर्हिरणिनोरराणाः॥ वहंतुमादशश्येतासोअस्यगैरिक्षितस्यक्रतुभिर्नुसश्चे॥ ॥त्रसदस्युश्च
विदथोश्चस्यश्चेतिनयोन्नृपाः॰ अश्वानूधनानिगाश्चादुदुःऋषयेतद्वदस्तुविः॰ उतअपिचत्येतेमाचतुर्थीद्वितीयामह्यमित्यर्थः॰ रराणाः॰ रातेर्दानार्थस्य
कर्मणिलिटःकानचिरूपंदत्ताइत्यर्थः॰ पौरुकुत्स्यस्यपुरुकुत्सापत्यस्यसूरेःप्रेरकस्यहिरणिनोहिरण्यवतोस्यत्रसदस्योः॰ एतन्नामकस्यराजर्षेः॰
गैरिक्षितस्यगिरिक्षितगोत्रोत्पन्नस्यअश्वेतासः॰ शुभ्रवर्णाःदशाश्वामामांवहंतुप्रापयंतुअहंचक्रतुभिः॰ कर्मभिःरथनियोजनादिभिर्यज्ञादिभि
र्वासुक्षिप्रंसश्चेगच्छेयं॥ ॥अथनवमी॥ ॥उतत्येमामारुताश्वस्यशोणाः॰ क्रत्वामघासोविदथस्यरातौ। सहस्रामेच्यवतानोददानआनूकमर्योवपु
षेनार्चत्॥ ॥उतापिचत्येतेश्वाः॰ वक्ष्यमाणाःमारुताश्वस्यमरुत्सदृशाश्चगाश्ववान्मरुताश्वः॰ तदपत्यस्यविदथस्यतन्नामकस्यराज्ञःशोणाः

सं॰भा॰ ३१

शोणवर्णाः ऋत्वा मघासः ऋतुना कर्मणा शीघ्रगमनादिलक्षणेन मोहनीयाः अश्वाः विदथस्य वेदनसाधनस्य रातौ दाने विनियुक्ता मां वहन्तीति शेषः ॥ किं
च सहस्रा सहस्राणि अपरिमितानि धनानि अर्थः ॥ चूड्यस्य मेव चतुर्थ्यर्थे षष्ठी चूड्याय मह्यं च्यवतानस्या वयन्नु ददानः प्रयच्छन् सः ॥ आतूकं आभरणं
वपुषे स्वगात्रीरालंकाराय आचर्क्रुशाय स्तुतमेनेति चार्थः ॥ ॥अथ दशमी॥ ॥उत त्ये मा ध्वन्यस्य जुष्टा लक्ष्मण्यस्य सुरुचो यतानाः ॥ मह्ना रायः संवर
णस्य ऋषेर्व्रजं न गावः प्रयता अपि ग्मन् ॥ ॥उतापि च त्ये ते वक्ष्यमाणा रायः ॥ ध्वन्यस्य ध्वन्यनामकस्य लक्ष्मण्यस्य लक्ष्मणपुत्रस्य राज्ञः ॥ संबंधिनो
श्वाः ॥ जुष्टा मां प्राप्ताः सुरुचः ॥ शोभनदीप्तयः यतानाः वहमानाय तमानाः ॥ रायः मह्ना महत्वेन युक्ता रायः प्रयताः दत्ताः सत्यः ॥ संवरणस्य ऋषेः अपिग्म
न् अपिगताः प्राप्ता मम गृहमिति शेषः व्रजं न गावः ॥ गोष्ठं गावो यथा गच्छन्तीति चार्थे गावश्च मम व्रजे अपिग्मन् अत्रैते द्वे सूक्ते प्रायणीये मरुतो राज्ञां च दानस्तुति
शिल्पकत्वादरविरुद्धा ॥ ॥इति चतुर्थस्य द्वितीये द्वितीयो वर्गः ॥ ॥ ॥अजातशत्रुमिति नवर्चं द्वितीयं सूक्तं प्राजापत्यस्य संवरणस्यार्षं ऐंद्रं नवमी त्रिष्टु
प् शिष्टा त्रिष्टुबन्तपरिभाषया जगत्यः ॥ अजातशत्रुं नव त्रिष्टुबन्तमित्यनुक्रमणिका विनियोगो लैंगिकः ॥ ॥तत्र प्रथमा॥ ॥अजातशत्रुमजरा स्वर्व
त्यनु स्वधामिता दस्ममीयते ॥ सुनोतन पचत ब्रह्मवाहसे पुरुष्टुताय प्रतरं दधातन ॥ ॥अजातशत्रुं अनुत्पन्नाः शातयितारो यस्य तं दस्यं शत्रूणामुप
क्षपयितारं अजरा क्षीणा स्वर्वती स्वर्णवती अमिता अपरिमिता स्वधा अन्नं हविरन्वीयते अनुप्राप्नोति तदर्थं हे ऋत्विजः ॥ सुनोतन अभिषुणुत पचत
पुरोडाशादिकं कस्मै ब्रह्मवाहसे ब्रह्मणः ॥ परिवृढस्य स्तोत्रस्य वाहकाय पुरुष्टुताय बहुभिः स्तुताय इंद्राय प्रतरं प्रकृष्टतरं दधातन धारयत स्वस्वो चि

राम ३१

॥ श्रीऋग्वेदाय नमः ॥ ॥यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥१॥ चतुर्थे प्रथमाध्यायं व्याख्याय बाकृ
तिक्षमः ॥ सुधीः श्रीसायणाचार्यो द्वितीयं व्याचिकीर्षति ॥२॥ तत्रात्रेयः ॥ पंचमे मंडले तृतीयेऽनुवाके द्वादश सूक्तानि ॥ तत्र महि मह इति दशर्चं प्रथमं सूक्तं
प्रजापतिपुत्रः संवरणाख्य ऋषिः ॥ त्रिष्टुप् छंदः ॥ इंद्रो देवता तथा चानुक्रांतं महि दश प्राजापत्यः संवरण इति विनियोगो लैंगिकः ॥ ॥तत्र प्रथमा॥ ॥
॥महि महे इति॥ ॥महि महे तवसे दीध्ये नॄनिंद्रायेत्था तवसे अतव्यान् ॥ यो अस्मै सुमतिं वाजसातौ स्तुतो जने समर्यश्चिकेत ॥ ॥अहं संवरणोऽतव्यान
त्यंतमिव दुर्बलः ॥ सन् महि महत् प्रभूतं स्तोत्रं महे महते तवसे बलवते इंद्राय वक्ष्यमाणप्रकारेण दीध्ये दीपयामि प्रकाशयामि किमर्थं नॄनृष
ष्टयर्थं द्वितीयामनुष्याणामस्मदीयानां तवसे बलाय यद्वा नॄनस्मद्विरोधिनामभिभवायेति शेषः ॥ तदर्थं तवसे स्वबलाय यदिंद्रोऽस्मै जनेजनाय संवरणा
य वाजसातौ संग्रामे वाजयानस्य वा लाभे निमित्ते सति स्तुतः ॥ सन् सुमतिं समर्यः मर्त्यैः स्तोतृभिः ॥ सहितः ॥ यद्वा सह म्रियमाणे युध्यमाने मरुदादि
भिः अथवा समरार्हः ॥ चिकेत जानाति ॥ ॥अथ द्वितीया॥ ॥स त्वं न इंद्र धियसानो अर्कैर्हरीणां वृषन्योक्त्रमश्रेः ॥ या इत्था मघवन्ननु जोषं वक्षो अभि प्रा
र्यः सक्षि जनान् ॥ ॥हे वृषन् वर्षक इंद्र स प्रसिद्धस्त्वं नोऽस्मान् धियसानो ध्यायन् अर्कैः रर्चनसाधनैः स्तोत्रैर्निमित्तभूतैः ॥ हरीणां रथे नियोज्यानामश्वानां
योक्त्रं नियोजनरज्जुमश्रेः ॥ आश्रयसि याः लिंगव्यत्ययः ॥ यान् हरीन् हे मघवन् इत्था इत्थं जोषं प्रीतिं वक्षो वहसि तैर्निमित्तैर्याः अस्मदीरितिं तथा कृत्वा अर्यः स्व
दरीन् अभि आभिमुख्येन प्रकृष्टं सक्षि पराभव ॥ ॥अथ तृतीया॥ ॥न ते त इंद्राभ्यस्मदृष्वायुक्तासो अब्रह्मता यदसन् ॥ तिष्ठा रथमधि तं वज्रहस्ता रश्मिं देव

स॰भा॰ स्य आकरो वसुनः कर्त्ता यः किल्बिषात् पित्रादिवधयुक्तात् न ईषते न चलति न बिभेति वा इंद्र स्य अस्तोतॄणां हंति रिं ड्रायती नृसालाष्टकेभ्यः प्रायच्छत् श्रौत
३२ रिक्षे पोलोमान् पृथिव्यां कालखंज्यान् अरूं सुखानूयती नृसालाष्टकेभ्यः प्रायच्छमित्यादि श्रुतिषु प्रसिद्धा॥ ॥अथ पंचमी॥ ॥न पंचभिर्दशभिर्वष्ट्या
रभं नासुन्वता सचते पुष्यता चन॥ जिनाति वेदमुया हंति वा धुनिरा देवयुं भजति गोमति व्रजे॥ ॥अयमिंद्रः पंचभिर्दशभिर्वा सहायैरारभं आरंभं
शत्रुहननाय आलंबनं न वष्टि सहाय्यं नापेक्षत इत्यर्थः यद्वा मुमिंद्रं पंचभिर्दशभिर्वा यजमानैर्दत्तैरूपायैरारब्धुं उद्योगं कर्त्तुं न वष्टि न कामयते असुन्व
ता अभिषवमकुर्वता सह पुष्यता चन बंधवादीनां पोषयिता अपि न सचते न संगच्छते असुन्वंतं अभिषवमकुर्वाणं॥ अयमस्मारं पुष्टं तं चन प्राप्नोतीत्यर्थः
न केवलमप्राप्तिमात्रं किंतु जिनाति वा वा शब्दः समुच्चयार्थे जिनाति बाधते इदिति पूरणः हंति वा मुया अमुमयष्टारं धुनिः कंपकः शत्रूणां देवयुं देवमिं
द्रं कामयमानं यजमानं गोमति व्रजे आभजति योजयतीत्यर्थः॥ ॥इति चतुर्थस्य द्वितीये त्रितीयो वर्गः॥ ॥अथ षष्ठी॥ ॥वित्वक्षणः समृतौ चक्रमा
सजोऽसुन्वतो विषुणः सुन्वतो वृधः॥ इंद्रो विश्वस्य दमिता विभीषणो यथावशं नयति दासमार्यः॥ ॥समृतौ संग्रामे वित्वक्षणः विन्नोषेण तनूकर्त्ता
शत्रूणां तदर्थं चक्रमासंजः रथचक्रमासजः रथचक्रस्यासंजयिता असुन्वतोऽयजमानस्य विषुणः पराङ्मुखः सुन्वतो यजमानस्य वृधो वर्धयिता
इंद्रो विश्वस्य दमिता शिक्षयिता विभीषणः भयजनकः आर्यः स्वामी यथावशं यथेच्छं दासं दासकर्माणं जनं नयति स्ववशे॥ ॥अथ सप्तमी॥ ॥समीं राम
पणेरजति भोजनं मुषे वि दाशुषे भजति सूनरं वसु॥ दुर्गे चन ध्रियते विश्व आ पुरु जनो यो अस्य तविषीमचुक्रुधत्॥ इममयमिंद्रः पणेर्वणिजो द्रव्यलु ३२

ब्धकस्यादातुर्भोजनं धनमन्नं वा मुषे चोरयितुं समजति सम्यग्गच्छति गत्वा च दाशुषे हविर्दत्तवते यजमानाय वि भजति सूनरं शोभनमनुष्यं व
सु धनं अयमिंद्रः धनमाहृत्य यजमानाय प्रयच्छतीत्यर्थः न केवलं वणिग्धनप्रदानमात्रं किंतु पुरु पुरूणि महांति दुर्गे चन दुःखेन गंतव्ये आपद्यपि विश्वः सर्वोपि
दात्रजनः आध्रियते आस्थाप्यते यो जनः अस्येंद्रस्य तविषीं बलमचुक्रुधत् विहिताकरणादिना तस्य पणेरजतीति पूर्वशेषः यद्वा यो अस्य तविषीमचु
क्रुधत् स सर्वोपि जनो दुर्गे चन आध्रियते इंद्रेण वनेत्येकपदमध्यत्वसंप्रदायशास्त्रे॥ ॥अथाष्टमी॥ ॥सं यज्जनौ सुधनौ विश्वशर्धसाववेदिंद्रो मघवा गो
षु शुभ्रिषु॥ युजं ह्यन्यमकृत प्रवेपन्युदीं गव्यं सृजते सत्वभिर्धुनिः॥ ॥समवेतं संजानाति यद्यदा जनौ परस्परप्रसिद्धिं वंतौ सुधनौ विश्वशर्धसौ व्याप्त
बलौ बलवंतौ हा वा मघवा धनवानिंद्रो गोषु शुभ्रिषु शुचिषु शोभनासु गोषु निमित्तभूतासु अन्यमष्टारं युजं सहायमकृत तत्कृतवान् प्रवेपनी शत्रूणां प्र
वेपनवान् ईमस्मै गव्यं समूहं उत्सृजते सत्वभिर्मरुद्भिः सह धुनिः मेघानां कंपयितेंद्रः यजमानमयजमानं वा यजमानाति गोनिमित्तं त्वा सायत्वेन गोस
मूहं प्रयच्छतीत्यर्थः॥ ॥अथ नवमी॥ ॥सहस्रसामाग्निवेशिं गृणीषे शत्रिमग्न उपमां केतुमर्यः॥ तस्मा आपः संयतः पीपयंत तस्मिन् क्षत्रममवत्त्वेषमस्तु॥
॥अग्निवेश्नी सुतं शत्रुं असंख्यात धनप्रदं आ शास्ते ऋषिरंत्यर्चा प्रजापति सुतः सुधीः अर्थहे सहस्रसां अपरिमित धनप्रदं आग्निवेशिं अग्निवेशि सुतं
शत्रिं एतन्नामकं राज र्षिं गृणी षे गृणे स्तौमि हे अग्ने त्वं गमनादि गुणविशिष्टे इंद्रकीदृशं तं उपमां उपमानभूतं केतुं प्रज्ञापकं प्रख्यातमित्यर्थः॥ तस्मा आपः
संयतः सम्यग्गच्छंत्यः पीपयंत तथा प्याययंतु तस्मिन् राज्ञि क्षत्रं धनं अमवत् बलसहितं त्वेषं दीप्तिमदस्त्विति॥ इति चतुर्थस्य द्वितीये चतुर्थो वर्गः॥ छ॥ ॥

च० भा० ॥यस्ते साधिष्ठ इत्यष्टर्चं तृतीयं सूक्तं॥ आंगिरसो गोत्रः प्रभूवसुर्नाम ऋषिः। अंत्या पंक्तिः पञ्चांत परिभाषया शिष्टा अनुष्टुभः। इंद्रो देवता। यस्ते ष्टौ प्रभूव
३३ सुरांगिरसः पञ्चांतमित्यनुक्रांतं सूक्तं विनियोगो लैंगिकः॥ अभिप्लविकेषूक्थ्येषु तृतीयसवने आद्यस्तृचोऽच्छावाकस्य वैकल्पिकोऽनुरूपः सूत्रितं च॥
यस्ते साधिष्ठोवसे पुरां भिंदुर्युवा कविरिति। द्वितीयतृतीययोः स्वसराम्नोराद्योत वा अनुरूपो यस्ते साधिष्ठोवस इति षळनुष्टुभ इति सूक्तं तत्र प्रथमा॥
॥यस्ते साधिष्ठोवस इंद्र क्रतुष्ट आ भर॥ अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरं॥ ॥हे इंद्र ते तव साधिष्ठोतिशयेन साधकः क्रतुरु क्रतुलक्षणं कर्म प्रज्ञा
वास्ति तं क्रतुं नोवसे अस्मद्रक्षणाय अस्मभ्यं आ भर आहर कीदृशं तं चर्षणीसहं सर्वेषां मनुष्याणामभिभवितारं सस्निं संस्नातं शुद्धं वाजेषु संग्रामेषु दुष्टरं
अन्यैरनभिभाव्यं॥ ॥अथ द्वितीया॥ ॥यदिंद्र ते चतस्रो यच्छूर संति तिस्रः। यद्वा पंच क्षितीनामवस्तत्सु न आ भर॥ ॥हे इंद्र ते तव यत्त्वायत्ता ऊतयश्च
तस्रः चतसृषु वर्णेषु संश्रिताः संति याश्च हे शूर तिस्रः त्रिषु लोकेषु वर्तमानाः वा आहः आर्थ्यं तु यद्वा पंच क्षितीनां पंचजनसंबंधिन्य ऊतयः संति
तानि सर्वाणि अवो रक्षणानि सुष्टु नो अस्मभ्यमा भर आहरेति॥ ॥अथ तृतीया॥ ॥आ तेवो वरेण्यं वृषंतमस्य हूमहे। वृषजूतिर्हि जज्ञिष आभूभिरिंद्र तुर्वणिः॥ ॥हे
इंद्र वृषंतमस्य फलानां वर्षकतमस्य ते तव अवो रक्षणं गमनं वा वरेण्यं वरणीयं आ हूमहे आह्वयामः। हे इंद्र वृषजूतिर्वर्षगमनस्तुर्वणिस्तूर्णवनिर्हिंस
को वा त्वं आभूभिः सर्वतो भवद्भिर्व्याप्तैर्मरुद्भिः सहायैर्हि जज्ञिषे उत्पादयसि खलु ते तव आह्वयाम इति यद्वा वृषगमनः सन्नत्र अस्मद्यज्ञमागत्य फ राम
लं जज्ञिषे तस्मात्ते वो हूमह इति॥ ॥अथ चतुर्थी॥ ॥वृषा ह्यसि राधसे जज्ञिषे वृष्णि ते शवः। स्वक्षत्रं ते धृषन्मनः सत्राहमिंद्र पौंस्यं॥ ॥हे इंद्र राधसे ३३

तकर्म॥ ॥अथ द्वितीया॥ ॥आ यः सोमेन जठरमपिप्रतामंदत मघवा मध्वो अंधसः। यदीं मृगाय हंतवे महावधः सहस्रभृष्टिमुशना वधं यमत्॥ ॥
यो मघवा सोमेन जठरं स्वकीयं आ सर्वतो अपिप्रत अपूरयत मध्वो मधुरस्य अंधसः अन्नस्य सोमस्य पानेनामंदत् अतृप्यत् यदा ईं एनं मृगाय एतन्नामका
यासुराय हंतवे हंतुं महावधः महायुधः सहस्रभृष्टिरपरिमिततेजाः उशना कामयमानः शत्रुं यद्वा उशनाः सा सह वधं वज्रं यमत् उदयच्छत् तस्मा
पिप्रतमंदत॥ ॥अथ तृतीया॥ ॥यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह। अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः
कवासखः॥ ॥यो यजमानः अस्मा इंद्राय घ्रंसे अहनि अतितरां दीप्ते तस्मिन् घ्रंसे वसा इति घ्रंसं तस्मिन्नुत वा अथवा यो यजमानः ऊधनि ऊधस्त
रं भवति उन्नद्धामिति वा ऊधो रात्रिः स्नेहप्रदानरसाभ्यां ऊधःसा रात्रिश्च समत्वात् रात्रिरप्यूधः ऊधः उच्यते अहनि रात्रौ च सोमं सुनोति स
भवति द्युमान् दीप्तिमान् अह इति विनिग्रहार्थः। यः किंच शक्रः शक्तोयमिंद्रः ततनुष्टिं ततं धर्मसंततिं नुदति वाञ्छिकाम यत्ते च कामानिति ततनुष्टिः तन
नूशुभ्रं तनूशुभ्रा शोभनीयालंकारादिभिर्यस्य तं तादृशं स्वपोषकं अयज्वानं अपोहति अपरोपशक्रः पूरणः मघवा धनवान् यश्च कवासखः कुहि
तपुरुषसहायः तमपोहतीति॥ ॥अथ चतुर्थी॥ ॥यस्यावधीत्पितरं यस्य मातरं यस्य शक्रो भ्रातरं नात ईषते। वेतीद्वस्य प्रयता यतंकरो न किल्बिषादी
षते वस्व आकरः॥ ॥शक्रः शक्तोयं यस्य अयज्वनः पितरं अवधीत् हतवान् यस्य च मातरं अवधीत् यस्य च भ्रातरं अतो यस्मात् अयस्य यज्वनः सकाशात् नेष
ते न बिभेति न गच्छतीति वा किं तस्य प्रयता दत्तानि हवींषि वेति इदु कामयत एव अयज्वानं त्रिक्षयिता नियोजयतीत्यर्थः॥ यतंकरः यमनकर्ता वस्वो वसुनो धन

यजमानानामृध्यये वृषा ह्यसि फलस्य वर्षकोसि खलु यद्वा वृषा खल्वसि राधसे धनार्थं जज्ञिषे उत्पद्यसे ते त्वावो बलं वृष्णि वर्षि कृतेमनः॥ स्वक्षत्रं ते स्वा
यत्तबलं धृषत् धर्षकं विरोधिनां हे इंद्र ते पौंस्यं पुरुषत्वं सत्राहं संवहंती॥ ॥अथ पंचमी॥ ॥ त्वं तमिंद्र मर्त्यममित्रयंतमद्रिवः॥ सर्वरथा शतक्रतो निया
हि शवसस्पते॥ ॥ इंद्र त्वं मित्रयंतं शत्रुत्वमाचरंतं शत्रुं वा इंद्र त्वं तं मर्त्यं हे अद्रिवो वज्रवन्निंद्र सर्वरथा सर्वत्र व्याप्तेन रथेन सुपां सुलुगित्याका
रः॥ हे शतक्रतो शवसस्पते बलस्य पालक नियाहि नितरां गच्छ अभिभवितुं॥ ॥इति चतुर्थस्य द्वितीये पंचमो वर्गः॥ ॥अथ षष्ठी॥ ॥त्वामि
द्वृत्रहंतम जनासो वृक्तबर्हिषः॥ उग्रं पूर्वीषु पूर्व्यं हवंते वाजसातये॥ ॥ हे वृत्रहंतम अतिशयेन शत्रूणां हंतः इंद्र त्वामित् त्वामेव जनासो जनाः वृ
क्तबर्हिषः आसादितदर्भाः प्रवृत्तयज्ञा इत्यर्थः॥ उग्रं उद्गूर्णबलं पूर्वीषु बह्वीषु प्रजासु मध्ये पूर्व्यं पुरातनं संतं वाजसातये संग्रामाय हवंते आह्व
यंते॥ ॥अथ सप्तमी॥ ॥अस्माकमिंद्र दुष्टरं पुरोयावानमाजिषु॥ सयावानं धनेधने वाजयंतमवा रथं॥ ॥ हे इंद्र अस्माकं रथं रंहणस्वभावं
वा पुत्रमवरक्ष कीदृशं रथं दुष्टरं दुःखेन तरणीयं आजिषु संग्रामेषु पुरोयावानं पुरतो मिश्रयितारं सयावानं अनुचरैः सह गंतारं धनेधने
सर्वेषु वाजयंतं संग्रामं धनं वा इच्छंतं॥ ॥अथाष्टमी॥ ॥अस्माकमिंद्रेहि नो रथमवा पुरंध्या॥ वयं शविष्ठ वार्यं दिवि श्रवो दधीमहि दिवि स्तो
मं मनामहे॥ ॥हे इंद्र अस्माकं अस्मदीय एव सन्नेहि आगच्छ आगत्य च पुरंध्या प्रभूतया बुध्या नोऽस्माकं रथमवरक्ष त्वं च हे शविष्ठ अतिशयेन ब
लवन् त्वदनुग्रहात् वार्यं वरणीयं श्रवोऽन्नं कीर्तिं वा दिवि द्योतमाने त्वयि दधीमहि स्थापयाम॥ अथवा दिवि त्वयि स्तोमं स्तोत्रं मनामहे करवाम

ऋ०भा० इत्यर्थः॥ ॥इति चतुर्थस्य द्वितीये षष्ठो वर्गः॥ ॥स आगमदिति षळृचं चतुर्थं सूक्तं आंगिरसः प्रभूवसुर्ऋषिः तृतीया जगती शिष्टा अनुक्तास्त्रि
ष्टुभः इंद्रो देवता अनुक्रांतं च स आगमत्षट् तृतीया जगती विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥स आगमदिंद्रो यो वसूनां चिकेतद्दातुं दाम
३४ नो रयीणां॥ धन्वचरो न वंसगस्तृषाणश्चकमानः पिबतु दुग्धमंशुं॥ ॥स इंद्र आस्मदभिमुखं प्रत्यागमत् आगच्छतु यो देवो वसूनां धनानां कर्मणि षष्ठी
वसूनि धनानि चिकेतत् जानाति प्रदातुं कीदृशः दामनो दाता दामनो वारयीणां धनानां गमने दृष्टांतः धन्वचरो न धनुषा सहसं चरन्धानुष्क
इव वंसगो वननीयगमनः तृषाणः अत्यंततृषितः चकमानः कामयमानश्च सन् दुग्धं अभिषुतमंशुं सोमं पिबतु॥ ॥अथ द्वितीया॥ ॥आ ते ह
नू हरिवः शूर शिप्रे रुहत्सोमो न पर्वतस्य पृष्ठे॥ अनु त्वा राजन्नर्वतो न हिन्वन्गीर्भिर्मदेम पुरुहूत विश्वे॥ ॥हे इंद्र हे हरिवः हरिभ्यां तद्वन् शूर ते
तव हनू हननसाधने यद्यपि शिप्रप्रवचनः तथापि पुनः शिप्रावचनात् गौणो वर्गतयः उक्तरूपे संहते वा शिप्रे आरुहत् आरोहतु प्राप्नोतु सोमोस्मद्द
त्तः पर्वतस्य पृष्ठे उपरि प्रदेशे सोमो न तत्र यथा विस्तंभेण प्रसरति तद्वत् हे राजन् राजमानेंद्र त्वा त्वामनु त्वया सह तृतीयार्थे इत्यनोः कर्मप्रवचनीयत्वे
विश्वे वयं अर्वतो न अश्वानिव ऋत्विजादिभिर्गीर्भिः स्तुतिभिर्हिन्वन् हिन्वंतः प्रीणयंतः सतो मदेम हृष्येम हे पुरुहूत बहुभिर्वाहूतेंद्र॥ ॥अथ तृतीया॥॥
चक्रं न वृत्तं पुरुहूत वेपते मनो भिया मे अमतेरिदद्रिवः॥ रथादधि त्वा जरिता सदावृध कुविन्नु स्तोषन्मघवन्पुरूवसुः॥ ॥हे पुरुहूत हे अद्रिवः वज्रिवन्निं राम
द्र मे मनः अमतेरिति दारिद्र्याद्दस्मात्तुर्वा सकाशात् भिया भीत्या वेपते कंपते वृत्तं चक्रं न भ्रमो वर्तमानं चक्रमिव यस्मादेवं तस्मात् रथादधि उपरि स्थितं त्वां हे स ३४

दाशुषा सर्वदा वर्धमान हे मघवन्निंद्र जरिता स्तोता पुरूवसुः हे ऋषिः कुवित् बहु नु क्षिप्रं स्तोषत् स्तोषयति स्तूयात् अत्र कुविद्योगेपि आख्यातस्य वकुल
अहणान्निपातः॥ ॥ अथ चतुर्थी॥ ॥ एष ग्रावेव जरिता त इंद्रेयर्ति वाचं बृहदाशुषाणः॥ प्रसव्येन मघवन् यंसि रायः प्रदक्षिणिद्धरिवो मा विवेनः॥ ॥ एव
जरिता गरिता स्तोता ग्रावेव अभिषवावसरे यथा रवं जनयति तद्वत् हे इंद्र ते तुभ्यं वाचं स्तुतिं इयर्ति प्रेरयतीत्यर्थः॥ बृहत् महत् हे अभूत फलं आशुषाणः
आनुसेभमास्तन् हे मघवन् सव्येन हस्तेन रायो धनानि प्रयंसि प्रयच्छसि दक्षिणित् दक्षिणेनापि प्रयंसीति शेषः मा विवेन विगतकामो मा कार्षीः॥ ॥ अथ
पंचमी॥ ॥ वृषा त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्यां॥ स नो वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रिन् भरे धाः॥ ॥ हे इंद्र त्वा त्वां वृषा वर्षित्री द्यौः
द्योतयित्री स्तुतिः द्योतते दीप्यते स्तुत्यर्थस्येदं रूपं वृषणं कामानां वर्षकं त्वां वर्धयतु वृषाभ्यां हरिभ्यां सेक्तृभ्यां वहसे यद्वा प्रत्यूह्यसे हे सुशिप्र शोभनह
नो वृषक्रतो वर्षणकर्मन् हे वज्रिन् वज्रयुक्तेंद्र स त्वं वृषा वृषरथश्च सन् नो स्मान् भरे संग्रामे भरं भवतीति यज्ञे वा धाः धारय॥ ॥ अथ षष्ठी॥ ॥ यो रोहितौ वा
जिनौ वाजिनीवान् त्रिभिः शतैः सचमानावदिष्ट॥ यूने समस्मै क्षितयो नमंतां श्रुतरथाय मरुतो दुवोया॥ ॥ इयं श्रुतरथस्य राज्ञो दानस्तुतिः यो राजा
वाजिनीवान् अन्नवान् श्रुतरथो रोहितौ रोहितवर्णौ वाजिनौ वेजनवंतौ अश्वौ त्रिभिः शतैः गवां धनानां वा तत्संख्याभिः सचमानौ संगच्छमानौ अदिष्ट
दात् हे ऋत्विजः ते वो लुङि रूपं यूने सर्वत्र मिश्रयित्रे नित्यतरुणाय वा अस्मै श्रुतरथाय क्षितयः सर्वाः प्रजाः दुवोया तत् इत्येकवचनस्य याजादेशः परिचर्य
या सं नमंतां प्रणता भवंतु सेवंतामित्यर्थः॥ हे मरुतः इति इंद्र सहायभूतानां मरुतां संबोधनं॥ ॥ इति चतुर्थस्य द्वितीये सप्तमो वर्गः॥ ॥ स भानुनेति

पं० भा०
३५

पंचर्चं पंचमं सूक्तं ॥ अत्रेरार्षं त्रैष्टुभमैंद्रं संभानुपंचार्चेत्यनुक्रमणिका विनियोगो लैंगिकः ॥ ॥ तत्र प्रथमा ॥ ॥ सं भानुना यतते सूर्यस्याजुह्वानो घृत
पृष्ठः स्वंचाः ॥ तस्मा अमृध्रा उषसो व्युछान्य इंद्राय सुनवामेत्याह ॥ ॥ सूर्यस्य भानुना तेजसा सह आजुह्वानः सर्वत्राहूयमानः कर्मकर्तृ प्रत्ययः घृत
पृष्ठः प्रदीप्तज्वालः घृतयुक्तः पृष्ठप्रदेशो वा स्वंचाः स्वंचनः शोभनगमनः एवंभूतो वा अग्निः संयतते सम्यक् प्रयत्नं करोति उदयकाले ह्यग्नयः प्रज्वाल्यंते त
स्मात्कारणात् यो यजमानः इंद्राय सुनवामेत्याह ब्रूते अध्वर्युं प्रति तस्मै यजमानाय अमृध्राः अहिंसिताः उषसो व्युछान् व्युछंतु उदयकाले अग्निः
प्रज्वलितः तस्मात् सोमयागं कुर्म इति यो ब्रूते तस्य सुदिनानि भवंतीत्यर्थः ॥ ॥ अथ द्वितीया ॥ ॥ समिद्धाग्निर्वनवत्स्तीर्णबर्हिर्युक्तग्रावा सुतसोमो
जराते ॥ ग्रावाणो यस्येषिरं वदंत्ययदध्वर्युर्हविषाव सिंधुं ॥ ॥ समिद्धाग्निः प्रदीप्ताग्निः स्तीर्णबर्हिः प्रस्तृतदर्भो यं यजमानो वनवत् संभजते युक्तग्रावा
नियुक्ताभिषवपाषाणः सुतसोमोभिषुतसोमो जराते जरते स्तोति यस्याध्वर्योरग्रे ग्रावाणो भिषवसाधना इषिरं एषणीयं गमनवन्तीलं वा ग्रावा वदंति
सोध्वर्युर्हविषा सहावायत् सिंधुं यन्नेजनीरवगछति ॥ ॥ अथ तृतीया ॥ ॥ वधूरियं पतिमिछंत्येति य ईं वहाते महिषीमिषिरां ॥ आस्य श्रवस्याद्रथ आ
च घोषात्पुरू सहस्रा परि वर्तयाते ॥ ॥ इयं वधूः इंद्रस्य पत्नी पतिमिछंती स्वप्रियं यज्ञगमनाय प्रवृत्तमिछंत्येति अनुगछति य इंद्र इमां महिषीं वहाते
वहति इषिरां गमनवती अस्येंद्रस्य रथः आ अर्वागस्मदभिमुखं श्रवस्यात् अन्नमिछतीत्या च घोषात् आघुष्यातिशब्दयति पुरु अत्यधिकं सहस्रा स
हस्राणि धनानि परि परितो वर्तयाते वर्तयति प्रापयति श्रवस्यादा च घुष्यादितिच ॥ ॥ अथ चतुर्थी ॥ ॥ न स राजा व्यथते यस्मिन्निंद्रस्तीव्रं सोमं पिबति

राम
३५

ऋ० भा० दुस्तरं अनभिभाव्यं उक्तलक्षणं प्रथते ॥ ॥ अथ तृतीया ॥ ॥ शुष्मासो ये ते अद्रिवो मेहना केतसापः ॥ उभा देवावभिष्टये दिवश्च ग्मश्च राजथः ॥ ॥ हे अद्रिवो
वज्रवन्निंद्र ते त्वदीयाः ये शुष्मासो बलभूता मरुतः संति कीदृशाः ते मेहना मंहनीयाः केतसापः प्रज्ञापकमंतरिक्षं वा स्पृशंत उभौ देवौ त्वं च मरुद्गणश्चे
३६ मौ युवां दिवश्च द्युलोकात् ग्मश्च भूमेः सकाशात् अभिष्टये अभितो गमनाय राजथः ईशाथे ॥ ॥ अथ चतुर्थी ॥ ॥ उतो नो अस्य कस्य चिद्दक्षस्य तव वृत्रह
न् ॥ अस्मभ्यं नृम्णमा भरास्मभ्यं नृमणस्यसे ॥ ॥ उतो अपि च हे वृत्रहन् इंद्र नोस्मभ्यं कस्य चिदनिर्दिष्टस्य प्रवृद्धस्य दातुर्वा स्यतव स्वभूतेभ्योस्मभ्यं
पुनः श्रुतिरादरार्था नृम्णां नृमणं धनमा भर आहर हे इंद्र यत स्त्वमस्मभ्यं नृमणस्यसे धनमिच्छसि ॥ ॥ अथ पंचमी ॥ ॥ नू त आभिरभिष्टिभिस्तव श
र्मञ्छतक्रतो ॥ इंद्र स्याम सुगोपाः शूर स्याम सुगोपाः ॥ ॥ हे शतक्रतो इंद्र ते तवाभिरभिष्टिभिः अभिगमनैर्नु शीघ्रं ससृध्या भवेमेति शेषः ॥ हे इंद्र
तव शर्मन् शर्मणि सुखे सति सुगोपाः स्याम भवेम हे शूर तव शर्मणि सुगोपाः शोभनरक्षा भवेम पुनरुक्तिरादरार्था ॥ ॥ इति चतुर्थस्य द्वितीये नवमो
वर्गः ॥ ९ ॥ ॥ यदिंद्र चित्रेति पंचर्चं सप्तमं सूक्तं ॥ अत्रेरार्षमैंद्रं मंत्यापंक्तिः शिष्टाः पंक्त्यंतपरिभाषया अनुष्टुभः ॥ यदिंद्र पंक्त्यंतमित्यनुक्रमणिका
आभिप्लविकेषूक्थ्येषु तृतीयसवने आद्यस्तृचोछावाकस्य वैकल्पिकस्तोत्रियः सूत्रितं ॥ यदिंद्र चित्र मेहनास्तीत्यसाधिष्ठावस इति ॥ ॥ तत्र प्रथमा ॥ ॥ राम
॥ यदिंद्र चित्र मेहनास्ति त्वादातमद्रिवः ॥ राधस्तन्नो विदद्वस उभयाहस्त्या भर ॥ ॥ हे इंद्र चित्र चायनीय हे अद्रिवो वज्रवन्यत्ते मेहना मंहनीयं त्वा
दातं त्वया दातव्यं राधो धनमस्ति तद्धनं हे विदद्वसो लब्धधन इंद्र नोस्मभ्यं उभयाहस्ति उभाभ्यां हस्ताभ्यां आ भर आहर ॥ अत्र यदिंद्र चित्र चायनीयं मंह ३६

नीयं धनमस्तीत्यादि निरुक्तं द्रष्टव्यं ॥ ॥ अथ द्वितीया ॥ ॥ यन्मन्यसे वरेण्यमिंद्र द्युक्षं तदा भर ॥ विद्याम तस्य ते वयमकूपारस्य दावने ॥ ॥ हे इंद्र यत्
द्युक्षं धनमन्नं वा वरेण्यं वरणीयं मन्यसे तद्द्युक्षं अस्मभ्यं आ भर आहर ते तव संबंधिनो वयं तस्य तादृशस्योक्तलक्षणस्याकूपारस्य अकुत्सितः पारो नो
यस्य तादृशस्यास्य दावने दाने विद्याम स्याम ॥ वाजपेये अतिरिक्तोक्थ्ये यत्ते दित्स्वित्येषा सूत्रितं च ॥ यत्ते दित्सु प्रराध्यं वामिंद्रेव सत्यत इति ॥ ॥ सेषा तृती
या ॥ ॥ यत्ते दित्सु प्रराध्यं मनो अस्ति श्रुतं बृहत् ॥ तेन दृळ्हा चिदद्रिव आ वाजं दर्षि सातये ॥ ॥ हे इंद्र ते तव यद् दित्सु दानेच्छु प्रराध्यं प्रकर्षेण साध्यं श्रुतं वि
श्रुतं बृहत् महत् मनो अस्ति तेन मनसा हे अद्रिवो हे वज्रवन्निंद्र दृळ्हा चित् दृढमपि वाजमपि अन्नमा दर्षि आदारयसि सातये तल्लंभजनाय लाभाय वा ॥
॥ ॥ अथ चतुर्थी ॥ ॥ मंहिष्ठं वो मघोनां राजानं चर्षणीनां ॥ इंद्रमुप प्रशस्तये पूर्वीभिर्जुजुषे गिरः ॥ ॥ मघोनां हविर्लक्षणधनवतां वो युष्माकं मंहिष्ठं अतिश
येन पूज्यं चर्षणीनां मनुष्याणां राजानं इंद्रं उप उपेत्य प्रशस्तये प्रशंसितुं पूर्वीभिः पुरातनीभिः नित्याभिर्वाग्भिर्गिरः स्तोतारो जुजोष सेवंते ॥ ॥ अथ पंचमी ॥ ॥
॥ अस्मा इत्काव्यं वच उक्थमिंद्राय शंस्यं ॥ तस्मा उ ब्रह्मवाहसे गिरो वर्धंत्यत्रयो गिरः शुंभंत्यत्रयः ॥ ॥ अस्मा इत् अस्मा एवेंद्राय काव्यं कवेः स्तोतुः संबंधि
यद्वा उशब्देन शब्दनीयं वचो वाचं उक्थं शस्त्रं शंस्यं शंसनीयं यस्मादेवं तस्मादिंद्रायैव ब्रह्मवाहसे परिवृढस्य स्तोत्रस्य वाहकाय गिरः स्तुतीः अत्रयो गि
रो वर्धयंति वर्धयंति ॥ अत्रयो गिरः शुंभं शुंभंति दीपयंति पुनरुक्तिरादरार्था ॥ ॥ इति चतुर्थस्य द्वितीये दशमो वर्गः ॥ ॥ आ याह्यद्रिभिरिति नवर्चमष्टमं
सूक्तं ॥ अत्रेयमनुक्रमणिका ॥ आ याहि नव स्वर्भानुर्गायंसौ त्रिष्टुभ्य ध्या चसासौरी न दादीति हासस्त्रिः कर्मत्वादत्रिर्दैवतेति ॥ इत्यनस्य सूक्तस्य ऋषिश्च

ऋ०भा० च्यस्मादिति परिभाषया त्रिष्टुप् ॥ आद्यास्तृच उष्णिहः पंचमीनवम्यावनुष्टुभौ शिष्टाश्चतस्रस्त्रिष्टुभः ॥ अत्रेतूयमानत्वात्पच्छ्याद्या अत्रिदेवताकाः
अत्र्यार्षेया अश्वपंचमी सूर्यदेवत्या त्रिष्टुप् ऐंद्र्यः ॥ दशरात्रे तृतीयेहनि प्रउगशस्त्रे आद्यास्तृच ऐंद्रः पंचमः ॥ सूत्रितं ॥ आ याह्यद्रिभिः सुतं सजूर्विश्वेभिर्द्वेभि
३७ रिति महाव्रते प्येषोस्मि हन्त राज्ञीनावर्यते च ॥ ॥ तत्र प्रथमा ॥ ॥ आ याह्यद्रिभिः सुतं सोमं सोमपते पिब ॥ वृषन्निंद्र वृषभिर्वृत्रहंतम ॥ ॥ हे इंद्र आयाहि
अस्मद्यज्ञमागच्छ आगत्य च हे सोमपते सोमस्य स्वामिन्निंद्र अद्रिभिर्ग्रावभिः सुतमभिषुतं सोमं पिब हे वृषन् फलस्य वर्षयितः वृत्रहंतम तिशा
येन शत्रूणां हंतः तम वृषभिर्वर्षकैर्मरुद्भिः सहायाहि पिबवा ॥ ॥ अथ द्वितीया ॥ ॥ वृषा ग्रावा वृषा मदो वृषा सोमो अयं सुतः ॥ वृषन्निंद्र वृषभिर्वृत्र
हंतम ॥ ॥ ग्रावा अभिषवसाधनः पाषाणो वृषा वर्षकः सोमरसस्य फलस्य वा मदः सोमपानेन जनितः वृषा वर्षकः अयं सुतोभिषुतः सोमो वृष
तं सोमं वृषभिः सह पिब ॥ ॥ अथ तृतीया ॥ ॥ वृषा त्वा वृषणं हुवे वज्रिंचित्राभिरूतिभिः ॥ वृषन्निंद्र वृषभिर्वृत्रहंतम ॥ ॥ हे वज्रिन् वज्रवन्निंद्र वृषा
सोमरसस्य सेक्ताहं वृषणं त्वां हुवे आह्वयामि किमर्थं चित्राभिश्चायनीयाभिः ऊतिभिरक्षाभिः निमित्तभूताभिः विशिष्टगते ॥ ऋजीषी वज्रीत्येषा ब्रा
ह्मणाच्छंसिनः आस्त्रेया याज्या ऋजीषी वज्री वृषभस्तुराषाळिति याज्येति हि सूत्रितं ॥ ॥ सैषा चतुर्थी ॥ ॥ ऋजीषी वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा
सोमपावा ॥ युक्त्वा हरिभ्यामुप यासदर्वाङ् माध्यंदिने सवने मत्सदिंद्रः ॥ ॥ ऋजीषी सवनद्वयेभिषुतस्य गतसारस्य सोमस्य तृतीयसवने आप्यायाभि राम
षुतोस्ति स ऋजीषः सोमः सोस्यास्तीत्यृजीषी वज्री वज्रवान् वृषभो वर्षिता तुराषाट् तुराणां त्वरमाणानां शत्रूणां सोढा शुष्मी बलवान् राजा ईश्वरः स ३७

गोसखायं ॥ सं सत्वभिरजति हंति वृत्रं क्षेति क्षितीः सुभगो नाम पुष्यन् ॥ ॥ स राजा न व्यथते व्यथितो न भवति यस्मिन् राजनि तदीये यज्ञे इंद्रस्तीव्रं मदजनकं
सोमं पिबति गोसखायं विकारे प्रकृतिशब्दः क्षीरादिमिश्रणावंतं स राजा सत्वभिः सत्वभिरनुचरैः आसर्वतः अजति गच्छति हंति च वृत्रं पापं वैरिणं क्षेति गच्छ
ति क्षितीः प्रजाः अथवा क्षितीर्निवासान् निवसेत् सुभगः शोभनसुखो नाम नामकं धनं इंद्रस्य स्तोत्रं वा पुष्यन् पोषयन् ॥ ॥ अथ पंचमी ॥ ॥ पुष्यात्क्षेमे अभि
योगे भवात्यभे वृत्तौ संयती सं जयाति ॥ प्रियः सूर्ये प्रियो अग्ना भवाति य इंद्राय सुतसोमो ददाशत् ॥ ॥ पुष्यात्पोषयेत् संध्यादीन् क्षेमे प्राप्तस्य रक्षणे
योगे अलब्धस्य प्राप्तौ वा अभिभवाति भवति आसीत्यनर्थको धातुरर्थानुवादी वा प्रभुर्भवतीत्यर्थः तथा उभे वृत्तौ वर्तमाने संभूचती नियते अहोरात्रे संजयाति स
म्यग्जयति ते सुखकरे अस्य स्यातामित्यर्थः किं च स प्रियो भवाति सूर्ये तथा अग्ना अग्नौ प्रियो भवति य इंद्राय सुतसोमो ददाशत् ॥ ॥ इति चतुर्थस्य द्विती
येष्टमो वर्गः ॥ ९ ॥ ॥ उरोष्ट इति पंचर्चं षष्ठं सूक्तं । अत्रेरार्षमानुष्टुभमैंद्रं उरोरनुष्टुबित्यनुक्रांतं विनियोगो लैंगिकः ॥ ॥ तत्र प्रथमा ॥ ॥ उरोष्ट इं
द्र राधसो विभ्वी रातिः शतक्रतो ॥ अधा नो विश्वचर्षणे द्युम्ना सुक्षत्र मंहय ॥ ॥ हे इंद्र शतक्रतो बहुकर्मन् ते तव उरोः प्रभूतस्य राधसो धनस्य रातिर्दानं
विभ्वी महती अध अतः कारणात् नोस्मभ्यं हे विश्वचर्षणे सर्वस्य द्रष्टः सुक्षत्र शोभनधनेंद्र क्षत्रमिति धननाम द्युम्नानि धनानि मंहय ॥ ॥ अथ द्वितीया ॥ ॥
॥ यदीमिंद्र श्रवाय्यमिषं शविष्ठ दधिषे ॥ पप्रथे दीर्घश्रुत्तमं हिरण्यवर्ण दुष्टरं ॥ ॥ हे इंद्र शविष्ठ अतिशयेन बलवन् यत् इषमन्नं श्रवाय्यं श्रवणीयं सर्वतो
दधिषे धारयसि ददासि वा । इषशब्दो नपुंसकलिंगोप्यस्ति हे हिरण्यवर्ण इंद्र तदन्नं पप्रथे प्रथते कथं दीर्घश्रुत्तमं अतिशयेन श्रवणीयतमं सर्वत्र कीर्तिमित्यर्थः

वृषस्य वृत्रहा वृत्रहा वृत्रस्य हंता सोमपावा सोमरसस्य पाता एवं महानुभाव इंद्रो हरिभ्यां युक्तो रथे योयोजयित्वोपयासत् उपयच्छतु अर्वाग् अस्मदभिमुखं
आगच्छतु माध्यंदिने सवने मत्सत् माद्यतु सोमेन इंद्रः। ॥ अथ पंचमी ॥ ॥ यत्त्वा सूर्य स्वर्भानुस्तमसा विध्यदासुरः। अक्षेत्रविद्यथा मुग्धो भुवनान्यदी
धयुः॥ ॥ इदमादिचतुर्भिर्मंत्रैरत्रीणां कर्म कीर्त्यते। हे सूर्य प्रेरक देव त्वा त्वां यद्यदा आसुरः असुरस्य प्राणापहर्तुरस्य यद्वा पुत्रः स्वर्भानुसंज्ञकस्त
मसा मायानिर्मितेन अविध्यत् आवृणोदित्यर्थः। तदा भुवनानि सर्वाणि अदीधयुः दृश्यंते यथा तत्रस्थः सर्वो जनो अक्षेत्रवित् स्वस्य स्थानमजान
न् मुग्धो मूढो भवति तथा॥ ॥ इति चतुर्थस्य द्वितीये एकादशो वर्गः॥ ११॥ ॥ अथ षष्ठी॥ ॥ स्वर्भानोरध यदिंद्र माया अवो दिवो वर्तमाना अवा
हन्। गूळ्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाविंददत्रिः॥ ॥ अध अथ ज[illegible]तमो घ्नानंतरं स्वर्भानोरसुरस्य यत् या मायाः संति कीदृश्यस्ताः दि
वो द्योतमानादादित्यात् अवः अवस्तात् वर्तमानाः तदुपरि तिरोधानासामर्थ्यादिति भावः। हे इंद्र ताः सर्वा अवाहन् आवहंसि अथा चेरवपसोक्षसा
दः तमसांधकारेण अपव्रतेन अपगतकर्मणा गूळ्हं सूर्यं अंधकारस्यावरणरूपत्वादपव्रतत्वं तथाविधं तुरीयेण ब्रह्मणा ग्राव्णो ब्रह्मेत्यनेना
त्रिरविंदत् लब्धवान् आवरणापगमोपायं निवारणं वा सूर्यमिति पूर्वमंत्रापेक्षयास्य तुरीयत्वं एकैकं मायां क्रमेकेकेन मंत्रेणापनोद्य चतु
र्थेन मंत्रेण निलीनं तमोप्यनुददित्यर्थः॥ ॥ अथ सप्तमी॥ ॥ मा मामिमं तव संतमत्र इरस्या द्रुग्धो भियसा नि गारीत्। त्वं मित्रो असि सत्यराधास्तौ
मेहावतं वरुणश्च राजा॥ ॥ इदं सूर्यवाक्यं। हे अत्रे मामा मिमं ईदृगवस्थं मा तव संतं त्वदीयं भूतमिरस्या अन्नेच्छया द्रुग्धा द्रोग्धा असुरो भियसा भयज

ऋ० भा०

३९

नकेनन्नमसा मा मा निगारीत् मा गिरत् किंच हे मित्र त्वं मित्रोऽसि प्रमीतेः सकाशात् त्राता भवसि सत्यराधाः। सत्यधनः अश्वै तौ राजा वरुणश्च त्वं च तौ युवां
मामभिहावतं रक्षतं यद्वा वा अत्रिरेवमिन्द्रमुच्यते वरुणश्च युवां ॥ अथाष्टमी ॥ ॥ ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन् ॥
अत्रिः सूर्यस्य दिवि चक्षुराधात् स्वर्भानोरप माया अघुक्षत् ॥ ब्रह्मा ब्राह्मणोऽत्रिः। ग्राव्णः। अभिषवसाधनानि युयुजानः। युञ्जन् इन्द्रार्थं सोमम
भिषुण्वन्नित्यर्थः। तथा कीरिणा विक्षिप्यते स्तुतिः कीरिः स्तोत्रं तेन देवान् सपर्यन् पूजयन् किंच नमसा अन्नेन हविर्लक्षणेन नमस्कारेण वा उपशिक्ष
न् शिक्षतिर्दानार्थः तत्प्रसाधनेन वर्तते प्रसाधयन्नेव मुक्तेः। प्रसाधने। सूर्यस्य सर्वप्रेरकस्य चक्षुः। सर्वस्य ख्यापकं मण्डलं दिवि अन्तरिक्षे अधात् नि
स्तमस्कं कृतवानित्यर्थः तदेव स्पष्टयति ॥ स्वर्भानोरेतन्नामकस्यासुरस्य माया स्वयमप्यामोहयती परांस्तथा कुर्वती माया इत्युच्यते ताः हृत्त्रीर्मायाः।
यत्तुरीयेण ब्रह्मणेत्युक्तं तदेतदुक्तं यत्तुरीयं ब्रह्म स्वयमेवात्रिः सहायः। इन्द्रोऽपाघुक्षत् अपजगोपयत् न्यवारयदित्यर्थः। ॥ अथवा तृतीयपाद एवार्थो
व्याख्येयः। ॥ सूर्यस्य दिवि पूर्वमावृते प्रकाशे तद्पोधस्वकीयं चक्षुराधात् निवारणं तेजः। संस्थापितवानित्यर्थः स्वर्भानुमायया सूर्यस्य आवृतिहि
र्द्विविके समाम्नाता स्वर्भानुर्ह वा आसुरः सूर्यं तमसा विध्यत् तस्मै देवाः प्रायश्चित्तिमैच्छन् तस्य यत्प्रथमं तमोऽपाघ्नन् सा कृष्णाविरभवत् यद्द्वितीयं
सा फल्गुनी यत्तृतीयं सा बलक्षी यदध्यस्थाद्पाकृंतन्नित्यादि ॥ ॥ अथ नवमी ॥ ॥ अत्रिकृतं सामर्थ्यमनुवदति ॥ ॥ यं वै सूर्यं
स्वर्भानुस्तमसाविध्यदासुरः। ॥ अत्रयस्तमन्वविंदन्नह्यन्ये अशक्नुवन् ॥ ॥ अन्वविदन् इन्द्रार्थं सोमयागदेवता स्तुतिनमस्कारैः। अनुके

राम

३९

मेणाईषदीषत्तमो विरुध्यद्दृष्टिं लब्धवंतं तद्दस्यर्थः॥ यं वै सूर्यमिति निगदव्याख्येषा॥ ॥इति चतुर्थस्य द्वितीये द्वादशो वर्गः॥१२॥ ॥को नु वामिति विंश
त्यृचं नवमं सूक्तं। भौमस्यात्रेरार्षं षोडश्यां सप्तदश्यां वा अतिजगत्यौ विंश्येकपदा विराट् शिष्टाः सप्तदश त्रिष्टुभः॥ विश्वे देवा देवता। तथा चानुक्रांतं॥
को नु विंशतिर्वैश्वदेवं चैतत्सोलश्यावृतिजगत्यौ विंश्येकपदेयमिति विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥को नु वां मित्रावरुणावृतायन्दिवो वा
महः पार्थिवस्य वा दे॥ ऋतस्य वा सदसि त्रासीथां नो यज्ञायते वा पशुषो न वाजान्॥ ॥हे मित्रावरुणौ देवौ वां युवाभ्यां देदातुं को नु कः खलु यजमा
नः ऋतायन् यज्ञमिच्छन् यज्ञं कुर्यादिति शेषः॥ तस्मात्स्वरूपेयेव दिवः सदसि द्युलोकसंबंधिनि स्थाने महो महतः पार्थिवस्य सदसि ऋतस्योदकस्यां
तरिक्षस्य सदसि तथैतेषु त्रिषु स्थानेषु नो अस्मान् त्रासीथां रक्षतं वा यज्ञ इच्छार्थे किं च यज्ञायते महयं पशुषो न वाजान् पशुषु सीदंतो वा म
न्त्वा निक्षीरदध्यादीनि वा तानि यथा प्रयच्छथ तद्वद्दत्तमिति। यद्वा। नशिरिच्छार्थे पशुषः पशून् वाजान् अन्नानि दत्तमित्यर्थः॥ ॥अथ द्वितीया॥ ॥ते नो मि
त्रो वरुणो अर्यमायुरिंद्र ऋभुक्षा मरुतो जुषंत। नमोभिर्वा ये दधते सुवृक्तिं स्तोमं रुद्राय मीळ्हुषे सजोषाः॥ ॥ते मित्रादयो देवाः नोऽस्माकं सु
वृक्तिं स्तोमं शोभनं पापाद्विवर्जनवत् स्तोत्रं नमोभिर्हविर्भिर्जुषंत सेवंतां ये दधते धारयंति ऋक्षलक्षणं स्तोत्रं देवाः हविर्धाः स्तोत्रभाजो ह विभाजश्चते
त्रस्तोत्रभाज उच्यंते आयुः सततगतिर्वायुरुच्यते। अथ मरुत एव वियुत्य विशेष्यंते रुद्राय मीळ्हुषे तृतीयार्थे चतुर्थी रुद्रेण सह सजोषाः सहप्री
यमाणाः तेषां पुत्रत्वादिति भावः। के च न रुद्राय सजोषाः इत्येतत् मित्रादिसर्वदेवताविशेषणमिति कथयंति॥ ॥अथ तृतीया॥ ॥आ वां येष्ठाश्विना हु

च०भा०
३९

चध्ये वातस्य पत्मन्नथ्यास्य पृष्ठे ॥ उत वा दिवो असुराय मन्म प्रांधांसीव यज्यवे भरध्वं ॥ ॥ अनयाश्विनौ रुद्राश्चोच्यंते ॥ हे अश्विनौ युष्मा कामानां
यंतं तमो वां युवां वातस्य पत्मन् धर्मसाम्यात् धर्मिग्रहणं वायुसमानगतेरश्वस्य गमने प्राप्ते रथ्यास्य रथस्य पृष्ठे च निमित्ते सति हुवे आह्वयामि धे
आह्वातुं प्रभवामि अथवा वायुवदश्वयोः शीघ्रगमनं तत्साधनं रथस्य पोषे च निमित्ते सति उत वा किंचेत्यर्थः दिवो द्योतमानाय चतुर्थ्यर्थे षष्ठी असु
राय प्राणापहर्त्रे रुद्राय यद्वा द्युलोकसंबंधिने असुराय प्राणदात्रे सूर्याय वायवे वा यज्यवे यागसाधकाय मन्म मननीयं स्तोत्रं प्रभरध्वं संपादय
त हे ऋत्विजः अंधांसीव अन्नानि हविर्लक्षणानि हवींषि स्तोत्रं चेत्यर्थः ॥ ॥ अथ चतुर्थी ॥ ॥ प्र सक्षणो दिव्यः कण्वहोता त्रितो दिवः सजोषा
वातो अग्निः ॥ पूषा भगः प्रभृथे विश्वभोजा आजिं न जग्मुराश्वश्वतमाः ॥ ॥ अत्रालिंगोक्तदेवताः प्रजग्मुरिति संबंधः सक्षणो यज्ञं सेवमानाः श
त्रूणां सोढा वा दिव्यो दिवि भवः कण्वहोता कण्वा ऋषयः मेधाविनो वा होतार आह्वातारो यस्य स तथोक्तः त्रितः त्रिषु क्षित्यादिस्थानेषु तायमा
नो दिवः सूर्येण सह सजोषाः समानप्रीतिर्वा वातः उत्कृष्टलक्षणको वायुः अग्निः पूषा पोषक एतन्नामा भगश्च प्रभृथे प्रभरणे यज्ञे
उक्ताः सर्वे देवाः विश्वभोजा विश्वरक्षकाः कृत्स्नात्मारो वा आश्वश्वतमाः प्रकृष्टगमनाश्ववतां श्रेष्ठाः संतः आजिं न संग्राममिव प्रजग्मुः प्रगच्छे राम
ति ॥ ॥ अथ पंचमी ॥ ॥ प्र वो रयिं युक्ताश्वं भरध्वं राय एषेऽवसे दधीत धीः ॥ सुशेव एवैरौशिजस्य होता ये व एवा मरुतस्तुराणां ॥ ॥ हे मरुतो यो ३९
यूयं रयिं धनं युक्ताश्वं अश्वसहितं अश्वयोग्यं पुत्रावाप्तं भरध्वं संपादयत रायो धनानि गवाश्वादिलक्षणानि एषे प्राप्तुं अवसे अव इत्यन्ननामत्र

च०भा० ॥ अथाष्टमी ॥ ॥ अभि वो अर्चे पोष्यावतो नॄन्वास्तोष्पतिं त्वष्टारं रराणः। धन्या सजोषा धिषणा नमोभिर्वनस्पतीँरोषधी राय एषे ॥ ॥ अहं पोष्यावतो
४० बहुपोष्यजनयुक्तान्नॄन् नृन्कर्मनेतॄन्वो युष्मानभ्यर्चे अभिपूजयामि स्तोमीत्यर्थः केन स्तोमेनेत्युच्यते वास्तोष्पतिं त्वष्टारं रराणः स्तोत्रादिभिः क्रीडन्
हविर्ददद्वाहं धन्या धनकरी सजोषाः इतरदेवैः सह गच्छंती प्रापयंती वा धिषणा वाङ्मे तत्त्वाग्देवतायै तादृक्तीयार्थे प्रथमा उक्तलक्षणो वाणी वनस्प
तीनोषधीश्च नमोभिः स्तोत्रैः सहार्च इति संबंधः किमर्थं राय एषे धनं प्राप्तुं ॥ ॥ अथ नवमी ॥ ॥ तुजे नस्तने पर्वताः संतु स्वैतवो ये वसवो न वीराः। पनित आ
प्त्यो यजतः सदा नो वर्धान्नः शंसं नर्यो अभिष्टौ ॥ ॥ पर्वताः पर्ववंतः पूरणवंतो वा मेघाः तने विस्तृते तुजे दाने पुत्रादानेनेति पुत्रनामसु षष्ठ्यर्थे चतुर्थी
पुत्रदान इत्यर्थः अथवा नस्तुजे पुत्रे तनने तस्मिन् स्वैतवः शोभनगमनाः संतु भवंतु कीदृशास्ते ये वसवः अगंतो वासयितारः वीरान् वीरा इव क्रियं
पनितः स्तुतः आप्त्यः आप्तव्यः सर्वैर्यजतो यजनीय आदित्यः सदा नः सर्वदा नः शंसं अस्माकं स्तुतिं नर्यो नरेभ्यो हितो देवः अभिष्टौ अभित एषणे
अभिगमने वा सति वर्धात् वर्धयेत् ॥ ॥ अथ दशमी ॥ ॥ वृष्णो अस्तोषि भूम्यस्य गर्भं त्रितो नपातमपां सुवृक्ति। गृणीते अग्निरेतरी न शूषैः शोचिष्केशो
नि रिणाति वना ॥ ॥ भूम्यस्य भूमिरंतरिक्षं तदर्हस्य तादृशस्य वृष्णो वर्षकस्य पर्जन्यस्य अथवा भूम्यो यं भूमेर्वार्हः तद्वृष्टिप्रदानात् तादृशस्य मे राम
घस्य गर्भं गर्भस्थानीयं अपां नपातं रक्षकं वैद्युतमग्निं सुवृक्ति स्तोत्रकर्मैतत् शोभनपापादिवर्जनवता स्तोत्रेण अस्तोषि स्तुतवानहं सुचितः स्तीर्ण ४०
तमः त्रिषु स्थानेषु अन्येषु चित्रापनेषु तायमानो अग्निरेतरीगंतरि मिथि शूषैः सुखकरैः रश्मिभिः नगृणीते नगरणं कुरुते न कुध्यतीत्यर्थः ॥ ॥ इति चतु

र्थस्य द्वितीये चतुर्दशो वर्गः ॥ १४ ॥ ॥ अथैकादशी ॥ ॥ कथा महे रुद्रियाय ब्रवाम कद्राये चिकितुषे भगाय। आप ओषधीरुत नोऽवंतु द्यौर्वना गिरयो वृक्ष
केशाः ॥ ॥ वयमत्र यः कथा केन प्रकारेण महे महते रुद्रियाय रुद्रपुत्राय मरुद्गणाय ब्रवाम स्तुतीः कत् किंच स्तोत्रं राये धनलाभाय चिकितुषे सर्वज्ञानवते
भगायैतन्नामकाय देवाय ब्रवामः। अपि च आप अद्देवता ओषधीरोषधयो द्यौर्द्युदेवता वना वनानि गिरयो वृक्षकेशाः वृक्षा इव केशस्थानीया येषां
ते ये ता उक्तदेवता नोऽस्मानवंतु रक्षंतु ॥ ॥ अथ द्वादशी ॥ ॥ शृणोतु न ऊर्जां पतिर्गिरः स नभस्तरीयाँ इषिरः परिज्मा। शृण्वंत्वापः पुरो न शुभ्राः परि स्रु
चो बबृहाणस्याद्रेः ॥ ॥ नोऽस्माकं गिरः स्तुतीः शृणोतु कः ऊर्जां बलानां पतिर्वायुः अथवा ऊर्जामन्नानां पतिः प्राणो वाधिक नभसि नभसि धारी तवानृतरि
तयः इषिरो गमनशीलः परिज्मा परितो गंता किंच आपः शृण्वंतु गिरः कीदृश्यस्ताः पुरो न पुराणीव शुभ्रा आदीप्ताः ॥ बबृहाणस्य वर्धमानस्याद्रेर्मेघस्य
वा पर्वतस्य वा परितः स्रुचो सरणशीलाः ॥ ॥ अथ त्रयोदशी ॥ ॥ विदा चिन्नु महांतो ये व एवा ब्रवाम दस्मा वार्यं दधानाः। वयश्चन सुभ्व आव यंति
क्षुभा मर्तमनुयतं वधस्नैः ॥ ॥ हे महांतो मरुतो नु क्षिप्रं प्रयूयं विदज्जानीथ स्तोत्रं हे दस्मा दर्शनीयाः वो युष्मान्नू य एवा गंतारो युष्मान् भजमाना वार्यं वरणी
यं हविः दधाना ददाना धारयंतो वा वयं ब्रवाम स्तुतिं यद्यायेव प्रयामित्यर्थः ये यूयमेवाः अस्मद्यज्ञं अभिगंतारः ते विद चिदिति पूरणः वयश्चन आगंतार
श्चैते मरुतः सुभ्वः सुष्ठु भवंतः प्रवृद्धा आ अस्मदभिमुखं आवयंति गच्छंति किं कुर्वंतः क्षुभा क्षोभकेण सहितं मर्तं मरणधर्माणं वैरिणं अनुयतं अभि
गतं वधस्नैरायुधैः परिहरन् आवयंति ॥ ॥ अथ चतुर्दशी ॥ ॥ आ दैव्यानि पार्थिवानि जन्मापश्चाच्छा सुमखाय वोचं। वर्धंतां द्यावो गिरश्चंद्राग्रा उदा वर्ध

ऋ०भा० नामभिधाना अर्णोः॥ ॥दैव्यानि देवसंबंधीनि पार्थिवानि पृथिवीसंबंधीनि च जन्म जन्मानि अपश्च अपसा कर्माभिप्राप्नु सुमुखाय शोभनपज्ञाय मरुद्गण
४१ य अवो नेत्रवीमि गिर स्तुतयो वर्धंतां द्यावो द्योतमानाः स्वप्रतिपाद्यार्थप्रकाशिन्यः चेड्याः आ ल्हादनं हरि एवं वा अग्रेयासो नास्ताः द्वयः सत्याव र्धतां अ
र्णीनद्यश्च अभिधाना मरुद्भिः संभक्ताः उदा उदकेन वर्धतां समृद्धा भवंतु॥ ॥अथ पंचदशी॥ ॥पदे पदे मे जरिमा निधायि वरूत्री वा शक्रा या पायुभि
श्च॥ ॥सिषक्तु माता मही रसा नः स्मत्सूरिभिर्ऋजुहस्त ऋजुवनिः॥ ॥जरिमा स्तुतिर्मदीया पदे पदे तत्तदान दातृमो निधायि निधीयते स्थाप्यते ऋयत
इत्यर्थः या च शक्रा समर्था पायुभी रक्षणैः वरूत्री अस्मदुपद्रववारयित्री भवति वा शब्दश्चार्थे माता सर्वस्य निर्मात्री मही महती पृथ्व्या रसा सारभूता भूमिः
सिषक्तु सेवतां नोस्माकं स्तुतिं अथवा स्तुतानोस्मान् सिषक्तु स्मत् शब्दः प्रशस्तः प्रशस्तवचनाः प्रशस्तैः सूरिभिः मेधाविभिः स्तोतृभिः स्तिमितैः तेषां
परिचर्याप्रीता इत्यर्थः ऋजुहस्ता अस्मदनुकूलहस्ता ऋजुवनिः कल्याणदाना भवतु॥ ॥इति चतुर्थस्य द्वितीये द्वादशो वर्गः॥१२॥ ॥अथ षोडशी॥॥
कथा दाशेम नमसा सुदानूनेवया मरुतो अच्छोक्तौ प्रश्रवसो मरुतो अच्छोक्तौ॥ मा नोहिर्बुध्न्यो रिषे धादस्माकं भूदुपमातिवनिः॥ ॥वयं कथा केन प्रका
रेण दाशेम परिचरेम नमसा स्तोत्रेणान्नेन वा सुदानून् शोभनदानान् मरुतः एवया एवं क्रियमाण प्रकारेण अच्छोक्तौ अभिमुख्येन वचने निमित्ते
सति तान् मरुतः कथं परिचरेम तेषां दुराधर्षत्वादिति भावः॥ कथं प्रश्रवसः प्रकृष्टान्ना भवंति अच्छोक्तौ अभिगंत्री उक्तिः स्तुतिर्यस्य तादृशो मधिरद्या प्र राम
वसः प्रकृष्टान्नस्य मम अच्छोक्तौ स्तोत्र निमित्ते सति मरुतः कथा दाशेम पुनरुक्तिरादरार्था अहिर्बुध्न्यो रेवा नोस्मान् हिंसकाय माधात् स्थापयतु देवो ४१

न्याय प्राप्तानां रक्षणाय वा धाः स्तोतात्रिर्दधीता धारयति स्तुतिं सचो द्विजस्य कक्षीवतो होता त्रिः एवेर्गतैः कामैर्गमनसाधनैरश्वैर्वा सुशेवः शेवमि
ति सुखनाम सुसुखो भवतु॥ हे मरुत स्तूराणां त्वरमाणानां वो युष्माकं ये एवाः कामाः अश्वा वा संति तैरिति॥ ॥इति चतुर्थस्य द्वितीये त्रयोदशो वर्गः॥
॥१३॥ ॥प्रवो वायुमिति षष्ठी वायव्ये पशौ हविषो याज्या॥ प्रवो वायुं रथयुजं कृणुध्वं त त्वामदिते महीति हि सूत्रितं॥ तत्पाठः स्तु॥ ॥ ॥
॥प्रवो वायुं रथयुजं कृणुध्वं प्र देवं विप्रं पनितारमर्कैः॥ इषुध्यव ऋतसापः पुरंधीर्वस्वीर्नो अत्र पत्नीरा धिये धुः॥ ॥हे मदीया ऋत्विजो वो यूयं वा
युं देवं रथयुजं यज्ञगमनाय रथसंबद्धं कृणुध्वं कुरुध्वं प्र देवं द्योतमानं विप्रं विशेषेण कामानां पूरकं विप्रवत्स्तुत्यं वा पनितारं कर्मणि कर्तॄन् प्रस्तयः स्तु
त्य मित्यर्थः फलप्रदातारं वा अर्कैः रर्चनसाधनैर्मंत्रैः प्रकृणुध्वं स्तुतिं किं च इषुध्यवः गंत्र्यः ऋतसापः यज्ञस्पृशाः पुरंधीः पुरंध्यः स्त्रीरूपाः रूप
वत्यो वा वस्वीः प्रशस्याः पत्नीर्देवपत्न्यो अस्मिन् यज्ञे नोस्मदीयधिये कर्मणे तत् निष्पन्नाय साधुः ऽऽगतवत्यः॥ ॥अथ सप्तमी॥ ॥उप व एषे वंद्येभिः शूषैः
प्र यह्वी दिवश्चितयद्भिरर्कैः॥ उषासानक्ता विदुषीव विश्वमा हा वहतो मर्त्याय यज्ञं॥ ॥हे उषासानक्ता अहोरात्राभिमानि देवते यह्वी महत्यो वं द्योभि
र्वंद्यमानाहैरितरेर्द्वैः सह दिवांतरिक्षादविशेषेण सर्वप्रदेशात् वो युष्मभ्यं उपप्रैषे उपप्रापयामि अर्कैः हविः इषैः प्रापण कर्मा स्यादिभिः सम
न्वितः शूषैः सुखकरैः चितयद्भिः ज्ञापयद्भिरर्कैर्मंत्रैः सह अपि प्रापयामि हे उषासानक्ता देवते विश्वं सर्वं कर्तव्यजातं विदुषी इव जानत्यावि वमर्त्याय यजमाना
य यज्ञमावहतः अभिमुखं प्रापयतः॥ हेति पूरणः यह्वा शब्दो द्वेस्त्यादीनि तन्नीया वहकुवचनांतानि वंधेभिरित्यस्य विशेषणानीति केचिदाहुः॥ ॥६॥

स्माकं भूत्व भवतु उपमातिवनिः॥ शत्रूणां हंता॥ ॥अथ सप्तदशी॥ इति चित्नु प्रजायै पशुमत्यै देवासो वनते मर्त्यो व आ देवासो वनते मर्त्यो वः॥ अत्रा
शिवां तन्वो धासिमस्या जरां चिन्मे निर्ऋतिर्जग्रसीत॥ ॥हे देवासो देवा वो युष्मान् इति चित् इत्थमेव नु क्षिप्रं प्रजायै पशुमत्यै पशुसहितायापत्याय व
नते भजते मर्त्यो मनुष्यो यजमानः आ देवासः इति पुनरुक्तिरादरार्था अत्रा अस्मिन् यज्ञे शिवां धासिं अन्नं मे मम अस्याः स्तोत्रो देवैरनुगृहीतस्य पुत्रस्य क
रोतु निर्ऋतिर्देवता च जरां चित् जग्रसीत ग्रसतु॥ ॥अथाष्टादशी॥ ॥तां वो देवाः सुमतिमूर्जयंतीमिषमश्याम वसवः शसा गोः॥ सा नः सुदानुर्मृ
ळयंती देवी प्रति द्रवंती सुविताय गम्याः॥ ॥अभि न इळा यूथस्य माता स्मन्नदीभिरुर्वशी वा गृणातु॥ उर्वशी वा बृहद्दिवा गृणाना अभ्यूर्ण्वाना प्रभृथस्या
योः॥ ॥सिषक्तु न ऊर्जव्यस्य पुष्टेः॥ ॥हे देवा हे वसवो वा सवितारो वो युष्माकं स्वभूतानां प्रसिद्धां सुमतिं शोभनमननसाधनां अन्नेन मतिं बुद्धिं र
त्नमयं हि सोम्य मन इत्यादिषु प्रसिद्धा ऊर्जयंतीं बलकरीं इषं एषणसाधनमन्नं क्षीरदध्यादिलक्षणं शासा स्तुत्या गोः सकाशात् अश्याम प्राप्नुयाम
सा देवी नोस्मान् सुविताय सुखाय प्रतिगम्याः गम्यात् अभिगच्छेत सा देवता विशेष्यते। सुदानुः शोभनदाना मृळयंती सुखयंती द्रवंती अस्मदभि
मुखं गच्छंती॥ ॥अथैकोनविंशी॥ ॥अभि न इळेति॥ अभिगृणातु नोस्मानिळा भूमिः॥ यूथस्य गोसंघस्य माता निर्मात्री यद्वा इळा गोरूपधरा म
नोः पुत्री स्यात्॥ यद्वा यूथस्य मरुद्गणस्य निर्मात्री इळा माध्यमिकी वाक् अथवा उर्वशी माध्यमिकी वाक् नदीभिर्गंगादिभिः सह गृणातु स्मच्छब्दः प्रश
स्तवचन इति स्मत् प्रशस्तं गृणातु वा अथवा उर्वशी बृहद्दिवा प्रभृथस्य नदीभिर्गृणाना शब्दयंती अस्मदीयं कर्म प्रशंसंती अभ्यूर्ण्वाना आच्छादयंती आयोः॥

सं॰भा॰ आयुं मनुष्यं यजमानं केन प्रभृथस्य तेजसो वोदकस्य दानेन प्रभृथस्य तेजसो वोदकस्येति निरुक्तं। अथवा प्रभृथस्य प्रभरणवत आयोर्यज्ञमभ्यूर्ण्वे
ना आच्छादयंती॥ ॥अथ विंशी॥ ॥सिषक्तु न इति॥ ऊर्ज्जो व्यस्येति नामकस्य राज्ञः पृष्टः पोषकस्य संबंधिनो नोस्मान् सिषक्तु सेवतां सामर्थ्यादिवसे
४२ घ इति गम्यते॥ अथवा ऊर्वशी मरुद्गणो वा गृह्यते प्रकृतत्वात्॥ ॥चतुर्थस्य द्वितीये षोडशो वर्गः॥१६॥ ॥प्रशांतमेत्यष्टादशर्चं दशमं सूक्तं भौमस्या
त्रेरार्षं त्रैष्टुभं पूर्वसूक्ते वेनादित्यकत्वादिदमपि वैश्वदेवं तनु तु ही त्येकारु इदेवत्या सप्तदश्येकपदा एतयोरुपांत्यैकपदे त्यनुक्रमिष्यमाणत्वात्
अत्रानुक्रमणिका॥ प्रशांतमाष्टौनैकादशी रौद्रीति॥ विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥प्रशांतमा वरुणं दीधिती गीर्मित्रं भगमदितिं नूनम
श्याः॥ पृषद्योनिः पंचहोता शृणोत्वतूर्तपंथा असुरो मयोभुः॥ ॥प्रशांतमा अत्यंतं सुखकरी। गीः स्तुतिरूपा वाक् वरुणं मित्रं भगं अदितिं च दी
धिती दीधित्या कर्मणा हविःप्रक्षेपात्मकेन सह अद्भुतमवितर्थं प्राश्याः प्राप्नोतु किं च पृषद्योनिः पृषद्वर्णोंतरिक्षस्थः पंचहोता पंचविधस्य प्राणा
पानादिहोमस्य साधको वायुः यद्वा पंचहोतेति वायोर्नाम वायुः पंचहोता स प्राण इति हि श्रूयते। स च अतूर्तपंथाः अहिंसितगति असुरः प्राणस्य
दाता मयोभूः सुखस्यास्य दभूतः एवमुक्तलक्षणो वायुः शृणोतु स्तोत्रमिति॥ ॥अथ द्वितीया॥ ॥प्रति मे स्तोममदितिर्जगृभ्यात्सूनुं न मा राम
ता हृद्यं सुशेवं। ब्रह्मप्रियं देवहितं यदस्त्यहं मित्रे वरुणे यन्मयोभु॥ ॥मे मदीयं स्तोमं स्तोत्रं अदितिर्देवता प्रतिजगृभ्यात् प्रतिगृह्णातु सूनुं न मा ४२
ता स्वतनुजं जननी वा सा यथा प्रतिगृह्य आलिंग्य परिपुष्यंति तद्वदित्यर्थः कीदृशं तं हृद्यं हृदयंगमं सुशेवं शोभनसुखकरं एतद्द्वयं साधारणं किं च

अश्मन्वं जातं प्रियं प्रियकरं देवहितं देवैः प्राप्यं पदस्ति ब्रह्मण्यो भुसुरखसाधनं तदहं मित्रेण वरुणेन च प्रापयामीति शेषः ॥ यद्वा मित्रे वरुणे च
अहोरात्राभिमानिदेवयोः यदुक्ते लक्षणं ब्रह्मपरिवृढं यज्ञादिरूपं कर्मास्ति तदहं धारयामीति ॥ उदीरयेत्येषा एकादशीने सावित्रपशो वपायां
याज्या सूचितं च उदीरय कवितमं कवीनोभ्यां धियं वाजयंतः पुरंधिमितिह्रे इति ॥ ॥ अथ तृतीया ॥ ॥ उदीरय कवितमं कवीनामुनत्तैनमभि मध्वा घृ
तेन ॥ स नो विश्वानि प्रयता हितानि चंद्राणि देवः सविता सुवाति ॥ ॥ हे ऋत्विजः कवीनां कविक्रांतदर्शिनां अतिशयेन तम मंत्रक्रांतदर्शिनं अमुं पु
रोवर्तिनं अग्निं सवितारं वा उदीरय ऊर्ध्वं प्रापयत हर्षयते त्यर्थः ॥ एनं देवं मध्वा मधुरेण सोमरसेन च अभ्युनत्त अभिषिंचत तर्पयतेत्यर्थः
स सविता देवो नोऽस्मभ्यं वसूनि निवासयोग्यानि गवादिधनानि प्रयताः प्रयतानि हितानि चंद्राणि आह्लादकानि हिरण्यानि सुवाति प्र
यच्छतीत्यर्थः ॥ ॥ अथ चतुर्थी ॥ ॥ समिंद्र णो मनसा नेषि गोभिः सं सूरिभिर्हरिवः सं स्वस्ति ॥ सं ब्रह्मणा देवहितं यदस्ति सं देवानां सुमत्या
यज्ञियानां ॥ ॥ हे इंद्र नोऽस्मान् मनसा प्रकृष्टेन चेतसा गोभिः सह नेषि नयसि अस्मभ्यं गाः प्रापयसीत्यर्थः एवं सर्वत्र हे हरिवः हरिभ्यां तद्व
न्निंद्र सूरिभिर्मेधाविभिः पुत्रैर्ऋत्विग्भिर्वा संनेषि नयास्वस्ति क्षेमेः संनेषि सं ब्रह्मणा प्रभूतेनान्नेन संनेषि यदन्नं देवहितमस्ति तेन किंच यज्ञा
नां यज्ञार्हाणां देवानां सुमत्या अनुग्रहबुद्ध्या संनेषि ॥ ॥ अथ पंचमी ॥ ॥ देवो भगः सविता रायो अंश इंद्रो वृत्रस्य संजितो धनानां ॥ ऋभुक्षा
वाज उत वा पुरंधिरवंतु नो अमृतासस्तुरासः ॥ ॥ देवो भग इति अत्र लिंगोक्ता देवता । भगो देवः सविता रायो धनस्य स्वामी अंशः स्व

ऋ० भा० वृत्रस्य हंता इंद्रस्त्वं एते देवा धनानां संजितः सम्यक् जेतारः ऋभुक्षाः ऋभुर्वाजश्च उतवा अपि च पुरंधिर्बहुधीः विभ्वो यूते एते च अमृतासो
४३ मृता अमरणधर्माणः भगादि देवाः तुरासः अस्मे घृतं प्रतित्वरमाणाः संतो नोस्मानवंतु रक्षंतु॥ ॥इति चतुर्थस्य द्वितीये सप्तदशो वर्गः॥
॥अथ षष्ठी॥ ॥मरुत्वतो अप्रतीतस्य जिष्णोरजूर्यतः प्रब्रवामा कृतानि॥ न ते पूर्वे मघवन्नापरासो न वीर्यं नूतनः कश्चनाप॥ ॥वयं य
जमाना मरुत्वतो मरुद्भिः संयुक्तः इंद्रस्य कृतानि कर्माणि प्रब्रवाम प्रख्यापयाम कीदृशस्य तस्य अप्रतीतस्य अप्रतिगतस्य युद्धे अपला
यमानस्य न केवलं तावन्मात्रं जिष्णोर्जयनशीलस्य अजूर्यतः अजीर्यमाणस्य सर्वदा युवा इत्यर्थः अथ प्रत्यक्षेण यूते हे मघवन्निंद्र ते
तव वीर्यं पराक्रमं ते पूर्वे पुरातनाः पुरुषाः नापनशाः नापरासः अपरेपि नापुः किं बहुना नूतनः कश्चन आश्चर्यभूतो यः कोपि वीर्यं ना
पनशाप्नोपि॥ ॥अथ सप्तमी॥ ॥उपस्तुहि प्रथमं रत्नधेयं बृहस्पतिं सनितारं धनानां॥ यः शंसते स्तुवते शंभविष्ठः पुरूवसुरागम
ज्जोहुवानं॥ ॥हे अंतरात्मन् त्वं प्रथमं मुख्यं प्रकृष्टतममित्यर्थः रत्नधेयं रमणीय धनदानं हे विलक्षणानां सनितारं संभक्तारं अथवा धनानां ४
रत्नशब्देन मणिमुक्तादयो गृहीताः इह धनशब्देन गवादयः गवादि दातारं बृहस्पतिं बृहतो मंत्रस्य पतिं स्वामिनं देवं उपस्तुहि यो देवः शं
सते शास्त्रैः स्तुवते सामभिर्यजमानाय शंभविष्ठः सुखस्य भावयितृतमो भवति यश्च जोहुवानां आह्वयंतं यजमानं पुरूवसुः प्रभूतधनः राम
सन् आगमत् आगच्छति तमुपस्तुहि॥ ॥अथाष्टमी॥ ॥तवोतिभिः सचमाना अरिष्टा बृहस्पते मघवानः सुवीराः॥ ये अश्वदा उत वा ४३

रणाय मेधां गिरं भरे नव्यसीं जायमानां ॥ य आहना दुहितुर्वक्षणासु रूपा मिनानो अकृणोदिदं नः ॥ ॥ सु सुष्टु प्र भरे प्रकर्षेण संपादयामि महे
महते सुखारणाय शोभनरक्षकाय इंद्राय सुसुखाय वा किं मे धां मनो धीयमानां गिरं स्तुतिं कीदृशीं नव्यसीं नवतरां अतिशयेन स्तुत्यां वा जायमा
नां इदानीमुत्पद्यमानां नूतनामित्यर्थः यः इंद्रः पर्जन्यो वा आहना आहंता सेक्ता दुहितुः स्थानीयायाः पृथिव्याः हिताय वक्षणासु नदीषु रूपा रूपा
णि मिनानः कुर्वाणः इदमुदकं नो स्माभ्यमकृणोत् करोतु ॥ ॥ अथ चतुर्दशी ॥ ॥ प्र सुष्टुतिः स्तनयंतं रुवंतमिळस्पतिं जरितर्नूनमश्याः ॥ यो
अब्दिमाँ उदनिमाँ इयर्ति प्र विद्युता रोदसी उक्षमाणः ॥ ॥ अत्र पर्जन्यः स्तूयते हे जरितः शोभनस्तुतिः स्तनयंतं गर्जंतं रुवंतं वर्षणजनितं शब्दं कुर्वाणं
इळः अन्नस्योदकस्य वा पतिं स्वामिनं हे जरितः स्तोतः त्वदीया स्तुतिः नूनं अश्याः प्रकर्षेण व्याप्नोतु यश्च पर्जन्यो यो अब्दिमान् अब्दिः अपां दानवा
न् मेघः तद्वान् उदनिमान् उदकवान् विद्युता तडिता रोदसी द्यावापृथिव्यौ उक्षमाणः सिंचन् प्रेयर्ति गच्छति ॥ ॥ अथ पंचदशी ॥ ॥ एष स्तोमो मा
रुतं शर्धो अच्छा रुद्रस्य सूनूँर्युवन्यूँरुदश्याः ॥ कामो राये हवते मा स्वस्त्युप स्तुहि पृषदश्वाँ अयासः ॥ ॥ एष मया संपादितः स्तोमः स्तोत्रं मारु
तं शार्धः मरुतां बलं अच्छ अभिमुखं अश्याः प्राप्नोतु समुदायरूपेण भूत्वा समुदायिरूपेण हे रुद्रस्य सूनून् एषां पुत्रत्वेन परिकल्पितस्य कमुद्गो
युवन्यून् यूनो मिश्रणो कुर्वाणान् उत उन्नतं अत्यधिकं अश्याः व्याप्नुहि हे मनः कामो संकल्पो राये धनार्थं मां मा स्वस्ति अविनश्वरं उप हवते आह्वयति
प्रेरयतीत्यर्थः यस्मादेवं तस्मात् एष पृषदश्वान् पृषद्वर्णाश्वोपेतान् अयासो यज्ञं गंतॄन् उप उपेत्य स्तुहि ॥ ॥ अथ षोडशी ॥ ॥ प्र वः स्तोमः पृथिवी

मंतरिक्षं वनस्पती ओषधी राये अस्रिधः॥ देवो देवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात्॥ ॥एष स्तोमम स्कृतिः पृथिव्यादिदेवताः अस्रिधाः
प्राप्नोतु किमर्थं राये धनार्थं देवो देवः सर्वविद्देवो मह्यं मदर्थं सुहवो भूतु स्वाह्वानो भवतु नोस्मान् दुर्मतौ माता सर्वस्य स्यनिर्मात्री यद्वा त्रैभौमत्वाद्विशे
षणं माता पृथिवी मा धात् मा स्थापयतु॥ ॥अथ सप्तदशी॥ ॥उरौ देवा अनिबाधे स्याम॥ ॥हे देवा युष्माकं संबंधिनि पुरौ महति अनिबाधे नितरां बा
धरहिते सुखे स्याम भवेम वयम त्रयः॥ ॥अथाष्टादशी॥ ॥समश्विनोरवसा नूतनेन मयोभुवा सुप्रणीती गमेम॥ आ नो रयिं वहतमोत वीरा
ना विश्वान्यमृता सौभगानि॥ ॥वयमश्विनोः नूतनेन पूर्वैर् अन्यैर ननुभूतेन मयोभुवा सुखस्य भावयित्र्या सुप्रणीती शोभनप्रणयनवता अवसार
क्षणेन संगच्छेमहि हे अमृता अमरणावश्विनौ नोस्मभ्यं रयिं धनं आवहतं प्रापयतं उत वीरान् सुवीर्यवतः पुत्रानप्यावहतं विश्वानि सौभगान्य
थावहतं॥ ॥इति चतुर्थस्य द्वितीये एकोनविंशो वर्गः॥ ॥आ धेनव इति सप्तदशर्चं एकादशं सूक्तं॥ अत्रेरार्षं त्रैष्टुभं वैश्वदेवं अत्रानुक्रमणिका॥
आ धेनवः सप्त नैतयोरुपांत्यैकपदेति॥ विनियोगो लैंगिकः॥ अपोनप्त्रीय एक धनासु हविर्धानं प्रतीयमानासु आद्यानुवचनीया सूचितं च॥ आ धेनवः
पयसा तूर्ण्यर्थाः समन्यायं स्फुपयन्याः इति॥ ॥तत्र प्रथमा॥ ॥आ धेनवः पयसा तूर्ण्यर्था अमर्धंतीरुप नो यंतु मध्वा॥ महो राये बृहतीः सप्त विप्रो म
यो भुवो जरिता जोहवीति॥ ॥धेनवः प्रीणयित्र्यो नद्यो मध्वा मधुरेण पयसा रसेन सहिताः तूर्ण्यर्थाः त्वरमाणगमनाः॥ अर्थोर्तिरिति यास्कः अमर्धं
तीरहिंसत्यः सत्यो नोस्माननुपयंतु पागच्छंतु महो महते राये धनाय बृहतीर्महतीः सप्त सर्पणस्वभावाः सप्तसंख्याका इमं मे गंग इति मंत्रोक्ताः गंगा

ऋ०भा० पुलिरध्वर्युः चानिश्च दत आल्हादयत् वदि आल्हादने इत्यस्मात् लङ् लुङि छांदसं रूपं दुदुहे दोग्धि स चांशुः शुक्रं निर्मलं दुदुहे दोग्धि यद्वैकं वा
४६ र्व्यं अंशुर्यां सि॥ सुग भक्तिः सुहस्तो ध्वर्युः मधोरसं दुदुहे दोग्धि॥ ॥अथ पंचमी॥ ॥असावि ते जुजुषाणाय सोमः क्रत्वे दक्षाय बृहते मदाय॥ हरी
रथे सुधुरा योगे अर्वाग् इंद्र प्रिया कृणुहि हूयमानः॥ ॥हे इंद्र ते तुभ्यं जुजुषाय सेवमानाय सोमः असावि अभिषुतः किमर्थं क्रत्वे कृतवे रत्नवधादि
कर्मणे दक्षाय बलाय बृहते महते मदाय च यस्मादेवं तस्मात् हे इंद्र त्वं हूयमानः स त्वं सुधुरा शोभमानायां धुरि नियुक्तौ प्रियाप्रियौ हरी अश्वौ योगे योगार्हे
युक्ते वा रथे योजयित्वा तं रथं अर्वाग् अस्मदभिमुखं कृणुहि कुरु॥ ॥इति चतुर्थस्य द्वितीये विंशो वर्गः॥ ॥अथ षष्ठी॥ ॥आ नो महीमरमतिं सजोषा ग्नां
देवीं नमसा रातहव्यां॥ मधोर्मदाय बृहतीमृतज्ञामाग्ने वह पथिभिर्देवयानैः॥ ॥अत्राग्निः संबोध्यः ग्ना देवता आवाह्यत्वात् अस्याग्नेः ग्ना वा देवता हे अग्ने
सजोषाः अस्माभिः प्रीयमाणस्त्वं ग्नां देवीं सर्वैर्गंतव्यां एतन्नामिकां देवतां मेनाग्ना इति स्त्रीणामिति यास्कः नो अस्मदर्थं देवयानैः देवैर्गंतव्यैः पथिभिर्मा
र्गैः आभिमुख्यं आवह कीदृशीं महीं महतीं अरमतिं आसमंतात् रममाणां सर्वत्र गंत्रीं वा नमसा स्तोत्रेण सह रातहव्यां रातं दत्तं दानाय संकल्पितं हव्यं
यस्याः तां दत्तहविष्कामित्यर्थः॥ किमर्थं मधोर्मधुरसस्य सोमस्य मदाय पुनः कीदृशीं बृहतीं प्रवृद्धां ऋतज्ञां यज्ञमभिजानंतीं॥ ॥प्रवर्ग्यं महावीरे राम
अज्यमाने अजेति यामित्येषा सूत्रितं च॥ अंजंति यं प्रथयंतो न विप्राः इत्यज्यमान इति॥ ॥सैषा सप्तमी॥ ॥अंजंति यं प्रथयंतो न विप्रा वपावंतं नाग्निना ४६
तपंतः॥ पितुर्न पुत्र उपसि प्रेष्ठ आ घर्मो अग्निमृतयन्नसादि॥ ॥यं घर्मं महावीरं प्रथयंतो नानेति संप्रत्ययी यः अस्यप मार्थस्य संप्रत्ययार्थे प्रयोगः॥

इत्सनी प्रथयंतो विप्रा मेधाविन ऋत्विजो ध्वर्य्वादयः वपावंतं वपा चैतं प्रवृद्धं पशुं यथाग्नौ तपंति तद्वदग्निना तपंतं अंजंति पितुर्न पुत्र उपसि प्रेष्ठः पितुरुत्संगे
पितृतमुषु इव घर्मो महावीरः येन घ्रां इत्यघमत तद्धर्मस्य घर्मत्वमिति हि श्रुतिः स ऋतयन् यज्ञमिच्छन् अग्निमग्नौ असादि आसादितः अत्र पितृपुत्र
दृष्टांतः स्फोटादिराहित्येन सुखवासप्रख्यापनार्थः॥ ॥अथाष्टमी॥ ॥अच्छा मही बृहती शंतमा गीर्दूतो न गंत्वश्विना हुवध्यै॥ मयोभुवा सरथा यातमर्वा
ग्गंतं निधिं धुरमाणिर्न नाभिं॥ ॥अच्छ अभिमुखं अश्विना अश्विनौ वा हुवध्यै आह्वातुं गीः स्तुतिः अस्मदीया स्तुतिः दूतो न दूत इव आक्रांतेव गंतु गच्छतु गी
र्विशेष्यते मही पूज्या बृहती महती शंतमा सुखतमा हे अश्विनौ मयोभुवा सुखस्य भावयितारौ सरथा एकं रथमास्थितौ निधिं आहितं सोमं अर्वाग् अभिमुखं
यातं गच्छतं धुरं भारवाहिकां नाभिं आणिर्न कील इव यथा निष्कीलाना भीरथं न निर्वहति तद्वत् युवाभ्यां वियुक्तः सोमो यागं न निर्वहतीति शापयितुमे
वेदृश्यो नितं॥ ॥अथ नवमी॥ ॥प्र तव्यसो नमउक्तिं तुरस्याहं पूष्ण उत वायोरदिक्षि॥ या राधसा चोदितारा मतीनां या वाजस्य द्रविणोदा उत त्मन्॥
॥अहमृषिः तव्यसः प्रवृद्धबलस्य तुरस्य त्वरमाणस्य पूष्णः पोषकस्य देवस्य उक्तगुणकाय देवाय उत अपि च वायोरुरु कलक्षणाय च नमउक्तिं नमइति
वचनं स्तोत्रं अदिक्षि प्रदिशामि यौ पूषवायू राधसा हविर्लक्षणेन निमित्तेन मतीनां चोदितारा प्रेरयितारौ यद्वा राधसेति षष्ठ्यर्थे तृतीया राधसो ध
नस्य मतीनां च चोदयितारौ यौ च वाजस्यान्नस्य संग्रामस्य वा चोदयितारौ तौ देवौ उत अपि त्मन् आत्मनि अनन्यप्रेरणयैव द्रविणोदौ भवतमिति शे
षः॥ ॥अथ दशमी॥ ॥आ नामभिर्मरुतो वक्षि विश्वाना रूपेभिर्जातवेदो हुवानः॥ यज्ञं गिरो जरितुः सुष्टुतिं च विश्वे गंत मरुतो विश्व ऊती॥ ॥हे जातवे

ऋ॰ भा॰ द्धजातप्रज्ञायैस्माभिराहूयमानः सजूः सहितास्त्वमरुतः सर्वान्पिस्तोत्रभाजो हविर्भाजश्च देवान्नामभिरिंद्र वरुणेत्यादिलक्षणैरवक्षि आवहसि रूप
४७ भिः सहस्राक्षवज्रहस्तेत्यादिलक्षणैरूपैः प्रावक्षि वहसि यज्ञं किं च हे मरुतो विश्वे सर्वे यूयं यज्ञमस्मदीयं यज्ञसंबंधि हविर्वा जरितुः स्तोतुः सं
बंधिनीर्गिरः स्तुतीर्वचांसि सुष्टुतिं स्तुत्याख्यां शोभनफलोत्कृतिं अवयविन्यास्तुतेरेकत्वादेकवचनं अवयवानां बहुत्वाद्बहुवचनं उक्थेयज्ञस्तुती
अभिलक्ष्य गंत आगच्छत विश्वे च यूयं मूती ऊत्या रक्षणया च सह गंत॥ ॥इति चतुर्थस्य द्वितीये एकविंशो वर्गः॥ ॥आ नो दिव इत्येकादशी बृह
द्दशरात्रे नवमेहनि पृष्ठ्यगतास्त्रे सारस्वतं शस्त्रे चेद्विनीयां सूत्रितं च॥ आ नो दिवो बृहतः पर्वतादा सरस्वत्यभिनो नेषि वस्य इति॥ नस्योक्तं॥ ॥अथै
कादशी॥ ॥आ नो दिवो बृहतः पर्वतादा सरस्वती यजता गंतु यज्ञं॥ हवं देवी जुजुषाणा घृताची शग्मां नो वाचमुशती शृणोतु॥ ॥नो स्माकं य
ज्ञं यजताय ष्टव्या देवी सरस्वती दिवो द्योतमानाद्द्युलोकादागंतु आगच्छतु तथा बृहतो महतः पर्वतात्पूरणवतः प्रीणनवतो वांतरिक्षान्मेघाद्वा
सरस्वती आगंतु आगच्छतु अनेन माध्यमिकी वागुच्यते॥ यद्वैतद्दिव इत्यस्य विशेषणं संति हि द्युलोकस्य त्रीणि पर्वाणीति तिस्रो दिवः पृथिवीः तृत्या
द्विष्कृतेः अस्मिन्पक्षे इति आकारः पूरणः तदर्थं चाहमस्मदीयमाह्वानं देवी सरस्वती जुजुषाणा स्तुतिं सेवमाना घृताची घृतमुदकं मंचतीनो
स्मदीयां शग्मां सुखकरीं वाचं स्तुतिं उशती कामयमाना सती शृणोतु॥ ॥अथ द्वादशी॥ ॥आ वेधसं नीलपृष्ठं बृहंतं बृहस्पतिं सदने सादयध्वं॥ राम ४७
सादद्योनिं दम आ दीदिवांसं हिरण्यवर्णमरुषं सपेम॥ ॥एषा बार्हस्पत्या हे ऋत्विजो यूयं बृहस्पतिं बृहतो मंत्रस्य स्वामिनं देवं सदने स्वगृहे

द्यावा तत्प्राधान्येन सखैवोक्तः मयोभुवः सुखस्य भावयित्र्यो विप्रो विशेषेण प्रीणयिता जरिता स्तोता जोहवीति आह्वयति॥ ॥अथ द्वितीया॥ ॥आ सु
ष्टुती नमसा वर्तयध्यै द्यावा वाजाय पृथिवी अमृध्रे॥ पिता माता मधुवचाः सुहस्ता भरे भरे नो यशसावविष्टां॥ ॥अहं सुष्टुती सुष्टुत्या शोभनस्तोत्रेण
मनसा हविषा वा अमृध्रे हिंसिते द्यावापृथिवी द्यावापृथिव्यावावर्तयध्यै आवर्तयितुमिच्छामि वा जायान्नार्थं अन्नं वै वाज इति हि श्रुतिः॥ पिता पालयि
त्री द्यौर्माता निर्मात्री पृथिवी मधुवचाः प्रियवचनाः सुहस्ता अभिमतदानेन शोभनहस्ताः एतदुभयविशेषणं यशसौ यशस्विन्यौ युक्तौ द्यावापृथिव्यौ भरे
भरे सर्वेषु संग्रामेषु पत्सु वा नो स्मान विष्टां रक्षतां॥ ॥अथ तृतीया॥ ॥अध्वर्यवश्चकृवांसो मधूनि प्र वायवे भरत चारु शुक्रं॥ होतेव नः प्रथमः पाह्य
स्य देव मध्वो ररिमा ते मदाय॥ ॥हे अध्वर्यवः अध्वरं युंजानाः मधूनि मधुरसानि सोमाज्यादीनि च कृवांसः यूयं वायवे प्रथमं प्रभरत प्रकर्षेण संपा
दयत चारु वरणीयं शुक्रं दीप्तं सोमं हे वायो त्वं च होतेव होता यथा प्रथमं पिबति तद्वन्नोस्मदर्थं अस्य अमुं सोमं प्रथमं इतरदेवेभ्यः पूर्वं पाहि पिब हे
देव वायो मध्वो मधुरं सोमरसं ते मदाय ररिम दद्मः वायोः पूर्वदानमसकृत्प्रपंचितं॥ ॥अथ चतुर्थी॥ ॥दश क्षिपो युंजते बाहू अद्रिं सोमस्य या श
३ मितारा सुहस्ता॥ मध्वो रसं सुगभस्तिर्गिरिष्ठां चनिश्चदद्दुदुहे शुक्रमंशुः॥ ॥अत्राभिषवस्य प्रतिपाद्यमानत्वात्सोमो देवता यद्वा ऐंद्री अद्रिमभिष
वग्रावाणं दश क्षिपो दशसंख्याकाः क्षेप्त्र्यो अंगुलयो युंजते बध्नंति यद्वा परस्परं युक्ता भवंति बाहू अध्वर्युसंबंधिनौ वाद्रिं युंजाते यौ सुहस्तौ शो
भनहस्तौ सोमस्य शमितारौ वा ह्युंजाते मध्वो मधुरस्य सोमस्य रसं गिरिष्ठां गिरिस्थायिनं गिरिवद्दुन्नतप्रदेशे स्थितं वा सुगभस्तिः शोभनो

आसादय ध्रुवं स्थापय ध्रुवं कीदृशं देवं वेधसं विविधं कर्तारं नीलपृष्ठं स्निग्धांगं गृहे तं महांतं स यथा संतं वयमृत्विग्यजमानाः ॥ स पेमपरिचरेमस
र्वविशिष्यते सादद्योनिं योनौ सीदंतं दमे यागगृहे आ सर्वतो दीदिवांसं दीप्यमानं हिरण्यवर्णं हितरमणीयं वर्णं अरुषमारोचमानं अथर्वे यमाग्ने
यी गृहत ॥ परिवृढस्य कर्मणः स्वामीति बृहस्पतिरग्निरुच्यते तथा नीलवर्णं धूमपृष्ठं तत्सदनसादनाहिरण्यं वर्णत्वादि लिंगैरप्यग्निरेव बृहस्पतिः ॥
॥ अथ त्रयोदशी ॥ ॥ आ धर्णसिर्बृहद्दिवो रराणो विश्वेभिर्गंत्वोमभिर्हुवानः ॥ ग्ना वसान ओषधीरमृध्रस्त्रिधातुशृंगो वृषभो वयोधाः ॥ ॥ इदमा
गृह्यमाग्नेयं अग्निरागंतु आगच्छतु अस्मद्यज्ञं धर्णसिः सर्वस्य धारकः बृहद्दिवः प्रभूतदीप्तिः ॥ रराणः रममाणः कामान् प्रयच्छन्वा विश्वेभिः स
र्वैः ओमभिः ॥ रक्षणैः सह हुवानः हूयमानो ग्नाः गंत्रीर्ज्वालाः ओषधीश्च वसानः ॥ अमृध्रो हिंसितः त्रिधातुशृंगः ॥ त्रिप्रकारशृंगः यद्वा नीलो लोहित
शुक्लः कृष्णश्च ज्वालः वृषभो वर्षिता वयोधाः अन्नस्य दाता हविषो वा धारकः ॥ ॥ अथ चतुर्दशी ॥ ॥ मातुष्पदे परमे शुक्र आयोर्विपन्यवो रास्पि
रासो अग्मन् ॥ सुशेव्यं नमसा रातहव्याः शिशुं मृजंत्यायवो न वासे ॥ ॥ आयोर्मनुष्यस्य यजमानस्य विपन्यवः स्तोतारः नामैनं तस्तोतारो होतादयो
रास्पिरासः ॥ रायं धनं हविर्लक्षणं तत्स्पृशंतीति रास्पाः उद्गात्रादयः तद्दान्तू रास्पीतद्वंतो रास्पिरासः उक्तविधानेन शिशो मातुर्निर्मातुः ॥ पृथिव्याः शुक्रे दीप्ते
परमे पदे उत्तरवेद्याख्ये स्थाने अग्मन् भजंते तदर्थं सुशेव्यं सुखाय हितं शिशुं जातमात्रं वाससेवा सायन नमसा स्तोत्रेण रातहव्याः दातव्यहविष्काः दूत्य
र्थः ताद्रव्यास्ते मृजंति संमार्जयंति तं न दृष्टांतः आयवो न लौकिका मनुष्या इव ते यथा शिशुं वासाय मृजंति तद्वत् ॥ ॥ अथ पंचदशी ॥ ॥ बृहद्वयो

ऋ० भा० बृहत्ते नु भ्यमग्ने धियाजुरो मिथुनासः सचंत॥ देवो देवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात्॥ ॥बृहत्स्य भूतं वयो नः हे अग्ने बृहते नु भ्यं धि
४९ याजुरः कर्मणा जरौजीर्णा मिथुनासः पत्नीभिः सहितास्ते चंत सचंते जायापती अग्निमादधीयातामित्यादिश्रुतेः अधिकाराध्याये षष्ठे स्त्रिया अ
ग्नि अधिकारः सहपत्न्या सहेति हि प्रतिपादितं अवशिष्टं गतं॥ ॥अथ षोडशी॥ ॥उरौ देवा अनिबाधे स्याम॥ ॥अथ सप्तदशी॥ ॥समश्विनोरिति या
ख्याते द्वे॥ ॥इति चतुर्थस्य षष्ठे तृतीये ह्यष्टाविंशो वर्गः॥ ॥तं प्रत्नथेति पंचदशर्चं षष्ठं सूक्तं॥ अवत्सारो नाम ऋषिः॥ स च काश्यपगोत्रः यास्ते ऽ सदा प
ण वाकुर्वृत्रादयः ऋताः ता सुत्ते पि समुच्चीयंते चतुर्दशी पंचदश्यौ त्रिष्टुभौ शिष्टास्त्रिष्टुबंत परिभाषया जगत्यः विश्वेदेवा देवता॥ तथा चानुक्रां
तं॥ तं प्रत्नथा पंचोना काश्यपो वत्सारो ऽन्ये च ऋषयो दृष्टलिंगा द्वित्रिष्टुबंतमिति॥ वाजपेये अतिरिक्तोक्थ्ये आदित स्त्रयोदशर्चः शंसनीयाः सू
त्रितं च तं प्रत्नथेति त्रयोदशानामेकां त्रिष्टुभा इत्युपरिष्टाद्रोहेदिति॥ ॥तत्र प्रथमा॥ ॥तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदं॥
प्रतीचीनं वृजनं दोहसे गिराशुं जयंतमनु यासु वर्धसे॥ ॥इयमुत्तरा चद्वे ऐंद्रावित्याद्ः॥ तत्रोपपन्नमेवाद्ः॥ तं प्रत्नथेत्येषा शुक्रामंथिग्रहणे वि
नियुक्ता ऐंद्रौ च शुक्रामंथिनौ यदैंद्रं शंसति तेन शुक्रामंथिनाववक्लृप्ताविति हि ब्राह्मणं अध्वर्युस प्रैषोपि भवति प्रातः प्रातः सावस्य शुक्रवतो मं राम
थिनो मधुश्च्युत इंद्राय सोमान्प्रस्थितान्प्रेष्येति॥ प्रशास्तृप्रैषश्च भवति होता यक्षदिंद्राय प्रातः सावस्येत्यादि प्रस्थिता इंद्राय सोमा इति याज्यावैंद्री
इदं ते सोम्यं मध्विति तस्मादैंद्रौ तमिंद्र प्रत्नथा पुरातनाय जमानाद्दव पूर्वथा अस्मदीयाः पूर्वे यथा विश्वथा विश्वे सर्वे प्राणिनो यथा इमथा इदानी ४९

वर्त्तमाने यजमानाः ते यथेंद्रस्य कृत्या फलमलभंत ॥ तद्वद्वयमपि हे अंतरात्मन् त्वमपि ज्येष्ठं बर्हिषदं बर्हिषि सीदंतं स्वर्विदं सर्वज्ञं सर्वस्य फलं भाव
यितारं वा प्रतीचीनं प्रति अस्मदभिमुखं मं वतं वृजनं बलं नामैतत् त्वं बलवति वर्त्तते बलवंतं आशुं द्वी ष्वगामिनं व्याप्तं वाजयंतं सर्वमपि भवंतमिंद्रं गीरा
स्तुत्यासा धनेन दोहसे धुक्ष्व सर्वदा सर्वाननुकामान् इत्यंतरात्मनः प्रेषः यास्तु स्तुतिषु वर्धसे प्रवृद्धो भवसि वर्धयसि वेंद्रं यथा स्तुत्या यास्विति यत्य
येन बहुवचनं ॥ ॥ अथ द्वितीया ॥ ॥ श्रिये सुदृशी रुपरस्य याः स्वर्विरोचमानः ककुभामचोदते ॥ सुगोपा असि न दभाय सुक्रतो परोमायाभिर्ऋ
त आस नाम ते ॥ ॥ हे इंद्र स्वः स्वर्गे विरोचमानस्त्वं अचोदते अप्रेरयितुः ष षष्ठ्यर्थे चतुर्थी उपरस्य मेघस्य संबंधिन्यः सुदृशीः सुरोचमाना या आपः सं
ति तासामपां ककुभां सर्वासां दिशां मध्ये श्रिये प्राणिनां श्रयणाय प्रेरको भवेति शेषः हे सुक्रतो शोभन वृष्टिप्रदानादिकर्मैंद्र त्वं सुगोपाः प्राणिनां
सुष्ठु गोपायिता असि अतो न दभाय न दंभाय वधाय प्राणिनां नासि न प्रभवसि । त्वं च मायाभिरासुरीभिः परो मायाभिः परस्ताद्वर्त्तमानः यस्मात् ते
त्वदीयं नाम नामकं रूपं ऋते सत्यलोके आस आस्ते ॥ ॥ अथ तृतीया ॥ ॥ अयं हविः सचते सच धातु वारिष्टगातुः स होता सहोभरिः ॥ प्रसस्राणो अ
नु बर्हिर्वृषा शिशुर्मध्ये युवाजरो विस्रुहा हितः ॥ ॥ इयमाग्नेयी होतृत्व युवात्वादिलिंगैः अयमग्निः अयं सततमननार्हः हविराज्यादिकं सचते सेवते
कीदृशं हविः सत्सत्फलत्वात् स्वविरपि सत्सु धातुः च धारकं सर्वस्य हूयमानस्य हविषः आदित्यद्वारा वृष्टिसाधनत्वात् तया च वृष्ट्या प्रजोत्पत्तेर्हेतुर
कत्वं । तथा हि अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इति अरिष्टगातुः अहिंसितगमनः सनितस्य गम

सं०भा० ४९ नेयज्ञनिष्पत्याफलसिद्धेरिष्टगमनत्वंतं देवाहुः सः खलुहोताहोमनिष्पादकः ॥ सहोऽपरिः बलस्यभर्त्ताबर्हिरन्तुप सर्व्वाणः प्रकर्षेणासरत्वृषाव
र्षकफलस्यद्रविणुः सद्वरक्षणीयः अप्रोढोवायुवासर्वत्रमिश्रयिता अजरोजरारहितः ॥ विस्तुहाविस्तुहाणामोषधीनामध्येहितोनिहितः स्थापितः ए
वंभूतः ॥ सचते ॥ ॥ अथ चतुर्थी ॥ ॥ प्रवएतेसुयुजोयामन्निष्टयेनीचीरमुष्मैयम्य ऋतावृधः ॥ सुयंतुभिः सर्वशासैरभीशुभिः क्रिविर्नामानि प
वणेमुषायन्ति ॥ ॥ एषासौरीवी — एतेरश्मयः सुयुजः सुष्ठुपरस्परंसंयुक्ताः यामन्नयज्ञगमने इष्टयेएषणायनीचीनधःपंगच्छंतीतिशेषः अ
मुष्मैयजमानाययम्यायाम्याः गमनार्हाः अथवायामानियमितादित्यः तस्यसंबंधिनः ऋतावृधः यज्ञस्यवर्धयितारश्च अयमादित्यः सु
यंतुभिः सुगमनैः सर्वशासैः सर्वस्यशासकैः अभीशुभीरश्मिभिः क्रिविः कर्त्तानामानिनामकानिउदकानिप्रवणेनिम्नेभूप्रदेशेमुषाय
तिमुष्णातिआदत्तइत्यर्थः ॥ अथवाग्निना आवाहस्याग्नेरेतेश्वाइष्टयेयज्ञगमनाययामनिरथेसुयुजः प्रगच्छंति निष्टंसमानं क्रिविः क्रिविः स
ह्वशोभिः प्रवणेनामानिहवींषुकलक्षणाभिः ज्वालाभिर्मुषायतिआदत्ते ॥ ॥ अथपंचमी ॥ ॥ संजर्भुराणस्तरुभिः सुतेगृभंवयाकिनंचित्तगर्भासुस्व
स्वरुः ॥ धारवाकेष्वृजुगाथशोभसेवर्धस्वपत्नीरभिजीवोऽअध्वरे ॥ ॥ हे ऋजुगाथशोभनस्तुतिमान् अग्ने तरुभिः तरुविकारैर्यज्ञैः सुतेगृभं राम
अभिषुतेनरसेनगृहीतंवयाकिनंकुत्सिताः अलावयाशाखावयाकालनाः तद्वंतंसोमं चित्तगर्भासुचित्तयाहिणीषुस्तुतिषुस्तुतिभिःसहसंज ४२
र्भुराणः ॥ शृङ्गन् सुस्वरुः शोभनगमनः ॥ शोभनस्तुतिकोवार्त्तधारवाकेषुधारयतिवाकानूस्तोत्राणीतिधारवाकाः ऋत्विग्यजमानाः तेषुमध्ये

ओभसे किं च अध्वरे जीवः सर्वस्य जीवयिता पत्नीः पालयित्री ॥१७॥ एधीः ज्वाला वा अप्ति अभिमुखं वर्धस्व अभिवर्धय ॥ ॥इति चतुर्थस्य द्वितीये
अध्यायो विंशो वर्गः ॥२३॥ ॥अथ षष्ठी ॥ ॥यादृगेव ददृशे तादृगुच्यते सं छायया दधिरे सिध्रया प्सु ॥ मही मस्मभ्यमुरुषामुरु ज्रयो बृहत्सुवीरम
नपच्युतं सहः ॥ ॥एषा वैश्वदेवी यादृगेव ददृशे यादृग्रूपमेव दृश्यते तादृगुच्यते तादृग्रूपमेवोच्यते यथा दृष्टमेव स्तूयते न तु परवचनप्रत्ययेन य
स्मात् छायया दीप्त्या सिध्रया साधिकया साधिकया सहाप्सु व्यापकासु सूक्तिषु अपि वैव वा आसद धिरे सम्यक् धारयंति स्वीयरूप स्तुतिं वा ते
देवा मही महती पृथ्वी पुरुषां बहुदात्री उरु प्रभूतं ज्रयो वेगं बृहन्महत् सुवीर्यं शोभनवीर्यमपत्यं अनपच्युतं अनुपक्षीणं सहो बलं चाभिभावु
कमस्मभ्यं श्रयच्छ त्विति यर्थः ॥ ॥अथ सप्तमी ॥ ॥वेत्यग्रुर्जनिवान्वा अतिस्पृधः समर्यता मनसा सूर्यः कविः ॥ घ्रंसं रक्षंतं परि विश्वतो गयमस्माकं
शर्म वनवत्स्वावसुः ॥ ॥इयं सौरी सूर्यः देवः अग्रुः अग्रगामी जनिवान्वै जन्मवान् जाया वा वा उषो ह्यस्य जायावा इति प्रसिद्धो कविः क्रांतदर्शी
समर्यता समरमिच्छता मनसा स्पृधः संग्रामान् अतिवेति अतिगच्छति मं देहान् सुरान् यो घ्रंसं दीप्तं गयं गृहं अंतरिक्षं वा विश्वतः सर्वं रक्षंतं परि
चरेमेति शेषः स देवो स्माकं शर्म सुखं सम्यक् वचनवत् दद्यात् स्वावसुः स्वायत्त धनः सन् ॥ ॥अथाष्टमी ॥ ॥ज्यायांसमस्य यतुनस्य केतुन ऋषि
स्वरं चरति यासु नाम ते ॥ यादृश्मिन् धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत् ॥ ॥इयमाग्नेयी सौरी वा हे देव ज्यायांसं अतिशयेन प्रवृद्धं
अस्य यतुनस्य यततिर्गतिकर्मा गंतुरस्य सूर्यस्य कर्मणिषष्ठ्यो अग्नुं गंतारं केतुना केतुना प्रज्ञापकेन कर्मणा उदयादिलक्षणेन विशिष्टं ऋषिस्व

च०भा० रं ऋषिभिः कृत्यं तां चरति गच्छति भजते यजमानः तेन साधनेन या स्तुतिः सुष्टुदीयं नाम नमन नामकं वा रूपं वर्त्तते तामभि इत्यर्थः यद्वा अस्य यत्तु
नस्य गमनशीलस्य तव केतुना तमोनिर्हरणादिकर्मणा विशिष्टं तां चरति याः हृष्मिन्नूयाः हृशो कामे धायि धनेकर्त्तरि चि एः सामर्थ्यात्मनः गम्य
५० तेतं यथानिर्दिष्टां प्रति निर्दिष्टस्य सा तां दृशमित्यर्थो ज्ञातव्यः नादृशां कामं अपस्यया कर्मणा हविः स्तुत्यादिलक्षणेन विदत् विंदते य उप एव स्वय
मनन्यप्रेरितः सन् स्वमनीषयैव वहते धारयति फलं सः अरं अलं अ स्वर्थं करत् करोतीति शेषः अथवा य उप एव स्वयं वहते स्वयमेवानुतिष्ठति
सो त्यर्थं कुर्यात् न त्वन्येन कारितं फलं वहतीति॥ ॥अथ नवमी॥ ॥समुद्रमासामव तस्थे अग्रिमा न रिष्यति सवनं यस्मिन्नायता॥ अत्रानहा
र्द्दिं ऋवणस्य रेजते यत्रा मतिर्विद्यते धृतबंधनी॥ ॥इयमपि सोरी आसां कृतीनां समुद्रं समुद्र इव सर्ववसानभूतं स्वर्यं अग्रिमा अग्र्यं तं श्रेष्ठाग्र्य
स्मादीया स्तुतिः अवतस्थे अवगच्छति यद्वा आसां प्रजानां ऋत्विजां स्तुतिः रिति संबंधः सवनं स्तूयते सोमो अत्रेति सवनं यज्ञगृहं न रिष्यति न हिंस्यते
किं तु प्रवर्धते इत्यर्थः यस्मिन्नायता विस्तीर्णा निश्चला वा तिष्ठति तत्सदनमिति अत्रास्मिन्नू यजमानगृहे ऋवणस्य स्तुतिः कर्तुर्हार्दिं हृदयसंबंधि हृ
दयगतं काम्यं फलं न रेजते न विचलति न मृषा भवति यत्र यस्मिन्नु स्तोत्र गृहे मतिः स्तुतिः धृतबंधनी धृतं सूर्यं लभ्यंती विद्यते अत्र नरेजत इति॥ ॥अ राम
थ दशमी॥ ॥स हि क्षत्रस्य मनसस्य चित्तिभिरेवावदस्य यजतस्य सध्रेः॥ अवत्सारस्य स्पृणवाम रण्वभिः शविष्ठं वाजं विदुषा चिदर्ध्यं॥ ॥इय ५०
मपि सोरी स हि खलु सविता देवः सर्वैः स्तुत्यः सर्वकामपूरक मित्यर्थः हि शब्दो लोकवेदयोः प्रसिद्धिद्योतकः तस्मात्सेका ज्ञातः अत्रान्ये च स्तुष

योत्र दृष्टलिंगाद् इत्युक्तत्वात् क्षत्रादय ऋषयः क्षत्रस्य मनसस्य एवावदस्य यजतस्य सध्रेः॥ अवत्सारस्य वैशाम् ऋषीणाम् अस्माकं रण्वं रमणीयम् अ
श्विनिभिः स्पृणवाम पूर्वयाम किं विशिष्टं वाजं अतिशायेन बलवदन्नं अन्नं वै वाज इति श्रुतेः विदुषा चित् विपश्चिता अर्थ्यं समर्धनीयं स्पृणवाम स्तोत्रा
दयो वयम् इति संबंधः॥ ॥ इति चतुर्थस्य द्वितीये चतुर्विंशो वर्गः॥ ॥ अथैकादशी॥ ॥ श्येन आसाम् अदितिः कक्ष्यो३ मदो विश्ववारस्य यजतस्य माथि
नः॥ सम् अन्यम् अन्यम् अर्थयन्त्येतवे विदुर्विषाणं परिपानम् अंति ते॥ ॥ मदः देवस्येयं विश्ववारादीनां त्रयाणाम् ऋषीणां स्वभूतः आसोमपः सोमरसलक्षण
नामदः श्येनः शंसनीयगमनः शीघ्रं पातसंकाशं गंता अदितिः अदीनः अतिसमृद्धः कक्ष्यः कक्ष्यपूरकः श्रमवतीतिशेषः ते विश्ववारादयः॥ सत्रे
प्रवृत्ता एते वै सोमे शाक्तुनत्सानाय अन्यम् अन्यं परस्परम् अर्थयंति याचंते अनुक्रांते विषाणं विशेषेण मदस्य दातारं परिपानं अंति अंतिके विदुर्जानंति
लभंते वा॥ ॥ अथ द्वादशी॥ ॥ सदापृणो यजतो वि द्विषो वधीद् बाहुवृक्तः श्रुतवित् तर्यो वः सचा॥ उभा स वरा प्रत्येति भाति च यद् ईं गणं भजते सुप्र
यावभिः॥ ॥ सदापृणः सर्वदा दानशीलः एतन्नामा यजतो यष्टा च बाहुवृक्तः बाहुभ्यां वृक्तः दर्भस्य श्रुतवित् श्रुतस् तस्य वेत्ता च तर्यश्च एतेषां प
वानां परस्परापेक्षया प्रत्येकमेकवचनं स सत्रऋषिः द्विषः शत्रून् वधीत् अहिंस्यात् वो युष्माकं सचा सहितः युष्माभिः सहित इत्यर्थः सत्रऋषिः
वरा श्रेष्ठौ उभा उभौ इहलोकपरलोकविषयौ कामौ प्रत्येति अभिगच्छति भाति च यद्यस्माद् ईम् एनं गणं देवसंघं सुप्रयावभिः सुष्ठु प्रकर्षेण मिश्र
यद्भिः स्तोत्रैः भजते तस्माद् एवं भातीति॥ ॥ अथ त्रयोदशी॥ ॥ सुतंभरो यजमानस्य सत्पतिर्विश्वासाम् ऊधः स धियाम् उदंचनः॥ भरद्धेनू रसवच्छिश्रि

सं॰ भा॰ येपयो नुब्रुवाणो अध्येतिन स्वपन्॥ ॥यजमानस्यावत्सारस्य मम सुतंभरो यागनिर्वाहकः एतन्नाम ऋषिः स सत्तिः सतां विद्यमानेपालयिता होता भ
वती यद्यर्थः स च विश्वासां धियां सर्वेषां कर्मणां ऊधः उधतरं फलं दत्नं ऊर्ध्वमुद्गमयिता फलप्रापक इत्यर्थः सामर्थ्यात्तस्मै वमनु ब्रुवाणो अ
५१ नुक्रमेणं कीर्तयन् स्वपन् स्वापमकुर्वन् अनवरम ध्येति स्मरति अवत्सारः सुतंभरस्तादृशाइति॥ ॥अथ चतुर्दशी॥ ॥यो जागार तमृचः कामयं
ते यो जागार तमु सामानि यंति॥ यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः॥ ॥यो देवो जागार सर्वदा विनिद्रो जागरूको गृहेय
न्तितमृचः सर्वशास्त्रात्मिकाः कामयंते यश्च जागार तमुत्तमेव सामानि स्तोत्ररूपाणि यंति प्राप्नुवंति यो जागार तमयं अभिषुतः सोम आहवर्ति
मां स्वीकुर्वंति हे अग्ने तादृशस्य तव सख्ये समानख्याने हितकरणे न्योकाः नियतस्थानोहमस्मि भवामि॥ ॥अथ पंचदशी॥ ॥अग्निर्जागार
तमृचः कामयंते ऽग्निर्जागार तमु सामानि यंति॥ अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः॥ ॥पूर्वयैव निगदितव्याख्याप्य
इत्यस्य स्थाने अग्निरिति शेषः॥ ॥इति चतुर्थस्य द्वितीये पंचविंशो वर्गः॥ ॥इति पंचमे मंडले तृतीयोनुवाकः॥ ॥चतुर्थेनुवाके द्वादश सूक्ता
नि तत्र विदा दिव इत्येकादशर्चं प्रथमं सूक्तं॥ सदापृणो नामात्रेय ऋषिः त्रिष्टुप् छंदः वैतदित्यृक्तत्वादिदमपि वैश्वदेवं विदा एकादश सदापृण राम
इत्यनुक्रमणिका। विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥विदा दिवो विष्यन्नद्रिमुक्थैरायत्या उषसो अर्चिनो गुः॥ अपावृत व्रजिनीरुत्स्वर्गा ५१
द्वि दुरो मानुषीर्देव आवः॥ ॥अत्रेंद्रादयो लिंगोक्ता देवताः अंगिरसां पणिभिरपहृत्य गिरेरधः स्थापिता नां गवामिंद्रेण विमोकः प्रतिपाद्यते।

ऋ॰भा॰ स्थिरं तोंगिरसो भूमस्य अस्यधिकं दसयंतउपक्षयंत्यात्मानं कर्मभिः। ——— अथ चतुर्थी॥ ॥सूक्तेभिर्वो वचोभिर्देवजुष्टैरिंद्रान्व१ग्नी अवसे
हुवध्यै॥ उक्थेभिर्हि ष्मा कवयः सुयज्ञा आविवासंतो मरुतो यजंति॥ ॥हे इंद्राहे अग्नी परस्परापेक्षया प्रत्येकं द्विवचनं अथ चैकमेव पदं मध्योद
५२ धानं छांदसं हे इंद्राग्नी वो युवां व्यत्ययेन बहुवचनं देवजुष्टैर्देवैः सेवनीयैः सूक्तेभिः सूक्तैः सुवचनैः शोभनगुणप्रकाशनप्रवणैः वचोभिर
वसे रक्षणाय हुवध्यै आह्वयामि नु क्षिप्रं युवां उक्थेभिः स्तोत्रैः कवयो नूचानाः पूर्वे ऋषयः सुयज्ञाः शोभनयागाः आविवासंतः त्यादिना
परिचरंतो मरुतो मरुत्सदृशाः कर्मसु शीघ्राः यजंति पूजयंति हि स्मेति पूरणे॥ ॥अथ पंचमी॥ ॥एतो न्व१द्य सुध्यो३ भवाम प्र दुच्छुना मिनवामा व
रीयः। आरे द्वेषांसि सनुतर्दधामायाम प्रांचो यजमानमच्छ॥ ॥अयमंगिरसां वादः॥ अद्यास्मिन्यागदिने नु क्षिप्रं एत गच्छत सुध्यः शोभनकर्माणो
भवाम दुच्छुना। द्विषः प्रमिनवाम प्रकर्षेण हिंसाम वरीयोत्यंतमित्यर्थः॥ तदेवोच्यते सनुतः। संभजनीयात् द्वेषांसि यजमानस्य द्वेष्टॄन् आरे दूरे दधाम स्था
पयाम यद्वा सनुत इत्यंतर्हितनाम पूर्वं प्रकाशवैरिणां वध उक्तः इदानीं प्रच्छन्नानामिति विशेषः। तदर्थं यजमानं सदाप्रणमवत्सारं प्रांछ अभिमुख
मायाम गच्छामः॥ ॥इति चतुर्थस्य द्वितीये षड्विंशो वर्गः॥२६॥ ॥अथ षष्ठी॥ ॥एता धियं कृणवामा सखायोऽप या माताँ ऋणुत व्रजं गोः॥ यया म
नुर्विशिशिप्रं जिगाय यया वणिग्वंकुरापा पुरीषं॥ ॥इदमप्यंगिरसां वाक्यं एत आगच्छत आगत्य च धियं कृतिं कृणवाम करवामहै सखायः। परस्परं राम
सखिभूता अंगिरस इत्यंगिरसां वचनं या धीः माता गवां निर्मात्री गो गर्वो व्रजं पणिभिरपहृतं अप ऋणुत अपावृणोत यया च मनुः विशिशिप्रं वि ५२

गतहनुं शत्रुं जिगाय जितवान् यद्वा मनुः सर्वस्य मंता इंद्रः विशिशिप्रो हन्ता सतमस्माभिः कृतया स्तोमलक्षणया धिया जिगाय यया च वणिक् वणिगि
वाल्पेन कर्मणा बहुफललाकांक्षावान् वंकुः जले ऋजुयावनगामी पुरीषं पूरकमुदकमापयाभिः सुदानुः आशिजाय वणिजे दीर्घश्रवसे मधुकोश इति हि
श्रुतेः॥ ॥अथ सप्तमी॥ ॥अनूनोदत्र हस्तयतो अद्रिरार्चन्येन दश मासो नवग्वाः॥ ऋतं यती सरमा गा अविंदद्विश्वानि सत्यांगिराश्चकार॥ ॥अ
त्रास्मिन्यज्ञे अद्रिरभिषवग्रावा हस्तयतो हस्तेन संहतः सन् अनूनोत् नोतिरत्र शब्दमात्रे वर्तते अशब्दयत् येन ग्राव्णा तदभिषवेण दशमासो मासा
न् दशमासपर्यंतं नवग्वाः नवमासपर्यंतं गवार्थं अनुतिष्ठतोंगिरसो नवग्वाः नवगो युक्ता वा अर्चन् अपूजयन्निंद्रं यद्वा दशसंख्याकामासोपेताः
दशमासानुष्ठाना अंगिरसोपरे नवग्वाश्चैते सर्वे येनार्चंति नवग्वासः सुतसोमास इंद्रमिति हि निगमः ऋतं सत्यं यज्ञं वायती गच्छंती स
रमा सरणशीला शुनिरूपा वाक् अंगिरसां गवार्थं इंद्रेण प्रहिता देवशुनी गा अविंदत् पणिभिरपहृताः विश्वानि सर्वाणि कृत्यादिलक्षणानि स
त्यासत्यानि चकार अंगिराः॥ ॥अथाष्टमी॥ ॥विश्वे अस्या व्युषि माहिनायाः सं यद्गोभिरंगिरसो नवंत॥ उत्स आसां परमे सधस्थ ऋतस्य पथा सरमा वि
दद्गाः॥ ॥विश्वे सर्वे अंगिरसो माहिनायाः संमहनीयायाः अस्याः उषसो व्युषि व्युच्छने सति गवामावरके अंधकारे अपगते सति यद्यदा गोभिः सन्नवंत संज
ग्मिरे तदा आसां गवां उत्सः क्षीराधस्त्रावः परमे उत्कृष्टे सधस्थे सहस्थाने यज्ञे उपयुक्तो भवदित्यर्थः ऋतस्य सत्यस्य पथा मार्गेण सरमा वाक् देव
शुनी वा गा निरूढा विदद्वेत् अलभत। यद्वा आसां गवां परमे सधस्थे सहस्थाने व्रजस्य निगूहनप्रदेशे उत्स उदकस्य प्रस्रवणो वर्तते बिलमित्यर्थः तेन

ऋ॰ भा॰ ऋतस्योदकस्य पथा मार्गेण सरमा गा अविंदत् ॥ ॥ अथ नवमी ॥ ॥ आ सूर्यो यातु सप्ताश्वः क्षेत्रं यदस्योर्विया दीर्घयाथे ॥ रघुः श्येनः पतयदंधो अच्छा युवा
५३ कविर्दीदयद्गोषु गच्छन् ॥ ॥ सूर्यः सर्वस्य प्रेरको देवः सप्ताश्वः सर्पणस्वभावाश्वोपेतः सप्तसंख्याकाश्वो वा आ यातु अस्मदभिमुखमागच्छतु यद्यस्मादस्य
सूर्यस्य दीर्घयाथे दीर्घगमने क्षेत्रं गंतव्यप्रदेशः उर्विया उरु अतिप्रभूतया मः सएव देवो रघुः लघुगमनः सः श्येनः शंसनीयगमनः अंधो दीप्यमा
नं हविः अच्छाभिलक्ष्य पतयत् आगच्छति युवा सर्वत्र मिश्रयिता कविः क्रांतदर्शी सन् गोषु रश्मिषु गच्छन् वर्तयन् दीदयत् दीप्यते यद्वा श्येनः सुप
र्णः अंधः अपतयत् द्युलोकस्थं सोमलक्षणं देवानामन्नम् अस्मद्यागार्थमानाने तदभिमुखमगात् युवेत्यादि द्विर्हि समानं ॥ ॥ अथ दशमी ॥ ॥ आ
सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्धरितो वीतपृष्ठाः ॥ उद्ना न नावमनयंत धीरा आशृण्वतीरापो अर्वागतिष्ठन् ॥ ॥ सूर्यो देवः शुक्रं दीप्तं अर्णः उदकं
प्रति अरुहत् सर्वतः प्रादुर्भवंतीत्यर्थः यद्यस्मात् यदा देवो हरितोश्वान् वीतपृष्ठाः कांतपृष्ठान् अयुक्त रथे अयोजत तदा तं सूर्यं धीरा धीमंतो यजमाना द
यः उद्ना उदकेन नावं न नावमिवानयंत तदा आशृण्वतीः सर्वतोनुज्ञां कुर्वाणाः आपो अर्वाक् अवाङ्मुखा अतिष्ठन् अभवन् ॥ ॥ अथैकादशी ॥ ॥ धि
यं वो अप्सु दधिषे स्वर्षां ययातरन्दश मासो नवग्वाः ॥ अया धिया स्याम देवगोपा अया धिया तुतुर्यामात्यंहः ॥ ॥ हे देवा वो युष्माकं धियं स्तुतं अ राम
प्सु अयेन मित्रो स्वर्षां सर्वस्य दात्रीं दधिषे धारयामि यया येन मध्यमः यया धिया कर्मणा नवग्वाः अंगिरसो दशमासो अंतरन् सत्रमनुतिष्ठ
तः अथानया धिया देवगोपाः देवैर्गुप्ताः स्याम भवेम अया धिया अंहः पापं तुतुर्याम अतितरेम ॥ ॥ इति चतुर्थस्य द्वितीये सप्तविंशो वर्गः ॥ ॥ ५३

विराट् अवेदयत् इंद्रः किं गा इति संबंधः निगूढाः किं कुर्वन् उच्चैरं गिरसां कृतिभिः निमित्तभूताभिः अद्रिं वज्रं विध्यन् प्रक्षिपन् रक्षकाणां पुरः भि
रिभेदनाय वपच विध्यन् अपस्याः आगामिन्या उषसः संबंधिनोरश्मयो युः आगच्छन् सर्वत्र प्रसृता अभवन् अपावृता अपावृणोत् व्रजि
नीः तमः पुंजवती निशा स्वः स्वरणशील आदित्यः उदात् उदगात् तथा कृत्स्नाम् मानुषीर्मनुष्यसंबंधिनीः दुरो द्वाराणि देवः सूर्यो व्याव वि अपावृणोत्
अंधकारापनयनेन मनुष्यादिव्यवहाराय करोदित्यर्थः ॥ ॥ अथ द्वितीया ॥ ॥ वि सूर्यो अमतिं न श्रियं सादोर्वाद्गवां माता जानती गात् ॥ धन्वर्णसो
नद्यः खादो अर्णाः स्थूणेव सुमिता दृंहत द्यौः ॥ ॥ सूर्यो देवः श्रियं दीप्तिं विसात् विभजते प्रकाशयतीत्यर्थः अमतिं न रूपमानेन तत् रूपमिव द्रव्याणि यथा
द्रव्याणि घटपटादीनि नीलपीतादिरूपं भजंते तद्वत् तथा गवां रश्मीनां माता ऊषाः जानती सूर्य उदेष्यतीति मया वर्त्युच्छेदनेन कर्तव्यमिति जानती उर्वा
त् महतोंतरिक्षात् आगात् आगच्छति तथा नद्यश्च धन्वर्णसः धन्व निर्गतिकर्मा धन्वंति गच्छंति अर्णांसि यासु ता स्तथोक्ताः दग्धा भावे छादसः खादो अ
र्णाः भक्षितकूलोदकाः कूलं केवा इत्यर्थः नद्यश्चैवंरूपा भवंति किं च द्यौश्च सुमिता सुष्ठु गृहे स्थापिता स्थूणेव गृहाधारस्तंभ इव दृंहत दृढा भव
त एतत्सर्वं सूर्यस्य ज्ञापयतीति भावः ॥ ॥ अथ तृतीया ॥ ॥ अस्मा उक्थाय पर्वतस्य गर्भो महीनां जनुषे पूर्व्याय ॥ वि पर्वतो जिहीत साधत द्यौराविवा
संतो दसयंत भूम ॥ ॥ अस्मै महां उक्थाय स्तोत्रे पर्वतस्य पर्ववतो मेघस्य गर्भो गर्भस्थानीयमुदकं जिहीत चलति चालयति वेंद्रः कीदृशाय अस्मै मही
नां महतीनां कृतीनां जनुषे उत्पादयित्रे पूर्व्याय प्रलायतदेव पुनरुच्यते पर्वतो मेघो विजिहीत द्यौश्च साधन साधयति वृष्टिं आविवासंतः सर्वतः प

॥हयोनविद्वानित्यष्टर्चं सूक्तं प्रतिक्षत्रस्यार्षं अष्टमीद्वितीयाचजगत्यौ शिष्टाः पङ्क्त्यन्त्यः आदितः षड्भ्यो देवाः सप्तम्यष्टम्यो देवपत्न्यो देवतास्तथा चानु
क्रान्तं हयोष्टौ प्रतिक्षत्रो त्र्यन्त्ये द्वे देवपत्नीस्तवौ त्याज्जिष्टुप् द्वितीया चेति। सूक्तविनियोगो लैङ्गिकः॥ ॥तत्र प्रथमा॥ ॥हयो न विद्वाँ अयुजि स्वयं धुरि तां
वहामि प्रतरणीमवस्युवं॥ नास्या वश्मि विमुचं नावृतं पुनर्विद्वान्पथः पुरएत ऋजु नेषति॥ ॥हयो न अश्व इव विद्वान् सुज्ञः स्वयं अनन्यप्रेरि
तः सन् धुरि यज्ञात्मिकायां अयुजि युक्तोभवं तां धुरं प्रतरणीं प्रकर्षेण तारयित्रीं अवस्युवं रक्षयित्रीं वहामि धारयाम्यहमध्वर्युर्होता वा अस्या धुरो विमु
चं विमोचनं परित्यागं वश्मि कामये नावृतं पुनः पुनः आवरणं धारणमपि न च वश्मि मम को भारो देवो च्यते विद्वान्मार्गाभिज्ञो नियामी देवः पुरएता
पुरोगन्ता सन् तथा यज्ञमार्गान् ऋजु अकुटिलं नेषति प्रापयति॥ ॥अथ द्वितीया॥ ॥अग्न इन्द्र वरुण मित्र देवाः शर्धः प्रयन्त मारुतोत विष्णो॥ उभा
नासत्या रुद्रो अध ग्नाः पूषा भगः सरस्वती जुषन्त॥ ॥हे अग्ने इन्द्र वरुण मित्र देवाः यूयं शर्धो बलमस्माकं प्रयन्त प्रापयन्त अत्र सर्वस्य पूर्वस्या वि
द्यमानत्वे नोत्तरस्य पादादित्वाद्द निघातः प्रथमस्य तु रचन एव पादादित्वं उत अपि च हे मारुता निमरुतो बलानि हे विष्णो यूयं शर्धः प्रयन्त विष्णो इत्य
स्य उ तेस्य नेन व्यवधानान्निघातः किं च उभाउ भौ नासत्या नासत्य भूतौ रुद्रः अध अथ ग्नाः एतेषां देवानां स्त्रियश्च पूषा भगः सरस्वती जुषन्त सेव
तां अस्मदीयं यज्ञं स्तुतिं वा॥ ॥अथ तृतीया॥ ॥इन्द्राग्नी मित्रावरुणादितिं स्वः पृथि[illegible]मरुतः पर्वतां अपः॥ हुवे विष्णुं पूषणं ब्रह्मणस्पतिं भगं नु शं
सं सवितारमूतये॥ ॥इन्द्रादिसवितृतान् चतुर्दश देवान् ऊतये रक्षणाय हुवे आह्वयामि सोमिवास्वरित्यादिषु उच्यते स्मरणात्॥ ॥अथ चतुर्थी॥॥

उतनोविष्णुरुतवातोअस्रिधोद्रविणोदाउतसोमोमयस्करत्॥उतऋभवउतरायेनोअश्विनोतत्वष्टोतविभ्वानुमंसते॥ ॥उतअपिचनोस्माकंविष्णु
र्व्यापकोदेवोमयस्करत्मयइतिसुखनामसुखंकरोतुउतापिचवातोवायुःअस्रिधोहिंसकःसन्नमयस्करत् किंचिद्रविणोदाःधनस्यदातासोमो
पिमयस्करत्उतापिचऋभवोनोस्मभ्यंरायेधनायअनुमंसतेअनुमन्यंतेअश्वावश्विनोचत्वष्टादेवःउतविभ्वाऋभूणामन्यतमोदेवःएतेसर्वेपि
अनुमंसतेयद्वाअनुमंस्तइतिप्रत्येकंसंबंधनीयं॥ ॥अथपंचमी॥ ॥उतत्यन्नोमारुतंशर्धआगमद्दिविक्षयंयजतंबर्हिरासदे॥बृहस्पतिःशर्मपूषो
तनोयमद्वरूथ्यंवरुणोमित्रोअर्यमा॥ ॥उतापिचत्यत्तन्मारुतंशर्धोमरुतोबलंसंघोनोस्मानागमदागच्छतुकीदृशंतत्छर्धःदिविक्षयंद्युलोकेवर्त
मानंयजतंपूज्यंकिमर्थमागमनमितितदुच्यतेबर्हिःबर्हिष्यासदेउपवेष्टुंउपविश्यहविःस्वीकारायेत्यर्थः॥किंचबृहस्पतिर्देवःशर्मसुखंयमत्
यच्छतुउतनोस्मभ्यंपूषापियमत्कीदृशंशर्मवरूथ्यंवारयतिशीतवातादिकमितिवरूथंगृहंतदर्हंवरूथ्यंकिंचवरुणादयस्त्रयोपिप्रत्येकंशर्मयं
च्छंतु॥ ॥अथषष्ठी॥ ॥उतत्येनःपर्वतासःसुशस्तयःसुदीतयोनद्यःत्रामणेभुवन्॥भगोविभक्ताशवसावसागमदुरुव्यचाअदितिःश्रोतुमे
हवं॥ ॥उतापिचत्येतेपर्वतासःपर्ववंतेइंद्रयःसुशस्तयःशोभनस्तुतयः॥किंचसुदीतयःसुदानानद्यश्चत्रामणेपालनेस्माकंभुवन्भुवंतुभगोदेवो
विभक्ताधनानांविभागकर्तादातासन्शवसावसाचनेनअवसारक्षणेनचसहागमदागच्छतु॥उरुव्यचाःप्रभूतव्याप्तिःअदितिःअदीनादेवमातामेहवं
स्तुतिमाह्वानंवाश्रोतुशृणोतु॥ ॥पत्नीसंयाजेबुद्देवानांपत्नीनींपत्नीरित्यादिकेद्वेयाज्यानुवाक्येसूत्रितेंच॥देवानांपत्नीरुशतीरवंतुनइतिद्वेइतिश्री

ग्निमारुतशस्त्रेपेतेदेवानांपत्नीरुशतीरवंतुनइति।हेराकामहमितिद्वेइति॥ ॥एतयोर्मध्येप्रथमासूक्तेसप्तमी॥ देवानांपत्नीरुशतीरवंतुनःप्राव
तुनस्तुजयेवाजसातये॥ याःपार्थिवासोयाअपामपिव्रतेतानोदेवीःसुहवाःशर्मयच्छत॥ ॥देवानामिंद्रादीनांपत्नीःपत्न्यःउशतीःउशत्यःअस्म
दीयांस्तुतिंकर्मवाकामयमानाःनोस्माननवंतुरक्षंतुगंतुवायाःपार्थिवासःपृथिवीसंबंधिन्योयाश्चापामुदकानांव्रतेकर्मण्यंतरिक्षेवर्तंतेताहेदे
वीर्देव्यःहेसुहवाःशोभनाह्वानाःयूयंनोस्मभ्यंशर्मयच्छत॥ ॥अथाष्टमी॥ ॥उतग्नाव्यंतुदेवपत्नीरिंद्राण्याग्नाय्यश्विनीराट्॥ आरोद
सीवरुणानीशृणोतुव्यंतुदेवीर्यऋतुर्जनीनां॥ ॥अपिचग्नाःस्त्रियोदेवपत्नीःदेवपत्न्यःदेवाःपतयोयासांताःदृश्योव्यंतुहविर्भक्षयंतुताविवि
च्योच्यंतेइंद्राणीइंद्रस्यपत्नीःअग्नाय्यग्नेःपत्नीअश्विनीअश्विनोःपत्नीराट्राजमानाकिंचरोदसीरुद्रस्यपत्नीतियास्केनोक्तेएवंसतिविधित
स्तुकारोदसीत्यत्रयथाआद्युदात्तग्रहतेनस्त्वंह्यद्यापिभाव्यंतथापिशाकल्येनमहर्षिणैवमुक्तत्वात्तथैवद्रष्टव्यंवरुणानीवरुणस्यपत्नी
आस्मर्वंतःप्रत्येकंशृणोतुकिंचदेवीःपत्नीसंयाजादेव्योव्यंतुखादयंतुहविःयोजनीनांदेवजातीनांऋतुःकालःतदभिमानोदेवोपिशृणोतु
व्यंतुच अत्रापिचग्नाव्यंतुदेवपत्न्यादिनिरुक्तंद्रष्टव्यं॥ ॥इतिचतुर्थस्यद्वितीयेष्टाविंशोवर्गः॥ ॥२८॥ ॥वेदार्थस्यप्रकाशेनतमोहार्दं
निवारयन्॥पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ ॥छ॥ ॥इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपाल
साम्राज्यधुरंधरेणसायणामात्येनविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येचतुर्थाष्टकेद्वितीयोऽध्यायः॥ ॥छ॥ ॥छ॥

॥ चतुर्थाष्टके द्वितीयोऽध्यायः॥

ऋ० भा० स्योदकस्य वा नाभिमंतरिक्षं आतस्थिवांसः आतिष्ठंतः अनंतासो परिमिताः उरवो व्याप्ताः पंथाः पतनशीलाः रश्मयो द्यावापृथिवी परि दिवं च पृ
थिवीं चांतरिक्षं च विश्वतः एष्नोः यंति गच्छंति सीमिति पूरणः ॥ ॥ अथ तृतीया ॥ ॥ उक्षा समुद्रो अरुषः सुपर्णः पूर्वस्य योनिं पितुरा विवेश ॥ म
५६ ध्ये दिवो निहितः पृश्निरश्मा वि चक्रमे रजसस्पात्यंतौ ॥ ॥ सोयमीयं त्र चः उक्षा उदकस्य कामानां वा सेक्ता समुद्रः समुंदनः यद्वा संमोदंते स्मि
न्देवा इति समुद्रः अरुषः आरोचमानः सुपर्णः सुगमनः पूर्वस्य विलक्षणे यं पूर्वदिगवयस्य पितुः पालकस्यांतरिक्षस्य योनिमुत्पादकमवय
वमाविवेश आविष्टवानू पश्चाद्दिवो मध्ये निहितः पृश्निः आश्रुतएनं वर्ण इति पृश्निरादित्यः अश्मा सर्वत्र व्याप्तः लुप्तोपमा वा अश्मसदृशः र
जसोंतरिक्षस्यांतौ पूर्वापरभागौ वि चक्रमे विक्रमते पाति च जगत् जगद्रक्षार्थं क्रमत इत्यर्थः ॥ ॥ अथ चतुर्थी ॥ ॥ चत्वार ईं बिभ्रति क्षेमयंतो द
शगर्भं चरसे धापयंते ॥ त्रिधातवः परमा अस्य गावो दिवश्चरंति परि सद्यो अंतान् ॥ ॥ चत्वार ऋत्विजः ईं इमं आदित्यं क्षेमयंतः क्षेममात्मन इच्छं
तो बिभ्रति धारयंति हविर्भिः स्तुतिभिश्च किंच दश आदिशो गर्भं गर्भवन्मध्ये उत्पन्नमेनं चरसे चरणाय उदयास्तमयव्यवहाराय धापयंते स्वरसं पिबं
ति त्रिधातवः त्रिप्रकाराः शीतोष्णवर्षभेदेन त्रिविधा अस्यादित्यस्य परमा उत्कृष्टा गावो रश्मयो दिवोंतरिक्षस्यांतान्पर्यंतान् परि परितः सद्यः उदयान
न्तरमेव चरंति गच्छंति ॥ ॥ अथ पंचमी ॥ ॥ इदं वपुर्निवचनं जनासश्चरंति यन्नद्यस्तस्थुरापः ॥ द्वे यदीं बिभृतो मातुरन्ये इहेह जाते यम्या सबंधू ॥ श्रीव
॥ जनासो हे जना ऋत्विजः इदं पुरतो दृश्यमानं वपुः शरीरं मंडलं निवचनं स्तुत्यं भवतीति शेषः यन्मंडलं उपजीव्य नद्यश्चरंति प्रवहंति आपश्च य ५६

न्मंडलमधितस्थुः मंडलाधीनतया आसां इदमेतद्द्युकालक्षणं यन्मंडलं द्वे अहोरात्रे मातुर्निर्मातुः मातृस्थानीयादंतरिक्षादन्ये इहेह चेह च सूर्ये जाते निष्प
न्ने यम्या यम्ये नियमनीये युग्मभूते वा सबंधू समानबंधने उभयोरेकः एव सूर्यो बंधको ययोस्तादृश्यौ बिभृतो धारयतः ॥ ॥ अथ षष्ठी ॥ ॥ वि त
न्वते धियो अस्मा अपांसि वस्त्रा पुत्राय मातरो वयंति ॥ उपप्रक्षे वृषणो मोदमाना दिवस्पथा वध्वो यंत्यच्छ ॥ ॥ अस्मै सूर्याय धियः स्तुतीः अपां
सि कर्माणि च वितन्वते विस्तारयंति यजमानाः पुत्राय पुत्रस्थानीयाय मातरो निर्मात्र्यः उषसो दिशो वा वस्त्राणि वयंति निष्पादयंति वस्त्रसदृशा
नि तेजांसि विहितानि संपादयंतीत्यर्थः ॥ वृषणः सेक्तुः सूर्यस्य उपप्रक्षे उपपर्चने संपर्के सति मोदमाना हृष्यंतो वध्वो वधूस्थानीयाः रश्मयः
दिवस्पथा सबंधिना मार्गेण अस्मदभिमुखं यंति गच्छंति प्रसरंति ॥ ॥ अथ सप्तमी ॥ ॥ तदस्तु मित्रावरुणा तदग्ने शंयोरस्मभ्यमिदमस्तु शस्तं ॥ अ
शीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥ ॥ लिंगसिद्धा देवता ॥ हे मित्रावरुणा मित्रावरुणौ इदं सूक्तं शस्तं कृतमस्तु भवतु हे अग्ने एतत्सू
क्तं शस्तमस्तु अस्मभ्यं शं सुखाय योः दुःखानामभिश्लेषणायेदं शस्तमस्तु वयं चाशीमहि प्राप्याम गाधं स्थितिमुतापि च प्रतिष्ठां स्थिततरां स्थितिं च
शीमहि नमो नमस्करोमि दिवे द्योतमानाय सूर्याय बृहते महते सादनाय आश्रयाय विश्वस्य ॥ ॥ इति चतुर्थस्य तृतीये प्रथमो वर्गः ॥ ॥ कदु प्रियाय पं
चर्चं चतुर्थं सूक्तं प्रतिभानुर्नामात्रेय ऋषिः जगती छंदः विश्वे देवा देवता ॥ कदु पंच प्रतिभानुर्जागतमिति ॥ आभिप्लविके पंचमेहनि वैश्वदेवशस्त्रे इदं
सूक्तं ॥ निविद्धानं सूत्रितं च ॥ कदु प्रियायेति वैश्वदेवमिति ॥ ॥ तत्र प्रथमा ॥ ॥ कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयं ॥ आमेन्यस्य र

सं०भा० जसो यदभ्र आं अपो वृणाना वितनोति मायिनी॥१॥ अत्र वैद्युताग्निः संस्तवः। कदु कदा इति पूरणः। प्रियाय सर्वेषां प्रियभूताय वृष्टिद्वारा हविरादिप्रयोजक
५७ त्वात्सर्वप्रियत्वमस्य प्रसिद्धं। धाम्ने धामाय तेजसे वैद्युताय उत्तरवाक्ये अभ्रं अपो वृणाना वितनोतीति वक्ष्यमाणत्वादिदं लभ्यते। कीदृशाय स्वक्षत्राय स्वभू
तबलाय किंच स्वयशसे स्वभूतान्नाय सर्वमथ मेघस्य स्वं महे महते एवंभूताय वयं कदा मनामहे स्तवाम यत् उत्तरत्र स्त्रीलिंगनिर्देशाद्येति विपरिणामयि
तव्यं या आग्नेयी शक्तिः। आमेन्यस्य समं तात्मतन्यस्य रजसो अंतरिक्षस्य अपरिमितमपि नभः इद्यदिति सर्वे मध्यं तेसंबंधिनि अभ्रे मेघे अधि मेघस्यो
परि अप उदकानि वृष्टिलक्षणानि वितनोति विस्तारयति वृणाना आच्छादयंती सेव्यमाना वा मायिनी मायेति प्रज्ञानाम प्रज्ञावती सती यद्वा यस्य संबंधि
नी माध्यमिका वाग्मितिवा योज्यं॥१॥ अथ द्वितीया॥ ता अत्नत वयुनं वीरवक्षणं समान्या वृतया विश्वमा रजः। अपो अपाचीरपरा अपेजते प्र पूर्वाभि
स्तिरते देवयुर्जनः॥२॥ इयमुषस्या ताः उषस अत्नत वितन्वंतीति किं वयुनं प्रज्ञानं कीदृशं वीरवक्षणं वीरैर्ऋत्विग्भिर्वहनीयं यद्वा वक्षणः कार्यवोढारो ये
न प्रेर्यंते तत्साहग्यं किंच समान्या एकरूपया वृतया वरकया दीप्त्या विश्वं सर्वमपि रजः जगदत्नता एवं सति देवयुः देवकामो जनः अपाचीः अपांच
नाः प्रतिनिवृत्तमुखीः अपरा अन्या आगामिनी रुषसः अपो एजते अपचालयति अपरो पशब्दः पूरणः पूर्वाभिस्ताभिः प्रतिरते प्रवर्धस्तिरतिर्वर्धना राम
र्थः वर्धयति स्वमुनीषां वर्धते वाल्ख्यं॥२॥ अथ तृतीया॥ आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि। शतं वा यस्य प्रचरन्त्स्वे दमे सं ५७
वर्तयंतो वि च वर्तयन्नहा॥३॥ अत्र पूर्वार्धेंद्र उच्यते। उत्तरार्धे इंद्रात्मा सूर्यः। आह्वयत इति शेषः। के। अहन्येभिः अहनि संपादितैः अक्तुभिः रात्रिभिः

॥श्रीभारत्यै नमः॥ ॥यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्। निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥१॥ ॥तृतीयाध्याय आरभ्यते॥ तत्र
प्रयुंजतीति सप्तर्चं तृतीयं सूक्तं प्रतिरथस्यार्षं त्रैष्टुभं पूर्ववत् वैश्वदेवं तद्धिकत्वादिदमपि वैश्वदेवं प्रयुंजती सप्त प्रतिरथ इत्यनुक्रमणिका। विनियो
गो लैंगिकः॥ ॥तत्र प्रथमा॥ प्रयुंजती दिव एति ब्रुवाणा मही माता दुहितुर्बोधयंती। आविवासंती युवतिर्मनीषा पितृभ्य आ सदने जोहुवा
ना॥ ॥एषोषस्या प्रयुंजती प्राणिनः प्रसक्तान् स्वेषु कर्मसु दिवो द्युलोकादेति आगच्छति ब्रुवाणा स्तूयमाना कर्मणि कर्तृप्रत्ययः मही महती माता
प्रकाशस्य देवानां वा निर्मात्री दुहितुः भूम्या बोधयंती बोधं कुर्वाणा तदुपजीव्यत्वात् दुहितृत्वमुपचर्यते यद्वा दुहितुर्देव इति संबंधः षष्ठी द्योर्दिवो
दुहितृत्वमाम्नातं अत इदमधिगम्यते। कदाचित् द्यौरुषसो जायते उषाश्च दिव इति प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुष
समित्यन्ये इति हि श्रूयते लिंगं च तत्पदि यत्नेकार्यकारणभावव्यत्यये अदितेर्दक्षो अजायत दक्षाद्वदितिरिति किंच आविवासंती परिचरंती युव
तिः मिश्रयंती सर्वत्र नित्यरूपिणी वा मनीषा स्तुतिमती पितृभ्यः तृतीयार्थे पंचमी पितृभिः पालकैर्देवैः सह सदने यागगृहे आ सर्वतो जोहुवाना अ
हूयमाना यद्वा पितृभ्यः कर्मणां पालकेभ्यो यजमानेभ्यः इष्टप्रापणेन पालकेभ्यो वा तेषामर्थाय जोहुवाना॥ ॥अथ द्वितीया॥ ॥अजिरासस्तदप
ईयमाना आतस्थिवांसो अमृतस्य नाभिं॥ अनंतास उरवो विश्वतः सीं परि द्यावापृथिवी यंति पंथाः॥ ॥अजिरासो गमनशीलाः अजिरशिरस्त
यांतो अजिरशिशिरेत्यादिना निपातितः तद्देवप्रकारान् रूपं कर्म यस्य तत् तादृशं आमहरीयमाना गच्छंतो अमृतस्य सूर्यस्य नाभिं संनाहकं मंडलं अमृत

च०भा० अपरो भावप्रत्ययः पूरणं यन्तायं भागो महान् भजनीयः सविता प्रेरकः दाति यच्छति वार्यं वरणीयं धनं॥ ॥इति चतुर्थस्य तृतीये द्वितीयो वर्गः॥ ॥
॥देवं व इति पंचर्चं पंचमं सूक्तं आत्रेयस्य प्रतिप्रभस्यार्षं त्रैष्टुभं वैश्वदेवं॥ प्रतिप्रभो स्यान्तृणपाणिरित्यनुक्रमणिका॥ विनियोगो लैंगिकः॥
५९ ॥तत्र प्रथमा॥ ॥देवं वो अद्य सवितारमेषे भगं च रत्नं विभजंतमायोः॥ आ वां नरा पुरुभुजा ववृत्यां दिवेदिवे चिदश्विना सखीयन्॥ ॥देवं द्यो-
तमानं सवितारं सर्वस्याभ्यनुज्ञातारं सर्वस्याभ्यनुज्ञातारं वः वामित्यर्थः यद्वा होतुरिदं वाक्यं वो यजमानोप्यो युष्मभ्यमर्थाया देवानां आ ईषे
उपगच्छामि भगं च भजनीयं देवं आयोर्मनुष्यस्य यजमानस्य रत्नं रमणीयं हविर्विभजंतं भगो वा विभजतीति भगस्य विभजने प्रसिद्धत्वाद्रायो वि-
भक्ता संभरस्व वस्वः॥ भगो विभक्ता शवसावसेति च श्रुतेः यद्वा चतुर्थ्यर्थे षष्ठी यजमानार्थं रत्नं रमणीयं धनं विभजंतं हे नरा नेतारो हे पुरुभुजा ते इ-
ति पुरुभुजो अश्विनो वां युवां दिवेदिवे प्रतिदिनं आववृत्यां आवर्षयामि अस्मदभिमुखं सखीयन् युवयोः सखित्वमिच्छन् चिदिति पूरणः॥ १॥
॥अथ द्वितीया॥ ॥प्रतिप्रयाणमसुरस्य विद्वान्त्सूक्तैर्देवं सवितारं दुवस्य॥ उप ब्रुवीत नमसा विजानं ज्येष्ठं च रत्नं विभजंतमायोः॥ ॥असुरस्य प्रा-
णानां निरसितुः प्रतिप्रयाणं प्रत्यागतिं विद्वान् जानन् सूक्तैः सवितारं देवं दुवस्य परिचर हे अंतरात्मन् किं च आयोर्मनुष्यस्य ज्येष्ठं च रत्नं धनं भ- राम
जंतं भगमित्यर्थः नमसा नमस्कारेण हविषा वा विजानन् विशेषेण भावयन्नित्यर्थः यद्वैतन्नितत्पर्थे यज्ञापयन् उप ब्रुवीत स्तोतुं सवान्॥ ॥ ५९
॥अथ तृतीया॥ ॥अदत्रया दयते वार्याणि पूषा भगो अदितिर्वस्त उस्रः॥ इंद्रो विष्णुर्वरुणो मित्रो अग्निरहानि भद्रा जनयंत दस्माः॥ ॥अथमत्रि

रदत्रया अदनीयानि अदेरौणादिकोत्रप्रत्ययः सुपां सुलुगिति याजादेशः अथवा अक्लिष्टदत्ताजिह्मतया वार्याणि वरणीयानि काष्ठानि दयत दयत
यतिरनेककर्मा अत्र दहने वर्त्तते दहतीत्यर्थः सामर्थ्यादग्निरिति गम्यते यद्वा अदनीयानि वरणीयानि अन्नानि दयत ददाति यजमानाय ददानय
तिहिंसाबलाख्यानेषु कीहगामिः पूषा पोषकः भगो भजनीयः अदितिरखंडनीयः यद्वा पूषादयस्त्रयोपि प्रत्येकं अदनीयानि वार्याणि चान्नानि द-
यत उस्रः सूर्यो वस्ते आच्छादयति सामर्थ्यात्तेजांसि इंद्रादयः पंचापि देवाः दर्शनीयाः अहानि सर्वाण्यागंतॄणि भद्रा शोभनीयानि जनयंत जनयं-
ति दिवसानां यागदानादिविशिष्टत्वमेव भद्रत्वं॥ ॥अथ चतुर्थी॥ ॥तन्नो अनर्वा सविता वरूथं तत्सिंधव इषयंतो अनु ग्मन्॥ उप यद्वोचे अध्व-
रस्य होता रायः स्याम पतयो वाजरत्नाः॥ ॥तत्प्रसिद्धं वरूथं वरणीयमस्मदभिमतं धनं नोऽस्मभ्यं अनर्वा अप्रयच्छत् केनाप्यप्रतिवारितः सविता दे-
वः प्रयच्छत्विति शेषः तद्धनं सिंधवः स्यंदनशीला इषयंतो गच्छंतो नद्यः अनुग्मन् अनुगच्छंतु धनं दातुं गच्छंत्वित्यर्थः यद्यस्मात् अध्वर-
स्य यागस्य होता होमनिष्पादकोहं उप वोचे उपेत्य ब्रवीमि तस्मात् प्रयच्छत्विति शेषः वयं चात्रेया रायो धनस्य बहुविधस्य पतयः स्वामिनः स्याः से
भवेम वाजरत्नाः अथवा यद्यस्माद्धोता वोचे स्तौमि तस्मात्सविता वरूथमागच्छतु। तस्मान्नद्यश्च नो वरूथं ग्मन् अनुग्मन् अनुगच्छंत्विति वा योज्यं॥ ॥अथ
पंचमी॥ ॥प्र ये वसुभ्य ईवदा नमो दुर्ये मित्रे वरुणे सूक्तवाचः॥ अवैत्वभ्वं कृणुता वरीयो दिवस्पृथिव्योरवसा मदेम॥ ॥ये यजमानाः वसुभ्यो यजनि-
वासेभ्यो देवेभ्यः ईवत् गमनवन्नमो नमस्कारं आप्रदुः ये च मित्रे वरुणे च सूक्तवाचः सूक्तवचसो भवंतीति तानस्मान् त्वमभ्वं महद्धनं तेजो वात्र

ऋ०भा० नेतुः अवगच्छतु हे देवाः कृणुत कुरुत च एतेभ्यो वरीयः उरुतरं सुखं दिवस्पृथिव्योरवसा रक्षणेन मदेम ॥ ॥ इति चतुर्थस्य तृतीये तृतीयो वर्गः ॥ ॥
॥ विश्वो देवस्येति पंचर्चं षष्ठं सूक्तं स्वस्त्यात्रेयस्यार्षं वैश्वदेवं पंचमी पंक्तिः आद्याश्चतस्रोऽनुष्टुभः तदुक्तमनुक्रमण्यां विश्वः स्वस्त्यात्रेयः पंक्त्यंत
५९ मिति ॥ षष्ठ्याभिप्लवषडहस्य प्रथमेहनि वैश्वदेवस्येति प्रतिपत्तत्र चस्याधः सूत्रितं च ॥ विश्वो देवस्य नेतुरित्येकेति आभिप्लविकेषु द्वितीया चतुर्थः ॥
॥ तत्र प्रथमा ॥ ॥ विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यं ॥ विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे ॥ ॥ तस्य सख्यं वुरीत वृणीत विश्वो जनो रायो धन
स्य इषुध्यति पे च मलंकार इत्तेतस्यानुग्रहात् सर्वो जनो द्युम्नं धनं वृणीत सवितारं पुष्यसे पुष्ट्यै पर्याप्तं धनं ॥ ॥ अथ द्वितीया ॥ ॥ ते ते देव नेतर्ये
चेमां अनुशसे ॥ ते राया ते ह्या३पृचे सचेमहि सचथ्यैः ॥ ॥ हे नेतर्देवताते ते तव स्वभूताः ते च ये यजमानाः ये चान्य इमान् विभक्तिव्यत्ययः इमे
होत्रादयः अनुशसे शंसितुं प्रभवंति ते पि मे मदीयाः संतु यद्वा इमान् अन्यानिंद्रादीन् अनुशसे क्रमेण शंसितुं प्रभवंति एकैव वा महानात्मा देव
तास्स सूर्यः स हि सर्वदेवतात्मा लोकस्वादितरासां देवतानां तदभिवादिति भावः न केवलं स एक एवेत्यर्थः ते उभये वयं राया धनेन सचेमहीति
संबंधः ते हि ते खलु आपृचे आपचनीये कृत्यार्थे कृत्यप्रत्ययः मेजी तद्यस्यत्ययस्वाद्विभक्तेः रदर्शनं सचथ्यैः सर्वैः कामैः सचेमहि संगच्छेमहि ॥ राम
॥ अथ तृतीया ॥ ॥ अतो न आ नॄनतिथीनतः पत्नीर्दशस्यत ॥ आरे विश्वं पथेष्ठां द्विषो युयोतु यूयुविः ॥ ॥ अस्मिन्यज्ञे पत्नी देवानां पत्नीरपितं दश
स्यत हविः सार्वविभक्तिकस्तसिः नोस्माकमृत्विजो नॄनतिथीन् नूतहृदयं ज्यां देवान् आरे दशस्यत सर्वतः परिचरत अतोस्मिन्यज्ञे पत्नीर्देवानाप ५९

तन्निषद्मेरित्यर्थः तथाविधेर्दिवे भिः साध्ये साधनत्वाच्छब्दः ग्रावसाध्यो रभिषवनिमित्तभूते आगत्य सोमः सन्ममापिनि च्छेनिमित्ते सति वरिष्ठमु
रुतरं वर्जं आ सर्वतो जिघर्ति दीपयति वा किं च वा ग्रावहृत्श्चार्थे यस्येदं शात्मकस्यादित्यस्य शतं शोत संख्याकाररश्मयः स्वेदमे स्वकीये गृहे आकाशे प्रच
रन्नून् प्रचरंति किं कुर्वंतः संवर्तयंतः प्राणिनो नाशयंतः यद्वा अहा अहानि दिवसान् संवर्तयंतः सम्यक्प्रवर्तयंतः विवर्तयन् अहा अहानि निवर्तयीति
गमान्येव पुनः प्रापयंति नृतपनपरिस्पंदाधीनत्वात् प्राणिनामायुः क्षयस्याहोरात्रादिव्यवहारस्य ॥ ॥ अथ चतुर्थी ॥ ॥ तामस्य रीतिं परशोरिव प्रत्य
नीकमख्यं भुजे अस्य वर्पसः ॥ सचा यदि पितुमंतमिव क्षयं रत्नं दधाति भरहूतये विशे ॥ ॥ इयमाप्तेयीतां प्रसिद्धामस्य सूरीतिं स्वभावं गतिं वा
परशोरिव प्रतिपरशोः प्रतिनिधिमिव पन्नया मिपरश्चुर्यथा स्वस्वामिनेभिमतं साधयति तद्वदित्यर्थः अस्य वर्पसो रूपवतोस्यादित्यस्यानीक
रश्मिसमूहं भुजे भोगाय अख्यं कथयाम्यहं स्तोत्रेय द्वियस्मात् स च देवः सचा अस्मत्सहायः सन् पितुमंतं अन्नवंतं क्षयमिव निवासमिव भर
हूतये संग्रामे यज्ञे वा आह्वानयुक्ताय विशे यजमानाय रत्नं रमणीयं धनं दधाति धारयति उभयमपि ददातीत्यर्थः ॥ ॥ अथ पंचमी ॥ ॥ स जिह्वया
चतुरनीक ऋंजते चारु वसानो वरुणो यतन्नरिं ॥ न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यं ॥ ॥ सोग्निश्चतुरनीकः चतुर्दिक्षु प्रवृद्ध
ज्वालः सन् स जिह्वया ऋंजते घृतादिकं गच्छति जिह्वया चतुरनीकः सन् ऋंजते अलंकरोति स्वात्मानं किं कुर्वाणः चारु रमणीयं तेजो वसानः आच्छा
दयन् वरुणः तमोवारकः सन् अरिमभित्रं च यतं नूतधरन् तस्य तमित्यर्थः तं न विद्म न जानीमो वयं पुरुषत्वता पुरुषत्वेन कामान् पूरकत्वेन वा युक्तं

च॰भा॰ भिरागहि॥ देवेभिर्हव्यदातये॥ ॥हे अग्ने त्वं सुतस्य पीतये सोमपानाय विश्वेः उमेभिः ऊमेः सर्वैरपि रक्षकैः देवेभिः देवैः इंद्रादिभिः सह हव्यदात
ये अस्माकं हविर्दानाय तत्र यजमानाय वा आगहि आगच्छ॥ ॥अथ द्वितीया॥ ॥ऋतधीतय आगत सत्यधर्माणो अध्वरं॥ अग्नेः पिबत जिह्व
६० या॥ ॥हे ऋतधीतयः सत्यस्तुतयः अबाध्यकर्माणो वा देवाः अध्वरमस्मद्यज्ञं आगत आगच्छत आगत्य च हे सत्यधर्माणः सत्यस्य धारयिता
रो यूयं अग्नेर्जिह्वया पिबत आज्यसोमादिकं॥ ॥अथ तृतीया॥ ॥विप्रेभिर्विप्र संत्य प्रातर्यावभिरागहि॥ देवेभिः सोमपीतये॥ ॥हे विप्र मेधा
विन् विविधकामानां पूरक हे संत्य संभजनीय अग्ने विप्रेभिः उक्तलक्षणैः प्रातर्यावभिः प्रातःकाले आगंतृभिर्देवेभिर्देवैः सार्धं आगहि आगच्छ कि
मर्थं सोमपीतये सोमपानाय॥ ॥अथ चतुर्थी॥ ॥अयं सोमश्चमू सुतो अमत्रे परिषिच्यते॥ प्रिय इंद्राय वायवे॥ ॥अयं पुरतो वर्तमानः सोम
श्चमूचम्वोः अभिषवणफलकयोः सुतः अभिषुतः सन् अमत्रे पात्रे परिषिच्यते पूर्यते स च इंद्राय वायवे च प्रियः पातुं हे इंद्रवायू आगच्छत
मिति शेषः॥ वायवायाहीत्येषा पृष्ठ्यस्य तृतीयेहनि प्रउगशास्त्रे वायव्यस्तृचस्याद्या सूत्रितं च॥ ॥अथ पंचमी॥ ॥वायवायाहि वीतये जुषा
णो हव्यदातये॥ पिबा सुतस्यांधसो अभि प्रयः॥ ॥हे वायो प्रयो त्वं सोमाख्यं अभिलक्ष्य आयाहि वीतये भक्षणाय जुषाणः हव्यदातये हविर्दा
तृयजमानाय तदर्थं आगत्य च सुतस्यांधसः अभिषुतमंधसोन्नं सोमलक्षणं पिब॥ ॥इति चतुर्थस्य तृतीये पंचमो वर्गः॥ ॥पृष्ठ्यस्य तृतीये राम
हनि प्रउगशास्त्रे ऐंद्रवायवस्तृचः इंद्रश्चेत्यादिके द्वे ऋचौ शंसनेतयोः प्रथमा द्वितीया वा आवर्त्य तृचं संपादयेत् तथा च सूत्रितं॥ इंद्रश्च वाय ६०

वेषां सुतानामिति द्वयोरन्यतरा द्विरिति॥ तृचे प्रथमा सूक्ते षष्ठी॥ इंद्रश्च वायवेषां सुतानां पीतिमर्हथः॥ तां जुषेथामरेपसावभि प्रयः॥ ॥हे वायो
हे इंद्र एषां पुरतो गृहीतानां सुतानामिति द्वयोरभिषुतानां पीतिं पानमर्हथः यस्माद्देवं तस्मात् तान् सोमरसान् जुषेथां सेवेथां अरेपसो अहिंसको
तदर्थं अभिप्रयः सोमाख्यमन्नमभिलक्ष्यागच्छतमिति शेषः यद्वा प्रयो अन्नरूपान्॥ ॥अथ सप्तमी॥ ॥सुता इंद्राय वायवे सोमासो दध्याशिरः॥
निम्नं न यंति सिंधवोभि प्रयः॥ ॥इंद्राय वायवे च सोमासः सोमाः दध्याशिरः दध्याश्रयणाः सुताः अभिषुताः संपादिताः ते च निम्नं गतं सिं
धवो नद्य इव हे इंद्रवायू युवामभियंति प्रयो अन्नरूपाः॥ तृतीयेहनि प्रउगशास्त्रे सजूर्विश्वेभिरिति वैश्वदेवस्तृचः सूत्रितं च॥ सजूर्विश्वेभिर्दे
वेभिरुत नः प्रियाः प्रिया स्विति सैषा तृचे प्रथमा सूक्ते अष्टमी॥ ॥सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः॥ आयाह्यग्ने अत्रिवत्सुते रण॥
॥हे अग्ने विश्वेभिः सर्वैर्देवेभिर्देवैः सजूः संगतः सन् अश्विभ्यां उषसा सजूः समानप्रीतिः सन् आगहि अत्रिवत् अत्रिरिव अत्रेर्यज्ञे यथा तथे
त्यर्थः यद्वा अत्रिर्यथा यज्ञे रमते तद्वत् सुते अभिषुते सोमे रण रमस्व॥ उत्तरे द्वे नवमी दशम्यौ स्पष्टे॥ ॥सजूर्मित्रावरुणाभ्यां सजूः सोमेन विष्णुना॥
आयाह्यग्ने अत्रिवत्सुते रण॥ सजूरादित्यैर्वसुभिः सजूरिंद्रेण वायुना॥ आयाह्यग्ने अत्रिवत्सुते रण॥ ॥इति चतुर्थस्य तृतीये षष्ठो वर्गः॥ ॥
पृष्ठ्यस्य षष्ठेहनि वैश्वदेवशस्त्रे स्वस्ति न इति तृचः सूत्रितं च॥ स्वस्ति नो मिमीतामश्विना भग इति तु वैश्वदेवमिति सूत्रितत्वात् तृचे प्रथमा सूक्ते
एकादशी॥ ॥स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः॥ स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना॥ ॥नोस्मभ्यं

स्व०भा० अश्विना अश्विनौ स्वस्ति अविनाशं क्षेमं मिमीतां भगश्च स्वस्ति मिमीतां तथा देव्यदितिश्च स्वस्ति मिमीतां अनर्वणः अस्य च८ एषा असुर८ शत्रूणां नि
६१ रसिता प्राणानां बलानां दाता८ स्वस्ति दधातु नोऽस्मभ्यं द्यावापृथिवी द्यावापृथिव्यौ च पिष्णु चेतुना शोभनेन प्रज्ञानेन विद्विष्टे स्वस्ति मिमी
तां॥ ॥अथ द्वादशी॥ ॥स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः॥ बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवंतु नः॥
॥स्वस्तये क्षेमाय वायुमुपब्रवामहे स्तुमः८ स्त्यर्थ८ सोमं चोपब्रवामहे यश्च सोमः८ भुवनस्य यस्पतिः८ पालकः८ सर्वलोकजीवनस्य सोमाय तेतात
तथा सर्वगणं देवगणोपेतं बृहस्पतिं बृहत८ कर्मणो मंत्रस्य पालयितारं स्वस्तये स्तुमः८ आदित्यासः८ आदित्य८ अदितेः८ पुत्राः सर्वे देवाः८ अ
रुणादयो द्वादशावानोऽस्माकं स्वस्तये भवंतु॥ ॥सत्रमध्ये दीक्षितेष्वाधितेसतित स्मिन्नह निवैश्वदेवशास्त्रे यंत्र चोनिविधानार्थः॥ स्वस्त्यात्रे
यं निविदं दधातीति स्वस्त्यात्रेयशाब्देनायं तत्र चोविवक्षितइतितत्र्याख्यातं तथा रूपादिकेस्तस्ययं तत्र जपः॥ ॥अथ त्रयोदशी॥ ॥विश्वे देवा
नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये॥ देवा अवंत्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः॥ ॥विश्वे सर्वे पि देवा नोऽस्मानत्र अद्यास्मि
न्नू पागदिने स्वस्तये क्षेमायावंतु वैश्वानरो विश्वएनं नरा नयंतीति वैश्वानरः८ वसुः८ सर्वस्यावासयिता अग्निर्देवः८ अयमेवाग्निर्वैश्वानर इति
शाकपूणिरितियास्कः८ सोपि स्वस्तये वंतु देवा ऋभवोपि स्वस्तयेवंतु रुद्रो दुःखाद्रावयिता देवोपि अंहसः८ पापात् स्वस्ति पातु नोऽस्मान्॥ ॥अथ राम
चतुर्दशी॥ ॥स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति॥ स्वस्ति न इंद्रश्चाग्निश्च स्वस्ति नो अदिते कृधि॥ ॥हे मित्रावरुणा अहोरात्राभिमानिनौ ६१

लौ रपि देशस्य तहविःप्रदानादिना यद्वा अस्मभ्यं नून पुत्र भृत्यादीन् अतिथीन् पत्नीश्च एते अयमत्र देशस्यते हे देवाः८ अयच्छत आरे दूरे विश्वं
सर्वं पथेष्ठां मार्गे वर्तमानं वैरिणं द्विषं८ अन्यानपि द्विषो द्वेष्टॄन् युयोतु पृथक्करोतु॥ देवसंघः८ स विदायू युविःसर्वस्याभिमश्रयिता पृथक्कर्ता॥ ॥अ
थ चतुर्थी॥ ॥यत्र वह्निरभिहितो दुद्रवद्द्रोण्यः पशुः॥ नृमणा वीरपस्त्योऽर्णा धीरेव सनिता॥ ॥यत्र यस्मिन्यज्ञे वह्निः८ यज्ञस्य वोढा अभिहितो
यूपे शापितो द्रोण्या यूपार्हः८ पशुः दुद्रवत् गच्छतिरूपं प्रतित नृमणाः८ यजमानमनाः८ सनिता वीरपस्त्यः वीराः अस्मिन् गच्छति जमानाः८ पुत्र भृत्याद
यो वा तद्दृश्य सं गृहं पस्त्यस तादृशः प्रेरितयहोवा पुत्रा द्युपेत गृह प्रदर्दूत्यर्थः८ सनिता भवति॥ अर्णा अर्णकु शला धारा इव दिवद्रूणो निहवो विचित्र
भिल क्षणसनिता भवति॥ ॥अथ पंचमी॥ ॥एष ते देव नेता रथस्पतिः शं रयिः॥ शं राये शं स्वस्तय इषस्तुतो मनामहे देवस्तुतो मनामहे॥ ॥हे
नेतर्हे सवितर्नेतवएषरथस्पतिः सर्वस्यपालकः८ रयिः दातव्य धनवान्नूमत्वे यो लुप्यते शं करोत्विति शेषः८ वयं च राये धनस्य शं सुखाय यद्वा राय
धनाय शं सुखाय च स्वस्तये अविनाशाय इषस्तुतः एषणीयस्य सवितुः८ स्तोतारो वयं मनामहे देवस्तुतः८ देवानां देवस्य वा सवितुः स्तोतारो म
नामहे स्तुमः८॥ ॥इति चतुर्थस्य तृतीये चतुर्थो वर्गः॥ ॥अग्ने सुतस्येति पंचदशर्चं षष्ठं सूक्तं॥ अत्रेयमनुक्रमणिका॥ अग्ने पंचोना चतस्रो गायत्र्यः८॥
उष्णिह स्त्रिस्रो जगत्यः८ त्रिष्टुभो वा स्य अनुष्टुभाविति ऋषिश्चान्यस्मादिति परिभाषया स्वस्त्यात्रेय ऋषिः८ आदितश्चतस्रो गायत्र्यः८ पंचम्याद्याः
षलुष्णिह एकादशाद्यास्तिस्रो जगत्यस्त्रिष्टुभो वा चतुर्दशी पंचदश्या वनुष्टुभौ विश्वे देवा देवता॥ ॥तत्र प्रथमा॥ ॥अग्ने सुतस्य पीतये विश्वैरूमे

ऋ०भा०

६२

यथं प्रतिहृत्निर्लक्षणा न प्रदाने स्वधा तु पश्चाद्धा अद्रोघमहिंसकं स्रवो जोलं लब्ध्वा मदंति हृष्यंति॥ ॥अथ द्वितीया॥ ॥ते हि स्थिरस्य शवसः सखायः॰
संति धृष्णुया॥ ते यामन्ना धृषद्विनस्त्मना पांति शश्वतः॰॥ ॥ते हि खलु स्थिरस्याविचलितस्य शवसो बलस्य सखायः॰ संति भवंति॥ मरुत्वं धृष्णु
या धृष्णवः॰ ते च यामन्ना इति चार्थे गमने धृषद्विनो धर्षणवंतः॰ त्मना आत्मनात्र उत्पहेणेव अस्मदुपकारमनपेक्ष्यैव शश्वतो बहून् स्मान् पु
त्रभृत्यादीन् पांति रक्षंति॥ ॥अथ तृतीया॥ ॥ते स्पंद्रासो नोक्षणो ति ष्कंदंति शर्वरीः॰॥ मरुतामधा महो दिवि क्षमा च मन्महे॥ ॥ते मरुतः स्पंदनशी
लाः॰ लक्षणो जलस्य सेक्तारः स्थनेति चार्थे यस्मात्स्पंद्राः अन्येषां तस्मात् शर्वरीः॰ शार्वरीया रात्रयः॰ कालावायवानि स्वर्थः॰ तान तिष्कंदंति अ
तिक्रम्य गच्छंति नित्या इत्यर्थः॰ यस्मादेते एवंविधाः॰ तस्मात् मरुतां अध अधुना महत्तेजो दिवि द्युलोके क्षमायां भूमौ च वर्तमानं मन्महे स्तुमः॰॥
॥अथ चतुर्थी॥ ॥मरुत्सु वो दधीमहि स्तोमं यज्ञं च धृष्णुया॥ विश्वे ये मानुषा युगा पांति मर्त्यं रिषः॰॥ ॥अध्वर्युर्होत्रादयो वो यूयं मरुत्सु धृष्णु
य धर्षकेषु दधीमहि व्यत्ययेनो तमः॰ पुरुषः किं च स्तोमं स्तोत्रं यज्ञं च इज्यते नेनेति यज्ञो हविः॰ तदुभयं किमर्थं दीयत इति येन मरुतो विश्वे सर्वे वि
मानुषाणि युगायुगानि सर्वेषु कालेष्वित्यर्थः॰ मारकधर्माणं यजमानं रिषो हिंसकात् सकाशात् पांति रक्षंति॥ ॥अथ पंचमी॥ ॥अर्हंतो ये सु
दानवो नरो असामिशवसः॰॥ प्र यज्ञं यज्ञियेभ्यो दिवो अर्चा मरुद्भ्यः॥ ॥हे होतः॰ आत्मसा ये अर्हंतः॰ इज्याः॰ सुदानवः॰ शोभनदानाः॰ नरो ने राम
तारः॰ कर्मणां असामिशवसो अनल्पबलाः॰ संति तेभ्यो यज्ञियेभ्यो यज्ञार्हेभ्यो दिवो द्योतमानेभ्यो मरुद्भ्यः॰ विभक्तिवचनयोर्व्यत्ययः॰ यद्वा कर्म ६२

णि षष्ठी दीप्तं यज्ञसाधनं हविः॰ अर्च प्रजयत प्रयच्छेत्यर्थः॰ अथवा दिवो अंतरिक्षादागतेभ्य इति संबंधः॥ ॥इति चतुर्थस्य तृतीये अष्टमो वर्गः॰॥ ॥
॥अथ षष्ठी॥ ॥आ रुक्मैरा युधा नर ऋष्वा ऋष्टीरसृक्षत॥ अन्वेनाँ अह विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः॥ ॥नरः॰ कृष्टेर्नेतारः ऋ
ष्वाः महांतो रुक्मैः॰ रोचमानैराभरणविशेषैरारोचंत इति शेषः॰ उपसर्गश्रुतिः संगते क्रियाध्याहारः॰ तथा युधा प्रहरणसाधनेनायुधेन आरोचं
ते येते मरुतः॰ ऋष्टीः॰ आयुधविशेषान् असृक्षत प्रक्षिपंति मेघभेदार्थं एतान् मरुतो विद्युतोपि जज्झती रिव जस्रती॰ शब्दकारिण्यः॰ आप इव ज
ज्झतीरापो भवंति शब्दकारिण्य इति निरुक्तं अन्वह अनुगच्छंत्येव दिवो द्योतमानस्य मरुद्गणः॰ स भानुर्दीप्तिः॰ त्मना स्वयमेव अर्त निरगात॥ ॥
॥अथ सप्तमी॥ ॥ये वावृधंत पार्थिवा य उरावंतरिक्ष आ॥ वृजने वा नदीनां सधस्थे वा महो दिवः॰॥ ॥ये मरुतः॰ पार्थिवाः॰ पृथिवीसंबंधा
स्तेनो ववृधं वर्धंतये चोरौ महत्यंतरिक्षे च ववृधंत आ इति चार्थे नदीनां नदनवतीनां वृजने वा ववृधंत महो महतः॰ दिवो द्युलोकस्य सधस्थे
सहस्थाने च ववृधंते उभयत्रावाशब्दश्चार्थे एवं सर्वत्र वर्धमानां मरुतो वृष्ण्यर्थः॰ ऋष्टीरसृक्षतेति पूर्वत्र संबंधः॰॥ ॥अथाष्टमी॥ ॥शर्धो मा
रुतमुच्छंस सत्यशवसमृभ्वसं॥ उत स्म ते शुभे नरः प्र स्पंद्रा युजत त्मना॥ ॥हे स्तोतः॰ मारुतं शर्धो बलं उच्छंस स्तुहि कीदृशं शर्धः सत्य
शवसं सत्यवेगं ऋभ्वसं महदिति प्रसिद्धं उत स्म उतापि च नरो वृष्टेर्नेतारस्ते मरुतः शुभे तु दयार्थं॰ प्र युजत प्रायुंजत समयोजयत त्मना
आत्मना जेगइक्षादु ध्येव स्पंद्राः चलनस्वभावाः पृषतीरित्यर्थः॰॥ ॥अथ नवमी॥ ॥उत स्म ते परुष्ण्यामूर्णा वसत शुंध्यवः॥ उत पव्या

सृ॰भा॰ रथानामद्रिं भिदंत्योजसा॥ ॥उतस्म अपि च हे मरुतः परुष्ण्यां एतन्नामिकायां वर्तंते ऊर्णा दीप्ताः सिंधवः शोधिकाः वसत आच्छादयंति नेउ
६३ तापि च याव्याने म्या रथानां स्वकीयानां रथचक्रे ओजसा बलेनाद्रिं भिदंति मेघं गिरिं वा विदारयंति॥ ॥अथ दशमी॥ ॥आपथयो विपथयोंत
स्पथा अनुपथाः॥ एतेभिर्मह्यं नामभिर्यज्ञं विष्टार ओहते॥ ॥आपथयः अस्मदभिमुखमार्गा येषां ते तादृशा विपथयो विपथमार्गाः अंत
स्पथाः दरीसुषिरादिमार्गाः अनुकूलमार्गाश्चये मरुतः संति ते यतेभिः एते चतुर्विधनामभिर्नामकैः स्वरूपैर्मह्यं यज्ञं विस्तारः विस्तृताः संतः
ओहते वहंति यद्वा यते नामभिरुदकैः साध्यं यज्ञमोहते॥ ॥इति चतुर्थस्य तृतीये नवमो वर्गः॥ ॥अधानरइत्येकादशी॥ ॥अधानरो न्योह
ते ऽधा नियुत ओहते॥ अधा पारावता इति चित्रा रूपाणि दर्श्या॥ ॥अथ अथ नरो अभिमत दृष्ट्यादि मेतारो न्योहते नितरां वहंति जगत आ
वहंति अधा नियुतः स्वयमेव मिश्रयितारः संतः ओहते अधाथ पारावताः पारावरदूरदेशाः तत्संबंधिनश्च अंतरिक्षादिदूरदेशे त्राय हतारा
दिमेघादिधारकाः सेतः ओहतइत्यर्थः इति उक्तप्रकारेण तेषां रूपाणि चित्रा नानाविधानि या निवादर्श्या स्वव्यापारे दर्शनीयानि भवंति
ति शेषः॥ ॥अथ द्वादशी॥ ॥छंदःस्तुभः कुभन्यव उत्समा कीरिणो नृतुः॥ ते मे के चिन्न तायव ऊमा आसं दृशि त्विषे॥ ॥छंदःस्तुभः छंदसो राम
भिः स्तोतारः कुभन्यव उदकेच्छवः कीरिणः उत्सं कूपमपेक्षत्वषितायागोतमायायानूं मरुतः आन्द्रं तुः सर्वतो कुर्वन् अनय वा स्तोत्रं यद्वा यच्छं ६३
दस्तुभः छंदोभिः स्तुत्याः स्तोभतिः स्तुतिकर्मा कुभन्यवः सेक्तारो दस्युरकस्य कुभिः रुदनकर्मा कीरिणः स्तोतुर्गातिमस्य पानार्थं उत्सं कूपं आ

देवो स्वस्ति कुरु तत् हे पथ्ये पथ्या स्वस्ति देवि पंथा अंतरिक्षमार्गः तत्र हिता मार्गाभिमानिनी देवी हे तादृशि रेवति धनवति देवि स्वस्ति कृधि इंद्रश्चा
ग्निश्च प्रत्येकं नो अस्मभ्यं स्वस्ति कृधि हे अदिते देवि नः स्वस्ति कृधि कुरु॥ ॥अथ पंचदशी॥ ॥स्वस्ति पंथामनु चरेम सूर्याचंद्रमसाविव॥ पु
नर्ददता घ्नता जानता संगमेमहि॥ ॥पंथां पंथानं स्वस्ति क्षेमेणानुचरेम सूर्याचंद्रमसाविव तौ यथा निरालंबे मार्गे राक्षसादिभिरनु
पहतौ संचरतः किं च वयं प्रवसंतः पुनर्ददता भिमतं अघ्नता चिरकालं विलंबको पुनाहिं सतजानता अविस्मरता मदीयश्चिरकालं गतः
कथं का पमितिसंदेहं कुर्वतमदीयायमिति बुध्यमानेन स्यथ उक्तलक्षणेन बंधुजनेन संगमेमहि यद्वा पूर्वार्धः प्रवसतां वाक्यं उत्तरार्धं
बंधूनां वयं बंधवः ददता अभिमतमुपार्जितं यच्छता अघ्नता प्रवासकोपेन अहिंसता जानता सस्नेहमधिगच्छतो प्रवसता संगमेमहि॥
॥ ॥चतुर्थस्य तृतीये सप्तमो वर्गः॥ ॥प्रश्यावाश्वेति सप्तदशर्चं सूक्तमिष्टमंसूक्तं॥ अत्रेयमनुक्रमणिका॥ प्रश्यावाश्व नानुयावाश्यो मा
रुतं हत स्पंक्तिः षष्ठ्यं स्वेति॥ अत्रेयः श्यावाश्व ऋषिः इहत दितिप्रयोगादिदमादीनि दश सूक्तानि मरुद्देवत्यानि षष्ठी सप्तदशी च पंक्त्यौ
शिष्टाः षडनुष्टुभः परिभाषया अनुष्टुप् गतो विनियोगः॥ ॥तत्र प्रथमा॥ ॥प्रश्यावाश्व धृष्णुयार्चा मरुद्भिर्ऋक्वभिः॥ ये अद्रोघमनुष्वधं श्र
वो मदंति यज्ञियाः॥ ॥हे श्यावाश्व एतन्नाम ऋषे धृष्णुया स्वं ऋक्वभिः स्तुत्यान् मरुतः शार्चं स्तुतीयार्थे तृतीया एवं स्वयमेव संप्रेष्यति यद्वा
यजमानं होता श्यावाश्वं ब्रूते यद्वा मरुद्भिः मरुत्संदं शो ऋक्वभिः स्तोत्रभिः सह स्तोत्रे रर्च स्तुहीत्यर्थः ये मरुतो यपात्तिया यय ज्ञाई अनु

च०भा० र्तृतीयाउक्तलक्षणेभ्यो मरुद्भ्यो दाना अभिमत दानानि सचेतसं गच्छते ॥ ॥ अथ षोडशी ॥ ॥ प्र ये मे बंध्वेषे गां वोचंत सूरयः पृश्निं वोचंत मात
६४ रं ॥ अधा पितरमिष्मिणं रुद्रं वोचंत शिक्वसः ॥ ॥ ये महां बंध्वेषे स्वेषां बंधूनामन्वेषणे सति सूरयः प्रज्ञापकाः गां माध्यमिकां वाचं गोदेवतां
वा प्रवोचंत अवादिषुः ऋषेर्वाक्यं ऋषिर्मरुद्वाक्यमनुवदतीति तस्माद् द्वयोराख्यातयोर्यच्छब्दान्वयान्निघातः ते पृश्निं शुद्धदेवतां पृश्निवर्णां गां वा
मातरं वोचंत अब्रुवन् पृश्न्या वै पयसो मरुतो जाता इति श्रुतेः अधाथ पितरं स्वकीयं इष्मिणं गमनवंतम् अन्नवंतं वा रुद्रं वोचंत शिक्वसः
शक्ताः ते मरुतो रुद्रेण पुत्रत्वपरिग्रहाद् बहुत्वं त उपपादितः ॥ ॥ अथ सप्तदशी ॥ ॥ सप्त मे सप्त शाकिन एकमेका शता ददुः ॥ यमुनाया
मधि श्रुतमुद्राधो गव्यं मृजे नि राधो अश्व्यं मृजे ॥ सप्त गणा वै मरुत इति श्रुतेः ॥ अदितिगर्भं वर्तमानं वायुमिंद्रः प्रविश्य सप्तधा व्यदा
रयत् ते एकोनपंचाशन्मरुद्गणा अभवन्निति पुराणेषु प्रसिध्यते च सप्तसंख्याकाः शाकिनः सर्वमपि कर्तुं ते चेकमेकाः एकैको गण
मे मह्यं सप्तास सप्तसंख्यानि गवामश्वयूथानि ददुः दत्तवंतः प्रयच्छंतीति वा आशीः ते दत्तं यमुनायां नद्यां अधि अयं सप्तम्यर्थानुवादी तत्र श्रुत
प्रसिद्धं गव्यं गोसमूहात्मकं गोसंबंधिनं वा राधो नि मृजे निमार्ज्मि ॥ ॥ इति चतुर्थस्य तृतीये दशमो वर्गः ॥ ॥ को वेद जानमिति षोडशर्चं राम
नवमं सूक्तं ॥ श्यावाश्व ऋषिः आद्या पंचमाद्यास्त्र्यम्येकादशी पंचदश्यः ककुभः षष्ठी सप्तमी नवमी त्रयोदशी चतुर्दशी षोळश्यः सतोबृ ६४
हत्यः अष्टमी द्वादशी च गायत्र्यौ द्वितीया बृहती अनुष्टुप् चतुर्थी पुर उष्णिक् मरुतो देवता तथा चानुक्रांतं ॥ को वेद षोळश ककुब्बृहत्यनुष्टुप्पुर

उष्णिक्ककुप्सतोबृहत्यो गायत्री सतोबृहत्यौ ककुप्सतोबृहती इति विनियोगो लैंगिकः ॥ ॥ तत्र प्रथमा ॥ ॥ को वेद जानमेषां को वा पुरा सुम्नेष्वास मरु
तां ॥ यद्युयुज्रे किलास्यः ॥ ॥ एषां मरुतां पूर्वसूक्ते प्रकृतत्वादन्वादेशविषयत्वादेषामित्यस्य निघातः तेषां जानमुत्पत्तिं को वेद जानाति कः पुमान् को
वा पुरा पूर्वं अप्येषां मरुतां सुम्नेषु सुखेषु आस अभवत् यद्यदा पृते किलास्यः किलीसीः पृषतीः स्वरथे आयुयुज्रे रथे योजितवंतः तदेषामुत्पत्तिव
लक्षणानि सुखानि च को जानातीत्यर्थः वेगविषये सर्वत्र वायोरुपमास्य दत्तत्वादिति भावः ॥ ॥ अथ द्वितीया ॥ ॥ ऐतान् रथेषु तस्थुषः कः शुश्रा
व कथा ययुः ॥ कस्मै सस्रुः सुदासे अन्वापय इळाभिर्वृष्टयः सह ॥ ॥ एतान् मरुतो रथेषु तस्थुषः स्थितवतः कः आशुश्राव शुश्राव ये दित्यर्थः
यद्वैतेषां आक्रोशध्वानं चक्रुः शृणुयात् कथा कथं ययुर्गच्छंति तदपि को जानाति यद्वा तान् कथमन्ये देवादयो अनुगच्छेयुः कस्मै सुदासे दाना
य आपाय बंधुभूताय प्राप्ताय वृष्टयो वर्षकाः अयं कर्तरि क्तिच् इळाभिर्बहुविधैरन्नैः सह सहिताः अनु सस्रुः अनुक्रमेणैवेतरयुः ॥ ॥ अथ
तृतीया ॥ ॥ ते म आहुर्य आययुरुप द्युभिर्विभिर्मदे ॥ नरो मर्या अरेपस इमान्पश्यन्निति ष्टुहि ॥ ॥ ऋषिर्महद्भ्यां मरुत्या दुर्भवमाख्यास्यन्
अनया प्रादुर्भूतान् पश्य आह ते मरुतः इदमस्मल्लपेतमाहुः यच्च पाययुः ये मरुतो मां प्राप्ताः के साधने द्युभिर्द्योतमानैः विभिर्गंतृभिरश्वैः किम
र्थं मदे मदाय सोमपानजनिताय हर्षाय आहुरिति तदनु ब्रूते नरः नेतारो मर्याः मनुष्येभ्यो हिताः अरेपसो अल्पापास्ते हे ऋषे इमान् अस्मान् पश्य
न् तथा स्थितान् चक्षुषावलोकयन् स्तुहि स्याकुः यद्वा इति इत्थं पश्यन् स्तुहीति ॥ ॥ अथ चतुर्थी ॥ ॥ ये अंजिषु ये वाशीषु स्वभानवः स्रक्षु रुक्मे

ऋ॰ भा॰ षु खादिषु॥ श्राया रथेषु धन्वसु॥ ॥ अनया मरुतां स्वरूपं निरूपयति हे मरुतो युष्माकं ये प्रसिद्धाः स्वभानवः स्वदीप्तयो अंजिषु आभरणेषु श्रायाः
६५ आश्रयभूताः संति ये च स्रक्षु माल्येषु रुक्मेषु उरोभूषणेषु ये च खादिषु हस्तपादस्थितकटकेषु खादिश्च कृतिश्च पत्सु खादय इति हि श्रुती भवंत
रथेषु धन्वसु ये स्वभानवः श्रायाः संति धन्वान इषुमंतः सुरथाः पृश्निमातर इति च नैगमः तान् सर्वान् स्तूम इति शेषः यद्वा॥ ये स्वभानवः स्वाप
त्रदीप्तयो मरुतो अंजिषु आभरणेषु निमित्तेषु श्रायाः आश्रयाभविष्याम ये च वाशीषु निमित्तेषु श्रायाः आश्रयाः भविष्यामः एवं सर्वत्र योज्यं
तादृग्विधानिमान् पश्यन् स्तूहीति सर्वत्र संबंधः तेषामेव इदं वाक्यं॥ ॥ अथ पंचमी॥ ॥ युष्माकं स्मा रथां अनु मुदे दधे मरुतो जीरदानवः॥ वृष्टी द्या
वो यतीरिव॥ ॥ हे जीरदानवः शीघ्रदानाः हे मरुतः युष्मान् अनु उद्दिश्य मुदे मादाय दधे धारयामि करोमीत्यर्थः सामर्थ्यात् स्तुतीरिति लभ्य
ते स्मेति पूरणः वृष्टी वृष्ट्यो यती सर्वत्र गच्छंती द्यावो दीप्तिरिव दृश्यमानान् रथानिति संबंधः॥ ॥ इति चतुर्थस्य तृतीये एकादशो वर्गः॥ ॥
॥ कारीर्यां तिस्रः पिंडो होतव्याः तत्र द्वितीयाया आ यं नर इत्यनुवाक्या सूत्रितं च। आ यं नरः सुदानवो विविक्तन्महसो नरो अश्मदिद्यव इति॥ ॥ सेषा
षष्ठी॥ ॥ आ यं नरः सुदानवो ददाशुषे दिवः कोशमचुच्यवुः॥ वि पर्जन्यं सृजंति रोदसी अनु धन्वना यंति वृष्टयः॥ ॥ नरो नेतारः सुदानवः शो राम
भनदानाः मरुतो यं कोशं मेघनामैतत् अपां कोशं वरकं मेघं ददाशुषे हविर्दत्तवते यजमानाय दिवो अंतरिक्षात् अचुच्यवुः आच्यावयंति पर्जन्यं
मेघं रोदसी अनु द्यावापृथिव्यावनु लक्ष्य विसृजंति विमोक्षयंति पश्चात् धन्वना सर्वत्र गच्छता उदकेन सह वृष्टयो वृष्टिप्रदा मरुतो यंति सर्वत्र व्याप्नु ६५

नृतुः आनीतवंतः। अस्मिंश्च संगो तमायतस्त्र इति॥ नृतून् नय इत्यस्य नर्तने वा विक्षेपमात्रशीलं रूपं ते मरुतः केचिन्नृत्यंतो नाप वः इव कच्चि
पदः शास्त्रकरा इव स्थिताः उमाः रक्षकाः दृश्यादर्शने आसन् विषयभूता अभवन् केचित् तिष्ठन्तः शरीरदीप्त्यै बलाय वासन् श्रोणप्रेरणेति भावः॥
॥ अथ त्रयोदशी॥ ॥ य ऋष्वा ऋष्टिविद्युतः कवयः संति वेधसः॥ तमृषे मारुतं गणं नमस्या रमया गिरा॥ ॥ ये मरुतः ऋष्वाः दर्शनीयाः मह
तो महतो वा ऋष्टिविद्युतः आयुधैर्विद्योतमानाः कवयो मेधाविनो वेधसः सर्वस्य विधातारः संति तं तेषां मारुतं गणं रमया गिरा रमणीयया
गिरा स्तुत्या हे ऋषे द्रष्टा श्यावाश्व नमस्य परिचर स्तुहि अथ नमः रमयतिः उत्तरत्वादनिघातः उभयसां हन्ति को दीर्घः॥ ॥ अथ चतुर्दशी॥ ॥ अच्छ
ऋषे मारुतं गणं दाना मित्रं न योषणा॥ दिवो वा धृष्णव ओजसा स्तुता धीभिरिषण्यत॥ ॥ हे ऋषे मारुतं गणं मरुत्संघं मित्रेन आदित्यमिव
दाना हविर्दानेन योषणा योतेरिदं रूपं योषा स्तुतिः तया वा अच्छ आगच्छति ऋषे रुत्तरार्धं प्रत्यक्षवादः ओजसा बलेन हे धृष्णवो धर्षका मरुतः
दिवो वा द्युलोकाद्वा वाऽऽत्र श्रुते लोकं तृतीयाद्वा धीभिः अस्मदीयाभिः स्तुतिभिः स्तुताः इषण्यत गच्छत यज्ञं॥ ॥ अथ पंचदशी॥ ॥ नू मन्वान ए
षां देवाँ अच्छा न वक्षणा॥ दाना सचेत सूरिभिर्यामश्रुतेभिरंजिभिः॥ ॥ नु क्षिप्रं एषां मरुतां एतान्मरुत इत्यर्थः मन्वानः स्तुवन् देवान् मरुद्दी
तिरिक्ता न वक्षणा वहनेन निमित्तेन अच्छ अभिप्राप्तुं नमन्नु तेय ह्वानेति संप्रत्यर्थे वहति देवानिति वक्ष्यमाणा स्तुतिः तथा ये एषां एतान् देवान् मरुतो
मन्वानः स्तुवन् अभिष्टुवन्निति सत्ता नाम सूरिभिर्मेधाविभिः यामश्रुतेभिः शीघ्रगमनेन विश्रुतेः फलस्य व्यंजके मरुद्भिः सर्वस्मात् पंचम्य

ऋ०भा०

६६

वक्षितगणो व्रातः वृष्ट्यो युष्मान् अनुप्रयंति प्रकर्षेण गच्छंति यद्वा वर्षकामरुतोऽनुकूलं प्रकृष्टयंति गच्छंति॥ ॥इति चतुर्थस्य तृतीये द्वादशो वर्गः॥
॥अथैकादशी॥ ॥शर्धंशर्धं व एषां व्रातंव्रातं गणंगणं सुशस्तिभिः॥ अनु क्रामेम धीतिभिः॥ ॥हे मरुतः एषां वो युष्माकं शर्धंशर्धं तेज
बलं व्रातंव्रातं विवक्षितगणो व्रातः तंतं व्रातंव्रातं वा गणंगणं तंतं समस्तसमस्तसमुदायात्मकं गणंगणं च सुशस्तिभिः शोभनस्तुतिभिः धीति
भिः कर्मभिः हविःप्रदानादिलक्षणैरनुक्रामेम अनुगच्छेम॥ ॥अथ द्वादशी॥ ॥कस्मा अद्य सुजाताय रातहव्याय प्र ययुः॥ एना याम्
एन मरुतः॥ ॥अद्यास्मिन्दिने कस्मै सुजाताय रातहव्याय दत्तहविष्काय ययुः प्रकर्षेण गच्छेयुः येन यामेन रथेन मरुतः॥ ॥अथ
त्रयोदशी॥ ॥येन तोकाय तनयाय धान्यं बीजं वहध्वे अक्षितं॥ अस्मभ्यं तद्धत्तन यद्व ईमहे राधो विश्वायु सौभगं॥ ॥हे मरुतः येन
सद्येन मनसा तोकाय पुत्राय तनयाय तत्सुताय धनाय वा धान्यं बीजं अक्षितं अक्षीणं वहध्वे धारयध्वे येन चित्तेनास्मभ्यं तद्धान्यं बी
जं धत्तन प्रयच्छ वो युष्मानीमहे याचामहे राधो धनं विश्वायुः सर्वायुरुपेतं कृत्स्नायुष्योपेतं वा सौभगं सौभाग्यं च तद्धत्तनेति समन्वयः॥
॥॥अथ चतुर्दशी॥ ॥अतीयाम निदस्तिरः स्वस्तिभिर्हित्वावद्यमरातीः॥ वृष्ट्वी शंयोराप उस्रि भेषजं स्याम मरुतः सह॥ ॥हे मरुतो
वयं स्वस्तिभिः क्षेमैः अवद्यं पापं हित्वा परित्यज्य निदो निंदकानरातीः शत्रून् तिरः आच्छाद्य तिरः अतीत्य अतीयाम अतिक्रम्य ग
च्छेम तिरस्कुर्म इत्यर्थः॥ अनेनानिष्टपरिहारः प्रार्थितः उत्तरेणेष्टप्राप्तिरुच्यते वृष्ट्वी विसृष्टे युष्मत्प्रेरिता सुसती पुत्रो सुखं योः पा

राम

६६

पानां यावनं च आप उदकानि शं शरस्थाने जसः उस्रियो युक्तं भेषजं पद्यप्येतदुदकनाम तथापि पृथगपामभिधानादत्र तद्धेतुकार्य
मन्नमुच्यते सर्वेण सह स्याम लभेमहि मरुतो वयं यद्वा आपो युष्मत्प्रेरिताः उक्तं सर्वं कुर्वंतु वयं सर्वे सह वस्याम भवेम युष्मत्स्तव प्र
ता॥ ॥अथ पंचदशी॥ ॥सुदेवः समहासति सुवीरो नरो मरुतः स मर्त्यः॥ यं त्रायध्वे स्याम ते॥ ॥हे समह प्रशस्तबलः समहत्त्राद्धे
हे पूजित मरुतां गण सुदेवः कल्याणमरुत्संज्ञिकदेवोपेतः असति भवति हि नरो नेतारः हे मरुतः स सुवीरः शोभनपुत्राद्युपे
तश्च असति भवति यं मर्त्यं त्रायध्वे पालयध्वे य एवं भवति ते वयं स्याम युष्मदीयाः॥ ॥अथ षोडशी॥ ॥स्तुहि भोजान्त्स्तुवतो अस्य या
मनि रणन्गावो न यवसे॥ यतः पूर्वाँ इव सखीँ अनु ह्वय गिरा गृणीहि कामिनः॥ ॥हे ऋषे स्तुवतः स्तुतिं कुर्वतोऽस्य यजमानस्य या
मनि यज्ञे भोजान् दातॄन् मरुतः स्तुहि गावो न यवसे तृणादिभक्षणाय गच्छंतो गावो यथा रमंते तद्वन्मरुतोऽपि रमंतो यतो मरुतः पूर्वान्
पुरातनान् सखीन् इव अनुह्वय आह्वान कामिनः स्तुतीच्छावतो मरुतः गिरा स्तुत्या गृणीहि स्तुहि॥ ॥इति श्री चतुर्थस्य तृतीये त्र
योदशो वर्गः॥ ॥प्रशर्धायेति पंचदशर्चं दशमं सूक्तं श्यावाश्वस्यार्षं मरुद्देवताकं चतुर्दशी त्रिष्टुभः त्रिष्टाजगत्यः प्रशर्धाय वं चोना
जागतमुपांत्या त्रिष्टुप् इति अनुक्रांतं सूक्तविनियोगो गतः सैषा सूक्ते प्रथमा॥ ॥प्रशर्धाय मारुताय स्वभानव इमां वाचमनजा पर्व
तच्युते॥ घर्मस्तुभे दिव आ पृष्ठयज्वने द्युम्नश्रवसे महि नृम्णमर्चत॥ ॥प्र अनजेति संबंधः मारुताय मरुत्संबंधिने शर्धाय ब

ऋ० भा०

६७

ञायइमौ क्षिपमाणौ तिष्ठन अथापय स्वभानवे स्वायत्ततेजसे पर्वतच्युते पर्वतस्य च्यावयित्रे घर्मस्तुभे घर्मस्य स्तोभायत्रे दिवः द्युलोकादागच्छ
ते पृष्ठयज्वने षड्हेषु रथंतरबृहदादिभिः राजानाय द्युम्नश्रवसे द्योतमानान्नाय महिमहतं प्रभृतं द्युम्नं धनं हविर्लक्षणमन्नं तदददते इत्यर्थः कारीर्यां
प्रथमस्याः पिंड्याः प्रवो मरुतस्तविषा इति याज्या सूत्रितं च॥ प्रवो मरुतस्तविषा उदन्यव इति॥ ॥ सेषा द्वितीया॥ ॥ प्रवो मरुतस्तविषा उदन्यवो वयोवृ
धो अश्वयुजः परिज्रयः। सं विद्युता दधति वाशति त्रितः स्वरंत्यापोऽवना परिज्रयः॥ ॥ हे मरुतो वो युष्माकं गणः प्र प्रादुर्भवति कीदृशा ग
णाः तविषाद्दीप्ताः महान्तो वा उदन्यवः उदकेच्छतो जगद्रक्षणार्थं वयोवृधो न्नस्य वर्धयितारः अश्वयुजः गमनाय रथे अश्वानां योक्तारः प
रिज्रयः परितो गंतारः विद्युता सं दधति संगच्छंते तदानीं त्रितः त्रिषु स्थानेषु तायमानो यो मरुद्गणो वा वाशाति शब्दयति अस्मिन् पक्षे संविद्यु
ता तदा आपो परिज्रयः परितो गंत्र्य आपोऽवना भूमौ स्वरंत्स्यधः पतंति॥ ॥ अथ तृतीया॥ ॥ विद्युन्महसो नरो अश्मदिद्यवो वातत्विषो मरुतः पर्वत
च्युतः। अब्दया चिन्मुहुरा ह्रादुनीवृतः स्तनयदमा रभसा उदोजसः॥ ॥ विद्युन्महस इति तृतीया कारीर्यामेव द्वितीयस्य पिंड्या याज्या सूत्रितं च॥
विद्युन्महसो नरो अश्मदिद्यवः कृष्णं नियानं हरयः सुपर्णा इति॥ तत्पाठस्तु विद्युन्महस इति विद्युन्महसो विद्योतमानतेजसः नरो वृष्ट्यादेर्ने तारः अश्मदिद्यवः व्याप्तायुधाः अश्मसारमयायुधा वा वाततत्विषः प्राप्तदीप्तयः पर्वतच्युतः पर्वतानां मेघानां च्यावयितारः अब्दया मुहुरुदका राम
नां दातारः आसो पजादेशः चिदिति पूरणः ह्रादुनीवृतः ह्रादुन्या अशनेः प्रवर्तकाः स्तनयदमाः अमा गृहः स हि स्ववाचि शब्दोपेतगणा इत्यर्थः॥ ६७

वेति॥ ॥ अथ सप्तमी॥ ॥ ततृदानाः सिंधवः क्षोदसा रजः प्र सस्रुर्धेनवो यथा॥ स्यन्ना अश्वा इवाध्वनो विमोचने वि यद्वर्तन्त एन्यः॥ ॥ सिंधवः स्यं
दमाना आपः ततृदानाः निर्भिंदंतो मेघात्ते मरुतः क्षोदसा उदकेन सह रजो तरिक्षं प्रसस्रुः प्रसरंति धेनवो यथा पयाः सिंधवस्यो नव प्रसृता
गाव इव किं च हृष्टां तांतरस्य न्नाः आशुगतयो अश्वा इव यथाध्वनो विमोचने मनुष्याणामध्वविमोकाय संचरंति तथेत्यर्थः। यद्यदा एन्यः न
दीनामैतत्सनद्यो विवर्तंते विविधं संचरंति। अथवा प्रतिनिवृत्य वर्तंते प्रवर्धंत इत्यर्थः तदेवं कुर्वंतीति पूर्वत्रान्वयः॥ ॥ अथाष्टमी॥ ॥ आ यात मरु
तो दिव आंतरिक्षादमादुत॥ माव स्थात परावतः॥ ॥ हे मरुतः परावतः असंत दूरदेशात् दिवो द्युलोकात् आयात तथांतरिक्षादायात उतापि च
अमात् अस्माल्लोकादायात परावत इत्यत्रापि वा योज्यं परावतो तत्र तत्र दूरदेशादावस्था अवस्थितिं मा कुरुत॥ ॥ अथ नवमी॥ ॥ मा वो रसानित
भा कुभा क्रुमुर्मा वः सिंधुर्नि रीरमत्॥ मा वः परि ष्ठात्सरयुः पुरीषिण्यस्मे इत्सुम्नमस्तु वः॥ ॥ हे मरुतो वो युष्मान् रसा नदीनामैतत् सा नदी
भवतीति निरुक्तं। रसवती शब्दवती अनितभा इत प्राप्ता भायस्याः सा इत भाना तादृशा अनितभा कुत्सितदीप्तिश्च मा निरीरमत् निरुद्धं मा रमत
क्रुमुः सर्वत्र क्रमणः सिंधुश्च समुद्रश्च मा निरीरमत् तथा पुरीषिणी पुरीषमुदकं तद्वती सरयूरपि मा परिष्ठात् परितस्तिष्ठतु मा तृणधु अस्मे इत् अ
स्मास्वेव सुम्नं त्वदागमनजनितं सुखं वो युष्माकं संबंधि युष्मत्स्वभूतं अस्तु॥ ॥ अथ दशमी॥ ॥ तं वः शर्धं रथानां त्वेषं गणं मारुतं नव्यसीनां॥ अ
नु प्र यंति वृष्टयः॥ ॥ तं मारुतं गणं च स्तोमीत्यर्थः। यद्वा रथानां रहणशीलानां वो युष्माकं शर्धं परिषामस्ति भावुकं गणं स्तोमीत्येकमेव वाक्यं अवि

च॰भा॰ यमार्गप्रदर्शननायकं भवतित्ददृत॥ ॥अथसप्तमी॥ ॥नसजीयतेमरुतोनहन्यतेनस्रेधतिनव्यथतेनरिष्यति॥ नास्यरायउपदस्यंतिनोतयऋ
६८ षिंवायंराजानंवासुषूदथ॥ ॥हेमरुतोयूयमृषिंमंत्रद्रष्टारंब्राह्मणंराजानंवासुषूदथरक्षयथप्रेरयथासकर्मसुसऋषिःराजावानजीयतेअन्ये
नपराभाव्यतेजिजयेज्यावयोर्हानावितिस्यवारूपंहेमरुतःनहन्यतेनहिंस्यतेअस्यर्थंप्राणैर्नवियुज्यतेनस्रेधतिनक्षीयतेनव्यथतेनपीड्य
तेनरिष्यतिनहिंस्यतिअत्रेतिसाधारणमात्रेनास्यरायोधनानिनोपदस्यंतिनतूपक्षीयंतेतथानोतयोरक्षाप्युपदस्यंति॥ कारीयमिवंततीयस्याः
पिउस्ययाउत्यानियुत्वतइयेषासृत्रितंच॥ ॥नियुत्वंतोग्रामजितोयथानरोअर्यमावोधस्ववद्विमृधोविदुर्गहेति॥ ॥सेषाष्टमी॥ ॥नियुत्वंतोग्राम
जितोयथानरोर्यमणोनमरुतःकबंधिनः॥ पिन्वंत्युत्संयदिनासोअस्वरन्व्युंदंतिपृथिवींमध्वोअंधसा॥ ॥नियुत्वंतोनियुत्संज्ञिकैरश्वैस्तद्व
तोमरुतःनरोग्रामजितोसंघात्मकस्यपदार्थस्यग्रामजितःविश्लेषयितारःनरोनेतारोवातामहंतेनियुत्वंतःअत्राश्वसामान्येवर्ततेनितरां नियुत्वद्भिः
जवेनवातोश्वंवंतोग्रामजितःग्रामस्यजेतारोनरइवमनुष्याइवतथाभवंतिअर्यमणोनअर्यमप्रभृतयआदित्याइववदीप्ताइतिशेषःतादृशा
मरुतःकबंधिनःउदकवंतोभवंतियद्यदाइनासःईश्वराःउत्संकूपादिनिम्नप्रदेशंमेघंवापिन्वंतिआप्याययंत्युदकेनयद्वाअस्वरन्शब्दंपंतियदा
व्युंदंतिपृथिवींमध्वःमधुरस्योदकस्यांधसासारेणतदैवभवतियदाअस्वरन्नूतदापिन्वंत्युत्संपृथिवीव्युंदंति॥ ॥अथनवमी॥ ॥प्रवत्वतीयंपृथि राम
वीमरुद्भ्यःप्रवत्वतीद्यौर्भवतिप्रवद्भ्यः॥ प्रवत्वतीःपथ्याअंतरिक्ष्याःप्रवत्वंतःपर्वताजीरदानवः॥ ॥इयंपृथिवीमरुद्भ्योमरुदर्थायप्रवत्वतीप्रवतः ६९

प्रकर्षवंतोविस्तीर्णाःप्रदेशायस्यांसाप्रवत्वतीनादृशीभवतिकृत्स्नापिभूमिर्मरुत्सराभवतीत्यर्थःनोसर्वामपिव्याप्नुवंतीतियावत्तथाद्यौरपिप्रव
द्भ्यःप्रकर्षेणगच्छद्भ्यःतेभ्यःप्रवत्वतीभवतिसापिमरुतांसंचारयत्तथाअंतरिक्ष्याःअंतरिक्षेभवाःपथ्याःसुमतयोपिप्रवत्वतीःप्रवत्वंतोमरुद्भ्योभ
वंतिपर्वताःअद्रयःमेघावाप्रवत्वंतोभवंतिजीरदानवःक्षिप्रदानामरुतः॥ ॥अथदशमी॥ ॥यन्मरुतःसभरसःस्वर्णरःसूर्यउदितेमदथा
दिवोनरः॥ नवोश्वाःश्रथयंताहसिस्यतःसद्योअस्याध्वनःपारमश्नुथ॥ ॥हेमरुतःसभरसःसहबलाःस्वर्णरःसर्वस्यनेतारोयूयंयदा
सूर्यउदितेउद्गतेमध्यान्हेमदथसोमेनअहदिवोद्युलोकस्यनरोनेतारःयदासोमंपातुमिच्छथेत्यर्थःनदावोश्वाःश्रिस्नतःसरंतोनाहश्रथयंत
येवश्लथयंतिसद्यस्तदानीमेवास्याध्वनोदेवयजनमार्गस्यपारमश्नुथव्याप्नुथायद्वायदासोमेनमदथतदास्वदीयाश्वाःनशिथिलाभवंतियू
यंचकृत्स्नस्यलोकत्रयमार्गस्यपारमश्नुथ॥ ॥इतिचतुर्थस्यतृतीयेपंचदशोवर्गः॥ ॥अथैकादशी॥ ॥अंसेषुवऋष्टयःपत्सुखादयोवक्षःसु
सुरुक्माभरुतोरथेशुभः॥ अग्निभ्राजसोविद्युतोगभस्त्योःशिप्राःशीर्षसुवितताहिरण्ययीः॥ ॥हेमरुतोवोयुष्माकमंसेषुऋष्टयःआयुधा
निभासंतीतिशेषःपत्सुखादयःकटकाःवक्षःसुरुक्माःहाराःरथेशुभःमधुराआपःअग्निभ्राजसोग्निदीप्ताःविद्युतोगभस्त्योःहस्तयो
र्भासंतइत्यर्थःशीर्षसुशिरःसुहिरण्ययीःहिरण्मय्यःशिप्राःउष्णीषमय्यःवितताविस्तृताःउतिवाक्यंविततादृतिवासंबंधनीये॥ अथद्वादशी॥
॥तंनाकमर्योअगृभीतशोचिषंरुशत्पिप्पलंमरुतोविधूनुथ॥ समच्यंतवृजनातित्विषंतयत्स्वरंतिघोषंविततमृतायवः॥ ॥हेमरुतोअर्यमितारो

रु०भा० यूयं तं प्रसिद्धं नाकमादित्यं नास्मिन्नकमस्तीति नाकः॥ अगृभीतशोचिषं असुरैरनपहृततेजस्कं रुशच्छुभ्रवर्णं पिप्पलमुदकं वि धूनुथ विविधं
६९ चालयथ अयं द्विकर्मकः॥ यद्यदा हे जनाबलानि समच्यवीत संगता बलिनो भवथ हविर्भिरस्मद्दत्तैः शीति भावः॥ पश्चाद तित्विषं तदीप्ता भवथ अभ
यत्र पुरुषव्यत्ययः॥ यद्वा यदा असुरा हे जनाबलेः समच्यवीत अतित्विषत तत्र घोषं भयतु न कैश्चिद् विततं विस्तृतं स्वरंति कुरुते इत्यर्थः॥ ऋताय
वः॥ उदकमिच्छंतो यूयं यद्वा नराद्धं ऋत्विग्यजमानपरतया व्याख्येयः॥ यद्वा ऋताय वो यज्ञकामाः॥ यजमानादयः॥ यदा समच्यवीत संगताः
जनाबलानि अतित्विषत अचस्वरंति घोषं स्तोत्रैः विततं तदानीं पिप्पलं वि धूनुथेति संबंधः॥ ॥ अथ त्रयोदशी॥ ॥ युष्मादत्तस्य मरुतो विचेतसो
रायस्याम रथ्यो वयस्वतः॥ ॥ न यो युच्छति तिष्यो यथा दिवो ऽस्मे रारंत मरुतः सहस्रिणं॥ ॥ हे विचेतसो विविधप्रज्ञा हे मरुतो युष्मादत्तस्य यु
ष्माभिर्दत्तस्य वयस्वतः॥ अन्नवतो रायो धनस्य स्याम भवेम स्वामिनः रथ्यो रथस्वामिनो वयं युष्माभिर्दत्तो रायः॥ न युच्छति न च्यवते यथा दिवः॥
सकाशान्निष्पन्नः॥ आदित्यो न युच्छति तथा स्मे अस्मासु सहस्रिणं अपरिमितं रारंतरमयंत हे मरुतः॥ ॥ अथ चतुर्दशी॥ ॥ यूयं रयिं मरुतः स्पा
र्हवीरं यूयमृषिमवथ सामविप्रं॥ ॥ यूयमर्वंतं भरताय वाजं यूयं धत्थ राजानं श्रुष्टिमंतं॥ ॥ हे मरुतो यूयं रयिं धनं स्पार्हवीरं स्पृहणीयवीरपुत्र राम
भृत्यादिभिरुपेतं धत्थ दत्त हे मरुतो यूयं सामविप्रं साम्नी विविधप्रेरयितारं यद्वा साम रहिताय विप्राय स्वेतादृशो ऽऋषिमवथ हे यूयं अर्वंतं अश्वं वा
जमन्नं च भरताय देवान्बिभ्रते यष्टावाम्धाय धनं हे मरुतो यूयं राजानं दीप्तं स्वामिनं वा श्रुष्टिमंतं सुखवंतं पुत्रमित्यर्थः धत्थ॥ ॥ अथ पंचदशी॥ ॥ ६९

रभसाः॥ त्वस्यर्थमुद्यं जनाः॥ उदोजसः॥ उद्धृतबलाः॥ मरुतो वृष्ट्यर्थं प्रादुर्भवंतीत्यर्थः॥ ॥ अथ चतुर्थी॥ ॥ व्यक्तून्रुद्रा व्यहानि शिक्वसो व्यंतरि
क्षं वि रजांसि धूतयः॥ ॥ वि यदज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ॥ ॥ हे रुद्राः॥ रुद्रपुत्रा मरुतः॥ अक्तून्वि अजथ स्कनराध्यगतेन
संबध्यते एवं सर्वत्र निक्षिपथेति तस्यार्थः॥ अहान्यपि वि अजथ हे शिक्वसः॥ शक्ताः॥ सर्वमपि कर्तुं अंतरिक्षं वि अजथ तथा रजांसि वि अजथ हे मरुतो नो ह रि
ष्यथ न हिंस्थ॥ ॥ अथ पंचमी॥ ॥ तद्वीर्यं वो मरुतो महित्वनं दीर्घं ततान सूर्यो न योजनं॥ एता न यामे अगृभीतशोचिषो ऽनश्वदां यन्न्ययातना गिरिं॥
॥ हे मरुतो वो युष्माकं तद्वीर्यं प्रसिद्धं सामर्थ्यं महित्वनं महत्वं महत्वं दीर्घं अत्यंतमायतं ततान तनोति लोके सूर्यो न योजनं सूर्यस्तेज इव ए
ताः॥ एतवर्णा देवानामश्वा इव ते यथा यामे गमनाय योजनं दीर्घं ततान तन्वंति॥ तद्वदित्यपरो दृष्टांतः॥ ते च अगृभीतशोचिषः॥ अगृहीततेज
स्काय द्वैतन्मरुतां विशेषणं हे मरुतो यूयं अगृभीतशोचिषः संतः॥ यद्यदा अनश्वदां व्यापकोदकदातारं पणिभिरपहृतानामश्वानां प्रदातारं
वा गिरिं मेघं पर्वतं वा न्ययातन निहितवंतः॥ ॥ इति चतुर्थस्य तृतीये चतुर्दशो वर्गः॥ ॥ अथ षष्ठी॥ ॥ अभ्राजि शर्धो मरुतो यदर्णसं मोषथा
वृक्षं कपनेव वेधसः॥ ॥ अध स्मा नो अरमतिं सजोषसश्चक्षुरिव यंतमनु नेषथा सुगं॥ ॥ हे वेधसो वृक्षो मेघः तं मोषथ ताडयथेत्यर्थः॥ कपना इ
व इवेत्यनर्थकः॥ यद्वा कपना कृमयो वृक्षं घूर्णादयः॥ ते यथा मुष्णंति तद्वत्॥ अध अपि च स्म इति पूरणः॥ नो ऽस्मान्नमामि इत्यर्थः॥ हे सजोषसः॥ युष्मासु
परस्परं समानप्रीतयो यूयं अरमतिं अरमणं धनादिकं प्रतियंतं गच्छंतं अनु नेषथ अनुक्रमेण नेषथ सुगं सुगमनं मार्गेण तद्दृष्टांतः॥ चक्षुरिव तद्य

ऋ॰भा॰ तुविराजथ उतापि चांतरिक्षं ओजसा बले न विममिरे व्याप्तवंतः शुभमित्यादिगतं ॥ ॥ अथ तृतीया ॥ ॥ साकं जाताः सुभ्वः साकमुक्षिताः श्रिये चि
५० दा प्रतरं वावृधुर्नरः ॥ विरोकिणः सूर्यस्येव रश्मयः शुभं यातामनु रथा अवृत्सत ॥ ॥ साकं सहैव जाता उत्पन्नाः सुभ्वः सुष्ठु भवंतः महां
तः इत्यर्थः तथैव साकं सहैव उक्षिताः सेक्तारो वर्षकाः श्रिये चित् आभायै एव प्रतरं प्रकृष्टतरं आ सर्वतो वावृधुः अवर्धयंत नरः कर्माणां नेतारः
विरोकिणः विरोचमानाः सूर्यस्येव रश्मयेव शुभमित्यादिगतं ॥ ॥ अथ चतुर्थी ॥ ॥ आभूषेण्यं वो मरुतो महित्वनं दिदृक्षेण्यं सूर्यस्येव च
क्षणं ॥ उतो अस्माँ अमृतत्वे दधातन शुभं यातामनु रथा अवृत्सतेति ॥ ॥ हे मरुतो वो युष्माकं महित्वनं महत्त्वं आभूषेण्यं स्तुत्यं किंच सूर्य
स्य चक्षणं रूपमिव दिदृक्षेण्यं दर्शनीयं उतो अपि चास्मान् अमृतत्वे मोक्षस्वर्गत्वे तत्र धातन धारयत शिष्टं गतं ॥ ॥ कारीयं प्रथमे
स्यापि ऋच्या उदीरयथेत्यनुवाक्या सूचितं च ॥ ॥ उदीरयथा मरुतः समुद्रतः प्रवो मरुतस्तविषा उदन्यव इति सैषा पंचमी ॥ ॥ उदीरयथ
मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ॥ न वो दस्रा उप दस्यंति धेनवः शुभं यातामनु रथा अवृत्सत ॥ ॥ हे मरुतो यूयं समुद्रतः
वनसाधनात् अंतरिक्षात् उदीरयथ प्रेरयथ वृष्टिमेवार्थः पुनरुच्यते हे पुरीषिणः पृणाते प्रीणयते वा पुरीषमुदकं हे तद्वंतो यूयं वृष्टिं वर्षय राम
थ हे दस्राः दर्शनीयाः वा नृणामुपक्षपितारो वा वो युष्माकं धेनवः प्रीणयितारो मेघाः नोपदस्यंति न क्षुभ्यंति ॥ ॥ इति चतुर्थस्य तृती ६४
यस्य सप्तदशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ यदश्वान् धूर्षु पृषतीरयुग्ध्वं हिरण्ययान् प्रत्यत्काँ अमुग्ध्वं ॥ विश्वा इत् स्पृधो मरुतो व्यस्यथ शुभं या ८०

तामनु रथा अवृत्सत ॥ ॥ हे मरुतो यूयं यदश्वान् धूर्षु रथसंबंधनीषु युग्ध्वं योजितवंतः किंच ईदृशानश्वान् पृषतीः एषत्यो मरुतामिव क
क्रवात् एषद्वर्णा वडवाः सारंगीर्वा ऽश्वाः शाद्वान्यो हिरण्ययान् हिरण्यवर्णान् अत्कान् वचनव्यत्ययः प्रत्यमुग्ध्वं प्रत्यमुंचत यद्वं कृत्वा
विश्वा इत् स्पृधः सर्वानपि संग्रामान् हे मरुतो व्यस्यथ विक्षिपथ शुभमित्यादि गतं ॥ ॥ अथ सप्तमी ॥ ॥ न पर्वता न नद्यो वरंत वो यत्राचिध्वं
मरुतो गच्छथेदु तत् ॥ उत द्यावापृथिवी याथना परि शुभं यातामनु रथा अवृत्सतेति ॥ ॥ हे मरुतो वो युष्मान् पर्वताः अद्रिः लोच्चयाः न वरंत
न वारयंतु तथा नद्यश्च न वारयंत किंतु यत्र यस्मिन् यज्ञादिस्थाने अचिध्वं जानीथ संकथयथ तत्स्थानं गच्छथैव उतापि च द्यावापृथिवी च परि
परितो याथन यथा सत्यर्थमिति ॥ ॥ अथाष्टमी ॥ ॥ यत्पूर्व्यं मरुतो यच्च नूतनं यदुद्यते वसवो यच्च शस्यते ॥ विश्वस्य तस्य भवथा न
वेदसः शुभमिति ॥ ॥ हे मरुतो यूयं यत् पूर्व्यं पूर्वतनं पूर्वमनुष्ठितं यत्कर्मास्ति तदित्यर्थः यच्च नूतनं कर्मास्ति यच्चोद्यते उद्धार्यते उच्चार्य
ते ऊर्ध्वं प्राप्यते स्तूयते इत्यर्थः हे वसवो वासकाः यच्च शस्यते शंसनं क्रियते तस्य विश्वस्योक्तस्य नवेदसः जानंतो भवथ ॥ ॥ अथ नवमी ॥ ॥
मृळत नो मरुतो मा वधिष्टनास्मभ्यं शर्म बहुलं वि यंतन ॥ अधि स्तोत्रस्य सख्यस्य गातन शुभमिति ॥ ॥ हे मरुतो नोऽस्मान् मृळत सुखय
त मा वधिष्टन स्म क्रूरत्वादिजनितेन कोपेन मा वधिष्ट किंतु अस्मभ्यं शर्म सुखं बहुलं अत्यधिकं वियंतन कुरुत किंच स्तोत्रस्य स्तो
त्रैः सख्यस्य सख्यं अधिगातन अधिगच्छत स्तुतिमनुभूयास्मासु सख्यं कुरुतेत्यर्थः ॥ ॥ अथ दशमी ॥ ॥ यूयमस्मान्नयत वस्यो अच्छा

निरंहतिभ्यो मरुतो गृणानाः॥ जुषध्वं नो हव्यदातिं यजत्रा वयं स्याम पतयो रयीणां॥ ॥हे मरुतो यूयमस्मान् रक्षणानाः स्तूयमानाः कर्मणि क
र्तृप्रत्ययः जुषध्वं सेवध्वं नोस्माकं हव्यदातिं हविर्दानं वर्तते यूयं यजत्राः यष्टव्याः यूयं च यं वयं वरणीयो बहुविधानां धनानां पतयः स्याम भ
वेम॥ ॥इति चतुर्थस्य तृतीये पंचदशो वर्गः॥ ॥अग्ने शर्धंतमिति नवर्चं द्वादशं सूक्तं श्यावाश्वस्यार्षं मारुतं तृतीयासप्तम्यौ सतो बृहत्यौ
शिष्टा बृहत्यः अग्ने नव बार्हतं तृतीयासप्तम्यौ सतोबृहत्या वित्यनुक्रमणिका॥ ॥तत्र प्रथमा॥ ॥अग्ने शर्धंतमा गणं पिष्टं रुक्मेभिरंजिभिः।
विशो अद्य मरुतामव ह्वये दिवश्चिद्रोचनादधीति॥ ॥हे अग्ने शर्धंतं शत्रूनभिभवंतं यज्ञे सहमानं वा गणं मारुतं गणं आह्वयते ति शेषः की
दृशं गणं रुक्मेभिः रोचमानै रंजिभिः आभरणैः पिष्टं अवयविते युक्तमित्यर्थः अद्यास्मिन् यागदिने मरुतां विशः प्रजा गणानित्यर्थः
रोचनाद्रोचमानात् दिवो द्युलोकादधीति पंचम्यर्थानुवादी चिदिति पूरणः अव अवस्तात् अस्मदभिमुखं ह्वये आह्वयामि॥ ॥अथ द्विती
या॥ ॥यथा चिन्मन्यसे हृदा तदिन्मे जग्मुराशसः॥ ये ते नेदिष्ठं हवनान्यागमन्तान्वर्ध भीमसंदृशः॥ ॥हे अग्ने त्वं हृदा हृदयेन मरुतो य
था चेन्मन्यसे चिदिति पूजायां येन प्रकारेण पूजितं जानासि तेषां दर्शनं करोषीत्यर्थः तदित् तथैव मे मदर्थं जग्मुर्गच्छंतु आशसः आशंसि
तारः इच्छंतः शत्रून् हिंसंतो वा अनंतरं ये मरुतो नेदिष्ठं अत्यंतांतिकं सन्निधाविव ते तव हवनान्याह्वानानि श्रुत्वा आगमन् आगच्छंति ता
न् भीमसंदृशः कालविलंबावसानेन भयंकरदर्शनान् वर्धवर्धय हविः प्रापणेन॥ ॥अथ तृतीया॥ ॥मीळ्हुष्मतीव पृथिवी पराहता मदंत्ये

तद्वो यामि द्रविणं सद्यऊतयो येना स्वर्ण ततनाम नृँरभि॥ इदं सु मे मरुतो हर्यता वचो यस्य तरेम तरसा शतं हिमाः॥ ॥हे सद्यऊतयस्तदानीं
मेव रक्षा येषां ते तादृशाः सद्योगमना वा वो युष्मान् तद्द्रविणं धनं यामि याचामहे येन धनेन नॄन् अस्मत्पुत्रभृत्यादीन् अभिततनाम स्वर्ण आ
दित्य इव रश्मीन् हे मरुतो मे मम स्वभूतमिदं इदानीं क्रियमाणं वचः स्तोत्रं सुष्ठु हर्यत कामयध्वं यस्य स्तोत्रवचसः तरसा बलेन शतं श
तसंख्याकान् हिमाः हेमंतान् तरेम शतसंवत्सरं जीवेमेत्यर्थः॥ ॥इति चतुर्थस्य तृतीये षोडशो वर्गः॥ ॥प्रयुज्यव इति दशर्चमेकाद
शं सूक्तं श्यावाश्वस्यार्षं मारुतं दशमी त्रिष्टुप् शिष्टा जगत्यः॥ प्रयज्यवो दशाद्यास्त्रिष्टुबित्यनुक्रमणिका॥ आभिप्लविके षष्ठेहनि आग्नि
मारुते सूक्तं मारुतनिविद्धानीयं सूचितं च॥ प्रयज्यव इमं स्तोमं मित्याग्निमारुतमिति॥ ॥तत्र प्रथमा॥ ॥प्रयज्यवो मरुतो भ्राजदृष्टयो
बृहद्वयो दधिरे रुक्मवक्षसः॥ ईयंते अश्वैः सुयमेभिराशुभिः शुभं यातामनु रथा अवृत्सत॥ ॥प्रयज्यवः प्रकर्षेण यष्टारो भ्राजदृष्टयो
दीप्तायुधा मरुतः बृहत्प्रभूतमन्नं वा दधिरे धारयंति रुक्मवक्षसो हारायत्तवक्षस्काः ते मरुतः सुयमेभिः सुखेन नियमयितुं शक्यैः आशु
भिः शीघ्रगैरश्वैरीयंते शोभनं यथा भवति तथा तदीदकमभिलक्ष्य यातां गच्छतां मरुतां रथाः अनुवृत्सत अनुवर्तंते॥ ॥अथ द्वितीया॥
॥स्वयं दधिध्वे तविषीं यथा विद बृहन्महांत उर्विया विराजथ॥ उतांतरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सतेति॥ ॥हे मरुतो यूयं अस
हायेनेव दधिध्वे धारयध्वे कुरुध्व इत्यर्थः किं तविषीं बलं सामर्थ्यं यथा विद जानीथ अप्रतिबंधसामर्थ्यादित्यर्थः॥ हे महांतो यूयं उर्विया उरवः सं

चं॰भा॰ वेचनंवहिष्ठावोह्वतमावक्षोधुरिवोह्वये॥ ॥अथसप्तमी॥ ॥उतस्यवाज्यरुषस्तुविष्वणिरिहस्मधायिदर्शतः॥ मावोयामेषुमरुतश्चिरं
७२ करत्प्रतंरथेषुचोदत॥ ॥उतापिचस्यःसवाजीवेजनवान्अरुषःआरोचमानःतुविष्वणिःप्रभूतध्वनिरश्वःअरुषइत्यनेनरोहितइत्युक्तंभवति।
प्रष्टिर्वहतिरोहितइत्युक्तं।इहेदानींदर्शतदर्शनीयस्मधायिरथेनियोजितःस्मेतिपूरणः।हेमरुतोवोयामेषुगमनेषुचिरंकरमाकरोतत्तंर
थेषुरथेयुक्तमितिशेषःप्रचोदयतप्रेरयततथाविलंबंनकुर्यात्तथाप्रेरयत॥ ॥अथाष्टमी॥ ॥रथंनुमारुतंवयंश्रवस्युमाहुवामहेआयस्मिंत महे॥
स्थौसुरणानिबिभ्रतीसचामरुत्सुरोदसी॥ ॥वयंआत्रेयाःरथंरंहणस्वभावंमारुतंमरुतांसंबंधिनंरथंश्रवस्युंअन्नेच्छुंनुअद्यआहुवामहेआ
ह्वयामःयस्मिन्रथेसुरणानिजलानिबिभ्रतीरोदसीरुद्रस्यपत्नीमरुतांमातायद्वारुद्रोवायुःतत्पत्नीमाध्यमिकादेवीमरुत्सुसचासहि
तातस्थौआश्रितवतीतंरथमाहुवामहे॥ ॥अथनवमी॥ ॥तंवःशर्धंरथेशुभंत्वेषंपनस्युमाहुवे॥यस्मिन्सुजातासुभगामहीयतेसचाम
रुत्सुमीळ्हुषी॥ ॥हेमरुतोवःशर्धंयुष्मदीयंतंप्रसिद्धंबलंगणंरथेशुभंरथेशोभनंत्वेषंदीप्तंपनस्युंस्तुत्यमाहुवेआह्वयेयस्मिन्शर्धेसु
जातासुष्ठुप्रवृद्धासुभगाशोभनभाग्याअतिमहतीमीळ्हुषीमीळ्हुःस्पर्शःशिवतमेत्यादौदर्शनान्मीढारुद्रःतत्पत्नीमीळ्हुषीमरुत्सुसचासह
महीयतेपूज्यतेतंसर्वथामाहुवेआपस्तंबोपिरुद्रपत्नींमीळ्हुषीसंज्ञयाव्याजहार॥उत्तरस्यांदक्षिणस्यांमीढ्वानमायासहयतिलोकिस्थावा राम
जोत्तरस्थौ मीळ्हुषीमध्येजयंतमिति॥ ॥इतिचतुर्थस्यतृतीयेविंशोवर्गः॥ ॥इतिपंचममंडलेचतुर्थोनुवाकः॥पंचमेनुवाकेषो ७२

डशसूक्तानितत्राऽऽरुद्रासइत्यष्टर्चंप्रथमंसूक्तंश्यावाश्वस्यार्षंमारुतंसप्तम्यष्टम्यौत्रिष्टुभौशिष्टाःषड्जगत्यःआरुद्रासोष्टौद्वित्रिष्टुबंतमिति
त्यनुक्रमणिकाविनियोगोलैंगिकः॥ ॥तत्रप्रथमा॥ ॥आरुद्रासइंद्रवंतःसजोषसोहिरण्यरथाःसुवितायगंतन॥इयंवोअस्मत्प्रतिहर्यते
मतिस्तृष्णजेनदिवउत्साउदन्यवे॥ ॥हेरुद्रासोरुद्रपुत्राःइंद्रवंतःइंद्रेणयुष्मत्स्वामिनातद्वंतःसजोषसःपरस्परंसमानप्रीतयोहिरण्यरथाः
संतःसुवितायसुगमनायतत्साधनाययुष्मत्सर्वेगंतव्यायवयज्ञायतदर्थंआगंतनआगच्छतकिमत्रविद्यतइतितदुच्यतेइयमस्मदस्मदीयाम
तिःस्तुतिर्वायुष्मान्प्रतिहर्यतिकामयतेतस्मादागच्छततदन्यवेउदकेच्छवेतृष्णजेगोतमायदिवःद्युलोकस्यकाशात्उत्साःउदकनिष्यंदाःय
थायुष्माभिःप्रेरितास्तद्वदस्मदर्थमागत्याभिमतंददतेत्यर्थः॥ ॥अथद्वितीया॥ ॥वाशीमंतऋष्टिमंतोमनीषिणःसुधन्वानइषुमंतोनिषं
गिणः॥स्वश्वास्थसुरथाःपृश्निमातरःस्वायुधामरुतोयाथनाशुभं॥ ॥हेमरुतोयूयंवाशीमंतःवाशीतितक्षणसाधनमायुधंतद्वंतःऋष्ट
िमंतःऋष्टिर्नामच्छुरिकातद्वंतःस्थएवंसर्वत्रयोज्यंमनीषिणःमनसईश्वराःमनस्विनःसुधन्वानःशोभनधनुष्काःइषुमंतोबाणवंतः
निषंगिणोनिषंगवंतःस्वश्वाःस्थशोभनाश्वाभवथसुरथाःशोभनरथाःपृश्निमातरःपृश्नेःपुत्राःस्वायुधाःखड्गपाशादिसंकुलायुधो
पेताःएवंमहात्मानःसंतःशुभंशोभनंयथाभवतितथाशुभंउदकायवायाथनगच्छथ॥ ॥अथतृतीया॥ ॥धूनुथद्यांपर्वतान्दाशुषेवसुनिवोव
नाजिहतेयामनोभिया॥कोपयथपृथिवींपृश्निमातरःशुभेयदुग्राःपृषतीरयुग्ध्वं॥हेमरुतोद्यांदिवीत्यर्थःपर्वतान्मेघान्दाशुषेहविर्द

ऋ॰भा॰ जेयजमानायवसुधनानि॥ यायवो युष्माकं यामनः गमनस्य भिया भीत्या वना वनानि वृक्षादिसमूहा निजिहते नितरां कंपने अवनाता भवं
७३ तीत्यर्थः। हे पृश्निमातरः पृश्नेः पुत्राः पृश्निर्या वै पयसा मरुतो जाता इति हि श्रुतिः। पृथिवीं कोपयथ क्षोभयथ हे उग्राः उद्गूर्णबलाः यूयं यद्यदा शुभे
उदकार्थं पृषतीः युष्मदीयाश्वाः अयुग्ध्वं योजयथ तदा कोपयथ पृथिवीं॥ ॥अथ चतुर्थी॥ ॥वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृ
शः सुपेशसः॥ पिशंगाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः॥ ॥वातत्विषः सर्वदा दीप्तदीप्तयः वर्षनिर्णिजः वृष्टेः शोध
यितारः अथवा निर्णिगिति रूपनाम वर्षमेव रूपं एषां ते तादृशाः वृष्टिप्रदा इत्यर्थः यमा इव युगलोत्पन्ना इव सुसदृशाः परस्परं बलरूपादि
भिरत्यंतसदृशाः सुपेशासः शोभनरूपाः पिशंगाश्वाः पिशंगवर्णाश्वोपेताः तथा अरुणाश्वाः अरेपसः अपापाः प्रत्वक्षसः प्रकर्षेण तनूक
र्तारो द्वेष्टॄणां महिना महत्त्वेन द्यौरिव अंतरिक्षमिवोरवः॥ ॥अथ पंचमी॥ ॥पुरुद्रप्सा अंजिमंतः सुदानवस्त्वेषसंदृशो अनवभ्रराधसः॥
सुजातासो जनुषा रुक्मवक्षसो दिवो अर्का अमृतं नाम भेजिरे॥ ॥अंजिमंतः आभरणवंतः सुदानवः शोभनदानाः त्वेषसंदृशो दीप्तरूपाः
अनवभ्रराधसो नवभ्रष्टधनाः सुजातासः शोभनजाताः जनुषा जन्मनैव उत्कृष्टरूपाः रुक्मवक्षसः हारवक्षस्काः अर्काः पूज्याः मरुतः दि
वो द्युलोकादागत्य अमृतं अमरणसाधनं नाम उदकं नाम उदकं उदकलक्षणं हविर्वा भेजिरे लब्धवंतः॥ ॥इति चतुर्थस्य तृतीये एकविंशो राम
वर्गः॥ ॥अथ षष्ठी॥ ॥ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितं॥ नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु ७३

त्यस्मदा॥ ऋक्षो न वो मरुतः शिमीवाँ अमो दुध्रो गौरिव भीमयुरिति॥ ॥मीळ्हुष्मती प्रबलस्वामिका पराहता अन्यैरभिभूता पृथिवी वइव श
हृत्तदधिष्ठितो पजोल्लक्षयति साय यथा स्वस्वामिनमुपद्रुताभिगच्छति तद्वदिति मरुतां साकल्येन सर्वथा प्राप्तं दृष्टांतः एवं मदंती मरुत्सेना अस्म
तअस्मानित्यर्थः आएति आगच्छति हे मरुतो युष्माकं अमो बलं ऋक्षो न अग्निरिव शिमीवान् कर्मवान् दुध्रो दुर्धरः गौरिव भीमयुः ऋषभ
युक्तो गौरिव सयथा शिमीवान् कर्मवान्॥ ॥अथ चतुर्थी॥ ॥नि ये रिणंत्योजसा वृथा गावो न दुर्धुरः॥ अश्मानं चित्स्वर्यं पर्वतं गिरिं प्रच्याव
यंति यामभिः॥ ॥ये मरुतः ओजसा स्वीयेन नि रिणंति हिंसंति शत्रून् वृथा अनायासेन स्वसंचारमात्रेण गावो न अश्वा इव दुर्धुरः दुःखेनधि
स्या अश्वा इव ते मरुतः स्वर्यं शब्दयंतं अश्मानं व्याप्तं पर्वतं जगत्याकारोदकवंतं पर्ववानू पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वेति निरुक्तं तादृशं
गिरिं मेघं यद्वा पर्वतमिति सविशेषणं गिरिरिति विशेषणं निगिरत्युदकमिति गिरिः तं यामभिर्गमने प्रच्यावयंति उदकनिर्गमनार्थं॥ ॥अथ पं
चमी॥ ॥उत्तिष्ठ नूनमेषां स्तोमैः समुक्षितानां॥ मरुतां पुरुतममपूर्व्यं गवां सर्गमिव ह्वये॥ ॥हे मरुतो यूयं उत्तिष्ठत अस्य येनेकवचनं न
निश्चये एषां स्तोमैः स्तोत्रैः समुक्षितानां वर्धितानां मरुतां यद्वा स्तोमैरुपह्वये इति संबंधः॥ ॥तादृशां मरुतां पुरुतमं प्रभूततमं अपूर्व्यं सर्गं संघ
मिव ह्वये॥ ॥इति चतुर्थस्य तृतीये एकोनविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥युंग्ध्वं ह्यरुषी रथे युंग्ध्वं रथेषु रोहितः॥ युंग्ध्वं हरी अजिरा धुरि वोळ्ह
वे वहिष्ठा धुरि वोळ्हवे॥ ॥हे मरुतो रोहितवर्णान् युंग्ध्वं हरी अश्वौ अजिरा अजिरौ आशुगमनौ धुरि वोळ्हवे वहनाय युंग्ध्वं आदरार्थं पुनः

ऋ॰भा॰ वसीनां॥ यश्चाश्वश्चा अमवद्वहंत उतेशिरे अमृतस्य स्वराजः॥ ॥ तमु नूनमेव पूर्वं स्तुतमेव मारुतं मरुतां संबंधिनं गणं तविषीमंतं नूनं अद्य
७४ स्तुषे कीदृशं मरुतां नव्यसीनां लिंगव्यत्ययः नवतराणां स्तुत्यानां वा एषां मरुतां गणं गणशः वर्तमानं मारुतं। कीदृशा। इत्युच्यंते ये मरुतः अश्वाः।
शीघ्रगाम्यश्वोपेताः। अमवत् बलवत् स्वं बलवंतो यथा भवंति तथा वहंति गच्छंति उतापि च ईशिरे ईश्वरा भवंति अमृतस्य उदकस्य स्वरा
जः। स्वायत्तदीप्ताः। स्वयमेव राजमानाः तेषां गणं स्तुषे॥ अथ द्वितीया॥ ॥ त्वेषं गणं तवसं खादिहस्तं धुनिव्रतं मायिनं दातिवारं॥ मयो
भुवो ये अमिता महित्वा वंदस्व विप्र तुविराधसो नॄन्॥ ॥ त्वेषं दीप्तं मारुतं गणं तवसं बलवंतं खादिहस्तं कटकहस्तं धुनिव्रतं कंपापित
कर्माणं मायिनं प्रज्ञावंतं दातिवारं दत्तधनं हे विप्र होतः वंदस्व स्तुहीति संबंधः। ये मरुतो मयोभुवः सुखस्य भावयितारः। महित्वा महत्वे
न अमिताः अपरिच्छिन्नाः तुविराधसः प्रभूतधनान् नॄन् नॄन् वंदस्व॥ ॥ अथ तृतीया॥ ॥ आ वो यंतूदवाहासो अद्य वृष्टिं ये विश्वे मरुतो जुनंति॥
अयं यो अग्निर्मरुतः समिद्ध एतं जुषध्वं कवयो युवानः॥ ॥ ये विश्वे व्याप्ता मरुतो वृष्टिं जुनंति प्रेरयंति ते उदवाहसः उदकस्य वोढारो म
रुतो अद्य इदानीं वो युष्मान् आयंतु आगच्छंतु हे ऋत्विग्यजमानाः। अथ प्रत्यक्षवादः। हे मरुतो यः प्रसिद्धो यमग्निः समिद्धः सम्यग्दीपि
तः एतमग्निं जुषध्वं हे कवयो मेधाविनो हे युवानः नित्यतरुणाः। सर्वत्र व्याप्ता वा॥ ॥ अथ चतुर्थी॥ ॥ यूयं राजानमिर्यं जनाय विभ्वतष्टं राम
जनयथा यजत्राः॥ युष्मदेति मुष्टिहा बाहुजूतो युष्मत्सदश्वो मरुतः सुवीरः॥ ॥ हे मरुतः यूयं जनाय राजानं स्वामिनं राजमानं वा इर्यं ७४

शत्रूणां प्रेरकं व्यापयितारं विभ्वतष्टं विभ्वानाम ऋभूणां मध्यमः। स कुशली तेन निर्मितं अत्यंतरूपवंतमित्यर्थः। तादृशं पुत्रं जनयथ उत्पादय
थ हे यजत्राः यष्टव्याः हे मरुतो युष्मद्युष्मत्तः एति गच्छति पुत्रः। कीदृशः। मुष्टिहा मुष्टिभिर्हंता बाहूपलक्षकः। स्वभुजबलेनैव हंता शत्रूणां तद
वोच्यते बाहुजूतः बाहुप्रेरकः। शत्रूणां यस्मात् तादृशः पुत्र एति तथा युष्मत् सदश्वः विद्यमानाश्वः बह्वश्व इत्यर्थः। सुवीरः शोभनवीर्यः पु
त्र एति आयत इत्यर्थः॥ ॥ वरुणप्रघासे मारुत्या मिक्षयोः। अरा इवेति याज्यासूत्रितं च॥ अरा इवेद चरमा अहेव मे मघवरुणस्य धाति
एकादशिन्ये मारुते पशौ वैश्वेव पशुपुरोडाशस्य याज्यासूत्रितं च॥ ॥ अरा इवेद चरमा अहेव यावः शर्मा वामाना येसंतीति॥ ॥ सैषा पंचमी॥ ॥
अरा इवेद चरमा अहेव प्रप्रजायंते अकवा महोभिः। पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या मरुतः सं मिमिक्षुः॥ ॥ अरा इव रथच
क्र इव अचरमाः अतिकृष्टाः सर्वे समा इत्यर्थः। अहेव अहानीव दिवसा यथा सर्वे षष्टिघटिकात्मकाः तद्वत् सप्तसंख्योपेतस्य गणस्य
पेण समा इत्यर्थः। अनेन दृष्टांतद्वयेन वैसादृश्यभावः प्रतिपादितः। एवमुक्तलक्षणा महोभिस्तेजोभिः प्रप्रजायंते प्रकर्षेण प्रादुर्भवंति ए
कं समुपोद्घः पादपूरण इति उपसर्गाभ्यासः। स च पूरणः। ते चाकवाः। अन ...ः महोभिरित्यस्य विशेषणं पृश्नेर्माध्यमिकाया वाचो गो
र्मिरूपाया अंतरिक्षस्य वा पुत्रस्थानीयाः उपमासः प्रत्येकं समानाः रभिष्ठाः प्रकृष्टवेगाः। एवं महानुभावा मरुतः स्वया मत्या स्वकीय
यैव अनुग्रहबुध्या संमिमिक्षुः वृष्ट्या सम्यक्सिंचंति॥ ॥ अथ षष्ठी॥ ॥ यत्प्रायासिष्ट पृषतीभिरश्वैर्वीळुपविभिर्मरुतो रथेभिः। क्षोदंत आ

ऋ०भा० पोरिणतेवनान्यवोस्त्रियोरुषभः।क्रंदनुद्योः॥ ॥यद्यदाप्रायासिष्टानागच्छथपृषतीभिःपृषत्संज्ञकैरश्वैर्वाहनसाधनैरश्वैः।अश्वशब्दोनवा
७५ हनसामान्यवचनः।अतःपुल्लिंगतातथान्यत्र॥यदश्वान्धूर्षुपृषतीरयुग्ध्वंरोहितश्वाःजाश्वइतिसामानाधिकरण्यप्रयोगः।एवंभूताश्वयु
क्तैः।वीळुपविभिः।दृढरथनेमिभिः।प्रायासिष्ट।यदाश्वैरथैश्चसहमरुतः।यदाप्रायासीष्टतदाआपः।क्षोदंतेक्षरंतिवनानिवृक्षसमूहाः।
ऋपीतेहिंस्यतेतेनैवभज्यंतेउस्त्रियःउस्राःसूर्यरश्मयःतत्संबंधीपर्जन्यःवृषभोपांवर्षिताद्योःद्योतमानःअवक्रंदनुद्योः।अवाङ्मु
खंशब्दयतुवृष्ट्यर्थं॥ ॥अथसप्तमी॥ ॥प्रथिष्टयामन्पृथिवीचिदेषांभर्तेवगर्भंस्वमिच्छवोधुः॥वातान्ह्यश्वान्धुर्यायुयुज्रेवर्षंस्वेदंचक्रि
रेरुद्रियासः॥ ॥येषांमरुतांयामन्यामनिगमनेपृथिवीचित्भूमिःचिदितिपूरणःप्रथिष्टप्रख्याताप्राभवत्गमनयोग्याभवदित्यर्थः।तेच
भर्तेवलौकिकःपतिःगर्भमिवभार्यायाःतथास्वमित्स्वभूतंगर्भस्थानीयंशवःउदकंधुःस्थापितवंतः।हियस्मात्वातान्गंतॄन्श्वान्
धुरिरथसंबंधिन्यांआयुयुज्रेआयोजितवंतःतस्माद्वर्षंस्वेदंस्वेदस्थानीयंवृष्टिंसंस्थायंचक्रिरेकुर्वंतिरुद्रियासोरुद्रपुत्राः॥ ॥अ
थाष्टमी॥ ॥इयेनरइतिगता॥ ॥इतिचतुर्थस्यतृतीयेत्रयोविंशोवर्गः॥ ॥प्रवस्पळिस्यष्टर्चंतृतीयंसूक्तंश्यावाश्वस्यार्षंमारुतम राम
ष्टमीत्रिष्टुप्शिष्टाःसप्तजगत्यः।प्रवस्पळ्हुवंतमित्यनुक्रमणिका॥विनियोगोलैंगिकः॥ ॥तत्रप्रथमा॥ ॥प्रवस्पळक्रंत्सुविता
यदावनेऽर्चादिवेप्रपृथिव्याऋतंभरे॥उक्षंतेअश्वान्तरुषंतआरजोनुस्वंभानुंश्रथयंतेअर्णवैः॥ ॥हेमरुतोवोयुष्मभ्यंसुवितायसु ७५

पिपिन्वो॥ ॥हेमरुतोवोयुष्माकंअंसयोरधिऋष्टयःआयुधविशेषाःहिताःवक्ष्यमाणहितशब्दोविपरिणेतव्यःअधीतिसप्तम्यर्थानुवादीतथा
वोबाह्वोरधिसहःशत्रूणामभिभावुकंओजःओजोनामाष्टमोधातुःतद्रूपंबलंहितंनिहितंशीर्षसुशिरस्सुरुक्माहिरण्मयानियदोल्ली
षादानिनिहितानिरथेषुआयुधानिइथ्योपेतंचचंद्रवधिरण्यापेतंराधोधनंदेदान।लोडर्थस्यलिटोमध्यमबहुवचनंहेरुद्रियासोरुद्रपुत्रा
मरुतोनोस्मदीयान्प्रशस्तिंसमृधिमित्यर्थः।तांकृणुतकुरुतवोयुष्माकंस्वभूतंअवसोरक्षणंदैव्यस्यदेवार्हंभक्षीयभजेय॥अथसप्तमी॥ ॥
गोमदश्वावद्रथवत्सुवीरंचंद्रवद्राधोमरुतोददान॥प्रशस्तिंनःकृणुतरुद्रियासोभक्षीयवोवसोदैव्यस्य॥ ॥एतस्यव्याख्यानेपूर्वऋ
ग्व्याख्यानेलिखितं॥ ॥अथाष्टमी॥ ॥हयेनरोमरुतोमृळतानस्तुवीमघासोअमृताऋतज्ञाः॥सत्यश्रुतःकवयोयुवानोबृहद्गिरयो
बृहदुक्षमाणाः॥ ॥हयेहेनरोनेतारोमरुतः।अस्मान्मृळतसुखयतअस्मभ्यंहितायवासुखिनोभवतहेतुवीमघासःप्रभूतधनाः।अ
मृताःअमरणस्वभावाः।ऋतज्ञाः।उदकस्ययज्ञस्यवाज्ञातारःकसरिदृस्यर्थःसत्यश्रुतः।सत्येनसत्यफलत्वेनप्रसिद्धाःकवयोमेधाविनः।
युवानोनित्यतरुणाः।बृहद्गिरयः।प्रभूतस्तुतयःएतानिसर्वाणिसंबोधनप्रथमांतानिपूर्वस्यपूर्वस्यअविद्यमानवत्त्वेनउदात्तानिबृहदुक्ष
षिकंउक्षमाणाःहविर्भिःसेविताःउदकंवासिंचतोयूयंमृळत॥ ॥इतिचतुर्थस्यतृतीयेद्वाविंशोवर्गः॥ ॥तमुनूनमित्यष्टर्चंद्वितीयंसू
क्तंश्यावाश्वस्यार्षंत्रैष्टुभंमारुतंतमित्यनुक्रमणिका।विनियोगोलैंगिकः॥ ॥तत्रप्रथमा॥ ॥तमुनूनंतविषीमंतमेषांस्तुषेगणंमारुतंन

वेगवंतः चारवो दर्शनीयास्त्र भवथ मर्याः समर्त्याः यजमाना इव ते यथा श्रियसे जानं नियज्ञादिकं तच्छ्रियो चेतथ जानथ हे नरो मरुतः॥
॥ अथ चतुर्थी॥ ॥ को वो महांति महतामुदश्नवत्कस्काव्या मरुतः को ह पौंस्या॥ यूयं ह भूमिं किरणं न रेजथ प्र यद्भरध्वे सुविताय दाव
ने॥ ॥ हे मरुतो वो युष्माकं महतां पूज्यानां को यजमानो महांति श्रेयांसि उदश्नवत् उत्कृष्टं प्राप्नुयात् कश्च तदर्थं काव्या काव्यानि क
वीनां युष्माकं संबंधीनि स्तोत्राणि कः उदश्नवत् को ह कश्च पौंस्या पौंस्यानि पराक्रमान् उदश्नवत् आदरार्थं पुनर्वचनं यूयं ह खलु
भूमिं किरणं न किरणमिव रेजथ किरणं यथा रश्म्यर्थं चालयथ तद्वद्भूमिं रेजथ यद्यस्मात् सुविताय सुष्ठु प्राप्तव्याय प्राप्तव्यस्येत्यर्थः।
तादृशस्य धनस्य वृष्ट्युदकस्य वा दावने दानाय प्रभरध्वे प्रकर्षेण संपादयथ वृष्टिः यस्माद्यूयं एवं कुरुथ तस्माद्देवं करोतीति॥ अथ पंच
मी॥ ॥ अश्वा इवेदरुषासः सबंधवः शूरा इव प्रयुधः प्रोत युयुधुः॥ मर्या इव सुवृधो वावृधुर्नरः सूर्यस्य चक्षुः प्र मिनंति वृष्टि
भिः॥ ॥ मरुत एते अश्वा इव त्वरीधुर्गंतारः अरुषासः आरोचमानाः स्नेहयुक्ता वा वीराः भटा इव प्रयुयुधुः प्रयोद्धारो वैरिभिः सह
तादृशाः उताऽपि च। प्रयुधः प्रकर्षेण युध्यंते मर्या इव मनुष्या यथा वर्धंते तथा सुवृधः सुष्ठु वर्धयितारो नरो नेतारो वावृधुः वर्धंते एवं
महात्मानः सूर्यस्य चक्षुस्तेजः सर्वं हि मंडलं वा वृष्टिभिः प्र मिनंति प्रकर्षेण हिंसंति आवृण्वंतीत्यर्थः॥ ॥ अथ षष्ठी॥ ॥ ते अज्येष्ठा
अकनिष्ठास उद्भिदोऽमध्यमासो महसा वि वावृधुः॥ सुजातासो जनुषा पृश्निमातरो दिवो मर्या आ नो अच्छा जिगातन॥ ॥ ते मरुतो

अज्येष्ठाः उद्भिदः उद्भेदयितारः शत्रूणां अमध्यमासः महसा तेजसा वि वावृधुः विवर्धंते सुजातासः सुष्ठु संभूता जनुषा जन्मना पृश्निमा
तरश्चतानूश्व आगतानू हे ऋत्विजो मर्याः यूयं आजिगातन आगच्छत ते नो अच्छ आगच्छत अस्मदभिमुखं॥ ॥ अथ सप्तमी॥ ॥ वयो न ये श्रेणीः पप्तु
रोजसांतान्दिवो बृहतः सानुनस्परि॥ अश्वास एषामुभये यथा विदुः प्र पर्वतस्य नभनूँरचुच्यवुः॥ ॥ हे ये मरुतो वयो न पक्षिण इव श्रेणीः प
ङ्क्तीः सरंतः ओजसा बलेन दिवोंऽतरिक्षस्य आदित्यस्य वा अंतान् बृहतो महतः सानुनः समुच्छ्रितस्याकाशावलंबस्य परि परितः पप्तुः पतं
ति एषामश्वासो अश्वाः पर्वतस्य मेघस्य नभनूं नभतेः शब्दकर्मणो नभ्रालपादितिवत् नभावः उदकानि तानि प्र चुच्यवुः च्यावयंति उ
भये देवमनुष्याश्च यथा विदुर्जानंति तथा मनुष्याणां ज्ञानं प्रसिद्धं देवाश्च दृष्टेः स्यात् आग्रयणादौ हविः प्रदानेन जानंति देवानां दृत्तिसंपूर्त्तिप
रिज्ञानमाश्वलायनेनोक्तं। यदा वर्षस्य तृप्तः स्यादथाग्रयणेन यजेतेत्यपकम्य ... हि देवा आज्ञुहृताः नूनं वर्षस्याग्रयणेन हि यजंत इतीति॥
॥ अथाष्टमी॥ ॥ मिमातु द्यौरदितिर्वीतये नः सं दानुचित्रा उषसो यतंतां॥ आचुच्यवुर्दिव्यं कोशमेत ऋषे रुद्रस्य मरुतो गृणानाः॥ ॥ नोस्म
दर्थं द्यौरंतरिक्षं मिमातु निर्मिमातु वृष्टिं तदनुकूलं करोत्वित्यर्थः। कीदृशी अदितिरदीना यद्वा द्यौर्मिमातु अदिति भूमिश्च मिमातु सुखं किम
र्थं वीतये उत्पत्तये प्रजननाय वा दानुचित्राः विचित्रप्रकाशादिदानाः उषसः सं यतंतां हे ऋषे त्वया गृणानाः स्तूयमानाः मरुतः रुद्रस्य पुत्रा इ
त्यर्थः। ये ते दिव्यं कोशं मेघस्थमुदकमा चुच्यवुः आच्यावयंति द्विकर्मकोयं॥ ॥ इति चतुर्थस्य तृतीये चतुर्विंशो वर्गः॥ ॥ ईळे अग्निं स्ववसं

च० भा० यह्नर्वे चतुर्थसूक्तं श्यावाश्वस्यार्षं सप्तश्चमो जगत्योऽग्निरिष्टाः षड्‌भिरुष्टुभः मरुद्देवताकंवा॥ ईळेऽग्निं जगत्यं चमामेयं चवेति॥ सूक्तविनियोगो लैंगि
७७ कः॥ आग्नाकारीर्य सामिधेनीषु धाय्यासूत्रितं च॥ इळे अग्निं स्ववसं नमोभिरिति धाय्येति॥ ॥सेषा प्रथमा॥ ॥ईळे अग्निं स्ववसं नमोभिरि
ह प्रसत्तो विचयत्कृतं नः॥ रथैरिव प्रभरे वाजयद्भिः प्रदक्षिणिन्मरुतां स्तोममृध्यां॥ ॥अहं श्यावाश्वो अग्निं स्ववसं स्वरक्षणं नमोभिः स्तो
त्रैः ईळे स्तौमि तत्स्तोत्रं कृतमिहेदानीं प्रसत्तः प्रसन्नः प्रकर्षेणायं प्राप्तो वा सन् नोऽस्मदर्थं विचयत् विजानातु वाजयद्भिरन्नमिच्छद्भिः स्तो
त्रैः रथैरिव रथैर्यथाभिमतं प्राप्नुवंति तद्वदिह साधनं प्रभरे प्रकर्षेण संपादयामि अभिमतं प्रदक्षिणित् प्रदक्षिण्येन गच्छन् मरुतां स्तो
मं स्तोत्रं ऋध्यां वर्धयेयं॥ ॥अथ द्वितीया॥ ॥आ ये तस्थुः पृषतीषु श्रुतासु सुखेषु रुद्रा मरुतो रथेषु॥ वना चिदुग्रा जिहते नि वो भिया पृथि
वी चिद्रेजते पर्वतश्चित्॥ ॥ये मरुतो रुद्रा रुद्रपुत्राः आतस्थुः आतिष्ठंति पृषती पृषन्मरुतां वाहनेषु श्रुतासु प्रसिद्धासु सुखासु खेषु स्वमाका
शंस्थितेषु आभनरथास्वद्वारे पुरथेषु रथानातस्थुरातिष्ठंति हे उग्रा उद्‌गूर्णबला मरुतो यूयं यदा रथमारूढास्तदानीं वना चित् वनान्यपि
निजिहते न्यग्गच्छंति वो युष्माकं भिया भीत्या पृथिवी चित् पृथिव्यपि रेजते पर्वतश्चित् सर्वतः कंपते उत्तरार्धः प्रत्यक्षकृतः पूर्वार्धे य एवम राम
कुर्वन् तेषां स्तोममृध्यामिति पूर्वत्रान्वयः॥ कारीर्यं मारुतस्य सप्तकपालस्य पर्वतश्चिदित्येषा याज्या सूत्रितं च॥ ॥पर्वतश्चिन्महि वृद्धो ७७
बिभाय सृजंतिर श्मिमोजसेति सा तृतीया॥ ॥पर्वतश्चिन्महि वृद्धो बिभाय दिवश्चित्सानु रेजत स्वने वः॥ यत्क्रीळथ मरुत ऋष्टिमंत

इ प्राप्तव्याय दावने हविःप्रदानाय स्पृहं स्पृहाहोता प्रकर्षेण अच्छ नू कंदृति स्तौति वो युष्मान् वासु इ प्राप्तव्याय दानाय कंदते श्वाद्धक
र्मणां लड्‌र्थे लिङ्‌ति पिरूपं हे होतः दिवे द्योतमानाय द्युदेवाय प्रार्चप्रकर्षेण स्तुहि हे होतः तथा पृथिव्यै कृत्तं स्तोत्रं भरे संपादयामि द्यावा
पृथिव्याव पिमरुतामाधारत्वात् अत्र निपातभाजौ भवतः किं च ते मरुतो अश्वान् व्यापकान् उदकसंघान् उक्षंते सिंचंति रजआ तदर्थं अं
तरिक्षमा सर्वतस्तरुषं तेत रंति स्वं भानुं स्वकीयं तेजः अर्णवैः मेघैः सह अनुश्रथयंते अनुश्लेषयंति अनुकूलं प्रापयंतीत्यर्थः॥ ॥
॥अथ द्वितीया॥ ॥अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती॥ दूरे दृशो ये चितयंत एमभिरंतर्महे विदथे येतिरे नरः॥ ॥
एषामन्वादेशविषयत्वादनुदात्तः एषां मरुतां भियसा भूमिरेजति कंपते नौर्न पूर्णा प्राणिभिः सायथोदकमध्ये क्षरति चलति पृथिवी
व्यथिर्यती। गच्छतिरतद्‌भयं नौर्विशेषणं। दूरे दृशो दूरे दृश्यमाना अपि ये मरुतः येमभिर्गमनैः चितयंते ज्ञायंते नरः महांतो मरुतो वि
दथे यज्ञगृहे महे महते हविषे हविर्लक्षणायान्नं तः द्यावापृथिव्योर्मध्ये येतिरे यतंते नराने तारो मरुतः॥ ॥अथ तृतीया॥ ॥गवामिव श्रिय
से शृंगमुत्तमं सूर्यो न चक्षू रजसो विसर्जने॥ अत्या इव सुभ्वश्चारवः स्थन मर्या इव श्रियसे चेतथा नरः॥ ॥हे मरुतो यूयं गवां शृंगमिव
उत्तममुत्कृष्टं उष्णीषपादिकं श्रियसे श्रिये धारयथ इति शेषः सूर्यो न सूर्य इव सयथा रजसस्तेजसो विसर्जने तं चक्षुर्दर्शनसाधनं मं
डलं धत्ते तद्वत् इमसाव पृथ्वि विसर्जने विसर्जनाय चक्षुः सर्वस्य प्रकाशकं तेजो धारयथ अत्या इव अश्वा इव सुभ्वः सुष्ठु सर्वत्र भवंतः

ऋ० भा०

७९

बोयद्यजाम॥ ॥हे मरुतो यूयं उत्तमे उत्कृष्टे उत्तमे उत्तमे चरमे दिवि द्युलोके मध्यमे वा दिवि यद्वा अवमे दिवि हे सुभगासः स्थ भवथ॥ त्रयो वा इमे
त्रिवृतो लोकाः अस्मिन्स्वा दिवः पृथिवी इत्यादिश्रुतेः द्युलोकस्य त्रैविध्यं अतः अस्मात्स्थानत्रयात् नोस्मदर्थे हे रुद्रा आगच्छतेति शेषः उत वा अ
थवा नु अद्य यत् यजाम यष्टव्यं प्रक्षिपामः हे हविषः एतद्धविर्वित्तात्त्वं वेत्तु॥ ॥अथ सप्तमी॥ ॥अग्निश्च यन्मरुतो विश्ववेदसो दिवो वहध्व
उत्तरादधि ष्णुभिः॥ ते मंदसाना धुनयो रिशादसो वामं धत्त यजमानाय सुन्वते॥ ॥हे विश्ववेदसः सर्वज्ञातारो विश्वधना वा हे मरुतो
यत् यूयं अग्निश्च दिवो द्युलोकात् उत्तरात् उत्कृष्टतरात् अधि उपरि ष्णुभिः सानुभिः उपरिप्रदेशैर्वहध्वे ऊह्यध्वे तत् यूयं मंदसानाः मोदमा
ना अस्मदीयस्तोत्रैर्हविर्भिश्च धुनयः शत्रूणां कंपयितारः रिशादसः अस्मद्धिंसकानामत्तारः संतो वामं वननीयं धनं धत्त दत्त यजमाना
य सुन्वते अभिषवं कुर्वते॥ ॥अग्ने मरुद्भिरित्यष्टमी आग्निमारुतस्य याज्या अग्ने मरुद्भिः शुभयद्भिर्ऋक्वभिरिति सूत्रितत्वात्॥ ॥अग्ने
मरुद्भिः शुभयद्भिर्ऋक्वभिः सोमं पिब मंदसानो गणश्रिभिः॥ पावकेभिर्विश्वमिन्वेभिरायुभिर्वैश्वानर प्रदिवा केतुना सजूः॥ ॥हे अग्ने मरु
द्भिः सह मंदसानः सन् सोमं पिब कीदृशैर्मरुद्भिः सह शुभयद्भिः शोभमानैः अन्यान् शोभयद्भिर्वा ऋक्वभिः स्तुत्यैः गणश्रिभिः गणभा
वमाश्रयद्भिः पावकेभिः शोधकैः विश्वमिन्वेभिः विश्वं कृत्स्नं प्रीणयद्भिः वैश्वानर विश्वनरहित प्रदिवा पुराणेन केतुना ज्वालापुंजेन स
जूः सहितः॥ ॥इति चतुर्थस्य तृतीये पंचविंशो वर्गः॥ ॥के ष्ठा नर इत्येकोनविंशत्यृचं पंचमं सूक्तं॥ अत्रानुक्रमणिका॥ ॥के ष्ठैकोना गा

राम

७९

यत्र श्यावाश्वो त्र वैददश्वीन् तरंत पुरुमीळ्हौ दार्भ्यं रथवीतिं मरुतश्च दानतुष्टः प्रशशंस बुध्वा च तरंतमहिषीं शशीयसीं पंचम्यत्र तुष्टवमी
सतो बृहतीति॥ तरंतमहिषी शशीयसी नाम्नी तरंतस्य राज्ञो भार्या देवता उत मे रपदित्यस्य वैददश्विपुरुमीळ्हौ देवता यो मे धेनूनामित्यस्य वै
ददश्विस्तरंतो राजा देवता य ईं वहंत इत्याद्याः षण्मारुत्यः एतं मे स्तोममित्यस्य त्वस्य दार्भ्यो रथवीतिर्नाम राजा देवता विनियोगो लैंगिकः॥ ॥अ
त्राश्वमेधे पुराह्न समाहूतागमपारगाः॥ अर्चनाना पुरात्रेयो दार्भ्येन रथवीतिना॥१॥ आर्त्विज्याय वृतो यज्ञे वितते होत्र आह्वितः॥ रथवीतिसु
तां कन्यां स ददर्शापि तरेतिके॥२॥ ययाचे स्वकुमाराय श्यावाश्वाय च तां नृपं॥ स प्रदानमना भार्यामपृच्छत्किं प्रयच्छसि॥३॥ इति पृष्टा पुनः प्रो
ह कथमस्मै प्रदास्यहे॥ इतः पूर्वं सुतादत्र नासीन्नृप ये क्वचित्॥४॥ तत्तथैवेति निश्चित्य प्रत्याचष्टार्चनानसं॥ श्यावाश्वः संत्विते यज्ञे तेन रा
ज्ञो निराकृतः॥५॥ ततः श्यावाश्वोन्वितो विप्रः स तपस्तेपे सुदारुणं॥ अलं चर्यरतः शांतो भिक्षार्थं पर्यटन्द्विजः॥६॥ तरंतमहिषीं साध्वीं विभिक्षे सोऽश
शीयसीं॥ सा संशाप्यो तिकं पत्युः शोभा वा गतवानृषिः॥७॥ इत्युक्तो नृपतिर्भार्यां प्रत्याहेनेश प्रहृजय॥ सानुज्ञाता वतानु यूयं पादादाभरणानि
च॥८॥ तरंतोपि पुनस्तस्मै शादाद्धनमपेक्षितं॥ ततो च पुरुमीळ्हस्य स्वानुजः स्वोंतिकं प्रति॥ प्रेरयामास तमृषिं सोपि स्वामानयिष्यति॥ तथेति राज्ञो
वचनं निशम्य तत्कार्यमादर्शितसर्वमार्गः॥ गच्छन्नरण्ये रथपथ्यां नूनमरुद्गणानूसमानरूपान्॥ विलोक्य विप्रः सभयः प्रणम्य कृतांजलिः के दवि
तोगसंघः॥ तुष्टाव शिष्टान्मरुतो विशिष्टैरथेवचोभिः परितुष्टचित्तः॥ संप्राप्य सर्वं स्वमनीषितं ते दामरुद्गणेभ्यो मुदितास विद्युः॥ तदाभवद्दाथि

ऋ०भा०
७२

सूक्ते दृष्टान् श्यावाश्वनामकः॥ पुरुमीळ्हगृहं पश्चात् पुनर्गृहं॥ गत्वा भूयो लब्धगवां शतं तदा श्याममं चन्द्रशे ससुतां ददौ॥ पुरुमीळ्हस्तरन्तश्च
तद्भार्या च शशीयसी॥ दार्भ्यो योरथवीत्याख्यः सप्त ये मरुतां गणाः॥ तत्तस्मै ददुरुत्कृष्टाः तत्कथा छत्र वर्ण्यते॥ तत्र सूक्ते प्रथमा॥ केष्ठा
नरः श्रेष्ठतमा य एकएक आयय॥ परमस्याः परावतः॥ हे नरो नेतारो मरुतः श्रेष्ठतमाः अत्यंतश्रेष्ठाः यूयं के स्थ के न वयं एवं स्वरूपा निश्च
यातुं संदिह्य ब्रवीमि तिये यूयं एकः प्रत्येकं आयय आगच्छथ कस्मादिति उच्यते परमस्याः परावतः अत्यंतदूरदेशात् अंतरिक्षादित्यर्थः॥
॥ अथ द्वितीया॥ क्व वोश्वाः क्वाभीशवः कथं शेक कथा यय॥ पृष्ठे सदो नसोर्यमः॥ हे मरुतो वो युष्माकं अश्वाः क्व कुत्र स्थाः क्वाभी
शवः बंधनरज्जवः कथं च शेक शीघ्रं गंतुं समर्था भवथ कथा कथं यय याता स्थ पृष्ठे अश्वानां पृष्ठदेशे सदः सीदति तिष्ठत्यनयेति सदः प
र्याणं तत् च दृश्यते॥ तथा नसोः नासिकयोः यमो नियमित्र पलायनप्रतिबंधकरी नासिकयोर्दृश्यते तस्माद् अश्वादिलिंगैः कुत्रापि त्वरितग
मनाय च प्रति यूयमिति देवत्वमनवधार्याह॥ अथ तृतीया॥ जघने चोद एषां वि सक्थानि नरो यमुः॥ पुत्रकृथे न जनयः॥ एषाम्
अश्वानां जघने हंतव्यप्रदेशे चोदः प्रेरिका कशा आरायकाष्ठविशेषो वा वर्तते शीघ्रगमनाय ताडयंत इत्यर्थः सक्थानि ऊरुप्रदेशान् नृ
रो नेतारो मरुतो वियमुः नियच्छंति आनुधावनेन विवृता भवंतीत्यर्थः विवृतो दृष्टांतः पुत्रकृथे पुत्रकरणे अपत्योत्पादने जनयः न
अपत्योत्पादयित्र्यो योषित इव ता यथा पुत्रोत्पादनकाले संगमसमये ऊरू विवृतौ कुर्वंति तद्वदित्यर्थः॥ अथ चतुर्थी॥ परा वीरास एतन

राम
७९

आपद्वसध्यं तो धवध्वे॥ हे मरुतो वो युष्माकं स्वने भयंकरशब्दे सति पर्वतान्निम्नपर्वतोपि महि महान् वृधः स च पिवि भाय बिभेति दिवश्च
तु अंतरिक्षस्यापि सानु समुच्छ्रितः प्रदेशः रेजते कंपते यद्यदा क्रीडथ हे मरुतो यूयं ऋष्टिमंतः आयुधवंतः तदा आप इव उदकानीव सध्र्यं
च महांतं नाधवध्वे धावध्वे गच्छथ॥ अथ चतुर्थी॥ वरा इवेद्रैवतासो हिरण्यैरभि स्वधाभिस्तन्वः पिपिश्रे॥ श्रिये श्रेयांसस्तवसो रथेषु
सत्रा महांसि चक्रिरे तनूषु॥ वरा इव विवाहयोग्या युवान इव ते यथा रेवतासो धनवंतो हिरण्यैः हिरण्मयैराभरणविशेषैः स्वधाभिरुदकैः
अन्नैश्च स्वकीयानि शरीराणि अ— पिपिश्रे संयोजयंति अलंकुर्वंति तद्वदेते मरुतोपि रैवतासः धनवंतः हिरण्यपाः हिरण्यस्कन्नीयः वि
धुदाभरणैः स्वधाभिः अन्नैश्च स्वकीयानि शरीराणि पिपिश्रे श्रिये शोभायै श्रेयांसः श्रेष्ठाः तवसो बलवंतो मरुतो रथेषु सत्रा सत्यं स
ह वा तनूषु महांसि चक्रिरे कृतवंतः सर्वाभरणैरुदकैः शोभिता रथान् अधिष्ठाय शरीरेषु तेजांस्यधारयन्नित्यर्थः॥ अथ पंचमी॥ अज्येष्ठा
सो अकनिष्ठास एते सं भ्रातरो वावृधुः सौभगाय॥ युवा पिता स्वपा रुद्र एषां सुदुघा पृश्निः सुदिना मरुद्भ्यः॥ अज्येष्ठासो अकनिष्ठासः प
रस्परं ज्येष्ठकनिष्ठभावरहिताः सहैवोत्पन्ना समानबला एते मरुतः भ्रातरः परस्परं भ्रातृभूताः संतः सौभगाय सुभगत्वाय सं ववृधुः व
र्धंते युवा नित्यतरुणः स्वपाः शोभनकर्मा एषां मरुतां रुद्रः पिता सुदुघा सुष्ठु दोग्ध्री पृश्निः गोदेवता माता भूता मरुद्भ्यो मरुदर्थं सुदिना शोभन
दिनानि अकुरुतानि ति शेषः॥ अथ षष्ठी॥ यदुत्तमे मरुतो मध्यमे वा यद्वावमे सुभगासो दिवि ष्ठ॥ अतो नो रुद्रा उत वा न्वस्याग्ने वित्ताद्धवि

ऋ०भा०
९०

मिति पूर्वत्र संबंधः ॥ ॥ अथाष्टमी ॥ ॥ उत घा नेमो अस्तुतः पुमां इति ब्रुवे पणिः ॥ स वैरदेय इत्समः ॥ ॥ उत घ अपि व चेति पूरणः नेमो नेम इत्यर्धस्य
ति निरुक्तं । नेमः अर्धः जायापत्योर्मिलित्वैकं कार्यकर्तृत्वादेक एव पदार्थः अर्धं शरीरं भार्येत्यादिस्मृतेः शशीयस्या अर्ध×पुंः×भूतं स्तोरंतः
पुमान् अस्तुतः इति ब्रुवे बहुधा स्तुतो पिगत्वस्यातिशाकुल्याद् अस्तुत इति ब्रुवे पणिः स्तोता हं स चरंतः वैरदेये वीरधनानां प्रेरयितारो दानं दात्री
णाः तैर्दातव्यं धनं देयं तस्मिन् धने समः सर्वेभ्यो दातेत्यर्थः इदिति पूरणः ॥ ॥ अथ नवमी ॥ ॥ उत मे ऽरपद्युवतिर्ममंदुषी प्रति श्यावाय वर्तनिं ॥
वि रोहिता पुरुमीळ्हाय येमतुर्विप्राय दीर्घयशसे ॥ ॥ उत अपि च श्यावाश्वाय मे मह्यं अरपत् अलपत् स्पष्टमाचष्ट किं वर्तनिं मार्गं कीदृशी
सा युवतिः प्रवृत्तयौवना प्रतिममंदुषी प्रतिमोदमाना कस्मै दीर्घयशसे प्रभूताय प्रभूतकीर्तये वा पुरुमीळ्हाय येतन्नामकाय प्रभूत
ग्रहाय किं अर्थविपदस्य कर्मणि स्कांनिनू इति चतुर्थी ॥ पुरुमीळ्हं प्राप्तुमित्यर्थः ॥ तदर्थं रोहिता रोहितवर्णावश्वौ शशीयस्या दशो विये
मतुः धृतवंतावित्यर्थः ॥ या आभ्यामश्वाभ्यां युक्ते रथे स्थापयित्वा पुरुमीळ्हगृहस्य मार्गं प्रदर्शयतीति अतो मतासे पुरा वस्यसीति पूर्वत्र संबंधः ॥ ॥ अ
थ दशमी ॥ ॥ यो मे धेनूनां शतं वैददश्विर्यथा ददत् ॥ तरंत इव मंहना ॥ ॥ इयं पुरुमीळ्हस्तुतिः वैददश्विः पुरुमीळ्होपि यः मे मह्यं धेनूनां श राम
तं यथा येन प्रकारेण ददत् दत्तवान् तथा मंहना मंहनीयानि धनान्यपि ददत् तरंत इव स यथा धेनुशतं बहुविधं धनं च दत्तवान् तद्वत् वैददश्विः
पुरुमीळ्होपि ददत् स्तुच इव इति शेषः ॥ ॥ इति चतुर्थस्य तृतीये सप्तविंशो वर्गः ॥ ॥ अथैकादशी ॥ ॥ य ईं वहंत आशुभिः पिबंतो मदिरं मधु ॥ ९०

अत्र श्रवांसि दधिरे ॥ ॥ इदानीं मरुत एवेति निश्चित्य प्रसिद्धैर्महात्म्यान्नियेः मरुत इदानीं आशुभिः शीघ्रगामिभिरश्वैर्वहंते ऊह्यंते किं कुर्वंतः
मदिरं मदकरं मधु सोमरसं पिबंतः पाथेय स्तेन धृतं सोममित्यर्थः ॥ ते मरुतो त्रास्मिन्देशेष्वश्रवांसि स्तुतिजनितानि यशांसि दधिरे धारयंति ॥ ॥
॥ अथ द्वादशी ॥ ॥ येषां श्रियाधि रोदसी विभ्राजंते रथेष्वा ॥ दिवि रुक्म इवोपरि ॥ ॥ एषां मरुतां श्रिया कांत्या रोदसी द्यावापृथिव्यावधि अधि
कते भवतेति शेषः तस्मात् ते मरुतो रथेषु विभ्राजंते विशेषेण दीप्यंते आ इति वार्थे तत्र दृष्टांतः उपरिभूते दिवि द्युलोके रुक्मो रोचमानः आदि
त्य इव । यद्वा उपरि रथस्योपरीति वा योज्यं ॥ ॥ अथ त्रयोदशी ॥ ॥ युवा स मारुतो गणस्त्वेषरथो अनेद्यः ॥ शुभंयावाप्रतिष्कुतः ॥ ॥ मारुतो ग
णो युवा सर्वेषां मिश्रयिता नित्यतरुणो वा त्वेषरथो दीप्तरथः अनेद्यः अनिंद्यः शुभंयावा शोभनं गंता अप्रतिष्कुतः अप्रतिशब्दितो वा एव
महानुभावो गणो दीप्यत इति ॥ ॥ अथ चतुर्दशी ॥ ॥ को वेद नूनमेषां यत्रा मदंति धूतयः ॥ ऋतजाता अरेपसः ॥ ॥ येषां मरुतां स्थाने को
वेद को जानाति यत्र स्थाने धूतयः शत्रूणां कंपकाः मदंति हृष्यंति ऋतजाताः जलार्थमुत्पन्नाः यज्ञे वा पापादुर्भूताः अरेपसो अपापाः ॥ ॥ अथ
पंचदशी ॥ ॥ यूयं मर्तं विपन्यवः प्रणेतार इत्था धिया ॥ श्रोतारो यामहूतिषु ॥ ॥ हे विपन्यवः स्तुतिकामा मरुतो यूयं मर्तं मरणस्वभावं यजमा
नं इत्थानया धिया इदानीं कृतेन प्रकारया अनुग्रहबुध्या ईदृशेन स्तुतेन वा कर्मणा निमित्तेन प्रणेतारः प्रकर्षेण प्रापयितारो अभिमतं स्वर्गा
दिकं यामहूतिषु यामगमनं तथा हूतयो यस्मिन्निति यामहूतयो यज्ञाः तेषु श्रोतारः आह्वानानां ॥ ॥ इति चतुर्थस्य तृतीये अष्टाविंशो वर्गः ॥ ॥ छ ॥

र०भा० ॥॥ अथ षोडशी ॥ ॥ तेनो वसूनि काम्या पुरुश्चंद्रा रिशादसः ॥ आ यज्ञियासो ववृत्तन ॥ ॥ हे रिशादसः । हिंसकानां शत्रूणामत्तारः । हे यज्ञियासो यज्ञार्हाः पु
९१ रुश्चंद्राः । प्रभूताह्लादकधनाः । ते यूयं नोस्मभ्यमेव वसूनि निवासयोग्यानि धनानि काम्या स्पृहणीयानि आ ववृत्तन आवर्तयतेत्यर्थः । मरुतां दानप्रशंसा
याः । अपेक्षितेन प्रार्थनाविता ॥ ॥ अथ सप्तदशी ॥ ॥ एतं मे स्तोमं मूर्म्ये दार्भ्याय परा वह ॥ गिरो देवि रथीरिव ॥ ॥ सपत्न ऋषिभावस्य श्यावाश्वस्यार्चना
नसः । रथवीतिः सुतायाश्च विवाहं शौनकोब्रवीत् ॥ कथं मरुत्स्तुत्या तेषु श्यावाश्वः सूक्तमहायत्राः ॥ प्रादुर्भूद्धार्षमात्मनं त्वा त्वानि कुलनंदनः । रथवीते
र्दुहितरमगाछन्मनसा तदा ॥ स सद्य ऋषिरात्मानं प्रवक्ष्यद्रथवीतये ॥ एतं मे स्तोममित्याभ्यां मंते रात्रिर्न्यवेदयत् ॥ ऋषिर्नियोगमाज्ञाय देव्या रात्र्या
प्रचोदितः । आदाय कन्यकां तां तु उपेयायार्चनानसं ॥ आदौ तस्योपसंगृह्य स्थित्वा प्रह्वः कृतांजलिः ॥ रथवीतिरहं दार्भ्य इति नाम त्रात्रसंसः ।
मयासंयोगमिछंत्या प्रस्या वस्क्षिदुरात्मना ॥ नत्क्षमस्व नमस्तेस्तु मेमास्म भगवः क्रुधः ॥ ऋषे । पुत्रस्त्वमृषिपितासि भगवन्नृषे ॥ हंत प्रतिग्रहा
णामीस्नुषामित्येनमब्रवीत् ॥ तस्मै तदा वश्वश्रीतसराजा स्वलंकृतां वापि सुतां स्नुषाय ॥ विवाहकाले पिददोनरं इश्शतं हयानां दुहितुः सहस्त्री
गवां सहस्त्रं वसु च प्रभूतं तत्पुत्रपो वेथ वनं जगामेति ॥ हे ऊर्म्ये रात्रिदेवि ऊर्म्येति रात्रिनाम मे मम मदीयं एतं स्तोमं मरुद्भिः कृतं स्तोत्रं अहं मे त्व राम
द्गमत्वामरुतः । स्तुतवानित्येवं दार्भ्याय श्यावाश्वाय परा पराङ्मुखी दार्भ्याभिमुखी सती वह प्रापयेत्यर्थः । तदेवादरार्थमुच्यते हे रात्रिदेवि
गिरः स्तुतीः । मरुद्विषयाः । परा वह रथीरिव रथी यथा रथेभिप्रेतं वस्तु स्थापयित्वा अभिमतदेशं प्रापयति ॥ तद्वत् ॥ ॥ अथाष्टादशी ॥ ॥ उत मे वोच ९१

मर्यासो भद्रजानयः ॥ अग्नितपो यथासथ ॥ ॥ कशत्ता इ नालिंगेन जिगमिषून्मत्वा ब्रूते ॥ हे वीरासो वीराः अमित्राणामेरयितारः । हे मर्यासो मर्त्ये
भ्यो हिता हे भद्रजानयः । भद्रस्त्रीकाः । जनिर्जन्म एषां ते तेषां तेन तथोक्ताः रुद्रपुत्रा इत्यर्थः ॥ अग्नितपोग्निनानतप्तादग्धदेहा यथा सथ पालयंते तथा भ
वथ ॥ ॥ अथ पंचमी ॥ ॥ सनत्साश्व्यं पशुमुत गव्यं शतावयं ॥ श्यावाश्वस्तुताय या दोर्वीरायोपबर्बृहत् ॥ ॥ सा तरंतमहिषी मही सनत शादात्
किं अश्व्यं अश्वसमूहात्मकं वा पशुं वा जाताचेकवचनं उतापि च गव्यं गोसमूहात्मकं पशुं शतावयं शतसंख्याकैरविभिर्युक्तं सनदिति से
त्युक्ते केहयाः श्यावाश्वस्तुताय श्यावाश्वेन मया स्तुताय तरंताय दोः स्वकीयं भुजं उपबर्बृहत् उपोदयद्धत् आलिंगनाय सा सनदिति यायतो
भर्त्रेमास्य दातस्मा देव वसु धनं दातुं शक्तेत्यर्थः ॥ ॥ इति चतुर्थस्य तृतीये षड्विंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ उत त्वा स्त्री शशीयसी पुंसो भव
ति वस्यसी ॥ अदेवत्रादराधसः ॥ ॥ उतापि च त्वा एका शशीयसी शशीयसीति तरंतमहिषी नाम सेव स्त्री यद्वा उतो वै सेव मेकार्थः स्त्री शुएकेव
प्रशस्तेत्यर्थः ॥ यापि समानमेत्यनुत्वानितिवचनात् त्वेति निपातः सेव पुंसः । पुरुषाद्वस्यसी वसीयसी भवति तस्मात्सु सङ्त्यच्यते ॥ अदेवत्रा
त् देवत्रात्येनेन त्रायंते स्तुत्यादिना सदेवत्रः तस्मादराधसः । राधो धनं दानार्हं धनरहिता क्षुब्धकादित्यर्थः ॥ ॥ अथ सप्तमी ॥ ॥ वि या जानाति ज
सुरिं वि तृष्यंतं वि कामिनं ॥ देवत्रा कृणुते मनः ॥ ॥ या शशीयसी जसुरिं व्यथितं जसिस्ताडनकर्म उपक्षेपणकर्मा वातं विजानाति कामिनं धना
द्यभिलाषवंतं विजानाति अनुकंपय अभिमतं ददत्वतीत्यर्थः । हे देवत्रा देवेषु मनः कृणुते कुरुते देवप्रीत्यर्थं प्रदानबुद्धिं करोति या सेव स्त्री

च०भा० दृशं देवानां वपुषां शरीराणां श्रेष्ठं मंडलं हि सूर्यस्य वपुःस्थानीयं तन्मंडलमपश्यं अथवा वां युवयोर्मध्ये सूर्यस्य मंडलं अपश्यमिति व्याख्येयं॥
मैत्रं वा अहरिति श्रुते मित्रस्य सूर्यत्वादित्या न्यायेन॥ ॥अथ द्वितीया॥ ॥तत्सु वां मित्रावरुणा महित्वमीर्मा तस्थुषीरहभिर्दुदुह्रे॥ विश्वाः पि
६२ न्वथऽ स्वसरस्य धेना अनु वामेकः पविरा ववर्त॥ ॥हे मित्रावरुणा वां युवयोर्यन्महित्वं सुसुष्ठु अतिशस्तमित्यर्थः किं तदित्युच्यते ईर्मा संतत
गता सर्वस्य प्रेरक आदित्यः अहभिरहोभिर्वर्षर्तुसंबंधिनस्तस्थुषीः स्थावरभूताः अपो दुदुह्रे दुग्धे किं च स्वसरस्य स्वयं सरतुरादित्यस्य विश्वाः
सर्वा धेना लोकानां प्रीणयित्रीर्द्युतीः पिन्वथ वर्धयथ वां युवयोः एकः अप्रतियोगी केवल इति रथस्य नेमिः पवी रथनेमिर्भवतीति यास्कवचनात्
तथाप्ययं लक्षितलक्षणया रथे वर्तते केवलं युक्तस्या वर्तमानयोरेको रथः आ न्याववर्त अनुक्रमेण परिभ्रमति॥ ॥अथ तृतीया॥ ॥अधारय
तं पृथिवीमुत द्यां मित्रराजाना वरुणा महोभिः॥ वर्धयतमोषधीः पिन्वतं गा अव वृष्टिं सृजतं जीरदानू॥ ॥हे मित्रराजाना मित्रभूताः स्तोता
रो राजानः स्वामिन ईश्वरा भवंति ययोः सकाशात् तौ मित्रराजानौ हे वरुणा प्रतियोग्यापेक्षया द्विवचने अत्र पादादित्वादाद्यपदं न निहन्यते
वरुणापस्य तु आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानस्यैव पादादित्वादनिघातत्वं युक्तं नैवं भवति नामंत्रिते समानाधिकरणे सामान्य
वचनमिति वरुणास्येतस्यामंत्रितसमानाधिकरणत्वादस्य च सामान्यवचनत्वाभावाद्उत्तरस्य निघातत्वं युक्तं हे देवौ महोभिस्तेजोभिः स्वसाम राम
र्थ्यैः पृथिवीं उतापि च द्यां अधारयतं हे देवौ युवामोषधीर्वर्धयतं वृष्टिप्रेरणेन गाः पिन्वतं गा वाश्वादीं च वर्धयतं तदर्थं वृष्टिमवसृजतं अवाङ्मुखं ६२

प्रेरयतं हे जीरदानू क्षिप्रदानौ॥ ॥अथ चतुर्थी॥ ॥आ वामश्वासः सुयुजो वहंतु यतरश्मय उप यंत्वर्वाक्॥ घृतस्य निर्णिगनु वर्तते वामुप सिंधवः प्र
दिवि क्षरंति॥ हे मित्रावरुणौ वां युवामश्वासोऽश्वाः सुयुजः सुष्ठु रथे युक्ताः संतः आ वहंतु यतरश्मयः सारथिनियमितप्रग्रहाः ते अर्वागुप यंतु
घृतस्योदकस्य निर्णिग्रूपं वामनु वर्तते अनुगच्छति किं च प्रदिवि पुराणानामेतत्पुराणाः सिंधवः उप क्षरंति उपगच्छंति युवयोरनुग्रहात्॥ ॥अथ
पंचमी॥ ॥अनुश्रुताममतिं वर्धदुर्वीं बर्हिरिव यजुषा रक्षमाणा॥ नमस्वंता धृतदक्षाधि गर्ते मित्रासाथे वरुणेळास्वंतः॥ ॥श्रुतां विश्रुतां अ
मतिं रूपनामैतत् शारीरदीप्तिमित्यर्थः तामनु वर्धयंता अनुवर्धयंतौ बर्हिर्यज्ञः सेव स यथा यजुषा मंत्रेण रक्ष्माणा रक्ष्यते तद्वत् उर्वीं भूमिं
रक्षमाणा पालयंतौ नमस्वंता अन्नवंतौ हे धृतदक्षा आयत्तबलौ हे मित्र हे वरुण मित्रा वा मुक्तलक्षणौ सं तौ इळासु यागभूमिषु अंतर्मध्ये
गर्ते अधिरथे आसाथे उपविशाथः रथोऽपि गर्त उच्यत इति यास्कः॥ आरोहथो वरुण मित्र गर्तमिति हि वक्ष्यति॥ ॥इति चतुर्थस्य तृतीये द्वात्रिंशो
वर्गः॥ ॥अथ षष्ठी॥ ॥अक्रविहस्ता सुकृते परस्पा यं त्रासाथे वरुणेळास्वंतः॥ राजाना क्षत्रमहृणीयमाना सहस्रस्थूणं बिभृथः सह द्वौ॥ ॥
॥अक्रविहस्ता अकृपणहस्तौ दानेश्वरावित्यर्थः कस्मै सुकृते शोभनकर्मणे परस्पा परस्तात्पातारौ रक्षितारौ हे वरुण मित्रावरुणौ युवां यं य
जमानं इळासु यागभूमिषु अंतर्मध्ये त्रासाथे रक्षथ तस्मै सुकृते अक्रविहस्ता इति परस्पा भवत इति संबंधः॥ किं च युवां राजाना राजमानौ
अहृणीयमाना अक्रुध्यंतौ परस्परं साहित्येन क्षत्रं धनं सहस्रस्थूणं अनेकावष्टंभस्तंभोपेतं सौधादिरूपं गृहं च बिभृथः धारयथः सुकृते प

स०भा०
९३

जमानाय अथक्षत्रं बलं अपरिमिताभिः स्थूणाभिरुपेतं रथं वा गमनार्थं सह धारयथ ॥ ॥ अथ सप्तमी ॥ ॥ हिरण्यनिर्णिगयो अस्य स्थूणा वि भ्रा
जते दिव्यश्वाजनीव ॥ भद्रे क्षेत्रे निमिता तिल्विले वा सनेम मध्वो अधिगर्त्यस्य ॥ ॥ अनयोः रथः हिरण्यनिर्णिक् हिरण्यरूपः निर्णिगिति रूपना
म अस्य रथस्य स्थूणाः कीलकादयः अयः हिरण्यनामैतत् अयो विकारा इत्यर्थः अयोमया वा तादृशो रथो दिवि अंतरिक्षे विभ्राजते किमिव
अस्य वाजनीव अश्वाः व्यापनशीला मेघाः तान् अजति गच्छतीत्यश्वाजनी विद्युत् सा दिवि विभ्राजते किंच भद्रे कल्याणे स्थले वा क्षेत्रे देवयजन
ति तिल्विले वा वाशब्द इवार्थे तिलस्नेहने इति तिलुः स्निग्धा इला भूमिर्यस्य तत्क्षेत्रं तिल्विलं देवयजनं घृतसोमादिना ति स्निग्धे भद्र इति क्षेत्रे
निमित्ते स्थूणे यूपा यष्टिरिव स्थितः मध्वो मधुपूर्णगर्तस्य गर्त्तं रथं स नेम संभजेम कर्मणिष्ठो अधीति पूरणः अथवा गर्तस्याधि रथस्यो
परि मध्वो मधु सोमरसं सनेम स्थापयामेत्यर्थः ॥ ॥ अथाष्टमी ॥ ॥ हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य ॥ आरोहथो वरु
ण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ॥ ॥ उषसो व्युष्टौ प्रातः कालइत्यर्थः सूर्यस्योदिते उदये स एव कालः प्रकारांतरेणोक्तः तस्मि
न्काले हिरण्यरूपं अयःस्थूणं अयोमयशंकुं गर्त्तं रथं हे वरुण हे मित्र युवां गर्त्तमारोहथ यज्ञं प्राप्नुतः अस्माद्धेतोः अदितिमखंडनीयां भूमिं
दितिं खंडितां प्रजादिकां च चक्षाथे पश्यथ ॥ दाक्षायणयज्ञे यद्बंहिष्ठमिति नवमी द्वितीयस्यामावास्यायां मैत्रावरुणस्य हविषो याज्या ॥ सू
त्रितं च ॥ आ नो मित्रावरुणा यद्बंहिष्ठं नातिविधे सुदानू हिरण्यगर्भः समवर्तताग्र इति तस्याठक्त ॥ ॥ अथ नवमी ॥ ॥ यद्बंहिष्ठं नातिविधे सुदा

राम
९३

नादिति सुतसोमे रथवीतौ ॥ न कामो अप वेति मे ॥ ॥ हे ऊर्म्ये उत्ताप्यिं च मे मां योचताद्ब्रूहि किमिति उच्यते इतीच्छं कथमिति सुतसोमे सोमयागे रथवी
तौ राज्ञे मे कामः तत्पुत्रीविषयो नापवेति नापगच्छति न विरमत इत्येवं वोचतात् ॥ ॥ अथैकोनविंशी ॥ ॥ एष क्षेति रथवीतिर्मघवा गोमतीरनु ॥ पर्व
तेष्वपश्रितः ॥ ॥ कन्यां दत्वा कृतार्थं तं श्यावाश्वोऽथ वनं गतः ॥ रथवीतिं तपस्यंतं संप्रेत्यार्षेण चक्षुषा ॥ रम्ये हिमवतः पृष्ठे एष क्षेतीति सोऽब्रवीत् ॥
॥ एष रथवीतिर्मघवा धनवान्दानवान्वा मघोमंहते दानकर्मण इति गोमतीरनु उदकवतीर्नदीरनु गोमत्यनदीनां तीरे क्षेति निवसति पर्वतेषु ह
र्म्येषु यथा पर्वतप्रांतेषु अपश्रितः आश्रितः ॥ ॥ इति चतुर्थस्य तृतीये एकोनत्रिंशो वर्गः ॥ ॥ ऋतेन ऋतमिति नवर्चं षष्ठं सूक्तं आत्रेयस्य श्रुतविद
आर्षं त्रैष्टुभं मैत्रावरुणं ॥ तथा चानुक्रम्यते ॥ ऋतेन नव श्रुतविन्मैत्रावरुणं वै तदिति वैतादित्युभयोः प्रयोगात् तुह्यादिपरिभाषया एतदादी
न्येकादश सूक्तानि मैत्रावरुणदेवत्यानि विनियोगो लैंगिकः ॥ ॥ तत्र प्रथमा ॥ ॥ ऋतेन ऋतमपिहितं ध्रुवं वां सूर्यस्य यत्र विमुचंत्यश्वान् ॥
दश शता सह तस्थुस्तदेकं देवानां श्रेष्ठं वपुषामपश्यं ॥ सूर्यस्य ऋतं सत्यभूतं मंडलं ऋतेनोदकेन अपिहितमाच्छादितं ध्रुवं शाश्वतं अपश्यमि
ति संबंधः यत्र वां युवाभ्यां स्थितिः तमित्यर्थः ॥ सूर्यमंडले सूर्यावरुणयोः स्थितिः ॥ ॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ॥ इ
त्यत्र चक्षुर्वरुणस्य प्रतीक देवयोरिति ॥ चक्षुर्मित्र वरुणस्य त्यादिषु प्रसिद्धा ॥ यत्र यस्मिन्मंडले स्थितानश्वान् विमुचंति विमोचयंति स्तोतारः मंदे
हारिभिः निरुद्धानीत्यर्थः अथवा शीघ्रधावनाय मुक्तात्या प्रेरयंति तस्मिंश्च मंडले दश शता शतानि सहस्रसंख्याकाः रश्मयः तस्थुः तिष्ठंतिता

नृअच्छिद्रंशर्मभुवनस्यगोपा॥तेननोमित्रावरुणाववि॰ष्टंसिषासंतोजिगीवांसस्याम॥ ॥हेसुदानूशोभनदानौहेभुवनस्यगोपायुवांबृहि
ष्ठंबहुतमंयदच्छिद्रंअनवच्छिन्नंशर्मसुखंगृहंवानातिविधेअतिवेधमशक्यंशर्मेतिविशेषणंव्यधताडनेइत्यस्मादिस्फपपदेकृत्यार्थेकेन्
संप्रसारणंचशर्मधारयथाः॥तेनशर्मणानोस्मानृअविष्टंरक्षतंहेमित्रावरुणौसिषासंतोधनानिसंभक्तुमिच्छंतोवयंजिगीवांसःशत्रूणांध
नानिजेतुमिच्छंतःस्यामभवेम॥ ॥६॥ ॥इतिचतुर्थस्यतृतीयेएकत्रिंशोवर्गः॥ ॥३१॥ ॥वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥
पुमार्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥ ॥छ॥ ॥इतिश्रीमद्राजाधिराजपरमेश्वरवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणामा
त्येनविरचितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्येचतुर्थाष्टकेतृतीयोध्यायः॥ ॥३॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

चतुर्थं

६४

॥ चतुर्थाह्स्के तृतीयोऽध्यायः ३॥ ०

भाषा

राम
६४

चतु०भाष्य

९५

वृषभा वर्षितारौ दिवो द्युलोकस्य पती स्वामिनौ पृथिव्याश्च पती विचर्षणी सर्वस्य द्रष्टारौ मित्रावरुणौ एवं महानुभावौ चित्रेभिश्चायनीयैरभ्रैर्मे
घैः सह रवं स्तोत्रं उपतिष्ठथः। पश्चात् द्यां च वर्षयथः असुरस्योदकं निरसितुः पर्जन्यस्य मायया सामर्थ्येन॥ ॥अथ चतुर्थी॥ ॥माया वां
मित्रावरुणा दिवि श्रिता सूर्यो ज्योतिश्चरति चित्रमायुधं॥ तमभ्रेण वृष्ट्या गूहथो दिवि पर्जन्य द्रप्सा मधुमंत ईरते॥ ॥हे मित्रावरुणा वां युव
योर्माया दिवि श्रिता केयं युवयोर्माया उच्यते। सूर्यः सर्वस्य प्रेरको ज्योतिर्दीप्यमानः। चित्रं चायनीयमायुधं उरुलक्षणायुधरूपश्चरति परि
भ्रमत्यंतरिक्षे शत्रूणां मारकत्वाद्धायुधमुच्यते। तं सूर्यं अभ्रेण मेघेन वृष्ट्या च दिवि गूहथो गोपाययथ यथा हे पर्जन्य देव त्वया मित्रावरुण
भ्यां वृष्ट्यर्थं प्रेरितेन त्वया मधुमंतो द्रप्सा ईरते। ईर्यां तत्र तत्र द्रप्सा वा गच्छंति॥ ॥अथ पंचमी॥ ॥रथं युंजते मरुतः शुभे सुखं शूरो न मित्रा
वरुणा गविष्टिषु॥ रजांसि चित्रा वि चरंति तन्यवो दिवः संम्राजा पयसा न उक्षतं॥ ॥हे मित्रावरुणौ युवयोरनुग्रहात् मरुतः। शुभे शुभ
कार्यार्थं सुखं शोभनाश्व्यं रथं युंजते आश्वैर्योजयंति। शूरो न शूर इव स यथा युद्धाद्यर्थं रथं युनक्ति तद्वत्। न विष्टिषु। गवामुदकानामेष
णेषु चित्राश्चायनीयानि रजांसि कानि तन्यवः। ततस्ते मरुतो वि चरंति विविधं चरंति तस्मात्। सहितौ हे संम्राजा युवां द्युलोकात् पयसो
दकेन नोऽस्माकं उक्षतं सिंचतं॥ ॥अथ षष्ठी॥ ॥वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीं॥ अभ्रा वसत मरुतः सु माय
या द्यां वर्षयतमरुणामरेपसं॥ ॥हे मित्रावरुणौ युवयोरनुग्रहात् पर्जन्यो मेघं सुष्टु इरावतीमन्नवतीमन्नसाधिकां चित्रां चायनीयां त्विषीम

राम

९५

तीं वाचं गर्जनशब्दं वदति शब्दयति वृष्ट्यर्थं मरुतश्चाभ्राणि मेघान् सुष्टु वसत। आच्छादयंति। मायया स्वप्रज्ञया युवां पर्जन्येन मरुद्भिश्च स
हारुणमरुणवर्णाम् अरेपसं। रेपसो विघातिनीं द्यां वर्षयतं॥ ॥अथ सप्तमी॥ ॥धर्मणा मित्रावरुणा विपश्चिता व्रता रक्षेथे असुरस्य मायया॥
ऋतेन विश्वं भुवनं वि राजथः सूर्यमा धत्थो दिवि चित्र्यं रथं॥ ॥हे मित्रावरुणा विपश्चिता प्राज्ञौ युवां धर्मणा जगद्धारकेण वृष्ट्यादिलक्ष
णेन कर्मणा व्रतानि यज्ञादिकर्माणि रक्षेथे। पालयथः। असुरस्य मेघानां निरसितुः। पर्जन्यस्य मायया प्रज्ञया च ऋतेनोदकेन यज्ञेन
वा निमित्तेन विश्वं भुवनं सर्वं भूतजातं वि राजथः। विदीप्यत इत्यर्थः। सूर्यमा सूर्यं चित्र्यं पूज्यं रथं रंहणस्वभावं दिवि द्युलोके धत्थः।
धारयथो जगदुपकारार्थं॥ ॥इति चतुर्थस्य चतुर्थे प्रथमो वर्गः॥ ॥वरुणं व इति सप्तर्चं अष्टमं सूक्तं। अर्चनानस आर्षं मैत्रावरुणं
पंक्त्यंतं परिभाषया अनुष्टुभं अंत्या पंक्तिः। वरुणं व इत्यंतं अनुक्रमणिका विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥वरुणं वो रिशाद
समृचा मित्रं हवामहे॥ परि व्रजेव बाह्वोर्जगन्वांसा स्वर्णरं॥ वां युवयोर्मध्ये व्यत्ययेन बहुवचनं रिशादसं रिशान् हिंसतीति रिशा शत्रवः
तेषां प्रेरकं स्वर्णरं स्वर्णरं स्वर्गस्य नेतारं एतद्धि वहितमप्युभयत्र संबध्यते। एवंविधं वरुणं उरुलक्षणं मित्रं वरुणं वा ऋचा मंत्रेण हवामहे
आह्वयामः। अथ युवयोरुच्यते। व्रजेव गोयूथामीव बाह्वोः बलेन परिजगन्वांसा परिगच्छंतौ॥ ॥अथ द्वितीया॥ ॥ता बाहवा सुचेतुना
प्रयंतमस्मा अर्चते॥ शेवं हि जार्यं वां विश्वासु क्षासु जोगुवे॥ ॥तौ युवां बाहवा बाहुना सुचेतुना सुष्टुप्रज्ञाना प्रयास्मत्यर्थं जानन्तस्यर्थः।

ऋतु॰ भा॰

९६

यद्यप्यासेव ज्ञाता न हस्तः। तथापि तद्धर्ममत्रारोप्य स्तूयते। यद्धि तत्सावित्स्यस्य विशेषणं। सुज्ञातावित्यर्थः। शोभनेन हस्तेन अस्मा अर्च
ते। स्तवते मह्यं प्रयंतं अभिमतं सुखं प्रगमयंतं अंतर्भावितण्यर्थो द्रष्टव्यः। यमिर्दानकर्मा वा द्रष्टव्यः। प्रयच्छंतमित्यर्थः। आर्यस्त्वं शोभनं
सुखं वां युवयोः। संबंधि युवाभ्यां कृतं वा विश्वासु सर्वासु क्षासु भूमिषु जोगुवे। गच्छति व्याप्नोति अचतगवतइति गतिकर्मसु पाठात्। अथ
सपि गतिकर्मा अथवा जोगुवे सर्वत्र शब्दयामीत्यर्थः॥ ॥ अथ तृतीया॥ ॥ यन्नूनमश्यां गतिं मित्रस्य यायां पथा॥ अस्य प्रियस्य शर्मण्यहिंसा
नस्य सश्चिरे॥ ॥ यत् यदा नूनमिदानीं गतिं गमनमश्यां प्राप्नुयाम्। यीयघोगादनिघातः। तदा मित्रस्य मित्रभूतस्य पथा मार्गेण मित्रप्रापकेण
मार्गेण पापांगत्वेयं मित्रो नयतु विद्वानि स्यादि पुमित्रस्येष्ट देवागमपितत्वं प्रसिद्धं न केवलमहमेक एव गंता किंतु सर्वेपि तथा गमनक्रिया
ह अस्य प्रियस्य मित्रस्येत्यर्थः। तस्य प्रियस्य शर्मणि सुखे गृहे स्थाने वा सस्थाने वा सश्चिरे संगताः॥ ॥ अथ चतुर्थी॥ ॥ युवाभ्यां मित्राव
रुणोपमं धेयां मृचा॥ यद्धक्षयेमघोनां स्तोतॄणां च स्पूर्धसे॥ ॥ हे मित्रावरुणा युवाभ्यां दातव्यं उपसमीपमीयमानं धनं अहं त्वास्त्यास्त
धनेन धेयां धारयामि। यद्वत्खलु युवाभ्यां सकाशाद्दातं धनं मघोनां धनवतां। अदातॄणां स्तोतॄणां च क्षयं गृहं च स्पूर्धसे स्पर्धमानाय राम
भवति। धनिकानां स्तोतॄणां च धनाधिक्यं विषम्यर्धा भवतीत्यर्थः। अपरिमितं धनं भवतीति भावः॥ ॥ अथ पंचमी॥ ॥ आनो मित्र सुदीति ९६
भिर्वरुणश्च सधस्थ आ॥ स्वे क्षये मघोनां सखीनां च वृधसे॥ हे मित्र त्वं च सुदीतिभिः सुदीप्तिभिः युक्तो युवां नोस्माकं सधस्थे सहनयज्ञे आग

॥ श्रीगणेशाय नमः॥ यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ अष्टकस्य चतुर्थस्य तृतीयो व्याकृतः
स्फुटं॥ अध्यायः सायणार्येण चतुर्थो व्याकरिष्यते॥ ॥ ऋतस्य गोपावितिसप्तर्चं सप्तमं सूक्तं। अत्रेयमनुक्रमणिका। ऋतस्य सप्तार्चनानाजा
गतमिति आत्रेयोर्चनाना नाम ऋषिः। जगती छंदः। तुह्यादि परिभाषया मित्रावरुणौ देवता। विनियोगो लैंगिकः॥ ॥ तत्र प्रथमा॥ ॥ ऋतस्य
गोपावधितिष्ठथो रथं सत्यधर्माणा परमे व्योमनि॥ यमत्र मित्रावरुणावथो युवं तस्मै वृष्टिर्मधुमत्पिन्वते दिवः॥ ॥ हे ऋतस्य यज्ञस्यो
दकस्य गोपौ रक्षितारौ सत्यधर्माणा सत्यधर्माणौ युवां रथमधितिष्ठथः। आरोहथः। अस्मद्यज्ञागमनार्थं कुत्र परमे व्योमनि निरतिशये
आकाशे हे मित्रावरुणौ युवं युवां अत्रास्मिन्यज्ञे यं यजमानं अवथो रक्षथः। तस्मै यजमानाय वृष्टिः। पर्जन्यो मधुमदुदकं दिवो द्युलो
कात्पिन्वते सिंचयति वर्धयति॥ अथ द्वितीया॥ ॥ सम्राजावस्य भुवनस्य राजथो मित्रावरुणा विदथे स्वर्दृशा॥ वृष्टिं वो राधो अमृतत्वमी
महे द्यावापृथिवी विचरंति तन्यवः॥ ॥ हे मित्रावरुणौ सम्राजौ सम्यग्राजमानौ युवां अस्य राजथः। ईशाथे स्वर्दृशा स्वर्गस्य द्रष्टारौ। यु
वां विदथे। अस्मद्यज्ञे सम्राजाविति संबंधः। वां युवां वृष्टिं राधो धनं वृष्ट्या रव्यं अन्नं अमृतत्वं स्वर्गं च ईमहे। प्रार्थयामहे। युवयोस्तन्यवो वि
स्तृताः। रश्मयो द्यावापृथिवी विचरंति। विविधं प्राप्नुवंति। अथवा वृष्टिं धनममृतत्वं च ईमहे॥ ॥ अथ तृतीया॥ ॥ सम्राजा उग्रा वृषभा दिव
स्पती पृथिव्या मित्रावरुणा विचर्षणी॥ चित्रेभिरभ्रैरुपतिष्ठथो रवं द्यां वर्षयथो असुरस्य मायया॥ ॥ सम्राजा सम्यग्राजमानौ उग्रा उद्गूर्ण

चतु० भा०

८१ कंसब्रवीतुस्तुतिंपरस्तुपदिशतुपश्चाद्दर्शतोदर्शनीयश्चवरुणः।दर्शनीयोमित्रोवामित्रश्चवायस्यदाशुषोऽर्थेगिरोऽस्मदीयाःस्तुतीर्वनतेस
लभते॥॥अथद्वितीया॥॥ताहिश्रेष्ठवर्चसाराजानादीर्घश्रुत्तमा॥तासत्पतीऋतावृधऋतावानाजनेजने॥॥ताहितौसत्पतीखलु
मित्रावरुणौश्रेष्ठवर्चसाप्रशस्ततेजस्कौराजानावीश्वरौदीर्घश्रुत्तमादूरदेशादाह्वानश्रोतृतमौतातौसत्पतीसतांयजमानानांस्वा
मिनौऋतावृधावृतस्योदकस्यवावर्धयितारौजनेजनेषुस्तोतृषुनिमित्तेषुऋतावानागमनवंतौ॥॥अथतृतीया॥॥तावामिया
नोवसेपूर्वाउपब्रुवेसचा॥स्वश्वासःसुचेतुनावाजाँअभिप्रदावने॥॥तावांपूर्वौपुरातनौवांयुवांइयानोगच्छंतोअवसेरक्षणायसचा
सहउपब्रुवेउपेत्यास्तौमि।स्वश्वासःस्वश्वावयामात्रेयाःसुचेतुनाशोभनप्रज्ञानौयुवांवाजानन्नानिअभिलक्ष्यप्रप्रकर्षेणदावनेदा
नायस्तुमइतिशेषः।यद्वास्वश्वोद्वितीयाद्विवचनस्यआसादेशः।उपब्रुवइतिसंबंधः॥॥अथचतुर्थी॥॥मित्रोअंहोश्चिदादुरुक्ष
यायगातुंवनते॥मित्रस्यहिप्रतूर्वतःसुमतिरस्तिविधतः॥॥मित्रोदेवःअंहोश्चित्।अंहस्ततोपिस्तोतुः।आदनुअनंतरमेवउरुउरवे
क्षयायगृहायनिवासायवागातुमुपायंवनतेप्रयच्छतिमित्रस्यखलुदेवस्यसुमतिःशोभनबुद्धिःप्रतूर्वतःप्रकर्षेणहिंसतोविविध राम
तःपरिचरतःशुश्रूषकस्यअस्तिहिभवतिखलु॥॥अथपंचमी॥॥वयंमित्रस्यावसिस्यामसप्रथस्तमे॥अनेहसस्त्वोतयःसत्रावरु ८१
णशेषसः॥॥वयंयजमानाःमित्रस्यदुःखनिवारकस्यदेवस्यप्रथस्तमेसर्वतःपृथुतमेअवसिरक्षणेवयंस्यामकिंचअनेहसःअपापाः।

त्वोतयः।त्वयारक्षिताःवरुणशेषसःशेषइत्यपत्यनाम।तारकाःपुत्रायेषांतेतादृशाःसत्रावयंसर्वेसहैवभवेम॥॥अथषष्ठी॥॥युवं
मित्रेमंजनंयतथःसंचनयथः॥मामघोनःपरिख्यतंमोअस्माकमृषीणांगोपीथेनउरुष्यतं॥॥हेमित्रावरुणौयुवांइमंजनंस्तोतारंप्रति
यतथः।गच्छथः।आगत्यचसंचनयथः।व्यापारेषुगमयथः।रात्रौवसंनयथः।निर्व्यापारंकारयथः।मघोनःहविर्लक्षणान्नवतोअस्मा
न्मापरिख्यतंमापरित्यजतंमोमातेवऋषीणांअस्माकंपुत्रानपिपरिख्यतंकिंतुगोपीथेगोःसोमरसःतस्यपानंयस्मिन्सगोपीथःयज्ञस्त
स्मिन्उरुष्यतंरक्षतं॥॥इतिचतुर्थस्यचतुर्थेतृतीयोवर्गः॥॥आचिकितानेतिषड्चंषष्ठंसूक्तं।रातहव्यस्यार्षमानुष्टु
भंमैत्रावरुणं।तथाचानुक्रमणिका।आचिकितानुष्टुभंत्विति।आद्यस्तृचोदशरात्रेचतुर्थेहनिप्रउगशस्त्रेमैत्रावरुणस्यासूत्रितंच।
आचिकितानसुक्रतूयमुवाअपहणमिति॥॥तत्रप्रथमा॥॥आचिकितानसुक्रतूदेवौमर्तरिशादसा॥वरुणायऋतपेशसेद
धीतप्रयसेमहे॥॥आचिकितानजानन्स्तुतिंहेमर्तमनुष्यरातहव्यस्यैवसंबोधनं।सुक्रतूशोभनकर्माणौरिशादसाहिंसकानां
हिंसकौदेवौआह्वयाकारयेतिशेषः।आहूयचऋतपेशसेपेशइतिरूपनाम।ऋतमुदकंउदकमेवरूपंयस्यतादृशायप्रयसेमहतो
स्तुप्यते।हविर्लक्षणान्नवतेमहेमहतेप्रज्यायदधीतदद्याः।हविरितिशेषः।द्वितीयार्थेवाचतुर्थी।महस्तविर्दधीतमस्ततोस्यलाभा
यतिवायोज्यं॥॥अथद्वितीया॥॥ताहिक्षत्रमविह्रुतंसम्यगसुर्यमाशाते॥अधव्रतेवमानुषंस्वर्णधायिदर्शतं॥॥ताहिहीतिहेतौयस्मा

तातो क्षत्रं बलं अविह्रुतं अहि[illegible]घातिमहन्नहेम इद्धं सम्यगाश्राते व्याप्नुतः॥ अथ अतो हेतोर्मानुषे मनुष्येषु प्रयत्तं अतेव
कर्मेव तद्यथा मनुष्येषु नियतं स्व ऽर्णरं सूर्य इव यथा दिवि दिदृयते तेन द्वेत् दस्मतं दर्शनीयं बलं धायि यज्ञेन निहितं॥ ॥अथ तृतीया॥ ॥ता वामेष
रथानामुर्वीं गव्यूतिमेषां॥ रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे॥ ॥हे मित्रावरुणौ तातौ प्रसिद्धौ वां युवां रथानां अस्मदीयानामेषां पुर
तो वर्त्मानानां उर्वीं प्रभूतां गव्यूतिं अतिविस्तृतं मार्गं एषं गंतुं मार्ग वक्षणायेत्यर्थः॥ तुमर्थे असे प्रत्ययः॥ तदर्थं वा मनामहे स्मः॥ रात
हव्यस्य ऋषे रातहव्यसंबंधिनः सुष्टुतिः शोभनस्तुतिसाधनैः। स्तोमैर्दधृक् वर्षकौ युवां॥ ॥अथ चतुर्थी॥ ॥अधा हि काव्या युवं दक्षस्य
पूर्भिरद्भुता॥ नि केतुना जनानां चिकेथे पूतदक्षसा॥ ॥अधा अपि च हि प्रसिद्धौ काव्या कव्यौ॥ युवं युवां दक्षस्य प्रवृद्धस्य मम पूर्भिः पुरके
स्तैः हे अद्भुता महांतौ आश्चर्यभूतौ। सतौ केतुना प्रज्ञानेन अनुकूलेन मनसा जनानां इत्यर्थः॥ स्तोतॄन् चिकेथे नितरां जानीथ हे पूतदक्ष
सा शुद्धबलौ युवां॥ ॥अथ पंचमी॥ ॥तदृतं पृथिवि बृहच्छ्रवएष ऋषीणां॥ ज्रयसानावरं पृथ्वति क्षरंति यामभिः॥ ॥हे पृथिवि विदेवि विस्तृत
तृ सर्वे रत्यमानत्वेन प्रसिद्धं बृहत् प्रभूतं ऋतमुदकं ऋषीणां स्तोतॄणामस्माकं श्रवएषे अन्नस्यैषणे सति ज्रयसानौ गच्छंतौ दस्यसानं
दृष्ट्वा ज्य मित्यसनावकृत्यतेर पि भवति। वितनुस्तोदात्तः॥ अरं अत्यंतं अत्यर्थः पृथु यथा भवति तथायमिता यामभिर्गमनैः अतिक्षरंति
असर्थं वर्षतः व्यत्ययेन बहुवचनं॥ ॥अथ षष्ठी॥ ॥आ यद्वामीयचक्षसा मित्र वयं च सूरयः॥ व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये॥ ॥ राम
४९

भक्त द्वितीया। आकरोनर्थकः॥ आदरार्थो वा। किमर्थमिति उच्यते। मघोनां धनवतां हविष्मतां सखीनां च युवयोः सखिभूतानामस्माकं येग
हे स्वे स्वकीये च ध्रुसे वर्धनाय॥ ॥अथ षष्ठी॥ ॥युवं नो येषु वरुण क्षत्रं बृहच्च बिभृथः॥ उरु णो वाजसातये कृतं राये स्वस्तये॥ ॥हे मित्रावरु
णा मित्रावरुणौ युवं युवां नोस्माकं क्षत्रं बलं बृहत् प्रभूतं परिदृढं मन्त्रं च येषु स्तोत्रेषु निमित्तेषु बिभृथः॥ धारयथः॥ युवाभ्यां धृतमन्त्रं
च नोस्मभ्यं वाजसातये अन्नस्य लाभाय यज्ञाय वा राये धनाय स्वस्तये क्षेमाय च उरु विस्तीर्णं कृतं कुरुतं॥ ॥अथ सप्तमी॥ ॥उच्छं
त्यां मे यजता देवक्षत्रे रुशद्गवि॥ सुतं सोमं न हस्तिभिरा पड्भिर्धावतं नरा बिभ्रतावर्चनानसं॥ ॥उच्छंत्यां उषसि मे सोममिति संबंधः॥
यजताय ष्टव्यौ रुशद्गवि रोचमानेन शरूमे प्रातः सवने देवक्षत्रे देवानां क्षत्रं बलं च यस्मिन् यज्ञे तदेवक्षत्रं तस्मिन्मेम दीयं सुतमभि
षुतं सोमं तनोति संप्रत्यर्थे इदानीं हस्तिभिः हस्तवद्भिः हंतेर्गतिकर्मणो हस्त शब्दः गमनसाधनसाधनपादवद्भिरित्यर्थः॥ पड्भिः पा
दवद्भिश्च पादचतुष्टयोयैतैरश्वैः॥ आ धावतं आगच्छतं हे नरा हे नरौ मित्रावरुणौ॥ ॥इति चतुर्थस्य चतुर्थे द्वितीयो वर्गः॥ ॥यश्चि
केते तिषलर्चं नवमं सूक्तं रातहव्यस्यात्रेयस्यार्षं मैत्रावरुणं यश्चिकेतेत्याद्यरातहव्य इत्यनुक्रमणिका। पंक्तिरित्यकत्वात्पंक्त्यंतपरि
भाषयानुष्टुप्छंदः सापंक्तिः॥ विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥यश्चिकेत स सुक्रतुर्देवत्रा स ब्रवीतु नः॥ वरुणो यस्य दर्शतो मित्रो वा
वनते गिरः॥ यस्तनोतिस्फार्ति युवयोः स सुक्रतुः शोभनकर्मा। देवत्रा देवेषु मध्ये युवयोरेव स्तुतिं यश्चिकेत स सुक्रतुरिति। सस्तुकर्मा नोस्मा

चतु० भा० ६६

तपंतिरक्षंति॥ ॥अथ चतुर्थी॥ ॥ते हि सत्या ऋतस्पृश ऋतावानो जनेजने। सुनीथासः सुदानवोंऽहोश्चिदुरुचक्रयः॥ ॥ते हि खलु सत्याः स
त्यभूताः सत्यफला वा। ऋतस्पृशः उदकस्य कर्तारः। ऋतावानो यज्ञवंतो जनेजने सर्वेषु यजमानेषु सुनीथासः सुनयनाः। सुदानवः
सुदानाः। हीति प्रसिद्धवाची सर्वत्र संबधनीयः। एवं महानुभावा वरुणादयो अंहोश्चित्। चिदप्यर्थे। पापिनोपि स्तोतुरुरुचक्रयः
प्रभूतधनादिकर्तारः॥ ॥अथ पंचमी॥ ॥को नु वां मित्रास्तुतो वरुणो वा तनूनां। तत्सु वामेषते मतिरत्रिभ्य एषते मतिः॥ ॥हे मित्रा वां
युवयोर्मध्ये त्वं वरुणो वा को नु अस्तुतः। सर्वैः स्तुतः। कस्मिन्निति उभावपि स्तुत्यावित्यर्थः। तनूनामिति तृतीयार्थे षष्ठी। तनूभिः स्तु
तिभिः। अस्तुत इति संबंधः। अत्र मित्र मित्रशब्देन मित्रस्यैकस्यैव संबोधनं। वरुणो वा स्तुत इत्यत्र चात्र द्विवचनसूचकस्याकारस्या
श्रवणात्। लोकेषु बहुषु संनिहितेषु एकमेव संबोध्य युवयोरिदं युष्माकमिति प्रयुंजते न तु तस्माद्यस्मात् सर्वे स्तुवंति तस्मात्तनूनामिति
तद्व्यवहितमपि उत्तरत्र योज्यं। तत् नु नाम अस्माकं मतीनां अस्माकं मतिः स्तुतिर्वां सुष्टु आ ईषते अभिगच्छति अत्रिभ्योऽत्रिगोत्रेभ्यः अस्म
भ्यं अस्मदीया मतिः। एते आदरार्थं पुनर्वचनं॥ ॥इति चतुर्थस्य चतुर्थे पंचमो वर्गः॥ ॥प्र वो मित्रायेति पंचर्चं द्वादशं सूक्तं। आत्रेयस्य
यजतस्यार्षं गायत्रं मैत्रावरुणं। तथा चानुक्रम्यते। प्र वो गायत्रमिति। अग्निष्टोमे प्रातःसवने मैत्रावरुणशस्त्रे एतत्सूक्तं। सूत्रितं च। प्र
वो मित्राय प्र मित्रयोर्वरुणयोरिति नवेति। अभिप्लवषडहे पृष्ठ्यषडहे च स्तोमनिमित्तावापार्थमिदमादीनि द्वितीयवर्जितानि चत्वारि सू

राम ६६

क्तानि तथैव सूत्रितं प्र वो मित्रायेति चतुर्णां द्वितीयमुद्धरेदिति॥ ॥तत्र प्रथमा॥ ॥प्र वो मित्राय गायत वरुणाय विपा गिरा॥ महिक्षत्रावृतं बृ
हत्॥ ॥हे मदीया ऋत्विजः। वो यूयमित्यर्थः। मित्राय वरुणाय च विपा व्याप्तया गिरा स्तुत्या प्रगायत स्तुतिं कुरुत तत्कृत्या स्तुतेभ्योपेतनौ
पार्कं पचनीतिवत् महिक्षत्रौ प्रभूतबलौ युवां ऋतं यज्ञं बृहंतं महांतं बृहत् अति प्रशस्तौ स्तुत्यर्थमागच्छतमिति शेषः। अथ वा महत्प्रभूतं
ऋतं स्तोत्रं भ्युपेतमिति शेषः॥ ॥अथ द्वितीया॥ ॥सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च। देवा देवेषु प्रशस्ता॥ ॥यौ मित्रश्च व
रुणश्च परस्परापेक्षया चशब्दः। उभा उभौ सम्राजौ सर्वस्य स्वामिनौ घृतयोनी उदकस्योत्पादकौ देवौ द्योतमानौ देवेषु मध्ये प्रशस्ता प्र
कर्षेण स्तुतौ तौ स्तुत्या गायतेति पूर्वत्रान्वयः॥ ॥अथ तृतीया॥ ॥ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य। महि वां क्षत्रं देवेषु॥ ॥
ता तौ देवौ नोऽस्मदर्थं पार्थिवस्य पृथिवीसंबंधस्य दिव्यस्य दिविभवस्य च महो महतो रायो धनस्य शक्तं समर्थौ भवतं दातुमिति शेषः।
हे देवौ वां युवयोर्महि महत् ज्यं क्षत्रं बलं देवेषु प्रसिद्धं स्तूयत इति शेषः॥ ॥अथ चतुर्थी॥ ॥ऋतमृतेन सपंतेषिरं दक्षमाशाते। अद्रुहा
देवौ वर्धेते॥ ॥ऋतेनोदकेन निमित्तेन ऋतं यज्ञं सपंतौ स्पृशंतौ इषिरं एषणीयं दक्षं प्रवृद्धं यजमानेन हविषा आशाते व्याप्नुतः। अद्रुहा
अप्राधारौ देवौ मित्रावरुणौ युवां वर्धेते। प्रवृद्धौ भवतः॥ ॥अथ पंचमी॥ ॥वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः। बृहंतं गर्तमाशाते॥ ॥
वृष्टिर्वर्षा द्यौः स्थितिर्ययोस्तौ वृष्टिद्यावौ। अथ वृष्टिं विंदिका द्यौरंतरिक्षं याभ्यां तौ तादृशौ रीत्यारी त्योरी गतिरेषणयोः। रीतिः शालिः सेव आपा

चतु॰ भा॰ आशिरभिमताशास्तो ययोस्तौ तादृशौ दुघो न स्य पती स्वामिनौ वृष्टिप्रदत्वात् स्वामित्वं दानुमत्याः दातुं घृचिंतायाइत्यर्थः। एतद्धि ज्ञापणमेवंम
९० हानुभावो वां बृहंतं महांतं गर्तं रथमाशाते व्याप्नुतः। अधितिष्ठतो यागार्थं॥ ॥इति चतुर्थस्य चतुर्थे षष्ठो वर्गः॥ ॥त्री रोचनेति चतुर्ऋ
चं त्रयोदशं सूक्तं उरुचक्रिर्नामात्रेय ऋषिः त्रिष्टुप् मित्रावरुणौ देवता। अनुक्रम्यते च। त्री रोचना वनुक्रम उरुचक्रिरिति विनियोगो लैं
गिकः॥ ॥तत्र प्रथमा॥ ॥त्री रोचना वरुण त्रीँरुत द्यून् त्रीणि मित्र धारयथो रजांसि। वावृधानावमतिं क्षत्रियस्यानुव्रतं रक्षमाणाव
जुर्यं॥ ॥हे वरुण हे मित्र युवां त्रीणि रोचनानि रोचमानानि द्युलोकात् धारयथ इति संबंधः। उत अपि च त्रीन् द्यून् द्योतमानं अंतरि
क्षलोकान् धारयथः तथा त्रीणि रजांसि द्युलोकात्। कीदृशौ युवां वावृधानौ वर्धमानौ क्षत्रियस्य क्षत्रं बलं तद्वत इंद्रस्य यद्वा क्षत्रिय
जातीयस्य यजमानस्य अमतिं रूपनामैतत् रूपं व्रतं कर्म च अजुर्यं अजीर्णं॥ अविंतन असंततं वा रक्षमाणौ॥ ॥अथ द्वितीया॥ ॥
इरावतीर्वरुण धेनवो वां मधुमद्वां सिंधवो मित्र दुह्रे। त्रयस्तस्थुर्वृषभासस्तिसृणां धिषणानां रेतोधा वि द्युमंतः॥ ॥हे वरुण हे मि
त्र वां युवयोराज्ञया धेनवः गावः इरावतीः इरां क्षीरलक्षणां तद्वत्यो भवंतो तथा त्रयः त्रिसंख्याकाः वृषभासो वर्षितारः रेतोधाः उ
दकस्य धारकस्याधारकाः द्युमंतो दीप्तिमंतः अग्निर्वायुरादित्याः। तिसृणां त्रिसंख्यानां धिषणानां स्थानानां भूम्यंतरिक्षद्युलोकानां
स्वामिनः संतः विविधं प्रत्येकं तस्थुः तिष्ठंति युवयोरनुग्रहात् त्रयोपि देवास्त्रिषु स्थानेषु वर्तंत इत्यर्थः॥ ॥अथ तृतीया॥ ॥प्रातर्देवीम राम ९०

हेर्यं चक्षसा व्याप्त दर्शनौ हे मित्रावरुणौ वां युवां पतये वयं च स्तरयः स्तोतार आ आह्वयामि। यविष्ठे अत्यंत विस्तृते बहुपाय्ये बहुभिर्गं
व्ये बहुभी रक्षितव्ये वा स्वराज्ये स्वराट्त्वाय एवं विधराज्यार्थं यतेमहि गच्छेम॥ ॥इति चतुर्थस्य चतुर्थे चतुर्थो वर्गः॥ ॥बळित्था देवेति पंचर्च
मेकादशं सूक्तं। अत्रेयमनुक्रमणिका। बळित्था पंच यजत इति यजमानो नामात्रेय ऋषिः। आनुष्टुभं हि सूक्तस्यादिदमप्यानुष्टुभं मित्रा
वरुणौ देवता विनियोगो लैंगिकः॥ ॥तत्र प्रथमा॥ ॥बळित्था देव निष्कृतमादित्या यजतं बृहत्। वरुण मित्रार्यमन्वर्षिष्ठं क्षत्रमाशाथे॥ ॥
हे देवा द्योतमानाः हे आदित्याः अदितेः पुत्राः हे वरुण। हे अर्यमन्। अरीणां नियमयितः मित्र युवां बहुत्वं अबाध्यं इत्था इत्थं इदानीं वर्तमान
प्रकारेण यजतं यष्टव्यं बृहदिति प्रवृद्धं वर्षिष्ठं प्रवृद्धतमं क्षत्रं बलं आशाथे अश्नुवाथे यद्वा अर्यमा पृथगेव निर्देष्टव्यः। द्विवचनं बहुव
चनं कर्तव्यं। यद्वा यजतं मानुषं क्षत्रमाशाथे। अत्र णिजर्थोऽत्यर्थः। आशायते व्यापयतमित्यर्थः॥ ॥अथ द्वितीया॥ ॥आ यद्योनिं हिरण्ययं वरु
ण मित्र सदथः। धर्तारा चर्षणीनां यंतं सुम्नं रिशादसा॥ ॥यद्वा हिरण्ययं हितरमणीयं योनिं यज्ञभूमिं हे वरुण हे मित्र आसदथः। आ
गच्छथः। तस्मात् चर्षणीनां धर्त्रा धारकौ हे रिशादसा हिंसकानां क्षेप्तारौ युवां अस्मभ्यं सुम्नं सुखं यंतं कुरुतमित्यर्थः॥ ॥अथ तृतीया॥ ॥विश्वे
हि विश्ववेदसो वरुणो मित्रो अर्यमा। व्रता पदेव सश्चिरे पांति मर्त्यं रिषः॥ ॥विश्वे हि सर्वे एव हीति चार्थः विश्ववेदसः सर्वविदः सर्वधना वा
वरुणो मित्रार्यमा चैते। त्रयः सर्वे [illegible] स्मदीयानि कर्माणि पदेव पदनीयस्थानानि व सश्चिरे संगता भवंति। आगस्य च मां मर्त्यं रिषो हिंसकान्मां

चतु० भा० ९१ गवो रक्षणं नूनं निश्चयेन अस्ति हि प्रसिद्धो विदितिपूरणः ॥ हे वरुण हे मित्र वां युवयोः सुमतिं अनुग्रहबुद्धिं वंसि संभजेय । यस्माद्वां अस्ति
तस्माद्वंसीति भावः ॥ ॥ अथ द्वितीया ॥ ॥ ता वां सम्यगद्रुह्वाणेषमश्याम धायसे ॥ वयं ते रुद्रा स्याम ॥ ॥ अद्रुह्वाणा हे द्रोग्धारौ ताता प्र
सिद्धौ वां युवां सम्यक् सुष्ठु मद्रूति शेषः ॥ स्तोतारो वयं इषमन्नं धायसे पानाय अश्याम प्राप्नुयामहि रुद्रा दुःखद्रावयितारो रुद्रा इव
यो वां ते स्तोतारो वयं स्याम भवेम समृद्धा इति शेषः ॥ युवाभ्यां स्वभूता वा स्याम ॥ ॥ अथ तृतीया ॥ ॥ पातं नो रुद्रा पायुभिरुत त्राये
थां सुत्रात्रा ॥ तुर्याम दस्यून्तनूभिः ॥ ॥ हे रुद्रा उक्तरूपौ देवौ युवां नोस्मान् पायुभिः रक्षणैः पातं रक्षतं उतापि च सुत्रात्रा त्राणेन भवनेन
त्रायेथां पालनं इष्टप्राप्तिरनिष्टपरिहार भेदेन भेदः ॥ स्तोत्रादिवैकल्पात् छत्रोर्वा त्रायेथां अभिमतप्रापणेन रक्षतमित्यर्थः ॥ वयं च
तनूभिः पुत्रादिभिः सहिताः स्वीयैरंगैर्वा दस्यून् शत्रून् तुर्याम हिंस्याम तरेम वा ॥ ॥ अथ चतुर्थी ॥ ॥ मा कस्याद्भुतक्रतू यक्षं भुजेमा
तनूभिः ॥ मा शेषसा मा तनसा ॥ ॥ हे अद्भुतक्रतू आश्चर्यकर्माणौ वयं कस्य अन्यस्य वचनं यक्षं पूजितं धनं मा भुजेम मा भुंजीमहि त
नूभिर्मदीयैरवयवैः युवयोरनुग्रहात् समश्नवाम अन्यायार्जितधनेन शरीरपोषं न कुर्मइत्यर्थः ॥ ॥ इति चतुर्थस्य चतुर्थे अष्टमो वर्गः ॥ राम ९१
॥ ॥ तथा शेष अत्र चालमकंपं च दत्रीसूक्तं बाहुवृक्तऋस्यात्रेयस्यार्षं गायत्रं मैत्रावरुणं ॥ आ नस्त्वच बाहुवृक्तं इत्यनुक्रमणिका ॥ उक्तसू
क्तविनियोगः अग्निष्टोमे प्रातःसवने मैत्रावरुणशास्त्रे अयमनुरूपस्तृचः सूत्रितं च ॥ आ नो मित्रा वरुणा ॥ आ नो गंतं रिशादसेति ॥

॥ ॥ तत्र प्रथमा ॥ ॥ आ नो गंतं रिशादसा वरुण मित्र बर्हणा ॥ उपेमं चारुमध्वरं ॥ ॥ हे वरुण हे मित्र रिशादसा शत्रूणां प्रेरकौ युवां नोस्माकमिमं चारुरम
णीयं अध्वरं अहिंसकं यज्ञमुपागतं उपागच्छतं कीदृशौ बर्हणा परिबर्हणौ निबर्हणौ हंतारौ शत्रूणां ॥ ॥ अथ द्वितीया ॥ ॥ विश्वस्य हि प्रचेतसा व
रुण मित्र राजथः ॥ ईशाना पिप्यतं धियः ॥ ॥ हे प्रचेतसा प्रकृष्टज्ञानौ युवां विश्वस्य राजथः सर्वस्य स्वामिनौ भवथः हीति प्रसिद्धौ हे ईशाना
अस्माकमीश्वरौ युवां धियोस्मदीयानि कर्माणि पिप्यतं प्याययतं फलेः ॥ ॥ अथ तृतीया ॥ ॥ उप नः सुतमागतं वरुण मित्र दाशुषः ॥ अस्य सोम
स्य पीतये ॥ ॥ नोस्माकं सुतमभिषुतं सोमं प्रति हे वरुण हे मित्र युवां उपागतं उपागच्छतं दाशुषो हविर्दातुर्ममास्य सोमस्य पीतये पानाय ॥ ॥ इति
चतुर्थस्य चतुर्थे नवमो वर्गः ॥ ॥ आ मित्रे वरुणे तृचात्मकं षोडशं सूक्तं बाहुवृक्तऋस्यार्षं गायत्रं मैत्रावरुणं ॥ आ मित्र उष्णिहमित्यनुक्रमणि
का ॥ दशरात्रे तृतीयेहनि प्रउगशस्त्रे अयं मैत्रावरुणस्य तृचः सूत्रितं च ॥ आ मित्रे वरुणे वयं ॥ अश्विना वेह गच्छतमिति ॥ ॥ तत्र प्रथमा ॥ ॥
आ मित्रे वरुणे वयं गीर्भिर्जुहुमो अत्रिवत् ॥ नि बर्हिषि सदतं सोमपीतये ॥ ॥ आ मित्रे वरुणे इति वेयासत्रेया । मित्रे वरुणे मित्रावरुणयोरर्था
य गीर्भिर्मैत्रैः जुहुमः अत्रिवत् अस्मज्जनकोत्र प्रवर्त्तको अत्रिरिव तस्मात् हे मित्रावरुणौ सोमपीतये बर्हिषि निषदतं निषीदतं ॥ ॥ अथ द्वितीया ॥ ॥
॥ व्रतेन स्थो ध्रुवक्षेमा धर्मणा यातयज्जना ॥ नि बर्हिषि सदतं सोमपीतये ॥ ॥ हे मित्रावरुणौ युवां धर्मणा जगद्धारकेण व्रतेन कर्मणा योगेन ध्रु
वक्षेमा स्थः अचलितस्थानौ भवथः यातयज्जना यातयंतः कर्मसु प्रवर्त्तयंतो जना ऋत्विजो ययोः स्तौ यातयज्जनौ अथवा यातयंतः श
त्रून् हिंसंतो जना भृत्या ययोस्तौ शिष्टं गतं ॥ ॥ अथ तृतीया ॥ ॥ मित्रश्च नो वरुणश्च जुषेतां यज्ञमिष्टये ॥ नि बर्हिषि सदतां सोमपीतये ॥ ॥ मित्रश्च व

चतु०भा० रुणश्चाभीनोस्माकीयज्ञं इष्टये अभिष्टये जुषेतां निषीदतां निषीदतां सोमपानाय॥ ॥इति चतुर्थस्य चतुर्थे दशमो वर्गः॥ ॥इति पंचमे मंडले पं
९२ चमोनुवाकः॥ षष्ठेनुवाके पंचदश सूक्तानि। तत्र यदद्य स्थ इति दशर्चं प्रथमं सूक्तं आत्रेयस्य पौरनाम्न आर्षं आनुष्टुभं आश्विनं। अनुक्रांतं
च यदद्य स्थ इति सूक्ते इति सूत्रितं॥ ॥तत्र प्रथमा॥ ॥यदद्य स्थः परावति यदर्वावत्यश्विना॥ यद्वा पुरू पुरुभुजा यदंतरिक्ष आगतं॥ ॥हे पुरु
भुजा बहुभुजयज्ञेषु भोक्तारौ अधिकं रक्षितारौ वा। हे अश्विनावद्य यदि यद्यस्मिन्काले परावति अत्यंत दूरदेशे द्युलोके स्थो भवथः। यद्वा अर्वाव
ति अरणवति गंतुमशक्ये प्रदेशे अंतिके स्थः यत्र यद्वा। अथवा पुरु बहुप्रदेशेषु स्थः यद्यदि अंतरिक्षे स्थः। तस्मात्सर्वस्मात् अद्यागतं आ
गच्छतं॥ ॥अथ द्वितीया॥ ॥इह त्या पुरुभूतमा पुरू दंसांसि बिभ्रता॥ वरस्या याम्यध्रिगू हुवे तुविष्टमा भुजे॥ ॥इहास्मिन्यज्ञे त्यातौ पुरुभू
तमा पुरूणां बहूनां यजमानानां भवेयितृतमौ पुरु पुरूणि दंसांसि कर्माणि बिभ्रता धारयंतौ वरस्या वरणीयौ अध्रिगू अन्यैरधृतगमनक
र्माणौ यामि उपागच्छामि तुविष्टमा प्रभूततमौ भुजे भोगाय पालनाय वा हुवे आह्वयामि॥ ॥अथ तृतीया॥ ॥ईर्मान्यद्वपुषे वपुश्चक्रं रथस्य
येमथुः॥ पर्यन्या नाहुषा युगा मह्ना रजांसि दीयथः॥ ॥अश्विनो रथस्य युवो युष्मदीयस्यान्यच्चक्रं ईर्मा प्रेरितं ईर्मेति रूपं गतेर्यादिस्यैव वपुषे
तस्य शोभायैव पूर्वं युष्मत्तेजस्वत् चक्रं येमथुः। नियमितवंतौ स्थः। अन्या अन्येन चक्रेण महत्त्वेन स्वसामर्थ्येन नाहुषा युगा नहुषाम राम
नुष्याः। तेषां युगा युगोपलक्षितान् कालान् प्रातरादिसवनानि अहोरात्रादिकालान्वा रजांसि लोकान् परिदीयथः। परिगच्छथः। न्यद्यस्य मूर्ध ६२
नि चक्रं रथस्य येमथुरित्युक्तं॥ ॥अथ चतुर्थी॥ ॥तदू षु वामेना कृतं विश्वा यद्वामनु ष्टवे॥ नाना जातावरेपसा समस्मे बंधुमेयथुः॥ ॥हे विश्वा

दितिं जोहवीमि मध्यंदिन उदिता सूर्यस्य॥ राये मित्रावरुणा सर्वतातेळे तोकाय तनयाय शं योः॥ ॥अहमृषिः प्रातःकाले अदिति
मखंडनीयां देवानां जननीं देवीं द्योतमानां जोहवीमि। आह्वयामि तथा मध्यंदिने सूर्यस्य उदिता उदिते नक्षमृद्धिकाले मध्यंदिने सव
ने जोहवीमि हे मित्रावरुणा युवां राये धनप्राप्तये सर्वताता तौ यज्ञे स्तोमि पुनः किमर्थं तोकाय पुत्राय तनयाय तत्पुत्राय च शं अरिष्टश
मनाय योः सुखस्य मिश्रणाय चेति॥ ॥अथ चतुर्थी॥ ॥या धर्तारा रजसो रोचनस्योतादित्या दिव्या पार्थिवस्य॥ न वां देवा अमृता
आ मिनंति व्रतानि मित्रावरुणा ध्रुवाणि॥ ॥यायौ रोचनस्य रोचमानस्य रजसो लोकस्य स्वर्गाख्यस्येत्यर्थः। उतापि च पार्थिवस्य
रजसो यानि कर्माणि देवाः अन्ये इंद्रादयः अमृता अमरणधर्माणोपि न मिनंति न हिंसंति यौ धर्तारौ आदित्या अदितेः पुत्रौ दिव्यादि
विभवौ तौ युवां ईळ इति पूर्वत्र संबंधः। हे मित्रावरुणा वां युवयोः ध्रुवाणि अन इत्यभिप्रायः॥ ॥इति चतुर्थस्य चतुर्थे सप्तमो वर्गः॥ ॥
पुरूरुणेति चतुर्ऋचं चतुर्दशं सूक्तं। उरुचक्रेरार्षं गायत्रं मैत्रावरुणं। पुरूरुणा गायत्रं त्वित्यनुक्रमणिका। पृष्ठ्याभिप्लवषळहयोः
प्रातःसवने आवापार्थत्वेनेदमपि सूक्तं पूर्वसूक्तेन सह प्रवो मित्रायेति चतुर्थे द्वितीयमुषसेदिति निरूक्तं। चतुर्विंशकेहनि प्रातःसव
ने मैत्रावरुणशस्त्रे आद्यस्तृचः। षळहस्तोत्रियसंज्ञकः सूत्रितं च॥ ॥तत्र प्रथमा॥ ॥पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण॥ मित्र वंसि वां
सुमतिं॥ पुरूरुणा अत्र योः सुपां सुलुगित्याकारः। पुरोरपि बहुतरं उरुबहुतरं अथवा पुरु च तत् उरु च पुरूरु अत्यंत पुरुतमामित्यर्थः। ताद

ऋ०भाष्य

६३

गमनेषुयज्ञेषुवाश्रूयते।हेअश्विनाहेनराअस्मान्वांयुवांदंसोभिःअत्रिरस्मत्पिताआववर्तति॥आवर्तयति॥ ॥अथाष्टमी॥ ॥मध्व
ऊषुमधुयुवारुद्रासिषक्तिपिप्युषी॥यत्समुद्रातिपर्षथःपक्वाःपृक्षोभरंतवां॥ ॥हेमधूयुवामधुरस्यसोमस्यमिश्रयितारौहेरुद्राक्रूत
स्तुतिःतयाइववल्गीयोरुद्रपुत्रौवांयुवांमध्वःमधुरसेनसुपिप्युषीसुष्टुप्याययंतीस्तुतिरस्मत्कृतासिषक्तिसेवतेयद्यदासमु
द्रायत्समुद्रवत्साधनान्यंतरिक्षाणिपर्षथः।अतिपारयथः।यद्वाप्राप्नुथइत्यर्थः।पक्वाःपृक्षोऽन्नानिहविर्लक्षणानिवांभरंतध्रियं
तेयजमानैः॥ ॥अथनवमी॥ ॥सत्यमिद्वाउअश्विनायुवामाहुर्मयोभुवा॥तायामन्यामहूतमायामन्नामृळयत्तमा॥ ॥हेअश्विनायुवां
सत्यमित्सत्यमेववाइतिपादपूरणः।मयोभुवासुखस्यभावयितारौआहुः।पुराविदःतातौयुवांरथेनप्रसिद्धौयुवांतायामन्यज्ञेयाम
हूतमागमनार्थंभृशमाह्वातव्यौभवतामितिशेषः।यामन्अस्मद्यज्ञेअस्मद्ग्यागमनेवामृळयत्तमाचअतिशयेनसुखयितारौभवतंआ
कारश्चार्थे॥ ॥अथदशमी॥ ॥इमाब्रह्माणिवर्धनाश्विभ्यांसंतुशंतमा॥यातक्षामरथाँइवावोचामबृहन्नमः॥ ॥अथसूक्तंनिगमयति।इ
माइमानीदानींकृतानिब्रह्माणिपरिदृढानिस्तोत्राणिअश्विभ्यांवर्धनानिसमर्धकानिशंतमासुखतमानिसंतुयायानितक्षामसंपादयामरथा
निवाल्मीकृत्यक्षमतानिसंतुवयंबृहत्प्रभूतफलदंनमोनमस्कारोक्तिमवोचाम॥ ॥इतिचतुर्थस्यचतुर्थेद्वादशोवर्गः॥ ॥कूष्ठइतिद
शर्चंद्वितीयंसूक्तंपौरस्यार्षंकूष्ठइत्यनुक्रमणिका।पूर्ववच्चशास्त्रादिदमप्यानुष्टुभमाश्विनंतद्धीतिपूर्वोक्तत्वात्प्रातरनुवाकाश्विनशस्त्रयोः।

श्री

राम

६३

पूर्वसूक्तेसहोक्तोविनियोगः॥ ॥तत्रप्रथमा॥ ॥कूष्ठोदेवावश्विनाद्यादिवोमनावसू॥तच्छ्रवथोवृषण्वसूअत्रिर्वामाविवासति॥ ॥हेदेवौमना
वसूस्तुतिधनौअद्यास्मिन्यागदिनेदिवोद्युलोकादागत्यकूष्ठःव्यत्ययेनैकवचनं।कौभूमौतिष्ठंतौसंतौतत्स्तोत्रंश्रवथःशृणुथः।हेवृषण्व
सूवर्षकधनौवांअत्रिरत्रेःपुत्रःआविवासतिचसतःपरिचरति।अथवाकूइत्यस्यनिपातस्यस्थइत्याख्यातेनसहेतियोगविभागात्समा
सः।एकःस्वर्येवाबाध्येत्समयप्राप्तं।अराइवेत्यत्रयथावाशब्दः।कूचजायतेकूचलंतमित्यादिवत्अत्रापिद्रष्टव्यं।कस्मिन्तौभवथः।यौ
युवांस्तोतितांशृणुथइत्यर्थः॥ ॥अथद्वितीया॥ ॥कुहत्याकुहनुश्रुतादिविदेवानासत्या॥कस्मिन्नायतथोजनेकोवांनदीनांसचा॥ ॥
त्यातौदेवादेवौनासत्याअश्विनौकुहकुत्रतिष्ठथः।नुअद्यकुहश्रुताकुत्रश्रुतौदिविद्युलोकेनिवसतइतिशेषः।अथप्रत्यक्षकृतः।हेदे
वौयुवांकस्मिन्जनेयजमानेआयतथः।आगच्छथः।स्तोतावांयुवयोर्नदीनांस्तुतीनांसचासहायःस्यात्॥ ॥अथतृतीया॥ ॥कंयाथः
कंहगच्छथःकमच्छायुंजाथेरथं॥कस्यब्रह्माणिरण्यथोवयंवामुश्मसीष्टये॥ ॥हेअश्विनौयुवांकंयजमानंयज्ञंवाप्रतियाथः।कंहकं
चप्रतिगच्छथः।गत्वाचकेनसहसंगतौभवथः।कंवाभिप्राप्तुंयुंजाथेयोजयथोरथमश्वैः।कस्यब्रह्मपरिदृढानिस्तोत्राणिरण्यथोरमेथे
वयंवःवायुवांइष्टयेगमनायएषणायउश्मसिकामयामहेकस्मात्कस्यचयागंप्रतिनगंतव्यमित्यर्थः॥ ॥अथचतुर्थी॥ ॥पौरंचिद्ध्यु
दप्रुतंपौरपौरायजिन्वथः॥यदींगृभीततातयेसिंहमिवद्रुहस्पदे॥ ॥हेपौरइदमश्विनोःसंबोधनंपौरेणसख्यत्वेनसंबंधादश्विनावपि

ऋ॰ भा॰ पोरोत्तमयोः छदिः समेकव चने हेपोर संबंधिना वश्विनो युवां पोरी चिदिति पूरणः। पोरेण रक्ष्यर्थे आर्थमानत्वेन संबंधान्मेघोपि पोरः। तेन दत्तु
९४ तेउदकप्लावकं मेघं पोराय त्रः सेय मद्रीजिन्वथः प्रेरयथः। यद्यो युवोरीं मितिपूरणः। गृभीत तातेयेग्रहीत ताते यग्रहीत यज्ञसंतानायपोरा
यईमेनं मेघं प्रतिगच्छथः। तुह इोहस्य पदेस्थाने अरण्य देशे सिंहमिव गर्जंतं प्रबलं सिंहं यथा बलं व्यावयंति शराः। तद्वज्जिन्वथ इति॥
॥ अथ पंचमी॥ ॥ प्र च्यवानाज्जुजुरुषो वव्रिमत्कं न मुंचथः। युवा यदी कृथः पुनरा काममृण्वे वध्वः॥ ॥ च्यवानाद्यषः जुजुरुषो रज
साजीर्णस्सकाशाद्वव्रिं हेयं पुराणोरूपं अत्कं न कवचमिव प्रमुंचथः। प्रमुंचतं। द्वापिमिव च्यवनादित्याद्रिमं त्रांतरं यूदियदा पुनर्युवा कृथः।
युवानं कुरुथ इत्यर्थः। तदा वध्वः सुरूपायाः स्त्रियः कामं कमनीयं रूपमाशु ऋण्वे प्राप्तवान्॥ ॥ इति चतुर्थस्य चतुर्थे त्रयोदशो वर्गः॥ ॥
॥ अथ षष्ठी॥ ॥ अस्ति हि वामिह स्तोता स्मसि वां संदृशि श्रिये॥ नू श्रुतं म आ गतमवोभिर्वाजिनीवसू॥ ॥ हे अश्विनौ वां स्तोता रात्ति हि
वर्ततेखलु हे हिवो वां संदृशि संदर्शने सन्निधाने स्मसि स्मो भवेम किमर्थं श्रियेनु अद्य मे मदीयं आह्वानं श्रुतं शृणुतं श्रुत्वा आगतं आग
च्छतं किं तूष्णीं नेत्याह अवोभी रक्षणैः सह। हे वाजिनीवसू अन्नवसू॥ ॥ अथ सप्तमी॥ ॥ को वामद्य पुरूणामा वव्ने मर्त्यानां॥ को विप्रो विप्र
वाहसा को यज्ञैर्वाजिनीवसू॥ ॥ हे वाजिनीवसू अन्नवसू वां युवां अद्यास्मिन्नूदिने पुरूणां मर्त्यानां। मध्ये क आवव्ने को यजमानो यज्ञैर्वव्रेत्र
यंत विलंबमसहमानः पुनर्ब्रूते॥ ॥ अथाष्टमी॥ ॥ आ वां रथो रथानां येष्ठो यात्वश्विना॥ पुरू चिदस्मयुस्तिर आंगूषो मर्त्येष्वा॥ ॥ हे अश्वि राम ९४

याप्तोपतये नस्तोत्रेण वा अनुष्टुभे अनुरूक्थेन तदु उ इति पूरणः। एता अनेन पोरेण सुष्टुवां युवाभ्यां हृतं संपादितं संभृतं भवतु। नानापृथगेव जा
तोसमृधो अरेपसा अपापौ अस्मे अस्मभ्यं वंधुमन्नं धनं वांसमे यथुः। सम्यक् प्रयच्छतमि त्यर्थः॥ ॥ अथ पंचमी॥ ॥ आ यद्वां सूर्या रथं तिष्ठ
द्रघुष्यदं सदा॥ परि वामरुषा वयो घृणा वरंत आतपः॥ ॥ हे अश्विनौ युवां युवयोः सदा सर्वदा रघुष्यदं शीघ्रगं रथं सूर्या युवयोः पत्नी यत्
यदा अतिष्ठत् आस्थितवती तदा वां परितो वृण्वती के अरुषाः आरोचमानाः घृणाः दीप्ताः आतपः आतपनाः शत्रूणां शोषयितारः। अथवा आ
तप इति विशेष्यं। वयो गंतार उत्कृष्टलक्षणाः आतपः सर्वतस्तापयित्र्यो दीप्तयः परिवरंते॥ ॥ इति चतुर्थस्य चतुर्थे एकादशो वर्गः॥ ॥ अथ
षष्ठी॥ ॥ युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा॥ घर्मं यद्वामरेपसं नासत्यास्ना भुरण्यति॥ ॥ हे नरा नेतारावश्विनौ युवोर्युवयोः युवामि
त्यर्थः। अत्रिरस्मत्पिता ऋषिः सुम्नेन सुखेन अग्निदाहोपशमरूपेण हेतुना चेतसा आदरयुक्तेन मनसा। चिकेतति जानाति स्तुतवानित्यर्थः
अत्रिरस्मत्पिता ऋषिः स तिद्दुःखसुखमुक्षत। दुःखं कस्य प्रसंग इत्यत आह। यद्यस्मात् हे नासत्यौ वां युवयोरास्ना आस्येन तन्निष्पन्नेन
स्तोत्रेण धर्मं दीप्तं दहंतमग्निं असुरैः स्वदाहाय प्रक्षिप्तं अरेपसं अपापं दुःखकरं भुरण्यति प्राप्तवान्। भुरण्यतिर्गतिकर्मा। अत्राग्नेः सका
शाद्रक्षणं हिमेनाग्निं घ्रंसं युवमृबीसमुत तप्तमत्रय इत्यादिभिः स्पष्टं प्रदर्शितं॥ ॥ अथ सप्तमी॥ ॥ उग्रो वां ककुहो ययिः शृण्वे यामेषु संत
निः॥ यद्वांदंसोभिरश्विनात्रिर्नराववर्तति॥ ॥ उग्रः उद्गूर्णबलो वां युवयोः ककुहः उच्छ्रितो महान् ययिर्गंतासीतनिः सततं गच्छतरथो यामेषु

चतु०भा०
९५

नाः। स्तोतारो वस्वीः भुजो वा। सुष्टुतिं च तिसंपर्चयति॥ ॥इति चतुर्थस्य चतुर्थे चतुर्दशो वर्गः॥ ॥प्रति प्रियतममिति नवर्चं तृतीयं
सूक्तं अवस्युर्नामात्रेय ऋषिः। पंक्तिश्छंदः आश्विनौ देवता। अनुक्रांतं च। प्रति नवावस्युः पांक्तमिति। प्रातरनुवाके आश्विने क्रतौ
पांक्ते छंदसि आश्विने शस्त्रे चेदं सूक्तं। प्रति प्रियतममिति पांक्तमिति हि सूत्रितं॥ ॥तत्र प्रथमा॥ ॥प्रति प्रियतमं रथं वृषणं वसुवा
हनं॥ स्तोता वामश्विनावृषिः स्तोमेन प्रति भूषति माध्वी मम श्रुतं हवं॥ ॥हे अश्विनौ एकः प्रतिशब्दोऽनुवादः। वां युवयोः प्रियतमं
रथं स्तोता ऋषिरवस्युः स्तोमे प्रतिभूषति अलंकरोति कीदृशं रथं वृषणं वर्षितारं फलानां च वसुवाहनं धनानां वोढारं ईदृशं रथं आ
गमनाय स्तौतीत्यर्थः। तस्मात् हे माध्वी मधुविद्यावेदितारौ मम हवमाह्वानं श्रुतं शृणुतं॥ ॥अथ द्वितीया॥ ॥अत्यायातमश्विना तिरो
विश्वा अहं सना॥ दस्रा हिरण्यवर्तनी सुषुम्ना सिंधुवाहसा माध्वी मम श्रुतं हवं॥ ॥हे अश्विना अत्यायातं सर्वान्यजमानानतिक्रम्या
गच्छतं। यथाहमृषिर्विश्वाः सर्वाः। अस्मद्विरोधिप्रजाः सना सदा तिरस्करोमि। अथवा अहं तिरः तिरः सततं इति प्राप्तस्येति निरुक्तं प्राप्ता
विश्वाः सर्वाः क्रियासु — युष्मदीयाः अनुतिष्ठेयमित्यर्थः। सना सनातनौ दस्रा शत्रूणामुपक्षपयितारौ। हिरण्यवर्तनी हिरण्यर
थौ सुषुम्ना सुधनौ सिंधुवाहसा नदीनां प्रवाहयितारौ वृष्टिप्रेरणेन तादृशौ युवां अत्यायातं॥ ॥अथ तृतीया॥ ॥आ नो रत्नानि बिभ्रता

राम
९५

मश्विना गच्छतं युवं॥ रुद्रा हिरण्यवर्तनी जुषाणा वाजिनीवसू माध्वी मम श्रुतं हवं॥ ॥हे अश्विना नो अस्मभ्यं रत्नानि रमणीयानि धनानि बिभ्रता धार
यंतौ युवां नो अस्मान् आगच्छतं हे रुद्रा रुद्रपुत्रौ स्तः स्तो हे वाजिनीवसू वाजिनधनौ युवां हिरण्यरथौ जुषाणा पद्मं सेव्यमानौ सर्वत्र आगच्छतमिति
माध्वी इत्यादि गतं॥ ॥अथ चतुर्थी॥ ॥सुष्टुभो वां वृषण्वसू रथे वाणीच्याहिता॥ उत वां ककुहो मृगः पृक्षः कृणोति वापुषो माध्वी मम श्रुतं ह
वं॥ ॥हे वृषण्वसू वर्षधनौ वर्षितारौ वा वसूनौ अश्विनौ सुष्टुभः सुस्तोतुर्मम वाणी वाक् रूपा स्तुतिः वां युवयोः रथे आहिता स्थापिता अस्मा
भिः कृतेत्यर्थः। उतापि च वां युवाभ्यां ककुहो महान् मृगो मृग्यिता यायिर्गंता वपुषो वपुष्मान् यजमानः पृक्षो अन्नं हविः कृणोति करोति त
स्मान्मम हवं श्रुतमिति॥ ॥अथ पंचमी॥ ॥बोधिन्मनसा रथ्येषिरा हवनश्रुता॥ विभिश्च्यवानमश्विना नियाथो अद्वयाविनं माध्वी मम
श्रुतं हवं॥ हे अश्विना बोधिन्मनसा बुध्यमानमनस्कौ रथ्या रथस्वामिनौ इषिरा क्षिप्रगंतारौ सर्वं गंतव्यौ हवनश्रुता हवनस्य श्रोतारौ युवां
विभिः अश्वैः च्यवानमृषिं अद्वयाविनं मायारहितं नियाथः। यथा तमृषिं प्राप्नुवंतौ तद्धर्मं प्रतिपथि नियाथः। नितरामगच्छतं माध्वी
इत्यादि गतं च्यवानो जुजुरुषो वव्रिमिति सूक्तं॥ ॥इति चतुर्थस्य चतुर्थे पंचदशो वर्गः॥ ॥अथ षष्ठी॥ ॥आ वां नरा मनोयुजोऽश्वासः प्रु
षितप्सवः॥ वयो वहंतु पीतये सह सुम्नेभिरश्विना माध्वी मम श्रुतं हवं॥ ॥हे नराः कर्मणां नेतारौ हे अश्विना वां युवां मनोयुजो मनोमात्रेण यु
ज्यमाना अश्वाः पुषितप्सवः इत्यर्थः। प्रुषितप्सवः विचित्ररूपाः। वयः शीघ्रगंतारोऽश्वाः आ वहंतु पीतये सोमपानाय सुम्नेभिः सह अस्मभ्यं दे

येः सुखैः तत्साधनैर्धनादिभिः वा सह वहंतु॥ ॥अथ सप्तमी॥ ॥अश्विना वेह गच्छतं नासत्या मा वि वेनतं। तिरश्चिदर्यया परि वर्तिर्यातमदा
भ्या माध्वी मम श्रुतं हवं॥ ॥हे अश्विनौ इह अस्मिन्यज्ञे आगच्छतं। हे नासत्या मा वि वेनतं विगतकामौ मा भवतं। वेनतिः कांतिकर्मा। हे अदाभ्या अहिं
स्यौ पूज्यौ अर्यया स्वामिनौ युवां सुपो सुलुगित्यादिना सुपो यजादेशः। तिरश्चित् अपगतेऽपि दूरदेशादपि युवां वर्तिः अस्मद्यज्ञगृहं परियातं
आगच्छतं॥ ॥अथाष्टमी॥ ॥अस्मिन्यज्ञे अदाभ्या जरितारं शुभस्पती। अवस्युमश्विना युवं गृणंतमुप भूषथो माध्वी मम श्रुतं हवं॥ ॥
॥हे अदाभ्यौ अहिंस्यौ हे शुभस्पती उदकस्य स्वामिनौ अश्विना युवं युवां जरितारं स्तोतारं अवस्युं गृणंतं स्तुवंतं मां उप भूषथः प्राप्नुतं
भूष प्राप्तौ इति धातुः। यद्वा अवस्माः समीपे भवतं॥ ॥अथ नवमी॥ ॥अभूदुषा रुशत्पशुराग्निरधाय्यृत्वियः। अयोजि वां वृषण्वसू रथो
दस्रावमर्त्यो माध्वी मम श्रुतं हवं॥ ॥रुशत्पशुः उषा व्युष्टिरभूत्। अग्निश्च रुशत्पशुः दीप्तपशुमान् प्रकाशितं हविरित्यर्थः। अथवा पशवः किर
णाः रुशंतः रश्मिः सन् अधायि वेद्यामधीयत अग्नीराहवनीयाः। ऋत्वियः ऋतौ काले भवः। हे वृषण्वसू प्रदत्तधनौ हे दस्रौ वां यु
वयोः अमर्त्यः अमरणधर्मा रथो अयोजि अश्वैर्युक्तो भवतीत्यर्थः। छंदसि लुङ्लङ्लिट इति सर्वधातुभ्यो लुङ् भवति इह प्रार्थनायां माध्वी इत्या
दिगतं॥ ॥इति चतुर्थस्य चतुर्थे षोडशो वर्गः॥ ॥आभात्यग्निरिति पंचर्चं चतुर्थं सूक्तं भौमस्यात्रेरार्षं त्रैष्टुभमाश्विनं। अत्रानुक्रमणि
का॥ आभात्यग्निः आत्रेय एवेति। प्रातरनुवाके आश्विने क्रतौ त्रैष्टुभे छंदसि आश्विनशस्त्रे च इदमादिके द्वे सूक्ते सूत्रितं हि। आभात्यग्निरिति

नाअश्विनोर्वां युवयोः रथः एकोरथः। रथानां श्रेष्ठः इतरदेवरथानां मध्ये अतिशयेन गंता सन् आयातु कीदृशः सन् पुरुत्रा चिद्धि अपि च अ
स्मद्धि रोधिनो हिंसकस्ति रः कर्त्ता वा अस्मयुः। अस्मान् कामयमानः। मर्त्येषु सर्वेषु यजमानेषु मध्ये आंगूषः स्तुत्यः। आकारः
अथवा आंगूषः स्तोमः। स्तवः अस्मयुः अस्मान् बलेयुक्तं कामयमानः। मर्त्येषु मर्त्यैः अस्मदीयैः ऋत्विग्भिः प्रेरितः सन् कलश
अश्विनो रथस्य वा स्तुतिः। सर्वतः पुरु चित् पुरूण्यपि शत्रुबलानि तिरस्तिरस्करोति॥ ॥अथ नवमी॥ ॥आ मू षु वां मधूयुवास्माकम
स्तु चर्कृतिः। अर्वाचीना विचेतसा विभिः श्येनेव दीयतं॥ ॥हे मधूयुवा मधुमंतौ सोमकामौ वा वां युवाभ्यां चर्कृतिः पुनः पुनः क्रियमाणा युवा
भ्यां अर्थाय पुनः पुनः क्रियमाणं स्तोत्रं युवयोः आगमनस्याभ्यासो वा अस्माकं सुसुष्ठु आंसुखकरमेव भवतु। हे अर्वाचीना अस्मदभि
मुखौ विचेतसा विचेतसौ विशिष्टप्रज्ञौ श्येनेव श्येनेना विवविभिर्गंतृभिः दीयतं गच्छतं॥ ॥अथ दशमी॥ ॥अश्विना यद्ध कर्हि चिच्छुश्रूयातमि
मं हवं। वस्वीरू षु वां भुजः पृंचंति सु वां पृचः॥ ॥हे अश्विना युवां यद्ध यत्र कर्हि चित् क्वास्थितवंतौ भवथः। कुत्र चित् तत्रापि मं हवं माह्वानं शु
श्रूयातं शृणुतं श्रुत्वा आगच्छतमित्यर्थः। किमर्थमिति उच्यते। वस्वीः प्रशस्ताः भुजः धनानि हविर्लक्षणानि। सुष्ठु वां युवां पृंचंति मिश्रयंति प्रा
प्नुवंति। पृचिर्... कीदृश्यो भुजः वां युवां सुसुष्ठु पृचः संपर्चनाः युवां प्राप्तुकामा यजमानाः इत्यर्थः। अथवा सुपृचः सुसंपर्क

सूक्ते इति। आप्तोयामहोतुरतिरिक्तोक्थ्य इदं सूक्तं। सूत्रितं च। आ भात्यग्निः। क्षेत्रस्य पतिना वयमिति परिधानीयेति॥ ॥ तत्र प्रथमा॥ ॥ आ भा
त्यग्निरुषसामनीकमुद्विप्राणां देवया वाचो अस्थुः॥ अर्वांचा नूनं रथ्येह यातं पीपिवांसमश्विना घर्ममच्छ॥ ॥ उषसामनीकं अनीकभूतः अ
नीकं मुखं उषसि प्रबुध्यमान इत्यर्थः। साद्वाग्निः आ भाति दीप्यते यद्वा उषसां मुखमा भाति दीपयति उषः काले ग्नयः। प्रतिबोध्यंते। किंच वि
प्राणां मेधाविनां स्तोतॄणां देवयाः देवकामा वाचः स्तोत्राणि उदस्थुः उत्तिष्ठंति। यस्मादेवं तस्मात्॥ हे रथ्या रथस्वामिनौ अश्विनौ अर्वांचा
अस्मदभिमुखं वां नूनं अद्यास्मिन्यागदिने इहायातं कथं। प्रतिपीपिवांसं आप्यतवसती वरीभिः सरद्रूपं सोमरसं अथवा घृतादिना स्वांगेप
रिवृद्धं घर्मं प्रदीप्तं यज्ञं यद्वा पीपिवांसं वासं घर्मं प्रवर्ग्यस्य सूक्तस्य विनियोगः॥ ॥ अथ द्वितीया॥ ॥ न संस्कृतं प्रमिमीतो गमिष्ठांति नूनम
श्विनोपस्तुतेह॥ दिवाभिपित्वेवसागमिष्ठा प्रत्यवर्तिं दाशुषे शंभविष्ठा॥ ॥ अश्विनौ संस्कृतं घर्मं न प्रमिमीतः न हिंसतः। किंतु। अंति अंति
के घर्मसमीपे नूनमिदानीं इह यज्ञे गमिष्ठा गंतृतमौ अश्विना अश्विनौ उपस्तुता उपस्तुतौ भवतः। दिवाभिपित्वे दिवसस्याभिपतने प्रातः
काले अवसा रक्षणेन अन्नेन वा सह आगमिष्ठाः। आगंतृतमौ सात्रायंता वितिन्नौ षः। अथवा अर्तिं प्रति द्वंद्वभूतो वर्तिर्गृहं जीवनं तदभावो वर्तिः
तद्रहितमन्नं यथा भवति तथा आगंतृतमो आगस्य च दाशुषे॥ हविर्दत्तवते यजमानाय शंभविष्ठा सुखस्य भावयितारौ भवतां॥ ॥ अथ तृती
या॥ ॥ उता यातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य॥ दिवा नक्तमवसा शंतमेन नेदानीं पीतिरश्विना ततान॥ ॥ अह्नो हे धात्रे धापं च
धापं च द्वाधा इति मानाविभागाः संति। इह पंचद्वाधा विभागः प्रातः उतापि च यातमागच्छतं कदा संगवकाले संगच्छंते गावो दोहभूमिर्यस्मिन्

चतु०भा० ९७

कालेससंगवः। रात्र्यपरकालेह्निगावोवनेहिमतृणानिभक्षयंतिभक्षयित्वापुनर्दोहायसंगवेप्रतिवर्तंतेयथाशातःप्रातःकालेपित्यामध्यंदिने
सूर्यउदितागुदितः अनुदये अत्यंतप्रवृत्यसमये अपराह्ण इत्यर्थः। एतत्सायाह्नस्याप्युपलक्षणं। नकेवलमुक्तिष्वेवकालेषुकिंतर्हिदिवानक्तं
स्यसर्वदाशंतमेनअवसारक्षणेनहविर्भिर्निमित्तेरथेनायातंकिमर्थमागम्यतेपूर्वमेवान्यैर्देवैःस्वीकृतवानूनेत्याह। इदानीमपिप्रातिरित
रदेवानांसामस्यघर्मस्यवापानंनतानानतनोतिअश्विनाअश्विनोविहायेतिशेषः॥ ॥अथचतुर्थी॥ ॥इदंहिवांप्रदिविस्थानमोकइमेगृहाअ
श्विनेदंदुरोणं॥ आनोदिवोबृहतःपर्वतादाद्भ्योयातमिषमूर्जंवहंता॥ ॥हेअश्विनावांयुवयोःप्रदिविपुराणमोकः ओकोनिवासयोग्यंस्था
नंउत्तरवेद्याख्यं अथसौमिकवेद्यभिप्रायेणआह्वयतेइमेगृहाःप्राचीनवंशादयः इदंदुरोणंदेवयजनेगृहंनोस्मदर्थंदिवोद्युलोकात्बृहतः
पर्वतात्पर्ववतोमेघादद्भ्योपकरणादायातं। आगच्छतं। इषमूर्जंचअन्नंबलंचबलसाधनंमन्नंसारभूतमित्यर्थः। ताद्दशंवहंतावहंतौ॥ ॥
॥अथपंचमी॥ ॥समश्विनोरवसानूतनेनमयोभुवासुप्रणीतीगमेम॥ आनोरयिंवहतमोतवीरानाविश्वान्यमृतासौभगानि॥ ॥वयंसंग
मेमसंगच्छेमअश्विनोर्नूतनेनावसाअन्यकृतेनरक्षणेनमयोभुवासुखस्यभावयित्र्यासुप्रणीतीसुष्ठुप्रणीत्यासुष्ठुप्रगमनेनचअपिवाएतेउ
भेअप्यवोविशेषणे। उक्तलक्षणेनसंगमेमनास्मभ्यंरयिंआवहतं उतवीरान्पुत्रादीनावहतं हेअमृताः अमरणधर्माणाविश्वाविश्वा
निसौभगानिसुभगत्वानिआवहतं॥ ॥इतिचतुर्थस्यचतुर्थेसप्तदशोवर्गः॥ ॥प्रातर्यावाणेतिपंचर्चंपंचमंसूक्तंआत्रेयंत्रैष्टुभमाश्विनंप्रात
र्यावाणेतिद्यहतुक्तं तंप्रातरनुवाकाश्विनशस्त्रयोःपूर्वसूक्तेनसहोक्तोविनियोगः। आप्रातर्यामिमेनावरुणेतिद्विक्तोक्तोचइंद्रस्यत्रयंतथास्म

राम ९७

रे॥ प्रातर्यावाणा क्षेत्रस्य पते मधुमंतमूर्मिमिति॥ ॥तत्र प्रथमा॥ ॥प्रातर्यावाणा प्रथमा यजध्वं पुरा गृध्रादररुषः पिबाथः॥ प्रातर्हि यज्ञमश्विना
दधाते प्रशंसंति कवयः पूर्वभाजः॥ ॥हे मदीया ऋत्विजः प्रातर्यावाणा प्रातरेव यज्ञं गंतारौ प्रथमा अत एवेतरेभ्यो देवेभ्यः पूर्वभाविनौ प्रकृ
ष्टतमौ वा अश्विनौ यजध्वं किमर्थं प्रथमयागनियोग इति उच्यते गृध्रात् अभिकांक्षतो अररुषः अदातुः रक्षः प्रभृतेः पुरा पूर्वं पिबाथः अपि
वृत्तौ अनागतौ कथं प्रवृत्तौ व्याख्यावित्यत आह। अश्विना अश्विनौ प्रातर्हि यज्ञं दधाते धारयतः संभजतः पूर्वभाजः सपूर्वकालीनाः कवयः अ
नूचाना ऋषयः प्रातरेवैतौ प्रशंसंति येवा अनूचानास्ते कवयः इति हि ति निगमः॥ ॥अथ द्वितीया॥ ॥प्रातर्यजध्वमश्विना हिनोत न सायमस्ति
देवया अजुष्टं॥ उतान्यो अस्मद्यजते वि चावः पूर्वः पूर्वो यजमानो वनीयान्॥ ॥हे मदीयाः पुरुषा अश्विना अश्विनौ प्रातः प्रातरेव यजध्वं पूजय
ध्वं हिनोत प्राहिणुत हवींषि सायं सायंकाले हविर्देवयाः देवगामिनी अस्ति न विद्यते देवान् स्वीकुर्वंतीत्यर्थः। अजुष्टं असेव्यं तद्भवति। पूर्वो ह्य
वै देवानामिति हि श्रुतिः। उत अस्मदस्मत्तो अन्यः कोपि यजते न सोमेन वि वावः। वितर्पयेत् हविषा अतो स्मात्स्वन्येषु च मध्ये पूर्वः पूर्वो यजमा
नः पूर्वः पूर्वो यष्टा भवति स वनीयान् देवानां भोक्तेति॥ हिरण्यत्वगित्येषा आश्विने पशौ हविषो याज्या॥ हिरण्यत्वङ्मधुवर्णो घृतस्नुभिके
स्वेद्भरयजान्निति हि सूचितं॥ ॥सैषा तृतीया॥ ॥हिरण्यत्वङ्मधुवर्णो घृतस्नुः पृक्षो वहन्ना रथो वर्तते वां॥ मनोजवा अश्विना वातरंहा येनाति
याथो दुरितानि विश्वा॥ ॥वां युवयो रथः पृक्षो अन्नमन्नं वहन् आवर्तते। अस्मदभिमुखं आगच्छति। कीदृशो रथः। हिरण्यत्वक् हिरण्याच्छादित
रूपः। हिरण्यावृतः। मधुवर्णः मनोहरवर्णः। घृतस्नुः उदकस्य प्रस्रवणः। मनोजवाः मनोवेगाः। वातरंहाः वातसदृशवेगाः। हे अश्विना येन रथ

चतु०भा० नविश्वासर्वाणि दुरितानि दुर्गमनान्मार्गान्वा अतियाथः॥ ॥अथ चतुर्थी॥ ॥यो भूपिष्ठं नासत्याभ्यां विवेष चनिष्ठं पित्वो ररते विभागे॥ सतोकमस्य पीपर
च्छमीभिरनूर्ध्वभासः सदमित्तुतुर्यात्॥ ॥यो यजमानो विभागे हविर्विभागवति यागे नासत्याभ्यामश्विभ्यां भूपिष्ठं चनिष्ठमित्यन्ननामबहुन्नं कर्मविशे
९६ षं करोति। पित्वः कर्मणि षष्ठी॥ अन्नं ररते ददाति स यजमानोस्यात्मन एव लोके पुत्रं पीपरत् पालयत्। शमीभिः कर्मभिः अनूर्ध्वभासः समुन्नततेजस्का
दूर्ध्वभासोन्नयः अग्निरहितयष्टॄन् सदमित् सदैव तुतुर्यात्। हिंस्यात्। समश्विनो रीति पंचमा गता॥ ॥इति चतुर्थस्य चतुर्थे द्वाविंशो वर्गः॥ ॥अश्वि
नावेहेति नवर्चं षष्ठं सूक्तं। अत्रानुक्रमणिका॥ अश्विनो नव। सप्तवध्रिस्त्र्युष्णिगादि चतुर्थी त्रिष्टुप् पंचान्त्यानुष्टुभ इति सप्तवध्रिर्नामात्रेय ऋषिः आदि
तस्तिस्र उष्णिहः चतुर्थी त्रिष्टुप् शिष्टाः पंचानुष्टुभः। प्रातरनुवाके आश्विने क्रतावौष्णिहे छंदसि आश्विनशस्त्रे चाद्यस्तृचो विनियोगः सूत्रितं च।
अश्विनावर्तिरस्मदाश्विनावेह गच्छतमिति॥ ॥तत्र प्रथमा॥ ॥अश्विनावेह गच्छतं नासत्या मा वि वेनतं॥ हंसाविव पततमा सुताँ उप॥ ॥हे अश्विनौ
इहास्मिन्यागे आगच्छतं हे नासत्या मा वि वेनतं वेनतिः कांतिकर्मा मा विगतकामौ भवतं निस्पृहावकामौ वा न भवतमित्यर्थः॥ हंसाविव निर्मलोद
कं आगतस्तद्वत्सुतानभिषुतान् सोमानुपापततं उपागच्छतं॥ ॥अथ द्वितीया॥ ॥अश्विना हरिणाविव गौराविवानु यवसं॥ हंसाविव पततमा सु
ताँ उप॥ ॥हे अश्विनौ गौराविव गौरमृगाविव तौ यथा यवसं घासं अनुधावतः। ताविव हंसाविव सोममागच्छतं॥ ॥अथ तृतीया॥ ॥अश्विना वा राम
जिनीवसू जुषेथां यज्ञमिष्टये॥ हंसाविव पततमा सुताँ उप॥ ॥हे वाजिनीवसू अन्नार्थं वासयितारौ हे अश्विना यज्ञमस्मदीयं इष्टये अभीप्सायै ९६
षणाय वा जुषेथां सेवेथां॥ ॥अथ चतुर्थी॥ ॥अत्रिर्यद्वामवरोहन्नृबीसमजोहवीन्नाधमानेव योषा॥ श्येनस्य चिज्जवसा नूतनेनागच्छतमश्विना

च०भा०
९९

वेटिकांसंचारायथः।प्रविष्टेमपिनिर्गतेवाप्रविष्टस्त्रांकापनोदार्थंयंवयश्चविगमयतंममनिर्गमार्थंसंगच्छथः।विअवयश्चविभक्तंकुरुथः॥ ॥
॥अथसप्तमी॥ ॥यथावातःपुष्करिणींसमिंगयतिसर्वतः।एवातेगर्भएजतुनिरैतुदशमास्यः॥ ॥वाताहृष्टेअयंगर्भस्त्वाविद्युपनिषत्एतदाघ
कूयेणासौसप्तवध्रिःस्वयोवितः।गर्भिण्याः।प्रसवायानुस्कृतवानश्विनावृषिः॥१॥यथावातःपुष्करिणींसरआदिकंसर्वतः।समिंगयतिसम्यु
कूषालयतिएवएवंतवगर्भएजतुकंपतांइतस्ततः।संचरतुदशमास्यः।दशमासान्गर्भेस्थितोनिरैतुनिर्गच्छतु॥ ॥अथाष्टमी॥ ॥यथावातो
यथावनंयथासमुद्रएजति।एवात्वंदशमास्यसहावेहिजरायुणा॥ ॥वातोयथाकंपमानोवनंकंपयतिस्वयंयथासमुद्रश्चलतिचाल्पेवाथवा
युना॥ ॥स्थितायथावातोयथेतिवातोयथाकंपमानोवनंकंपयतिस्वयंदशैवमासांस्त्वंगर्भोभवतुवेष्टितःनिर्गच्छजठरान्मातुर्जरायुक्तस्तः
पतेत॥ ॥अथनवमी॥ ॥दशमासाञ्छशयानःकुमारोअधिमातरि॥निरैतुजीवोअक्षतोजीवोजीवंत्याअधि॥ ॥दशमासानुषित्वास्वेजननीज
ठरेसुखंनिर्गच्छतुसुखंजीवोजननीवापिजीवतु॥ ॥इतिचतुर्थस्यचतुर्थेविंशोवर्गः॥ ॥महेनोअद्येतिदशर्चंसप्तमंसूक्तं।आत्रेयस्यासत्य
श्रवसआर्षंपांक्तमुषस्यंअनुक्रम्यतेचेदंसूक्तं।सूच्यतेहि।महेनोअद्येतिपांक्तमिति॥ ॥तत्रप्रथमा॥ ॥महेनोअद्यबोधयोषोरायेदिवित्मती॥
यथाचिन्नोअबोधयःसत्यश्रवसिवाय्येसुजातेअश्वसूनृते॥ ॥अद्यास्मिन्यागदिनेहेउषोदेविदिवित्मतीदीप्तिमतीनोस्मान्महेमहतेराये राम
धनप्राप्तयेबोधयप्रज्ञापयप्रकाशायेत्यर्थः।सतिप्रकाशेतद्द्वाराद्द्रव्यस्योपार्जयितुंशक्यत्वात्।यथाचित्यथैवपूर्वंनोस्मानबोधयप्रज्ञापय।अतीते ९९

षुदिनेषुयथाबोधितवतीतद्वदद्यापीत्यर्थः।हेसुजातेशोभनप्रादुर्भूतेअश्वसूनृतेअश्वात्मप्रियसत्यात्मिकावाक्यतिर्वाकूयस्याःसाहेतादृशी।
देविवाय्येवय्यपुत्रेसत्यश्रवसिमयिअनुग्रहाणेत्यर्थः॥ ॥अथद्वितीया॥ ॥यासुनीथेशौचद्रथेव्यौछोदुहितर्दिवः।साव्युच्छसहीयसिसत्य
श्रवसिवाय्येसुजातेअश्वसूनृते॥ ॥हेदेवदुहितःदिवःसूर्यस्यपुत्रिउषः।यात्वंसुनीथेएतन्नामकेशौचद्रथेशुचद्रथस्यापत्येपूर्वंव्यौछः
व्यवसेयस्तमांसिसात्वंसहीयसिअतिशयेनबलवतिवाय्येवय्यपुत्रेसत्यश्रवसिमयिव्युच्छतमोविवासयउछीविवासार्थविवासोवर्जनंवीप्सु
क्तं॥ ॥अथतृतीया॥ ॥सानोअद्याभरद्वसुर्व्युच्छादुहितर्दिवः।योव्यौच्छःसहीयसिसत्यश्रवसिवाय्येसुजातेअश्वसूनृते॥ ॥हेदुहितर्दि
वःउषःआभरद्वसुःआहृतधनसात्वंसिधात्वंनोस्माकमस्यास्मिन्नद्यदिनेव्युच्छतमोविवासयसहीयसिप्रोयाउकारोनर्थकः।यात्वंपू
र्वःव्योच्छसद्यापीति॥ ॥अथचतुर्थी॥ ॥अभियेत्वाविभावरिस्तोमैर्गृणंतिवह्नयः।मघैर्मघोनिसुश्रियोदामन्वंतःसुरातयःसुजातेअ
श्वसूनृते॥ ॥हेविभावरिप्रकाशोपेतेविभाशब्दाद्वसीवनिपातावितिवानिपात्यतेवाकर्त्तरिवनिपूउषाः।त्वांअभिप्रत्येवह्नयोवोढार
स्त्विजः।स्तोतारःस्तोमैःस्तोत्रैर्गृणंतिस्तुवंतितेस्तोतारोमघैः।हेमघोनिधनेधनवतिवद्दत्तैर्महात्सुश्रियोभवंतिसुष्ठुअर्थिभिराश्रयणी
याभवंति।दामन्वंतोदानवंतोदानवंतोभवंतिसुरातयः॥रातिर्दानंसुदानाश्चभवंति॥ ॥अथपंचमी॥ ॥यच्चिद्धितेगणाइमेछदयंतिमघत्तये॥
परिचिद्विष्टयोदधुर्ददतोराधोअह्रयंसुजातेअश्वसूनृते॥हेउषःयच्चिद्धीतिपूरणः।येकेचनतवस्वभूताइमेपुरतोवर्त्तमानागणाःसंब

ऋ०भा० भूताः।मघत्तयेधनस्यदात्तयेधनदातायधनवत्तयेवाउछदयेति उपछदयंतितेसर्वेपि अस्मान्परिदधुः।परितोधारयंतिदधुयोस्मानेचकामायमानाः।
१०० किंकुर्वंतः।अद्वयं अद्रियमाणं अक्षीणं अलज्जावहं वाराधोहविर्लक्षणंददतोयजंते इत्यर्थः। अर्थिभ्यो हीनंददतोवयेत्वाहविर्ददतः।स्कंदं
तितेसर्वेप्यस्मदर्थमेवफलंधारयंतः।रूक्वंती इत्यर्थः।अथवायद्विधीसत्रयद्यपीतिव्याख्येयंतस्मिन्पक्षेरेस्वरव्याख्येतथापिसध्याहार्यं अवति
ष्ठेसमाने॥ ॥इतिचतुर्थस्यचतुर्थेएकविंशोवर्गः॥ ॥अथषष्ठी॥ ॥एषुधाविरवद्यशउषोमघोनिसूरिषु॥एनोराधांस्यह्रयामघवानो
आसतसुजातेअश्वसूनृते॥ ॥हेउषोहेविमघोनिमघवतित्वंसूरिषुवावीरवद्यशः।वीरैःपुत्रादिभिरुपेतमन्नंयशोवाअधाः।आधेहि
आदेहिआनययेमघवानोधनवंतः।सूरयोनोस्मभ्यंतवस्तोतृभ्योराधांसिधनानिअरासतददुस्तेधि इत्यर्थः॥ ॥अथसप्तमी॥ ॥तेभ्योद्य
म्नंबृहद्यशउषोमघोनिसूरिषु॥येनोराधांस्यश्व्यागव्याभजंतसूरयः।सुजातेअश्वसूनृते॥ ॥हेउषोमघोनित्वंतेभ्योद्युम्नंद्योतमानंहिर
ण्यादिरूपंधनंबृहद्यश्चओमहदन्नंमहतींकीर्तिंवातेभ्योयजमानेभ्यः।आधत्स्वनोस्मभ्यंराधांसिधनानिअश्व्याअश्वैर्युक्तानिगव्यागोभिर्युक्ता
निगोसमूहान्वश्वस्यसमूहान्भजंतभजेरन्ददुःसूरयोदातारः॥ ॥अथाष्टमी॥ ॥उतनोगोमतीरिषआवहादुहितर्दिवः।साकंसूर्यस्यर
श्मिभिःशुक्रैःशोचद्भिरर्चिभिःसुजातेअश्वसूनृते॥ ॥उतअपिचनोस्मभ्यंगोमतीर्गोभिरुपेतानिइषोन्नानिआवहआनयहेदिवोदुहित राम
रुषः।कदासूर्यस्यरश्मिभिःसाकंशोचद्भिःदीप्यद्भिःशुक्रैर्निर्मलैरर्चिभिःअग्नेतेजोभिश्चसाकंसूर्योदयकालेचेत्यर्थः॥ ॥अथनवमी॥ ॥ १००

शंतमेन॥ ॥अत्रिरस्मत्पितायद्यदावांयुवांअजोहवीत्आस्तोषीत्नाधमानायाचमानायोविदिवसायुथापतिप्रीणयतितद्वत्किंकुर्वन्ऋ
बीसंतुषाग्निअग्निकुंडेक्षिप्तः।सनुअवरोहन्नविमुंचनू।अजोहवीत्श्येनस्यप्रथमजवेनजवसाशंतमेनास्माकंसुखतमेनास्माकंसुखतमे
नरथेनत्वंरक्षितुमागच्छतंहेअश्विना॥ ॥इतिचतुर्थस्यचतुर्थेएकोनविंशोवर्गः॥ ॥अत्रब्रुवंतीतिहासंसप्तवध्रेःपुराविदः।भ्रातृभ्याःपेटिका
यांतमृषिंप्रक्षिप्ययत्नतः॥१॥मुद्रांकृत्वागृहेस्वीयेरक्षयित्वान्यवेद्मायन्॥नसंगच्छेतभार्यास्वांयथारात्रौतथाकृते॥२॥प्रातःप्रातःसमुद्धाय
निर्भिद्यनिष्क्रांतितंमुनिं॥एवंस्थित्वाचिरंकालंपेटायांदुःखितःकृशः॥३॥उपायंचिंतयामासनिर्गमस्यचिरंमुनिः।हृदिनिश्चित्यनासत्यावस्तो
षीत्दृश्यमानसः॥४॥तमश्विनोसमागत्यसमुद्घाट्यचपेटिकां॥उत्सृज्यतमृषिंशीघ्रंनावदृष्टौबभूवतुः॥५॥सकृत्सविप्रोभार्ययासार्धंरमित्वाथपुनर्म
यात्॥प्रातरेवपुनःपेटांप्रविश्यप्राग्वत्स्थितः॥६॥सरविपेटानिवासमयेदृष्टवान्तद्ध्यंतदा॥ ॥तत्रसूक्तेप्रथमास्तकेंपंचमी॥ ॥विजिहीष्ववन
स्पतेयोनिःसूष्यंत्याइव॥श्रुतंमेअश्विनाहवंसप्तवध्रिंचमुंचतं॥ ॥हेवनस्पतेवनस्पतिविकाररूपेपेटिकेविजिहीष्वविगच्छविवृताभवसूष्यं
त्याइवप्रसोष्यमाणायाःस्त्रियायोनिरिवयथाऊपाणिप्रसवेल्टिशातरिवरूपेसंज्ञापूर्वस्यविधेरनित्यत्वात्गुणाभावः।तदर्थंहेअश्विनाअश्विनोमेह
वंआह्वानंश्रुतंश्रुत्वाचसप्तवध्रिंनामामृषिंमुंचतंमोचयतं॥ ॥अथषष्ठी॥ ॥भीतायनाधमानायऋषयेसप्तवध्रये॥मायाभिरश्विना
युवंवृक्षंसंचविचाचथः॥ ॥भीतायबिभ्यमानायद्धिभ्युषेनाधमानायऋषयेसप्तवध्रयेहेअश्विनाअश्विनोयुवंयुवांमायाभिः।वृक्षंवृक्षविकारं

ऋ०भा० याति गच्छति की दृश्योषाः बृहद्रथा बृहत्तरथा महती विश्वमिन्वा विश्वं तर्पयन्ती वा ईदृश्युषा अग्रमग्रे ज्योतिस्तेजो यच्छति ॥ ॥ अथ द्वितीया ॥ ॥
एषा गोभिररुणेभिर्युजानास्रेधन्ती रयिमप्रायु चक्रे । पथो रदन्ती सुविताय देवी पुरुष्टुता विश्ववारा वि भाति ॥ ॥ एषोषा अरुणैररु
१०१ णवर्णैः गोभिर्बलीवर्दैः रथं युंजाना योजयन्ती अस्रेधन्ती अशुष्यन्ती अक्षीणा वा किं रयिं धनं अप्रायु अप्रगतं अविचलितं चक्रे करोति किं
कुर्वती पथो मार्गान् रदन्ती प्रकाशयन्ती किमर्थं सुविताय सुष्ठु गमनाय देवी द्योतमाना पुरुष्टुता बहुभिः स्तुता विश्ववारा सर्वैर्वरणीया वि
भाति प्रकाशं करोति ॥ ॥ अथ चतुर्थी ॥ ॥ एषा व्येनी भवति द्विबर्हा आविष्कृण्वाना तन्वं पुरस्तात् । ऋतस्य पन्थामन्वेति साधु प्रजानतीव
न दिशो मिनाति ॥ ॥ एषोषाः व्येनी भवति द्विबर्हा द्वयोः परिवृढा उषाः । पश्चात्तु तन्वं स्वीयां तनुमाविष्कृण्वाना प्रकटीकुर्वती अपुरस्तात्
पूर्वस्यां दिशि यामिनाति नहिनस्ति प्रस्फुटं दिशः प्रकाशयति अथवा प्रजानतीव अनुगंतव्यमिति प्रकर्षेण अवगच्छन्तीव तस्य पन्थामन्वेति ॥
॥ ॥ अथ पंचमी ॥ ॥ एषा शुभ्रा न तन्वो विदानोर्ध्वेव स्नाती दृशये नो अस्थात् । अप द्वेषो बाधमाना तमांस्युषा दिवो दुहिता ज्योतिषागात् ॥
॥ एषोषाः शुभ्रा शुभ्रवर्णा निर्मला स्वकृता योषिदिव तन्वो गात्राणि विदाना प्रज्ञापयन्ती स्नाती स्नानं कुर्वाणा ऊर्ध्वेव उन्नतेव स्थाना दृ
ष्टी वनो स्मदर्थं पुरातना वा दृशये सर्वेषां दर्शनाय उदस्थात् पूर्वस्यां दिशि युत्तिष्ठति किं कुर्वती द्वेषो द्वेष्याणि तमांसि अपबाधमाना दिवो दुहि राम
ता उषाः ज्योतिषा तेजसा सह आगच्छति ॥ ॥ अथ षष्ठी ॥ ॥ एषा प्रतीची दुहिता दिवो नॄन्योषेव भद्रा नि रिणीते अप्सः । व्यूर्ण्वती दाशुषे वार्याणि १०१
पुनर्ज्योतिर्युवतिः पूर्वथाकः ॥ ॥ अभिमुखा सती दिवो दुहिता नॄन् सर्वान् प्राणिनः प्रति भद्रा येषां चक्रे कल्याणवेषा योषा दिव सा रूपं निरिणी

ते प्रेरयति विवृणोति किंच दाशुषे हविर्दात्रे यजमानाय वार्याणि वरणीयानि धनानि व्यूर्ण्वती प्रयच्छन्ती युवतिर्नित्ययौवना सर्वत्र मिश्रयन्ती वा
पुनरद्यापि पूर्वथा पूर्वमिव ज्योतिस्तेजोऽकः करोति ॥ ॥ इति चतुर्थस्य चतुर्थे त्रयोविंशो वर्गः ॥ ॥ युंजत इति पंचर्चं नवमं सूक्तं । अत्रेयमनु
क्रमणिका ॥ युंजते पंच श्यावाश्वः सावित्रं तु जागतमिति । श्यावाश्वनामा त्रेय ऋषिः । जगती छंदः सविता देवता । पृष्ठ्याभिप्लवषडहस्य
प्रथमेऽहनि वैश्वदेवशस्त्रे सावित्रनिविद्धानमिदं सूक्तं सूत्रितं च युंजते मन इह्येह वृष्णन्त इति आग्रयावस्तो त्रेपि सूत्रितं च युंजते मन उत युंज
ते धिय इत्यन्त इंद्र स्तुमंत इति ॥ ॥ तत्र प्रथमा ॥ ॥ युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक
इन्मही देवस्य सवितुः परिष्टुतिः ॥ ॥ विप्रा मेधाविनः ऋत्विग्यजमानाः मनः स्वीयं सर्वेषु कर्मसु युंजते योजयन्ति सवित्रनुग्रहाय सर्व
त्मीकुर्वन्तीत्यर्थः । उतापि च धियः कर्माण्यपि युंजते प्रयुंजते किमस्यानुज्ञया इति उच्यते । विप्रस्य मेधाविनः बृहतो महतः विपश्चितः स्तो
तस्य ज्ञानवतो वा सवितुः अनुज्ञयेति । सविता वै प्रसवानामीशे इति हि श्रुतिः । स एव सविता होत्राः सप्त होत्रकाः यामुदिता क्रियाव
युना वित् वयुनमिति प्रज्ञानाम तत्तदनुष्ठानविषयज्ञानवेत्ता एक इत् एक एव विदधे करोति पृथग्वा धारयति । किंच सवितुर्देवस्य परिष्टुतिः
स्तुतिः मही महती अभि प्रभूता कृत्यगोचरेत्यर्थः । हविर्धानप्रवर्तने ररा द्यामक वक्षायां विश्वा रूपाणि त्येषा नु प्रवक्तव्या । सूत्रितं चा वि
श्वा रूपाणि प्रतिमुंचते कविरिति वत्स्वा यामिति ॥ ॥ सैषा द्वितीया ॥ ॥ विश्वा रूपाणि प्रति मुंचते कविः प्रासावीद्भद्रं द्विपदे चतुष्पदे । वि
नाकमख्यत्सविता वरेण्योऽनु प्रयाणमुषसो वि राजति ॥ ॥ कविर्मेधावी सविता विश्वा सर्वाणि रूपाणि आत्मनि प्रति मुंचते बध्नाति धारयति ।

चतु० भा० किंच भद्रं कल्याणं गमनादिविषयं प्रासावीत्। अनुजानाति कस्मैचित् द्विपदे मनुष्याय चतुष्पदे गवाश्वादिकाय किं सविता सर्वस्य प्रेरको देवो व
१०२ रेण्यो वरणीयः। स नूनं व्यख्यत् ख्यापयति प्रकाशयति किं नाकं नास्मिन्नकं दुःखमस्तीति नाकः स्वर्गः। यजमानार्थं स्वर्गं प्रकाशयतीत्य
र्थः। स देवः उषसः प्रयाणमुदयमनु विराजति प्रकाशते। सवितुरुदयात्पूर्वं हि उषा उदेति॥ ॥अथ तृतीया॥ ॥यस्य प्रयाणमन्वन्य इद्ययुर्देवा
देवस्य महिमानमोजसा॥ यः पार्थिवानि विममे स एतशो रजांसि देवः सविता महित्वना॥ ॥अन्ये इतरे देवा अन्ये अग्न्यादयो देवस्य द्योतमान
स्य सवितुः प्रयाणमन्वनु ययुः गच्छंति प्राप्नुवंति किं महिमानं महत्त्वं सवितुरुदयाभावे अग्निहोत्रादि अनिष्पत्तेः सोमादिहविःस्कस्याभावा
त् ओजसा बलेन च युक्ता भवंतीत्यर्थः। सविता पार्थिवानि रजांसि पृथिव्यादिलोकान् महित्वना स्वमहत्त्वेन विममे परिच्छिनत्ति स देव एव ए
तवर्णः शुभ्रः शोभमानः। सन् राजत इति शेषः। युवशाता कृण्वोत नेस्यातश्रा इत्यादिशाकारोपजनश्छांदसः॥ ॥अथ चतुर्थी॥ ॥उत या
सि सवितस्त्रीणि रोचनोत सूर्यस्य रश्मिभिः समुच्यसि॥ उत रात्रीमुभयतः परीयस उत मित्रो भवसि देव धर्मभिः॥ ॥हे सवितर्देव उतापि
त्रीणि रोचनारोचमानान् द्युलोकान् यासि गच्छसि। तिस्रो दिवः पृथिवीरिति श्रुतेः। उतापि च सूर्यस्य रश्मिभिः समुच्यसि संगच्छसि उत च स
मवायस्त्यस्येदं रूपं उदयात्पूर्वभावी सविता उदयास्तमयमध्यवर्ती सूर्य इति। उतापि च रात्रीमुभयतः उभयपार्श्वे परीयसि उदयाय परि राम
च्छयसि। उतापि च हे देव सवितः त्वं धर्मभिः जगद्धारकैः कर्मभिः मित्रो भवसि मित्राख्यो देवो भवसि। अथवा प्रकाशनादिप्रदानेन सखा भवसि। १०२
सर्वं गिते॥ ॥अथ पंचमी॥ ॥उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः॥ उतेदं विश्वं भुवनं विराजसि श्यावाश्वस्ते सवितः स्तोमम्

॥व्युच्छंती दुहितर्दिवो मा चिरं तनुथा अपः॥ नेत्त्वा स्तेनं यथा रिपुं तपाति सूरो अर्चिषा सुजाते अश्वसूनृते॥ ॥हे दिवो दुहितः उषः त्वं व्युच्छ विवासं कु
रु अपो अस्मदीयं कर्म अतिचिरं विलंबमा तनुथाः। त्वा त्वां रिपुं स्तेनं यथा संतापयति राजादिस्तद्वत् सूरः सूर्यः अर्चिषा तेजसा नेत् तपाति तपेत्
शीघ्रं नोदेहीत्यर्थः॥ ॥अथ दशमी॥ ॥एतावद्वेदुषस्त्वं भूयो वा दातुमर्हसि॥ या स्तोतृभ्यो विभावर्युच्छंती न प्रमीयसे सुजाते अश्वसूनृ
ते॥ ॥हे उषः त्वं अस्मभ्यं वा अथवा दित्सितं किमेतावदेव इदु इव एवकारार्थः। अस्मिन्नस्मत्प्रार्थितमेवेत्यर्थः। अथवा भूयो दातुमर्हसि।
अप्रार्थितमपि यद्दातव्यमस्ति तत्सर्वं देहीत्यर्थः। हे विभावरि उषः। या त्वं स्तोतृभ्यः नैपाकोक्तिकवैदिकव्यवहारार्थः॥ व्युच्छंती न विवासयं
ती न प्रतीयसे न हिंसिन ऋध्यसीत्यर्थः। सा त्वं दातुमर्हसीति। मीङ् हिंसायामित्यस्मात् आत्वाने श्यन्॥ ॥इति चतुर्थस्य चतुर्थे द्वाविंशो वर्गः॥
घा घृतं मानं मिति षळृचमष्टमं सूक्तं। अत्रानुक्रमणिका। घृतधामानं षळिति सत्यश्रवा ऋषिः अनुक्रांता त्रिष्टुप् उषस्यं हि सूक्तं अत उषो
देवता प्रातरनुवाके उषस्ये क्रतौ त्रैष्टुभे छंदसि आश्विनशस्त्रे चेदं सूक्तं। घृतधामानमुषो वाजेनेति॥ ॥तत्र प्रथमा॥ ॥घृतधामानं बृहतीमृ
तेन ऋतावरीमरुणप्सुं विभातीं॥ देवीमुषसं स्वरावहंतीं प्रति विप्रासो मतिभिर्जरंते॥ ॥घृतधामानं दीप्तरथां बृहतीं ऋतेन सत्येन यज्ञेन वा ऋ
तावरीं अरुणप्सुं अरुणरूपां विभातीं व्युच्छंतीं देवीं द्योतमानामुषसं स्वरावहंतीं सूर्यं गच्छंतीं एवं महानुभावामुषसं विप्रासो मेधाविनः ऋ
त्विजो मतिभिः प्रतिजरंते स्तुवंति॥ ॥अथ द्वितीया॥ ॥एषा जनं दर्शता बोधयंती सुगान्पथः कृण्वती यात्यग्रे॥ बृहद्रथा बृहती विश्वमिन्वोषा
ज्योतिर्यच्छत्यग्रे अह्नां॥ ॥दर्शता दर्शनीया एषा उषाः बोधयंती कं जनं प्रसुप्तमित्यर्थः। पथः सुगान् सुगमनान् कृण्वती अग्रे सूर्यपुरस्तात्

चतु॰भा॰ नहिंसंति॥ ॥अथतृतीया॥ ॥सहिरत्नानिदाशुषेसुवातिसविताभगः॥ तंभागंचित्रमीमहे॥ ॥सहिसखलुसविताभगोभजनीयोदाशुषे
१०३ हविर्दत्तवतेमह्यंरत्नानिरमणीयानिधनानिसुवातिप्रेरयतिप्रयच्छतितंदेवंभागंभजनीयंचित्रंचायनीयंधनंईमहेयाचयामहे॥ ॥अद्यानो
देवसवितरितिचतुर्थीपंचमीभ्याममनोज्ञस्वप्नदर्शनेप्रस्तुतंजुहुयात्।अद्यानोदेवसवितरितिद्वाभ्यामितिहिसूत्रितं॥ ॥अथचतुर्थी॥ ॥
॥अद्यानोदेवसवितःप्रजावत्सावीःसौभगं॥पराडुःष्वप्न्यंसुव॥ ॥हेसवितर्देवनोस्मभ्यंअद्यास्मिन्यागदिनेप्रजावत्सुताद्युपेतंसौभगं
धनंसावीःप्रेरयादुःष्वप्न्यंदुःस्वप्नभवंदुःखकरंदारिद्र्यंपरासुवदूरेप्रेरय॥ ॥अथपंचमी॥ ॥विश्वानिदेवसवितर्दुरितानिपरासुव॥य
द्भद्रंतन्नआसुव॥ ॥हेसवितर्देवत्वंविश्वानिदुरितानिपरासुवयद्भद्रंप्रजापशुगृहादिकंतन्नोस्मभ्यंमासुवअस्मदभिमुखंप्रेरय।प्रजा
वैभद्रंगृहंभद्रमितिश्रुतिः॥ ॥इतिचतुर्थस्यचतुर्थेपंचविंशोवर्गः॥ ॥अथषष्ठी॥ ॥अनागसोअदितयेदेवस्यसवितुःसवे॥विश्वावा
मानिधीमहि॥ ॥वयमनुष्यान्तरःसवितुःप्रेरकस्यसवेअनुज्ञायांसत्यांअदितयेअखंडनीयायैदेव्यैभूम्यैअनागसःस्यामाअ
नपराधिनोभवेमहिभूम्यांहिपापाःभवंतिअपगतेपापेसुविश्वासर्वाणिवामानिवननीयानिधामहिधारय॥ ॥चातुर्मास्येषुवैश्वदे
वेपर्वणिसावित्रस्यद्वादशकपालस्यविश्वदेवामित्यनुवाक्या।सूत्रितंच।आविश्वदेवंसत्पतिंवाममद्यसवितरितिप्रायणीयाएषैव राम
सवितुरनुवाक्यासूत्रितंच।आविश्वदेवंसत्पतिंयइमाविश्वाजातानीतिदेवसुवांहविष्षुसवितुरनुवाक्यासूत्रितंच।आविश्वदेवंस १०३

त्पतिंनप्रमियेसवितुर्दैव्यस्यतदिति॥ ॥सैषासप्तमी॥ ॥आविश्वदेवंसत्पतिंसूक्तैरद्यावृणीमहे॥सत्यसवंसवितारं॥ ॥विश्वेदेवायस्यव
शेभवंतिनादृशंसहिसवासिकर्त्तादिंद्रंमित्रंवरुणमग्निमाकुत्रिस्यादिष्कृतेपितरेषांतद्वृत्तिसात्सत्पतिंसतामनुष्यानृणांपालकंसत्यसवं
सत्यानुज्ञंसवितारंदेवंअद्यास्मिन्यागदिनेसूक्तैराद्वृणीमहेसंभजामहे॥ ॥अथाष्टमी॥ ॥यइमेउभेअहनीपुरएत्यप्रयुच्छन्॥स्वाधी
र्देवःसविता॥ ॥यःसवितादेवःस्वाधीःशोभनध्यानःसुकर्मावासन्इमेअहनीनयोःपुरःपुरस्तादप्रयुच्छन्।अप्रमाद्यन्नेतिगच्छ
तितमावृणीमहइतिसंबंधः।प्रायणीयेयइमाविश्वेतिसवितुर्याज्या।सूत्रितंच।यइमाविश्वाजातानिसुत्रामाणंपृथिवीद्यामनेह
समितिःअश्वमेधेश्वमुत्सृज्यानुसवनंसावित्रीष्टिः।कार्यातस्यामेषामाध्यंदिनेसवनेनुवाक्या।सूत्रितंच।यइमाविश्वाजातान्यादेवा
यानुसवितासुरत्नइति॥ ॥सैषानवमी॥ ॥यइमाविश्वाजातान्याश्रावयतिश्लोकेन॥प्रचसुवातिसविता॥ ॥योदेवइमाइमानिवि
श्वासर्वाणिजातानिउत्पन्नानिप्राणिनःजंगमानिसपर्थः।तान्श्लोकेनयशसाआश्रावयतिसर्वेष्वस्यस्तुतिंशृण्वंतीत्यर्थः।अथवाग
र्जनशब्देनसर्वाणिमान्यत्स्यानिआश्रावयतिवृष्ट्युन्मुखाःसन्तिकिंचसविताप्रसुवातिचप्रेरयतितंवृणीमहइति॥ ॥इतिचतुर्थस्यचतु
र्थेषड्विंशोवर्गः॥ ॥अच्छावदेतिदशर्चमेकादशंसूक्तंभौमस्यात्रेरार्षंत्रैष्टुभमनुक्रमणिका।अच्छादशात्रिःपार्जन्यमुपास्त्यास्तिस्रोजग
त्युपांत्यानुष्टुबितिपर्जन्यस्तथानवम्यनुष्टुप्विवृक्षानित्याद्यास्तिस्रोजगत्यः।शिष्टाःषट्त्रिष्टुभः।पर्जन्योदेवता।अनेनसूक्तेनप्रत्य
वेचदिशउपस्थेयाः।सूत्रितंच।संस्थितायांसर्वादिशउपतिष्ठेत।अच्छावदतवसंगीर्भिराभिरितिचतसृभिःप्रत्यृचंवादिशउपतिष्ठेत्सूक्ते

चतु०भा०
१०४

नवेति॥ ॥तत्र प्रथमा॥ ॥अच्छा वद तवसं गीर्भिराभिः स्तुहि पर्जन्यं नमसा विवास॥ कनिक्रदद्वृषभो जीरदानू रेतो दधात्योषधीषु गर्भं॥ ॥
हे स्तोतस्त्वं तवसं बलवंतं पर्जन्यं अच्छाभिः प्राप्य वद प्रार्थय पर्जन्य आशीर्यास्तेन वक्रु धा निरुक्तः। पर्जन्यस्तृपेराद्यंतविपरीतस्य तर्पयिता ज
न्यः। परो जेता वा जनयिता वा प्रार्जयिता वा रसानामिति। आभिर्गीर्भिः स्तुतिरूपाभिः। स्तुहि नमसान्नेन हविर्लक्षणेन आ विवास सर्वतः
परिचरः। यः पर्जन्यो वृषभो अपां वर्षिता जीरदानुः क्षिप्रदानः कनिक्रदत् गर्जनशब्दं कुर्वन्नोषधीषु गर्भं गर्भस्थानीयं रेतउदकं दधाति
स्थापयति तं स्तुहि॥ ॥अथ द्वितीया॥ ॥वि वृक्षान् हंत्युत हंति रक्षसो विश्वं बिभाय भुवनं महावधात्। उतानागा ईषते वृष्ण्यावतो यत्पर्ज
न्यः स्तनयन् हंति दुष्कृतः॥ ॥अयं मंत्रो निरुक्तेस्य द्रष्टुं व्याख्यातः। तद्देवात्र लिख्यते। पर्जन्यस्तृपेराद्यंतविपरीतस्य विहंति वृक्षान्विहंति च
रक्षांसि रक्षांसि वलिवास्माद्भूतानि बिभ्यति महावधान्महानस्य वधोप्यनपराधो भीतः पलायते वर्षकर्मवतो यत्पर्जन्यः स्तनयन् हंति दुष्कृ
तः पापकृतो हंति॥ ॥अथ तृतीया॥ ॥रथीव कशयाश्वाँ अभिक्षिपन्नाविर्दूतान्कृणुते वर्ष्यां अह। दूरात्सिंहस्य स्तनथा उदीरते यत्प
र्जन्यः कृणुते वर्ष्यं नभः॥ ॥रथीव रथस्वामीव स यथा कशयाश्वान् अभिक्षिपन् दूतान्मेघान्मरुतो वा आविष्कृणुते प्रकटयति अह
इति पूरणः। एवं सिंहस्य सहतेर्हिंसतेर्वा शब्दकर्मणः। सिंह इव सिंहः। अवर्षणेनाभिभवितुः। आद्रष्टुर्वा मेघस्य स्तनथाः। गर्जनशब्दाः
दूरादुदीरते उद्गच्छंति कदा यदा पर्जन्यो नभोंतरिक्षं वर्ष्यं वर्षोपेतं कृणुते करोति तदा॥ ॥अथ चतुर्थी॥ ॥प्र वाता वांति पतयंति विद्युत उ
दोषधीर्जिहते पिन्वते स्वः। इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीं रेतसावति॥ ॥प्र वाता वांतीति पर्जन्यस्य चरा वाज्याः सृजितेच। राम १०४

नत्रो॥ ॥हे सवितस्त्वं एक इत् एक एव प्रसवस्य सर्वकर्मानुज्ञाकारणस्य ईशिषे समर्थो भवसि ये लौकिकं गमनादिरूपं वैदिकमग्निहोत्रादि
रूपं कर्म अनुतिष्ठंति तेषां सर्वेषां अनुज्ञातुमेक एव प्रभवसि उतापि च पूषा पोषको भवसि हे देव यामभिर्गमनैः उतापि त्वं विश्वं भुवनं भूत
जातं विराजसि ईशिषे धारयितुं यस्मादेवं महानुभावस्तस्माद्धे सवितस्त्वे तुभ्यं श्यावाश्व ऋषिः स्तोमं स्तोत्रं मानशे व्याप्नोति करोति। स्वयमा
त्मानं परोक्षतया निर्दिशन्नाह॥ ॥इति चतुर्थस्य चतुर्थे चतुर्विंशो वर्गः॥ ॥तत्सवितुरिति नवर्चं दशमं सूक्तं। श्यावाश्वस्यार्षं आत्रेयमनु
क्रमणिका। तत्सवितुर्नव गायत्र्यमाद्यानुष्टुबिति। प्रथमानुष्टुप्। शिष्टा गायत्र्यः। सावित्रं हि सूक्तं। सावित्रेग्निष्टोमे वैश्वदेवशस्त्र
स्याद्यस्तृचः। प्रतिपत्। अद्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचराविति॥ ॥तत्र प्रथमा॥ ॥तत्सवितुर्वृणीमहे वयं देवस्य भोजनं॥
श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि॥ ॥तत्सर्वत्वेन प्रसिद्धं भोजनं भोग्यं धनं वयं स्तोतारो वृणीमहे प्रार्थयामहे कस्य धनं सवितुः प्रेरक
स्य देवस्य स्वर्णलक्षणं श्रेष्ठं प्रशस्यं सर्वधातमं सर्वस्य धातृतमं सर्वस्य भोगप्रदमित्यर्थः। तुरं शत्रूणां हिंसकं धनेन शत्रून्हंतुं शक्यत्वा
त्तादृशं धनं भगस्य भजनीयस्य सवितुरनुग्रहात् धीमहि धारयामः समुपभोगे करवामेत्यर्थः। अथवा धनं वृणीमहे अर्थित्वाच्च
लभेमहीति॥ ॥अथ द्वितीया॥ ॥अस्य हि स्वयशस्तरं सवितुः कच्चन प्रियं॥ न मिनंति स्वराज्यं॥ ॥अस्य सवितुः स्वयशस्तरं स्वयमसा
धारणं यशो यस्यातिशयेन भवति तत्तादृशं प्रियं सर्वेषां प्रियभूतं स्वराज्यं स्वयमेव राजमानत्वमैश्वर्यं कच्चन केचिदपि असुरादयो न मिनंति।

च०भा० र्थश्चाकर्षद्वृष्ट्यर्थं यद्वा । विषितं विमुक्तबंधनं एवंकर्षं एवं कृते उद्वतोर्ध्वतश्च उन्नतप्रदेशाः निपादाः । न्यग्भूतपादाः । निकृष्टपादा वा निम्नोन्नतप्र
देशाः समा एकरूपा भवंतु उदकपूर्णा भवंत्वित्यर्थः ॥ ॥ अथाष्टमी ॥ ॥ महांतं कोशमुदचा नि षिंच स्यंदंतां कुल्या विषिताः पुरस्तात् । घृते
१०५ न द्यावापृथिवी व्युंधि सुप्रपाणं भवत्वघ्न्याभ्यः ॥ ॥ हे पर्जन्य त्वं महांतं प्रवृद्धं कोशं कोशस्थानीयं मेघं उदच उद्गच्छ उद्गमय यथा तथा
त्वाभिषिंच नीचैः ॥ क्षारय कुल्या नद्यो विषिताः सत्यः स्यंदंतां प्रवहंतु पुरस्तात् पूर्वाभिमुखं प्रायेण नद्यः प्राच्यः स्यंदंते घृतेनोदकेन द्यावा
पृथिवी दिवं च पृथिवीं च व्युंधि क्लेदय अघ्न्याभ्यो गोभ्यः सुप्रपाणं सुप्रपादमुदकं भवतु ॥ ॥ अथ नवमी ॥ ॥ यत्पर्जन्य कनिक्रदत्स्तन
यन्हंसि दुष्कृतः । प्रतीदं विश्वं मोदते यत्किं च पृथिव्यामधि ॥ ॥ हे पर्जन्य यद्यदा त्वं कनिक्रदत् अत्यर्थं शब्दयन् स्तनयन् दुष्कृतः पापकृतो मे
घान् हंसि विदारयसि तदानीमिदं विश्वं जगत् प्रतिमोदते विश्वं विशिष्यते । यत्किं च पृथिव्यामधि । भूम्यामधिष्ठितं यच्चराचरात्मकं तदिदं वि
श्वं मोदते हृष्यति हृष्टः सर्वजगत्सु ति कारणत्वं प्रसिद्धं ॥ ॥ अथ दशमी ॥ ॥ अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ ॥ अजीजन ओ
षधीर्भोजनाय कमुत प्रजाभ्योऽविदो मनीषां ॥ ॥ इयमतिवृष्टिविमोचनी । हे पर्जन्य त्वमवर्षीः वृष्टवानसि वर्षमुदु षू गृभाय उत्कृष्टं सुष्ठु
गृभाय गृहाण परिहरेत्यर्थः । धन्वानि निरुदकप्रदेशान् कः । जलवतः कृतवानसि किमर्थं अत्येतवा उ अतिक्रम्य गंतुं ओषधीरजीजनः । राम
उत्पादयसि किमर्थं भोजनाय धनाय भोगाय किमित्यर्थं [illegible] जीवनाय किमिति पादपूरणः । उतापि च प्रजाभ्यः सकाशात् मनीषां स्तुतिम् १०५
विदः प्राप्तवानसि ॥ ॥ इति चतुर्थस्य चतुर्थेऽष्टाविंशो वर्गः ॥ ॥ बळित्थेति त्र्यृचात्मकं द्वादशं सूक्तं भौमस्यात्रेरार्षं पृथिवीदेवताकं आनुष्टुभं

अनुक्रांतं च । बळित्था त्र्यृचं पार्थिवमानुष्टुभमिति । सूक्तविनियोगो लैंगिकः ॥ आद्या देवानां हविःषु पृथिव्यां अनुवाक्या बळित्था पर्वतानां दृळ्हा
चिद्या वनस्पतीनिति हि सूत्रितं । भूमि सोमे तेषामरुणतीय इत्यस्य सूक्तमुखीया ॥ ॥ सैषा प्रथमा ॥ ॥ बळित्था पर्वतानां खिद्रं बिभर्षि पृथिवि ।
प्र या भूमिं प्रवत्वति मह्ना जिनोषि महिनि ॥ ॥ बळित्थेति द्विरूपा पृथिवी तेषा प्रत्यक्षा देवतापि च मध्यस्थानादियो ऽसा त्र संबोध्य वर्ण्यते हे
पृथिवि प्रथनवति मध्यस्थाने देवता बळित्था इत्था सत्यं अमुत्रांतरिक्षे वा बह्वसत्यं पर्वतानां मेघानां वा खिद्रं खेदनं वेदनं बिभर्षि धारयसि हे महि म
हति हे प्रवत्वति प्रवर्षं च प्रवणोदकवति प्र या त्वं भूमिं प्रत्यक्षा पृथिवीं मह्ना महत्त्वेन महतोदकेन वा प्रजिनोषि प्रकर्षेण प्रीणयसि ॥ ॥ अथ
द्वितीया ॥ ॥ स्तोमासस्त्वा विचारिणि प्रति ष्टोभंत्यक्तुभिः ॥ प्र या वाजं न हेषंतं पेरुमस्यस्यर्जुनि ॥ ॥ हे विचारिणि विविधं चरणशीले पृथिवि देवि
स्तोमासः स्तोतारः अक्तुभिः गमनशीलैः स्तोत्रैः प्रतिष्टोभंति अभिष्टुवंति । किं च या त्वं हेषंतं शब्दयंतं वाजं न अश्वमिव उद्यतं । पेरुं पू
रकं मेघं प्रास्यस्य प्रक्षिपसि हे अर्जुनि शुभ्रवर्णे गमनशीले च । देवानां हविःषु दृळ्हा चिदिति पृथिव्या याज्या एषैव भूमिः । सोमे निष्केवल्ये
सूक्त— पास्त्रितं च तु पूर्वमेवोदाहृतं ॥ ॥ सैषा तृतीया ॥ ॥ दृळ्हा चिद्या वनस्पतीन्क्ष्मया दर्धर्ष्योजसा ॥ यत्ते अभ्रस्य विद्युतो दिवो व
र्षंति वृष्टयः ॥ ॥ हे पृथिवि दृळ्हिया त्वं दृळ्हा चित् सुपां सुलुगिति तृतीयाया आकारः । दृढया भूम्या सह वनस्पतीन् वृक्षान् ओजसा बलेन
दर्धर्षि धारयसि । अथ दृळ्हेति विधेयविशेषणं दृढान् वृक्षान् धारयसीत्यर्थः । यत् यस्मात्ते तव संबंधिनो वृष्टयो वर्षकामेघाः विद्युतो
विद्योतमानान् अभ्रस्य पंचम्यर्थे षष्ठी अभ्रादपां हर्तुः दिवोंतरिक्षात् सिद्ध्यंति अथवा यस्यां ते तव अभ्रस्य वृष्टयः उदकसंघाताः विद्युतो

ऋ॰ वृ॰ भा॰ द्योतमानाया दिवः सकाशाद्वर्षयति पततीति॥ ॥ इति चतुर्थस्य चतुर्थे एकोनत्रिंशो वर्गः॥ ॥ प्र सम्राज इति नवर्चं चतुर्दशं सूक्तं आत्रेयं त्रैष्टुभं वा

१०६ रुणं। अनुक्रम्यते प्र सम्राजे षळ्वारुणमिति। विनियोगो लैंगिकः॥ ॥ तत्र प्रथमा॥ ॥ प्र सम्राजे बृहदर्चा गभीरं ब्रह्म प्रियं वरुणाय श्रुता

य॥ वि यो जघान शमितेव चर्मोपस्तिरे पृथिवीं सूर्याय॥ ॥ आत्रिः स्वात्मानं संबोध्य ब्रवीति। हे अत्रे त्वं सम्राजे सम्यग्राजमानाय ईश्वरा

य श्रुताय सर्वत्र स्तूयमानाय वरुणाय वरुणाय उपद्रवस्य निवारकाय नामारकाय पते तन्नामकाय देवाय बृहत् संभृतं गभीरं दुः

खगाहं बृहद्यथा पितं प्रियं प्रियभूतं ब्रह्म स्तोत्रभूतं कर्म प्रार्चय प्रोच्चारय इत्यर्थः। यो वरुणः शमितेव चर्म शमिता पशुवधे समानकर्ता य

थोपस्तरणाय चर्म शकुना हंति तद्वत् पृथिवीं विस्तीर्णमंतरिक्षं द्वितीयस्यां तृतीयस्यां पृथिव्यामिति श्रुतेरंतरिक्षस्यापि पृथिवीशब्दवा

च्यं सूर्याय सूर्यस्य तस्य व्याप्तिरे आस्तरणाय विजघान विस्तारयामास विस्तृतं यथा अवहारयोग्यं भवति तस्मा अध्य प्रह्वाय अंतरिक्षं विस्तारितवान्।

उरुं हि राजा वरुणश्चकारेति हि श्रुतं॥ ॥ अथ द्वितीया॥ ॥ वनेषु व्यंतरिक्षं ततान वाजमर्वत्सु पय उस्त्रियासु॥ हृत्सु क्रतुं वरुणो अप्स्वग्निं

दिवि सूर्यमदधात्सोममद्रौ॥ ॥ अयं वरुणो वनेषु वृक्षाग्रेषु अंतरिक्षं विततान विस्तारितवान्। तथा वाजसनेयकं। वनेषु हीदं वृक्षाग्रेष्व राम

न्तरिक्षं विततं तस्मादाह वनेषु व्यंतरिक्षं ततानेति। वाजं बलमर्वत्सु अश्वेषु विततान पयः क्षीरमुस्त्रियासु गोषु उस्त्रियेति गोनाम उस्त्रा विणा

स्यां भोगा इति तद्व्युत्पत्तिः। हृत्सु हृदयेषु क्रतुं कर्म संकल्पं यद्धि मनसाध्ययति तत्कर्मणा करोतीति श्रुतेः। अप्सु उदकेषु अग्निं वैद्युतं च यं सर्वत्र वि १०६

ततानेति सर्वं धः। किं च दिवि द्युलोके सूर्यमदधात् स्थापितवान्। सोमं चाद्रौ पर्वते अदधात्॥ ॥ अथ तृतीया॥ ॥ नीचीनबारं वरुणः क

प्र वाता वांति पतयंति विद्युत इत्यन्याधेयप्रश्नतीति वातस्योत्थतः प्र वाता वांतीति वाताः प्रकर्षेण पतयंति गच्छंति समंतात्संचरति विद्युतः ओ

षधीरोषधयः उज्जिहीते उद्गच्छंति प्रवर्धते स्वः अंतरिक्षं पिन्वते क्षरति इरा भूमिर्विश्वस्मै सर्वस्मै भुवनाय जायते सर्वजगद्धिताय समर्था

भवति कदैवमिति यद्यदा पर्जन्यो देवः पृथिवीं रेतसोदकेनावति रक्षति अभिगच्छति वा तदेवं भवति॥ ॥ अथ पंचमी॥ ॥ यस्य व्रते पृथिवी

नंनमीति यस्य व्रते शफवज्जर्भुरीति॥ यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ॥ ॥ यस्य पर्जन्यस्य व्रते कर्मणि पृथिवी

नंनमीति अत्यर्थं नमति सर्वेषामधो भवति। यस्य व्रते शफवत् पादोपेतं गवादिकं जर्भुरीति पुष्यति ध्रियते पूर्यते गच्छतीति वा। यस्य व्र

ते कर्मरथोषधीरोषधयो विश्वरूपा नानारूपा भवंति हि पर्जन्य स महान् त्वं नोस्मभ्यं महि शर्म महत्सुखं यच्छ प्रयच्छ॥ ॥ इति चतुर्थस्य च

तुर्थे सप्तविंशो वर्गः॥ ॥ अथ षष्ठी॥ ॥ दिवो नो वृष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो अश्वस्य धाराः॥ अर्वाङेतेन स्तनयित्नुनेह्यपो निषिंचन्न

सुरः पिता नः॥ ॥ हे मरुतः यूयं दिवोंतरिक्षात्सकाशात् नोस्मभ्यं वृष्टिं ररीध्वं दत्त वृष्णो वर्षकस्याश्वस्य व्यापकस्य मेघस्य संबंधिन्यो धाराः उद

कस्य धाराः प्रपिन्वत रक्षत तु हे पर्जन्य त्वमेतेन स्तनयित्नुना गर्जता मेघेन सह अर्वाग् अस्मदभिमुखमेहि। आगच्छ किं कुर्वन् अपो जलानि निषिंचन्

स देवो सुर उदकानां निरसिता सन्नोस्माकं पिता पालकश्च॥ ॥ अथ सप्तमी॥ ॥ अभि क्रंद स्तनय गर्भमा धा उदन्वता परि दीया रथेन॥ दृतिं सु

कर्ष विषितं न्यंचं समा भवंतूद्वतो निपादाः॥ ॥ अभिक्रंद शब्देन तदेव पुनरुच्यते यथा दा स्तनय गर्जं गर्भं गर्भस्थानीयमुदकमोषधीष्वाधाः आ

धेहि उदन्वता उदकवता रथेन परिदीय परितो गच्छेति दृतिं दृतिवदुदकधारकं मेघं विषितं विश्लेषणासितं बद्धं न्यंचं न्यग्धामुखं सुष्ठुक

च० भा० यत्ते द्यां वरुणोंतरिक्षे तस्थिवानतिछन्नः मानेनेव दंडेन सूर्येण पृथिवीमंतरिक्षं विममे परिछिनत्ति तस्यैषा माया ॥ ॥इति चतुर्थस्य चतुर्थे त्रिं
१०७ शो वर्गः ३०॥ ॥अथ षष्ठी ॥ ॥इमामू नु कवितमस्य मायां महीं देवस्य नकिरादधर्ष । एकं यदुद्ना न पृणंत्येनीरासिंचंतीरवनयः समुद्रं ॥ ॥
॥कवितमस्य प्रकृष्टस्य द्योतमानस्य वरुणस्य मां सर्वप्रसिद्धां महीं महतीं मायां प्रज्ञां न किर्न च आदधर्ष न हिनस्ति कश्चिदपि उन्नेति
पूरणो यद्यस्मादेकं समुद्रं उदकेन न पृणंति न पूरयंति कः एनीः एनीः एन्यः शुभ्राः गमनशीला वा आसिंचंतीः उदकमासेचयंत्यः
अवनयो नद्यः सर्वे उदकेन पूरयंत्योपि तेन कमपि समुद्रं पूरयंतीति इदं वरुणस्य महत्कर्मेति अत्रांतरिक्षविस्तारादिसमुपूरणपर्यंतेक
र्म परमेश्वरस्यैवोच्यते न वरुणस्यैन वाच्यं तस्य वरुणादिरूपेणावस्थानए षत्रऽसादिश्यते ॥ ॥अथ सप्तमी ॥ ॥अर्यम्यं वरुण मित्र्यं
वा सखायं वा सदमिद्भ्रातरं वा ॥ वेशं वा नित्यं वरुणारणं वा यत्सीमागश्चकृमा शिश्रथस्तत् ॥ ॥हे वरुण अर्यम्यं अर्यमेवार्यम्यः स्वार्थि
को यत् अतेरिदं रूपं प्रदातारमित्यर्थः अथवा इरणात्मना प्रज्ञणत्तीति अर्यमा गुरुः तथा अथवा मित्र्यं मिदा स्नेहने द्रुत्यस्मात्मि
त्रः स्वार्थिको यत् अनुरक्तमित्यर्थः वा अथवा सखायं समानख्यानं सदमित् सर्वदैव भ्रातरं वा नित्यं निरंतरं वेशं निकटनिकेतनवर्तिनं वा
अरणं वा अशक्यमित्यर्थः अथवा अरणमदातारं वा नित्यं निरंतरं एतान्प्रति यत्सीयदेतत्तनदागोपराधं चकृमतत् शिश्रथः अस्मत्तो विना राम
शय ॥ ॥अथाष्टमी ॥ ॥कितवासो यद्रिरिपुर्न दीवि यद्वाघा सत्यमुत यन्न विद्म ॥ सर्वा ता विष्य शिथिरेव देवाधा ते स्याम वरुण प्रियासः ॥ ॥ १०७
कितवासः कितवाः द्यूतकृतः कितवास्ति सर्वं मया जितमिति वदंतीति कितवः सोतेदाविन देवने द्यूते यथा अद्रिरिपुः लेपयंति पापमाचो

पयंति अस्मासु द्वेष्टारो मयि मे घेतत्पापमकरो रित्याक्षिपंति । अत्र पुरस्तादुपचारोपि न कारणं उपमार्थीयः अथवा घेति पूरणः यत्पापं सर्वं
अरोपमंतरेण कृतवंतः स्म । उत अपि च यत्कृतं पापं न विद्म न जानीमः नानानि सर्वा सर्वाणि शिथिरेव शिथिलानीव शिथिलसंबंधनानि
फलानीव विष्य विमोचय यस्य निरूपमूष्टो विमोचनेहेव अध अनंतरं ते तव प्रियासः प्रियाः स्याम ॥ ॥इति चतुर्थस्य चतुर्थे एकत्रिंशो व
र्गः ३१॥ ॥इंद्राग्नीयुमिति षळ्र्चं चतुर्दशं सूक्तं अत्रेरार्षं आनुष्टुभं विराट्पूर्वा अद्योदशाकाष्टकास्त्वयद्दति परिभाषितत्वात् ॥ तथा चानु
क्रांतं । इंद्राग्नी षळैंद्राग्नमानुष्टुभं विराट्पूर्वांतमिति विनियोगो लैंगिकः ॥ ॥तत्र प्रथमा ॥ ॥इंद्राग्नीयमवथ उभा वाजेषु मर्त्यं दृळ्हा
चित्स प्रभेदति द्युम्ना वाणीरिवत्रितः ॥ ॥हे इंद्राग्नी उभा उभौ परस्परावियुक्तौ युवां यं मर्त्यमवथः रक्षथ वाजेषु संग्रामेषु स मर्त्यो दृळ्हा
न्यपि दृढानि द्योतमानानि धनानि शत्रुं बंधिभिः प्रभेदति भिनत्ति त्रित ऋषिर्वाणीरिव प्रतिवादिवाक्यानीव अथवा त्रिषु स्थानेषु वर्तमा
नोग्निः शत्रूणां वाक्यानीव ॥ ॥अथ द्वितीया ॥ ॥या पृतनासु दुष्टरा या वाजेषु श्रवाय्या ॥ या पंच चर्षणीरभींद्राग्नी ता हवामहे ॥ ॥याया
विंद्राग्नी पृतनासु दुष्टरा दुष्टरौ अभिभाव्यौ यायो च वाजेषु संग्रामेषु अन्नेषु श्रवाय्या श्रवाय्यो स्तुत्यौ । यायो पंच चर्षणीः चर्षणयो म
नुष्याः तानभिरक्षत इति शेषः तातो महानुभावौ हवामहे ह्वयामः ॥ ॥अथ तृतीया ॥ ॥तयोरिदमवच्छवस्तिग्मा दिद्युन्मघोनोः ॥ प्रति द्रु
णा गभस्त्योर्गवां वृत्रघ्न एषते ॥ ॥अमवत् अभिभावुकं शवो बलं तयोरितरयोरेवं मघोनोर्मघवतोरन्नवतोर्धनवतो वा तयोर्दिद्युत्
वज्रंति ग्मा तीक्ष्णं वर्तते गभस्त्योर्हस्तयोरेवं भूतौ देवौ गवां मुद्रकानां पणिभिरपहृतानां वा लाभाय द्रुणा द्रुविकारेण गमनशीलेन

ऋ०वे०भा० नैकेन रथेन वृत्रघ्ने आवकारमेघहननायतथाविधृतवृत्रासुरवधायवाप्रतिगच्छति॥ ॥अथचतुर्थी॥ ॥तावामेषेरथानामिंद्राग्नीहवा
महे॥पतीतुरस्यराधसोविद्वांसागिर्वणस्तमा॥ ॥हेदेवौतातौवक्ष्यमाणगुणौवांयुवांहवामहे।कस्मैकिमर्थंरथानामेषेयुद्धेरथानां
१०८ प्रेरणायकीदृशौयुवांइंद्रमग्निंचपरस्परंयुग्मभूतौतुरस्यजंगमरूपस्यराधसः।धनादिलक्षणस्यपतीस्वामिनौविद्वांसासर्वज्ञौगि
र्वणस्तमागीर्भिर्वननीयतमौयुवामाह्वामहे॥ ॥अथपंचमी॥ ॥तावृधंतावनुद्यून्मर्तायदेवावदभा॥अर्हंताचित्पुरोदधेंशेवदेवावर्व
ते॥ ॥तातौअनुद्यून्प्रतिदिनंवृधंतौवर्धमानौअदभाअहिंस्यौअर्हंताचित्प्रकर्षेणपूज्यौविदितिपूजायांतादृशौमहानुभावौदे
वावर्वतेऽश्वलाभायपुरोदधेपुरस्कुर्वेअंशेवअंशोनामद्वादशादित्यमध्यवर्तीदेवःसभगस्याप्युपलक्षकःअंशाविवआदित्या
विवदीप्तावित्यर्थः॥ ॥अथषष्ठी॥ ॥एवेंद्राग्निभ्यामहाविहव्यंशूष्यंघृतंनपूतमद्रिभिः॥तासूरिषुश्रवोबृहद्रयिंगृणत्सुदिधृत
मिषंगृणत्सुदिधृतं॥ ॥इंद्राग्निभ्यांहव्यंहविःअहाविप्रहितंकमासीत्।कीदृशंततशूष्यंबलकरंकिमिवअद्रिभिःग्रावभिःपूतमभि
षुतंघृतंनसोमरसमिवतथायुवाभ्यांप्रदीयतेतद्वच्चपुरोडाशादिकमपितातौदेवौसूरिषुमेधाविषुस्मासुबृहत्प्रभूतंश्रवोन्नंयशो
वारयिंधनंचविधृतंधारितंइषमन्नंगृणत्सुवत्सुदिधृतंपुनरुक्तिरादरार्था॥ ॥इतिचतुर्थस्यचतुर्थेद्वात्रिंशोवर्गः॥ ॥प्रवोमहइति राम
नवर्चंपंचदशंसूक्तं।एवयामरुन्नाम्नआत्रेयस्यमुनेरार्षंमरुद्देवताकमितिजगतीछंदस्कं।तथाचानुक्रमणिका।प्रवोनवैवएवयामरु १०८
न्मारुतमतिजागतमितिद्वाराात्रेषष्ठेहनितृतीयसवनेछावाकशस्त्रेइदंसूक्तं।सूत्रितंच।एवयामरुदुक्थंछावाकपिनेति॥ ॥तत्रप्रथमा॥ ॥

बंधंप्रससर्जरोदसीअंतरिक्षं॥तेनविश्वस्यभुवनस्यराजायवंनवृष्टिर्व्युनत्तिभूम॥ ॥नीचीनबारंअधोमुखबिलंप्रससर्जकृतवान्कु
बंधंकवनमुदकंभवतितद्धीयतेअत्रेतिकवंधोमेघःतथाकरोत्।अथवाकवंधमुदकंतदुदकंनीचीनबारंनीचीनंनिर्गमनबिलंचकार
मेघंविदार्योदकमधोमुखंचकारेत्यर्थः।किंप्रतीतिरुच्यतेरोदसीद्यावापृथिव्योअंतरिक्षंचप्रतिलोकत्रयहितायेत्यर्थः।तेनोदकेनविश्व
स्यसर्वस्यभुवनस्यभूतजातस्यराजास्वामीवरुणोभूमभूमिंव्युनत्ति।क्लेदयतिवृष्टिःसेक्तापुमान्यवंनयवमिवयवान्यथाप्रोहायस
र्वत्रप्रसारयतितद्वत्भूमिंसर्वत्रोन्नातिअथवावृष्टिर्वरुणइतिसंबंधः।वर्षकःपर्जन्यइत्यर्थः।अस्मिन्पक्षेयवंपुरुषइवेतिपुरुषशब्दोध्या
हार्यः।अत्रनीचीनबारंवरुणःकबंधमित्यादिइन्द्रेर्व्यं॥ ॥अथचतुर्थी॥ ॥उनत्तिभूमिंपृथिवीमुतद्यांयदादुग्धंवरुणोवष्ट्यादित्॥
समभ्रेणवसतपर्वतासस्तविषीयंतश्रथयंतवीराः॥ ॥वरुणोभूमिंपृथिवींप्रथितमंतरिक्षमंतरिक्षस्यापिपृथिवीशब्दवाच्यत्वंपूर्वमु
क्तं।उतापिचद्यांद्युलोकंउनत्तिक्लेदयतियदायंदुग्धंउदकंपूरणावष्टिकामयते।अथवादुग्धमुदकंतेनतत्कार्यमोषध्यादिकंलक्ष्य
ते।ओषध्यादयःप्रवर्धतामितियदाकामयतेआदितअनंतरमेवसंवसतसमाच्छादयंतिकेपर्वतासःपर्वतोइयःकेनअभ्रेणमेघेनकिंच
तविषीयंतोबलमिच्छंतोवीराविशेषेणवृष्टेःप्रेरयितारोमरुतः।श्रथयंतमेघान्॥ ॥अथपंचमी॥ ॥इमामूष्वासुरस्यश्रुतस्यमहींमायां
वरुणस्यप्रवोचं॥मानेनेवतस्थिवाँअंतरिक्षेवियोममेपृथिवींसूर्येण॥ ॥आसुरस्यअसुरसंबंधिनःअसुराणामस्यचर्थेवघातभावृक्ष
बंधःअसुरहंतुरित्यर्थः।अथवाअसुरोमेघःप्राणदानात्तत्संबंधिनःश्रुतस्यमहीमहतीमिमांमायांप्रज्ञांप्रवोचंब्रवीमिकेषामायेतिस्त

ऋ०वे०भा० स्तः। प्रशृण्विरे। एवं स्तुतिं कृतवान् मरुतो गिरा एवयामरुत् स्तुतवान् ता नृम्णस्थिरे कीदृशास्ते सुशुक्वानो दीप्ताः। सुभ्वः। सुष्ठु भवंतः। येषां मरुतां
१०९ सधस्थे। सहस्थाने स्वकीये निवासे तिष्ठतां ईरी ईरयिता प्रेरिता न ईष्टे अतिशक्तो न भवति च चालयितुं आ इति चार्थे अग्नयो न अग्नय इव स्वविद्
युतः। स्वयमेव द्योतमानाः। धुनीनां नदीनां प्रस्यन्द्रासः। वर्षणेन चलयितारः॥ ॥ अथ चतुर्थी॥ ॥ स चक्रमे महतो निरुरुक्रमः समानः
स्मात्सदस एवयामरुत्॥ यदायुक्त त्मना स्वादधि ष्णुभिर्विष्पर्धसो विमहसो जिगाति शेवृधो नृभिः॥ ॥ स मरुद्गणो महतः। प्रवृद्धात्समा
नस्मात् सर्वेषां साधारणात् सदसः। स्थानादंतरिक्षात् उरुक्रमो विस्तीर्णक्रमणः। स चक्रमे निरगच्छत् एवयामरुदृषिः। यदा स्वाश्वकी
यस्थानात् अधीति पंचम्यर्थानुवादी त्मना आत्मनैव। स्नुतिगर्तभिः। स्नुभिः स्थानैरभिआश्वैरयुयुक्त अयुक्तो भवदागमनार्थनाय अथ वहु
वद्व्यते तदानीं विस्पर्धसः। विविधस्पर्धाः। अहं पुरागच्छामीति तेषां स्पर्धा अथवा विगतस्पर्धानित्येषां साध्वसाधकाः। संति विमहसो विशि
ष्टबलाः। शेवृधः। शेवस्य सुखस्य वर्धयितारो जिगाति निर्गच्छंति व्यत्ययेनैकवचनं॥ ॥ अथ पंचमी॥ ॥ स्वनो न वोऽमवान्रेजयद्वृषा त्वेषो
ययिस्तविष एवयामरुत्॥ येना सहंत ऋंजत स्वरोचिषः स्थारश्मानो हिरण्ययाः स्वायुधास इष्मिणः॥ ॥ हे मरुतो वो युष्माकं स्वनो वेगजनि
तः। शब्दो नरेजयत् नकंपयत्तु एवयामरुतं मां सुपां सुलुगिति द्वितीयालुक् स्वनो विशेष्यते अमवान् बलवान् वृषा वर्षिता त्वेषः। त्वेषो दीप्तः। राम
ययिर्गंता तविषः। प्रवृद्धः। येन स्वनेन सहंतः। शत्रून् अभिभवंतो यूयं ऋंजत प्रसाधयथ। लङर्थे लेट्। कीदृशा यूयं स्वरोचिषः। स्वायत्तरश्म १०९
यः। स्थारश्मानः। स्थिररश्मयो हिरण्ययाः। हिरण्याभरणाः। स्वायुधासः। स्वायत्तायुधाः। इष्मिणो गमनवंतो वा॥ ॥ इति चतुर्थस्य

चतुर्थे त्रयस्त्रिंशो वर्गः॥ ॥ अथ षष्ठी॥ ॥ अपारो वो महिमा वृद्धशवसस्त्वेषं शवोऽवत्वेवयामरुत्॥ स्थातारो हि प्रसितौ संदृशि स्थन ते न उरुष्य
ता निदः शुशुक्वांसो नाग्नयः॥ ॥ हे मरुतो वो युष्माकं महिमा अपारो नवधिकः। हे वृद्धशवसः। प्रवृद्धबलाः। त्वेषं दीप्तं शवो युष्माकं बलमव
तु रक्षतु एवयामरुतं मां द्वितीयैकवचनस्य लुक् यूयं प्रसितौ प्रबलबंधने नियमनवति यज्ञे संदृशि संदर्शने नियमेन तिष्ठतो भवथ खलु ते
नोऽस्मान् निदानिंदकाच्छत्रोः सकाशात् उरुष्यत रक्षत अग्नय इव शुशुक्वांसो यूयमिति॥ ॥ अथ सप्तमी॥ ॥ ते रुद्रासः सुमखा अग्नयो यथा
तुविद्युम्ना अवंत्वेवयामरुत्॥ दीर्घं पृथु पप्रथे सद्म पार्थिवं येषामज्मेष्वा महः शर्धांस्यद्भुतैनसां॥ ॥ ते रुद्रासो रुद्रपुत्राः। सुमखाः। शो
भनयज्ञाः। अग्नयो यथा अग्नय इव। तुविद्युम्नाः। प्रभूतदीप्तयः। अथवा अग्निसदृशाः। तुविद्युम्नाः प्रभूतधनाः। अवंतु रक्षंतु एवयामरु
त् एतन्नामानमृषिं मां पार्थिवं पृथिव्यंतरिक्षं तत्संबंधि दीर्घं आयतं पृथु विस्तीर्णं सद्म सदनं प्रथे महद्भिः प्रथितमभूत् अद्भुतैनसां पा
पानां येषां अज्मेषु गमनेषु महो महांति शर्धांसि च आगच्छंतीति शेषः॥ ॥ अथाष्टमी॥ ॥ अद्वेषो नो मरुतो गातुमेतन श्रोता हवं जरितु
रेवयामरुत्॥ विष्णोर्महः समन्यवो युयोतन स्मद्रथ्यो न दंसनाप द्वेषांसि सनुतः॥ ॥ हे मरुतः। अद्वेषः। अद्वेषसो यूयं नोऽस्माकं गातुं गम
नस्थानं वेस्तोत्रं आ इतन आगच्छत जरितुः स्तोतुः एवयामरुत् एवयामरुतो मम हवं श्रोत शृणुत विष्णोर्व्यापकस्येंद्रस्य महो महतो हे समन्यवः।
समानयज्ञाः। यूयं स्मत् प्रशस्तनामप्रशस्तारथ्यो रथिनो योद्धार इव ते यथा शत्रूनपाकुर्वंति तद्वदस्माकं दंसना कर्मणा सनुतः। अंतर्हि
तनामेतत् अंतर्हितानि द्वेषांसि द्वेष्टॄन् अपयुयोतन दूरे वियोजयत पृथक्कुरुत॥ ॥ अथ नवमी॥ ॥ अथोपाकरणोत्सर्गयोर्विनियुक्ता॥ छ॥

ऋ०भा० ॥ गंतानोयज्ञं यज्ञियाः सुशमिश्रोताहवमरक्षएवयामरुत् ॥ ज्येष्ठासो नपर्वतासोव्योमनियूयंतस्य प्रचेतसः स्यातदुर्धर्तवो निदः ॥ ॥ यूयं
११० ज्ञियामरुतोयूयंनोस्माकंयज्ञंगंतआगछत सुशमि शोभनकर्मयथाभवतितथा सुकर्मत्वायेत्यर्थः। तदर्थंनोहवमस्मदीयं आह्वानंश्रोत
श्रुणुत। अरक्षः रक्षोवर्जिताः यूयं लिंगवचनयोर्व्यत्ययः। ज्येष्ठासोनज्येष्ठा यूयंपर्वतासः। विध्यादयइव अतिप्रवृद्धाव्योमनिअंतरिक्षेवर्त्त
मानाः। प्रचेतसोयूयंतस्यनिदोनिंदकस्यदुर्धर्त्ताःस्यातभवत ॥ ॥ इति चतुर्थस्यचतुर्थेचतुस्त्रिंशोवर्गः ॥ ॥ छ ॥ ॥ समाप्तंचात्रेयंपंचमं
मंडलं ॥ ॥ भारद्वाजेषष्ठेमंडलेषडनुवाकाः। तत्रप्रथमेनुवाकेपंचदशसूक्तानि तत्रत्वंह्यग्नइतित्रयोदशर्चं। प्रथमंसूक्तं त्वंह्यग्नेसप्त
नेतिबार्हस्पत्योभरद्वाजः षष्ठंमंडलमपश्यदित्युक्तत्वात्। मंडलद्रष्टासएवभरद्वाजऋषिः। अनादेशपरिभाषया त्रिष्टुप्। मंडलादि
परिभाषयाग्निर्देवता। पशोर्हविष्यवदीयमाने मैत्रावरुणेनानुवचनीयमिदंमनोतासूक्तं। सूत्रितंच। त्वंह्यग्नेप्रथमइत्यन्वाहेति। प्रातरनु
वाकेआग्नेयेक्रतौत्रैष्टुभेछंदस्येतदादिसूक्तत्रयंद्वितीयवर्जंसूत्रितंच। त्वंह्यग्नेप्रथमइतिषण्णांद्वितीयामुद्धरेदिति। आघोपक्रमणेविनि
युक्तासूत्रंतुपूर्वमंत्रेउक्तं ॥ ॥ तत्रप्रथमा ॥ ॥ त्वंह्यग्नेप्रथमोमनोतास्याधियोअभवोदस्महोता। त्वंसींवृषन्नकृणोर्दुष्टरीतुसहोविश्व
स्मैसहसेसहध्यै ॥ ॥ हेअग्नेप्रथमोदेवतानांमध्येप्रथमः प्रकृष्टतमः पूर्वभावीवात्वंमनोताहिदेवानांमनोयत्रऊतंसंबद्धंभवतिताह राम
शोभवतिहि। वाग्वाअग्निः सर्वामनोताग्नौह्यस्यमनोताः संगछंतइत्यादिब्राह्मणप्रसिद्धिद्योतनार्थः। हेदस्मदर्शनीयअस्याधियः अस्यकर्मणोहोता ११०
देवानामाह्वाता अभवः भवसि हेवृषन्कामानांवर्षितः त्वंसींसर्वतः दुष्टरीतु दुःहिंस्यमहिंस्यंसहोबलंकृणोः अकरोः किमर्थंविश्वस्मै

॥ प्रवोमहेमतयोयंतुविष्णवेमरुत्वतेगिरिजाएवयामरुत् ॥ प्रशर्धायप्रयज्यवेसुखादयेतवसेभंददिष्टयेधुनिव्रतायशवसे ॥ ॥ प्रयंतुप्र
गछंतु गिरिजाः गिरिवाविनिष्पन्नामतयः स्तुतयः कस्मैएवंभूतेवचनव्यत्ययः। विष्णवेवामरुत्वतेमरुद्भिस्तद्वते कस्यस्तुतयइत्युच्यते।
यएवयामरुत् एतन्नामकस्यऋषेः। षष्ठ्यालुक्। अथवायन्मूर्धिगिरिजाः स्तुतेनर्जनयिताभवति। उत्तरार्द्धेमरुतः स्तुतिः किंचप्रयंतुस्तुतयः
कस्मैशर्धायबलायमारुताय इतरशर्धंबलंविशेषणं प्रयज्यवेप्रकर्षेणयष्टव्याय सुखादयेशोभनाभरणाय खादिराभरणविशेषः ह
स्तेषुखादिश्चपत्सुखादयइतिचश्रुतेः। तवसेबलवते भंददिष्टयेस्तुतिरूपाइष्टिर्यस्यतत् भंददिष्टिर्यस्यतत् तस्मै धुनिव्रतायमेघानां
चालनंकर्मयस्यतत् ताहृशायशवसेगमनयेति ॥ ॥ अथद्वितीया ॥ ॥ प्रयेजातामहिनायेचनुस्वयंप्रविद्मनाब्रुवतएवयामरुत् ॥ क्रत्वात
द्वोमरुतोनाधृषेशवोदानामह्नातदेषामधृष्टासोनाद्रयः ॥ येमहिनामहत्त्वाविष्णोर्नेर्द्वेणसहप्रजाताः प्रादुर्भूताः तान्नुमरुतएव
यामरुत् ब्रुवतेस्तोति वाक्यादिवादनिघातः प्रत्ययमाख्यातेनवासंबंधीयः। ब्रुवतेइतिव्यत्ययेनबहुवचनेवाञ्छांदसः शः निघाताभाव
श्छांदसः। अथप्रत्यक्षवादः। हेमरुतोवोयुष्माकंतत्प्रसिद्धंशवोबलंक्रत्वादिरूपेणकर्मणायुक्तंनाधृषेकेश्चिदप्याधर्षणीयंनभवति।
अन्येषामसुरादीनांक्रत्वाकर्मणावनाभिभाव्यंभवतिक्रत्वार्थेकिंनदिंचैषांतत्बलं। नाभ्यभिमतदानेनमह्नामहत्त्वेनचोपेतंशवोयूयंप्र
बवा। अधृष्टासः अधर्षणीयाः नचदृष्टांतः। अद्रयोनतेयथाधर्ष्याःतद्वदप्यमपि ॥ ॥ अथतृतीया ॥ ॥ प्रयेदिवोबृहतः शृण्विरेगिरा
सुशुक्वानः सुभ्वएवयामरुत् ॥ नयेषामिरीसधस्थईष्टआँअग्नयोनस्वविद्युतः प्रस्पंद्रासोधुनीनां ॥ ॥ येमरुतोबृहतोदिवोद्युलोकात्

सर्वे॰भा॰ त्वां वर्धंति क्षितयः पृथिव्यां त्वां राय उभयासो जनानां ॥ त्वं त्राता तरणे चेत्यो भूः पिता माता सदमिन्मानुषाणां ॥ ॥ हे अग्ने त्वां क्षितयो मनुष्याः
ऋत्विजः । पृथिव्यां वेदिलक्षणायां वर्धंति वर्धयंति त्वां उभयासो भयविधा अपि पशुरूपाणि जनानां यजमानानां संबंधीरायो धनानि ऋत्विजो
१११ ध्वर्य्वादयः । त्वामुद्दिश्य वर्धयंति । हे तरणे अथवा उभयविधानि धनानि गवादीनि जनानां पुत्रादीनामर्थाय प्राप्तुं त्वां वर्धंति । हे तरणे दुः
खात्तारकाग्ने त्वं चेत्यो ज्ञातव्यः । स्तुत्यः सन् त्राता रक्षिता भूः भवसि किं च मानुषाणां मनुष्याणां स्तोतॄणां अस्माकं सदमित् सर्वदा पिता माता
च मातापितृस्थानीयो भूर्भवसि ॥ ॥ इति चतुर्थस्य चतुर्थे पंचत्रिंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ सपर्येण्यः स प्रियो विक्ष्वग्निर्होता मंद्रो नि षसा
द यजीयान् ॥ तं त्वा वयं दम आ दीदिवांसमुप ज्ञुबाधो नमसा सदेम ॥ ॥ सोग्निः सपर्येण्यः पूज्यः प्रियकामानां प्रियकरः विक्षु प्रजा
सु होता होमनिष्पादकः मंद्रो मदनीयः यजीयान् अतिशयेन तरदेवानां यष्टा यजनीय एवं महानुभवोग्निः निषसाद निषण्णो भूत् अथ प्रत्य
क्षभूतः । तं त्वा तादृशं त्वां वयं यजमाना इह गृहे दीदिवांसं दीप्यमानं ज्ञुबाधः ज्ञु नवाधयंतः अवनतजानवः आनताः प्रणताः संतो नमसा
स्तोत्रेणोपासदेम आसादयेम । अथवा उपासदेमेत्यवमाज्ञास्तु ॥ ॥ अथ सप्तमी ॥ ॥ तं त्वा वयं सुध्यो३ नव्यमग्ने सुम्नायव ईमहे देवयंतः ॥ त्वं वि
शो अनयो दीद्यानो दिवो अग्ने बृहता रोचनेन ॥ ॥ हे अग्ने तं तादृशं महानुभावं नव्यं स्तुत्यं त्वां सुध्यः शोभनबुद्धयः सुम्नायवः सुखमिच्छं राम
तो वयं ईमहे । याचामहे स्तुमहे इत्यर्थः । हे अग्ने त्वं दीद्यानो दीप्यमानः सन् बृहता महता रोचमानेन रोचमानेन तेजसा दीद्यानः विशः प्र १११
जाः स्तोतॄन् अस्मान् दिवः स्वर्गं अनयः अगमयः रोचनेन दिव्येन दिवं गमयतु इति वा संबंधः आदित्यमार्गेण इत्यर्थः ॥ ॥ अथाष्टमी ॥ ॥

विशां कविं विश्पतिं शाश्वतीनां नितोशनं वृषभं चर्षणीनां ॥ प्रेतीषणिमिषयंतं पावकं राजंतमग्निं यजतं रयीणां ॥ ॥ शाश्वतीनां नित्यानां विशां ऋ
त्विग्यजमानलक्षणानां विश्पतिं स्वामिनं कविं क्रांतदर्शिनं नितोशनं शत्रूणां हिंसकं वृषभं कामानां वर्षकं चर्षणीनां स्तोतॄणां मनुष्याणां
प्रेतीषणिं शत्रुगमनं इषयंतं अन्नं कुर्वंतं पावकं शोधकं राजंतं दीप्यमानं दीपयंतं वा रयीणां शोभाय यजतं यष्टव्यमग्निं स्तुमः इति शेषः ॥ ॥ अथ
नवमी ॥ ॥ सो अग्न ईजे शशमे च मर्तो यस्त आनट् समिधा हव्यदातिं ॥ य आहुतिं परि वेदा नमोभिर्विश्वेत्स वामा दधते त्वोतः ॥ ॥ हे अग्ने सो मर
र्त्यः स यजमान ईजे यजते शशमे च स्तोति शशमान इति स्तुतिकर्म सु पाठात् इदमपि स्तुतिकर्म यो यजमानस्ते तव समिधा सह हव्यदातिं हविर्दा
दानं आनट् करोति किं च यो यजमानो नमोभिः स्तुतिभिः आज्यादिलक्षणां परिवेद परितो वेत्ति ददातीत्यर्थः स यजमानस्त्वोतः त्वया रक्षितः
सन् विश्वेत् सर्वाण्येव वामा वननीयानि धनानि दधते धारयति ॥ ॥ अथ दशमी ॥ ॥ अस्मा उ ते महि महे विधेम नमोभिरग्ने समिधोत हव्यैः ॥
वेदी सूनो सहसो गीर्भिरुक्थैरा ते भद्रायां सुमतौ यतेम ॥ ॥ हे अग्ने महते अस्मै ते तुभ्यं महि महत् अत्यधिकं विधेम परिचरेम केनेति उच्य
ते नमोभिर्नमस्कारैः समिधा वा उतापि च हव्यैर्हविर्भिः हे सहसः सूनो देव देवीर्वेदी गीर्भिः स्तोत्रैः उक्थैः शास्त्रैश्च विधेमेति संबंधः किं च
ते तव भद्रायां सुमतौ शोभनानुग्राहबुद्धौ आ यतेम आगता भवेमेत्यर्थः ॥ ॥ अथैकादशी ॥ ॥ आ यस्ततंथ रोदसी वि भासा श्रवोभिश्च श्रवस्य१
स्तरुत्रः ॥ बृहद्भिर्वाजैः स्थविरेभिरस्मे रेवद्भिरग्ने वितरं वि भाहि ॥ ॥ हे अग्ने यस्त्वं रोदसी द्यावापृथिव्यौ भासा दीप्त्या आततंथ ततनोः किं च त
रुत्रः तारकस्त्वं श्रवोभिः स्तुतिभिः श्रवस्यः भवसि हे तादृशाग्ने बृहद्भिर्महद्भिर्वाजैरन्नैः स्थविरेभिः स्थविरैः स्थूलैः रेवद्भिरयमद्भिः अस्मे

चतुर्थाष्ट
११२

अस्मदर्थं वितरं विशिष्टतरं विभाहि विधेहि दीपयस्व ॥ ॥ अथ द्वादशी ॥ ॥ नृवद्वसो सदमिद्धेह्यस्मे भूरि तोकाय तनयाय पश्वः ॥ पूर्वीरिषो बृ भाष्य
हतीरारे अघा अस्मे भद्रा सौश्रवसानि सन्तु ॥ ॥ हे वसो वासक धनाग्ने नृवत् मनुष्यरूपैर्धनैः सहितं सर्वदास्मे अस्मासु धेहि स्थापय किंच
भूरि प्रभूतान् पश्वः पशून् च धेहि । किमर्थं तोकाय अस्मत्पुत्राय तनयाय तत्पुत्राय । किंच पूर्वीः प्रभूताः इषः कामानां बाह्या बृहतीर्महतीः ॥ आरे
अघा दूरे अघानि यासु ताः स्याद्दृशा इषः । उत्तमलक्षणान्यन्नानि भद्राभद्राणि सौश्रवसानि सुखवन्ति अस्मे अस्मासु संतु भवन्तु ॥ ॥
॥ ॥ अथ त्रयोदशी ॥ ॥ पुरूण्यग्ने पुरुधा त्वाया वसूनि राजन्वसुता ते अश्यां ॥ पुरूणि हि त्वे पुरुवार सन्त्यग्ने वसु विधते राजनि त्वे ॥ ॥ त्र
योदशी तु षष्ठस्य भरणी पेष्टो अग्नेः । क्षत्रवंतो नु वाक्या । सूत्रितं च । पुरूण्यग्ने पुरुधा त्वा । यास विश्व चित्रं चितयंत मस्मे इति । तस्या उक्ता पुरू
ण्यग्न इति । हे अग्ने राजन् तेतव पुरूणि बहूनि पुरुधा गवाश्वादिरूपेण बहुप्रकाराणि वसूनि धनानि वसुताये वसुमत्त्वाय त्वया अश्यां व्याप्नुयां
भुंजीय वा ॥ अत्र भरतस्वामी वसुतात्येतत्पदं सप्तम्यंतं चकार भट्टतारकाश्मिश्रोपि एकपदं संबुध्यंतं चकार ॥ हे पुरुवार बहुभिर्वरणीया
ग्ने राजन् विराजमाने त्वे त्वयि पुरूणि बहूनि च रूपाणि ते त्वां विधते परिचरते मह्यं दातव्यानि सन्ति ॥ ॥ छ ॥ ॥ इति चतुर्थस्य चतुर्थे [illegible]विंशो
वर्गः ॥ ॥ छ ॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ॥ छ ॥ ॥ इति श्रीमन्महाराजाधि राम
राजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्सं ११२
हिताभाष्ये चतुर्थाष्टके चतुर्थोध्यायः ॥ ॥ छ ॥ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ ॥ छ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ छ ॥ ॥

२९

सहः सर्वस्यापि बलवतः सहध्यै अभिभवनाय ॥ ॥ अथ द्वितीया ॥ ॥ अधा होता न्यसीदो यजीयानिळस्पद इषयन्नीड्यः सन् ॥ तं त्वा नरः प्र
थमं देवयंतो महो राये चितयंतो अनु ग्मन् ॥ ॥ अध अधुना हे अग्ने यजीयान् अतिशयेन यष्टा त्वं होता होमनिष्पादकः सन् इळो भूम्याः
वेदिलक्षणायाः पदस्थाने न्यसीदो निषण्णवानसि किं कुर्वन् इषयन् एषु पुरोडाशादिलक्षणमन्नमिच्छन् ईड्यः स्तुत्यः सन् तं तादृशं
त्वां प्रथमं इतरदेवताभ्यः पूर्वं देवयंतो जानंतः स्तुत्यान् ज्ञापयंतो देवं त्वामिच्छंतो नरो नेतारो मनुष्या ऋत्विग्यजमानाः महो महते
राये धनाय चितयंतो जानंतः स्तुत्यान् ज्ञापयंतो वा । अनु ग्मन् अन्वगच्छन् पूर्वं ॥ ॥ अथ तृतीया ॥ ॥ वृतेव यंतं बहुभिर्वसव्यैस्त्वे रयिं जागृ
वांसो अनु ग्मन् ॥ रुशंतमग्निं दर्शतं बृहंतं वपावंतं विश्वहा दीदिवांसं ॥ ॥ वृतेव मार्गेणेवेति संप्रत्ययार्थे लोकद्वयमध्यगतेन मार्गेण ब
हुभिरनेकैर्वसव्यैः वसुभिः स्वार्थिकस्तद्धितप्रत्ययः । यजमानानां निवासयोग्यैर्धनैः सार्धं यंतं गच्छंतं त्वा अनु ग्मन् अनुगच्छंति संभजंते ।
यजमानाः कीदृशाः त्वे त्वयि देवे रयिं धनं जागृवांसः प्रयच्छंत इत्यर्थः । कीदृशं त्वामिति उच्यते रुशंतं दीप्तवर्णं अग्निं अंगनादिगुणविशि
ष्टं दर्शतं दर्शनीयं बृहंतं महांतं वपावंतं विश्वहा सर्वेषु कालेषु दीदिवांसं दीप्यमानं ॥ ॥ अथ चतुर्थी ॥ ॥ पदं देवस्य नमसा व्यंतः श्रवस्यवः श्र
व आपन्नमृक्तं ॥ नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयंत संदृष्टौ ॥ ॥ देवस्य द्योतमानस्याग्नेः पदं आहवनीयादिस्थानं नमसा हविषा स्तोत्रे
ण वा व्यंतः गच्छंतः श्रवस्यवो अन्नमिच्छंतः पूर्वे यजमानाः श्रवः सर्वत्र श्रूयमाणमन्नं अमृक्तं अन्यैरपरिबाध्यमन्नं आपन् आप्नुवंति हे अग्ने तेन
वे भद्रायां स्तुत्यायां संदृष्टौ निमित्ता यां रणयंत रमयंत यज्ञयोग्यानि नामानि नमनीयानि वैश्वानरो जातवेदा इत्यादीनि दधिरे ॥ ॥ अथ पंचमी ॥ ॥

ऋ॰ भा॰ च श्रूयते अग्निर्वायुः सूर्यस्ते वै वाजिन इति वायुः सप्तिः। आदित्यो वा दितिर्वा। कीदृशो वाजी अद्रुहः अहिंसकः रहितः। रजःस्तूः उदकमन्तरजः उच्य
ते तस्य वृष्टिलक्षणस्य प्रेरयिता यद्वा रजसां लोकानां तरिता गन्ता विश्वचर्षणिः सर्वस्य द्रष्टा॥ ॥अथ तृतीया॥ ॥सजोषस्त्वा दिवो नरो यज्ञस्य केतु
११२ मिन्धते॥ यद्ध स्य मानुषो जनः सुम्नायुर्जुह्वे अध्वरे॥ ॥हे अग्ने सजोषः सजोषसा सह प्रियमाणः दिवः नरो नेतारः ऋत्विजः यज्ञस्य केतुं प्र
ज्ञापकं त्वां इन्धते समिद्धं कुर्वन्ति। कदेति तदुच्यते। यद्ध यदा खलु स्यः सः मानुषः मनोरपत्यभूतो जनः जातो यजमानः होता वा सुम्नयुः सु
म्नं सुखमात्मन इच्छन् अध्वरे हिंसाप्रत्यवायरहिते यज्ञे त्वां आह्वयति॥ तदेत्यर्थः॥ ॥अथ चतुर्थी॥ ॥ऋधद्यस्ते सुदानवे धिया मर्तः शशाम
ते॥ ऊती ष बृहतो दिवो द्विषो अंहो न तरति॥ ॥ऋधत् यजमानः ऋध्नुयात् हे अग्ने सुदानवे शोभनदानाय ते तुभ्यं षष्ठ्यर्थे चतुर्थी तव सं
बंधिन्या धिया कर्मणा मर्त्तो मरणधर्मा यजमानः आ शशमते शाम्यतिर्यद्वा शमतिः स्तुतिकर्मा तदर्थं कर्मणा युक्तः सन् स्तौति स यजमानः बृह
तो महतः दिवो द्युलोकस्य तव संबंधिन्या ऊती ऊत्या रक्षया द्विषो द्वेष्टॄन् अंहः अंहो न आहननशीलं पापमिव तरति अतिक्रामति॥ ॥अथ पंचमी॥
समिधा यस्त आहुतिं निशितिं मर्त्यो नशत्॥ वयावन्तं स पुष्यति क्षयमग्ने शतायुषं॥ ॥हे अग्ने समिधा समिंधनहेतुभूतेनेंधनेन सह तेन त राम
दीयां निशितिं तनूकृत्वा संस्कृतामाहुतिं यो मर्त्यो मनुष्यो नशत् व्याप्नुयात् नशतिर्व्याप्तिकर्मा स मनुष्यो यजमानः वयावन्तं वयाः शाखाः ११२
पुत्रपौत्रादिलक्षणाः तद्वन्तं शतायुषं बहुविधान्नं चिरकालजीवनं वा क्षयं गृहं च पुष्यति पोषयति वर्धयति तत्र कालमवतिष्ठत इत्यर्थः॥६॥

॥ ॥इति चतुर्थस्य पंचमे प्रथमो वर्गः॥ ॥अथ षष्ठी॥ ॥त्वेषस्ते धूम ऋण्वति दिवि षंछुक्र आततः॥ सूरो न हि द्युता त्वं कृपा पावक रोचसे॥ ॥हे
अग्ने त्वेषः दीप्तस्य ते तव शुक्रः निर्मलः शुभ्रवर्णो वा धूमः दिवि अंतरिक्षे आततो विस्तीर्णः सन् ऋण्वति मेघात्मना परिणतो गच्छति अपि च हे पा
वक शोधकाग्ने सूरो न सूर्य इव कृपा अभिमुखीकरणसमर्थया स्तुत्या स्तूयमानस्त्वं द्युता दीप्त्या रोचसे हि दीप्यसे खलु॥ ॥अथ सप्तमी॥ ॥
अधा हि विक्ष्वीड्योऽसि प्रियो नो अतिथिः॥ रण्वः पुरीव जूर्यः सूनुर्न त्रययाय्यः॥ ॥अध अपि च विक्षु प्रजासु हे अग्ने त्वं ईड्यः स्तुत्योऽसि हि
यस्मादर्थे यस्मादेवं तस्मात् नो अस्माकं अतिथिः लुप्तोपमानमेतत् अतिथिरिव प्रियोऽसि यद्वा हविर्वहनाय सततगामी भूत्वा अस्माकं प्रियोऽसि तथा
पुरीव नगर्यां जूर्यः जीर्णो वृद्धो हितोपदेष्टा राजेव रण्वो रमणीयो गंतव्यो वा भवसि तथा सूनुर्न पुत्र इव त्रययाय्यः यजमानैः त्रातव्यः पालयि
तव्यो भवसि त्रायतेः दृर्पीय हैतस्मात् नोर्विज्ञोषलोविधा त्रयः कर्मलक्षणत्रयं यातीति त्रययाय्यः यातेरोणादिक आय्यप्रत्ययः स्पृहयाय्य
इतिवत् अथवा त्रययाय्यो जन्मत्रयं स्मृतमिति तादृशः पुत्र इव रण्वो रमणीयोऽसि॥ ॥अथाष्टमी॥ ॥क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः॥
परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः॥ ॥हे अग्ने क्रत्वा कर्मणा मंथनरूपेण द्रोणे काष्ठे अरण्यो विद्यमानस्त्वं अज्यसे हि यजसे खलु तथा
ह्वार्यो नि वेगवानश्व इव कृत्व्यः कृतीति कर्मनाम हविर्वहनादीनां कर्मणां कर्त्ता स यथा पुरुषं वहति तद्वत् हविर्वहनमग्ने अश्वसादृश्यं तथा
परिज्मेव परितः सर्वत्र गंता वायुरिव दावानलादिरूपेण सर्वत्र गंता स्वधा अन्ननामैतत् अन्नं गयः गृहं च भवासि उभयोदातेत्यर्थः॥ अपि च

शिशुर्जातमात्रो बालो ऽश्वो न सततगामी जात्यश्व इव ह्वार्यः कुटिलेन गमितः गंता सिद्धः कौटिल्य इत्यस्यैतद्रूपं। कारीर्यामुग्नेः दासच्छदौवैक
लिक्यनुवाक्ये पुरोनुवाक्या त्वं त्येति सूत्रितं च। त्वं त्या चिदच्युताधामेते विश्वमिति सप्तमी॥ ॥त्वं त्या चिदच्युताग्ने पशुर्न यवसे॥ धामा ह यत्
ते अजर वना वृश्चति शिक्वसः॥ ॥हे अग्ने त्वं त्यानि तानि काष्ठानि चित् अच्युताश्च समानार्थोभिः क्रमः अच्युताच्युतानि च्यावयितुमशक्या
न्यपि अश्नासि भोषः। तत्र दृष्टांतः। यवसे विसृष्टः पशुर्न पशुरिव सयथा सर्वं भक्षयति तथा त्वं प्रौढकाष्ठादीनि क्षणमात्रेण दहसीत्यर्थः। हे अ
जर जरारहिताग्ने यद्यस्य सुपांसुलुगिति षष्ठ्या लुक्। वृश्चिकः सो ऽहीत्यस्य ते तव धामा धामानि तेजांसि वनावननीयानि संभजनीयान्यरण्यानि
वृश्चति छिंदंति भक्षयंति सत्वं मिति पूर्वंगान्वयः। ह इत्येतत्पदपूरणं॥ ॥अथ दशमी॥ ॥वेषि ह्यध्वरीयतामग्ने होता दमे विशां॥ समृधो विश्प
ते कृणु जुषस्व हव्यमंगिरः॥ ॥हे अग्ने अध्वरीयतां अध्वरं यज्ञमात्मन इच्छतां विशां यजमानानां दमे गृहे त्वं होता देवानामाह्वाता वेषि हि स्तु
तिं हवींषि वा यतः कामयसि अतः कारणात् विश्पते विशां पालकाग्ने समृधः समृद्धाननु अस्मान् यजमानान् कृणु कुरु कृत्वा च हे अंगिरः
अंगनादिगुणयुक्त अंगाररूप वाग्ने हव्यं अस्मदीयं हविः जुषस्व सेवस्व॥ ॥अथैकादशी॥ ॥अच्छा नो मित्रमहो देव देवानग्ने वोचः सु
मतिं रोदस्योः॥ वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा तरेम॥ ॥हे मित्रमहः अनुकूलदीप्ते देव दानादि
गुणयुक्ताग्ने रोदस्योः द्यावापृथिव्योर्वर्तमानः त्वं देवान्नूयहव्यानिंद्रादीन् अच्छ आभिमुख्येन नो ऽस्माकं सुमतिं वोचः ब्रूहि दिवः द्युलोकात् नॄन्

राम
११४

॥ श्रीगुरुमूर्तये नमः॥ ॥यस्य निश्वसितं वेदा यो वेदेभ्योखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥अथ पंचमाध्याय आरभ्यते॥ एवं मंड
लस्य षडनुवाकात्मकस्य प्रथमे ऽनुवाके पंचदश सूक्तानि॥ तत्र त्वं हीत्येकादशर्चं द्वितीयं सूक्तं। भरद्वाजस्यार्षं। अंत्या षट्पंचाशदक्षरा श
क्वरी आदितो दशानुष्टुभः। अनुक्रम्यते हि त्वं ह्येकादशानुष्टुप् शाक्वर्यंतमिति। प्रातरनुवाके आग्नेये क्रतौ आनुष्टुभे छंदसि इदं सूक्तं
समावर्जं विनियुक्तं। सूत्र्यते हि। त्वं हि क्षैतवद्यशो होता जनिष्टेति। आश्विनशस्त्रे चैतत् शंसनीयं। प्रातरनुवाकन्यायेन स्तिनिर्दिष्टत्वात्। अंगिर
सां द्विरात्रे द्वितीये ऽहनि इदमेव सूक्तमाज्यशस्त्रं। सूत्रितं च। त्वं हि क्षैतवदिति चाज्यमिति॥ ॥तत्र प्रथमा॥ ॥त्वं हि क्षैतवद्यशो ऽग्ने मित्रो न पत्यसे॥
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि॥ ॥हे अग्ने त्वं हि त्वं खलु क्षैतवत् क्षितिः क्षयोपचयः तत्संबंधि क्षैतं शुष्कं काष्ठं तद्युक्तं यशो ऽन्नं हविर्ल
क्षणं पत्यसे अभिपतसि गच्छसि। तत्र दृष्टांतः। मित्रो न अहरभिमानी देवो मित्रः सइव यद्वा क्षयंतीति गृहनाम क्षैतवत् क्षैतं निवासकं हवि
र्लक्षणमन्नं तद्युक्तं यजमानगृहं मित्रभूतः पुरुष इवाभिपतसि। यद्वा पत्यतिरैश्वर्यकर्मा। ईदृशमन्नं पत्यसे ईशिषे। यतः कारणात् हे
विचर्षणे विशेषेण सर्वस्य द्रष्टः वसो वासकाग्ने त्वं यजमानगृहस्थं न। अयं न शब्दः श्रव आर्थे अन्नकार्यभूतां पुष्टिं च पुष्यसि वर्धयसि॥ ॥अ
थ द्वितीया॥ ॥त्वां हि ष्मा चर्षणयो यज्ञेभिर्गीर्भिरीळते। त्वां वाजी यात्यवृको रजस्तूर्विश्वचर्षणिः॥ ॥हे अग्ने त्वां हि स्म त्वामेव खलु चर्षणयो
मनुष्याः यज्ञेभिर्यज्ञसाधनैर्हविर्भिः स्तुतिभिः ईळते स्तुवंति। अपि च वाजी वाजो गमनं तद्वान् सूर्यः त्वा यातिगच्छति प्रविशतीत्यर्थः। तथा

स्मान् सुक्षितिं शोभननिवाससंयुक्तं स्वस्तिं अविनाशं वा अभिगमय वेतितं चांतर्भावितण्यर्थो द्रष्टव्यः॥ वयं च द्विषो द्वेष्टॄन् शत्रून् अंहांसि पापानि दु
रितानि तत्फलरूपाणि दुर्मनानि तरेम अतिक्रामेम तथा तानि व्यवहितानि जन्मांतरकृतानि पापादीनि तरेमत्क एवार्थो द्राढ्याय पुनरुच्य
ते हे अग्ने तवावसा त्वदीयरक्षणेन अंहस्पशमतीनुत्तरेम॥ ॥इति चतुर्थस्य पंचमे द्वितीयो वर्गः॥ ॥अग्ने सक्षेषदिति सप्तर्चं तृतीयं सूक्तं भरद्वा
जस्यार्षं त्रैष्टुभमाग्नेयं॥ अनुक्रांतं च॥ अग्ने सप्तेति प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥ ॥तत्र प्रथमा॥ ॥अग्ने सक्षेषद्धतपा ऋत
तेजा उरु ज्योतिर्नशते देवयुष्टे॥ यं त्वं मित्रेण वरुणः सजोषा देव पासि त्यजसा मर्तमंहः॥ ॥हे अग्ने स यजमानः क्षेषत् क्षियति निवसति
चिरकालं जीवेदित्यर्थः॥ कीदृशो यजमानः ऋतपाः ऋतस्य यज्ञस्य पालकः ऋतेजाः यज्ञनिमित्तं जातः अपि त्वा च ते त्वदीया देवयुः देवान् आल
न इच्छन् स यजमानः उरु विस्तीर्णं ज्योतिः सूर्याख्यं नशते प्राप्नोति हे देव द्योतमानाग्ने यं मर्त्यं मनुष्यं यजमानं मित्रेण वरुणः तृतीयार्थे प्रथ
मा॥ वरुणेन च सजोषाः सह प्रियमाणः त्वं त्यजसा धनेनायुधेन अंहः अंहसः पापात् पासि रक्षसि। स यजमान इति पूर्वेण संबंधः॥ ॥अ
थ द्वितीया॥ ॥ईजे यज्ञेभिः शशमे शमीभिरृधद्वारायाग्नये ददाश॥ एवा चन तं यशसामजुष्टिर्नांहो मर्तं नशते न प्रदृप्तिः॥ ॥यो यजमा
नः ऋधद्वाराय ऋधत्समृद्धं वारं वरणीयं धनं यस्य तादृशायाग्नये ददाश हवींषि ददाति। स यज्ञेभिः सर्वैर्यज्ञैः ईजे इष्टवान् भवति तथा श
मीभिः कर्मभिः कृच्छ्रचांद्रायणादिभिः श्वर्वा शशमे श्रांतो भवति आग्नेयेन यागेन सर्वं फलं लभ्यत इत्यर्थः। अपि च तं यजमानं यशसां यश

सं॰भा॰ स्विनां पुत्राणां अनुत्पत्तिर प्राप्तिः नैव नशाते नैव प्राप्नोति पुत्रवान्भवत्येवेत्यर्थः। तथा मर्त्तं मनुष्यं अंहः पापं न नशाते तथा प्रदृप्तिः अनर्थहेतु
र्दर्पश्च तं न प्राप्नोति॥ ॥अथ तृतीया॥ ॥सूरो न यस्य दृशतिररेपा भीमा यदेति शुचतस्त आधीः॥ हेषस्वतः शुरुधो नायमक्तोः कुत्राचिद्र
११५ ण्वो वसतिर्वनेजाः॥ ॥सूरो न सूर्यस्येव अस्याग्नेः दृशतिः दर्शनं अरेपाः पापरहितं हे अग्ने यत् यस्य ते तव शुचतः ज्वलतः धीः धारयि
त्री ज्वाला भीमा भयंकरा सती आसमन्तादेति गच्छति यायमग्निः हेषस्वतः शब्दयुक्ताः शुरुधः शुचः शोकस्य रोधयित्रीः गाश्च अक्तोः अकु
रितिरात्रिनाम तेन च तत्र संचारी राक्षसादिर्लक्ष्यते राक्षसादेः स्वभूता नृदहतीति शेषः सोयं वसतिः सर्वेषामावासभूतः वनेजाः अरण्य
जायमानाः कुत्रचित्क्वचिदेवस्थाने पर्वताग्रादौ रण्वो रमणीयो भवति॥ ॥अथ चतुर्थी॥ ॥तिग्मं चिदेम महि वर्पो अस्य भसदश्वो न यम
सान आसा॥ विजेहमानः परशुर्न जिह्वां द्रविर्न द्रावयति दारु धक्षत्॥ ॥यस्याग्नेः एम गमनभूतो मार्गः तिग्मं तीक्ष्णं दुस्समवाक्यवात्व
स्य वर्पो रूपं महि महत्प्रभूतं भसत् दीप्यते भस भर्त्सनदीप्त्योः इति धातुः कीदृशोग्निः अश्वोन अश्व इव आसा आस्येन यमसानः तृणादि
कं नियच्छन् परशुर्न यथा परशुः स्वकीयां धारां काष्ठे प्रक्षिपति तथा स्वकीयां जिह्वां ज्वालां विजेहमानः तरुगुल्मादौ प्रक्षिपन् तथा दारु काष्ठं राम
धक्षन् दहन् द्रविर्न द्रावयिता स्वर्णकारः स यथा स्वर्णादिकं द्रावयति तथा सर्वं घनं द्रावयति मूर्त्तभूतं सर्वं भस्मसात्करोतीत्यर्थः॥ ॥अथ ११५
पंचमी॥ ॥स इद्दस्तेव प्रति धादसिष्यञ्छिशीत तेजोयसो न धारां॥ चित्रध्रजतिररतिर्यो अक्तोर्वेर्न द्रुषद्वा रघुपत्मजंहाः॥ ॥स कृतसरवत्

च॰भा॰ नोत्स्वशोचिषा इद्ममकरोत्। यश्च घृणानसंचलनशीलेन दीप्तेनेव ध्वजसा गमनशीलेन तेजसा पत्मना द्रुतक्षत। यन्नुगच्छन्नुपवर्त्ततेसोग्निः दे
अस्मभ्यं च्छत्रं नु दमयन्नसुपत्नी शोभनपतिके रोदसी द्यावापृथिव्यौ वसुना धनेन आपूरयति॥ ॥अथाष्टमी॥ ॥धायोभिर्वा यो युज्येभिरर्कैर्वि
११६ द्युन्न दविद्योत्स्वेभिः शुष्मैः॥ शर्धो वा यो मरुतां ततक्ष ऋभुर्न त्वेषो रभसानो अद्यौत्॥ ॥यो अग्निः धायोभिर्वा धारकै रश्मिभिर्वा युज्येभिः यु
ज्यैः स्वयमेव युज्यमानैः अर्कैः अर्चनीयैर्दीप्तिभिर्गच्छति सोग्निः विद्युन्न विद्युदिव स्वेभिः स्वकीयैः शुष्मैः शोषकैस्तेजोभिः दविद्योत् वि
द्योततेयश्च मरुतां एतत्संज्ञकानां शर्धो वा बलमिव ततक्ष तनूकरोति सर्वं तीक्ष्णीकरोति शोषयति ऋभुर्न भासमानः सूर्य इव त्वेषो दीप्तः रभ
सानो वेगं कुर्वन् अद्यौत् विद्योतते प्रकाशते॥ ॥इति चतुर्थस्य पंचमे चतुर्थो वर्गः॥ ॥यथा होतरिति सप्तर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टु
भमाग्नेयं यथा होतरित्यनुक्रांतं प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥ ॥तत्र प्रथमा॥ ॥यथा होतर्मनुषो देवताता यज्ञेभिः सू
नो सहसो यजासि॥ एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान्॥ ॥हे होतः देवानामाह्वातः सहसः सूनो बलस्य पुत्राग्ने यथा य
न प्रकारेण मनुषः मनोः प्रजापतेः यजमानस्य देवताताय यज्ञनामैतत् देवताता यज्ञे यज्ञेभिः यजमानसाधनैर्हविर्भिर्यजासि देवान् यजसि। एवमे राम
वहे अग्ने नः अस्माकं अद्यास्मिन्नपि यज्ञे समानान् कामयमानस्त्वं उशन् कामयमानान् यष्टव्यान् देवान् समना क्षिप्रं यक्षि यज। यद्वा समा ११६
नं मन्यते अस्मिन् देवा निति समानोयज्ञः तस्मिन्निति योज्यं॥ ॥अथ द्वितीया॥ ॥स नो विभावा चक्षणिर्न वस्तोरग्निर्वंदारु वेद्यश्चनो धात्। वि

श्वायुर्यो अमृतो मर्त्येषूषर्भुद्भूदतिथिर्जातवेदाः॥ ॥वस्तोरहनि चक्षणिर्न प्रकाशकः सूर्य इव विभावा विशेषेण दीप्यमानः वेद्यः सर्वैर्ज्ञातव्यो
लंभनीयो वा सोग्निः नोस्मभ्यं वंदारु वंदनीयं स्तुत्यं चनः अन्नं धात् दधातु प्रयच्छत्वित्यर्थः। विश्वायुः सर्वान्नः सर्वेषां जीवनहेतुर्यो अमृतो
मरणरहितः अतिथिर्हविर्वहनाय सततगामी जातवेदाः जातानां वेदिता जातधनो वा एवंभूतो यो अग्निः मर्त्येषु मनुष्येषु यजमानेषु उषर्भुद्भू
त् उषःकाले अग्निहोत्रे होमार्थं प्रबुद्धो भवति स इति पूर्वत्रान्वयः॥ ॥अथ तृतीया॥ ॥द्यावो न यस्य पनयंत्यभ्वं भासांसि वस्ते सूर्यो न शु
क्रः। वि य इनोत्यजरः पावको अश्नस्य चिच्छिश्नथत्पूर्व्याणि॥ ॥नेति संप्रत्यर्थे उक्तं च अस्य उपमार्थस्य संप्रत्यर्थेपि प्रयोग इति द्यावः स्तो
तारः संप्रतीदानीं यस्याग्नेः अभ्वं महत्कर्म पनयंति स्तुवंति सोग्निः सूर्यो न सूर्य इव शुक्रः शुक्रवर्णः सन् भासांसि तेजांसि वस्ते आच्छाद
यति यश्च अजरो जरारहितः पावकः सर्वस्य शोधकोग्निः वि इनोति भासा सर्वं व्याप्नोति सोयं अश्नस्य चित् व्यापनशीलस्यापि रक्ष
सः पूर्व्याणि चिरंतनानि पुराणानि शिश्नथत् श्नथ क्नथ हिंसायामिति धातुः॥ ॥अथ चतुर्थी॥ ॥वद्मा हि सूनो अस्यद्मसद्वा चक्रे अ
ग्निर्जनुषाज्मान्नं॥ स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यंतः॥ ॥हे सूनो सहसः पुत्र वद्मा सर्वस्य प्रेरकाग्ने वग्नावंदनीयः स्तुत्यो सि
हि परः पादः परोक्षकृतः अद्मसद्वा अद्मसद्मा ये पुरुहविषि सीदत् हविः स्वीकरणाय प्रविशन् अग्निः जनुषा जन्मना अज्म अज्मे अन्नम
गृहनामैतत् गृहमन्नं च यजमानानां चक्रे करोति हे ऊर्जसन ऊर्जस्यान्नस्य दातरग्ने नोस्मभ्यं प्रवृद्धो भवति स त्वं ऊर्जमन्नं धाः देहि तथा

ऋ॰भा॰ राजेवजेः अस्मच्छत्रून् जयएतत्सर्वं अहं केराक्षसादिभिर्बाधकैर्वियुक्तो अस्मदीययज्ञागारे अंतर्मध्ये क्षेषि निवससि॥ ॥अथ पंचमी॥ ॥नितिक्ति
योवारणमन्नमतिवायुर्नराज्यत्यस्य कृन्॥ तुर्यामयस्त आदिशामरातीरत्यो न ह्रुतः पततः परि ह्रुत्ः॥ ॥योग्निः वारणं तमसो निवारकं स्वकी
११७ यं तेजः नितिक्ति निशितं तीक्ष्णीकरोतितिजनिशातन इति धातुः यस्मान्नयंत्तेत्रीयमाणं हविर्भक्षणं अत्ति भक्षयति तथा च श्रूयते अन्नादो वाए
षोन्नपतिर्यदग्निरिति सोग्निः वायुर्न वायुरिव राष्ट्री ईश्वरनामैतत् राष्ट्रं राज्यं तद्वान् वायुर्यथा स्वमाहात्म्येन सर्वमीदे तद्वत् सर्वस्येश्वर इत्यर्थः
तादृशः स त्वं अक्तून् रात्रीः अत्येति अतिक्रामति तद्गतमंधकारं तिरस्करोती सः वयं च तस्य सादात् तुर्याम योयजयामः तेनुग्रं आदिशां आदि
श्यमानानां दीयमानानां हविषां अरातीः अरातिवत् अतो छांदसं दीर्घः यद्वा अरातीर्धनस्यादातृन् तेलांप्रति आदिशां आदेष्टृणां आचक्षा
णामस्माकं योजनोविरोधी तं हिं स्याम त्वं च अत्यो न शीघ्रगामी ात्यश्व इव ह्रुतः हिंसकादन्यतः अभिमुख्येन गच्छतः शत्रून् परिह्रुत् परि
तोस्य हंता भव। ह्वयते र्हिंसार्थस्यैतद्रूपं॥ ॥इति चतुर्थस्य पंचमे पंचमो वर्गः॥ ॥अथ षष्ठी॥ ॥आ सूर्यो न भानुमद्भिरर्कैर ग्ने ततंथ रोदसी वि राम
भासा॥ चित्रो नयत्परि तमांस्यक्तः शोचिषा पत्मन्नौशिजो न दीयन्॥ ॥हे अग्ने रोदसी द्यावापृथिव्यौ भासा दीप्त्या ततंथ विस्तारेण व्याप्नोषितत्र
दृष्टांतः भानुमद्भिः प्रभावद्भिः अर्कैर र्चनीयैः किरणैः सूर्यो न यथा सूर्य आतनोति तद्वत् अपरोर्धर्चः परोक्षकृतः पत्मन् पतत्यस्मिन्निति पत्मा मार्ग ११७
तस्मिन् औशिजो न उशिजः स्तोतारः स्तुत्यं तथा तत्संबंधी औशिजः सूर्यः स इव दीयन् गच्छन् शोचिषा तेजसा अक्तः अक्तिः च चित्र इव चित्रश्चा

ग्निः अस्ते व बाणादेः क्षेपमेव प्रतिधाने स्वकीयज्वालां प्रतिधत्ते। यथा धन्वी लक्ष्याभिमुख्येन बाणं संधत्ते तथा ज्वालां संधत्त इत्यर्थः प्रतिधाय च असिष
त्। ज्वालां प्रक्षिपन् तेजोस्वकीयं शिशाति तीक्ष्णीकरोति तत्र दृष्टांतः अयसां धारां यथा अयोमयस्य परश्वादेर्धारां प्रक्षेप्तुकामः तीक्ष्णीकरोति तद्वत्
तीक्ष्णीकृत्य च चिद्भ्रजतिः विचित्रगतिः अक्तोरा चेः अरतिरभिगंता वेर्न पक्षीव द्रुपदाः वृक्षेषु सीदन् रघुपत्म जं हाः लघुपतन समर्थपादः
एवंभूतः सन् रयामिवर्त्ते तेसद्॥ इति पूर्वत्रान्वयः॥ ॥इति चतुर्थस्य पंचमे तृतीयो वर्गः॥ ॥अथ षष्ठी॥ ॥स ईं रेभो न प्रतिवस्त उस्राः शोचिषा रार
पीति मित्रमहाः॥ नक्तं य ईमरुषो यो दिवा नॄनमर्त्यो अरुषो यो दिवा नॄन्॥ ॥स ईं सोयमग्निः रेभोन स्तो स्यः सूर्य इव उस्राः दीप्ताः प्रति वस्ते
आच्छादयति यथा मित्रमहाः सर्वेषामनुकूलप्रकाशः सन् शोचिषा तेजसा रारपीति भृशं शब्दं करोति। य ईं योयमग्निः नक्तं रात्रौ अरुषः अ
रोचमानः सन् दिवा अहनी व नॄन् मनुष्यान् स्वस्वकार्ये प्रेरयति। पुनर्यः अमर्त्यः मरणधर्मा अरुषः आरोचमानो रोपरहितो वा
योग्निः दिवा द्योतमानेन तेजसा नॄन् नेतॄन् आलीयान् रश्मीन् प्रेरयति। स इति पूर्वत्र संबंधः। यद्वा नक्तं रात्रौ योयमग्निररुषः आरोचमानः
यश्च मरणरहितोग्निः दिवा अह्नि नेतॄन् देवान् हविर्भिः संयोजयति। यो दिवा नॄनिति पुनरुक्तिरादरार्था॥ ॥अथ सप्तमी॥ ॥दिवो न यस्य
विधतो नवीनोद्वृषा रुक्ष ओषधीषु नूनोत्॥ घृणा न यो ध्रजसा पत्मना यन्ना रोदसी वसुना दं सुपत्नी॥ ॥दिवो न दीप्तस्य सूर्यस्येव विध
तो विधातुः रश्मीन् कुर्वतो यस्याग्नेः नवीनात् स्तुत्याच्छब्दाः भूत् एतदेवयाचष्टे। वृषा कामानां वर्षिता रुक्षः दीप्तः सोग्निः ओषधीषु दह्यमानासु

ऋ०भा० निष्ठां। यद्वा। द्रविणानि प्रचेता विश्ववाराणि पुरुवारो अध्रुक्॥ ॥हे अग्ने वः यस्य येन बहुवचनं। त्वां मतिभिर्मननीयैः स्तोत्रैः हुवे आह्वयामि की
दृशं सहसो बलस्य सूनुं पुत्रं अग्निर्हि बलेन मथ्यमानो जायते युवानं नित्यतरुणं च लोकस्य मिश्रयितारं वा अद्रोघवाचं अद्रोग्ध्री प्रशस्ता स्तुति रू
११९ पा वाग्यस्मिन् प्रयुज्यते तादृशं यविष्ठं अतिशयेन युवानं प्रचेताः प्रकृष्टज्ञानः पुरुवारः पुरुभिर्बहुभिर्वरणीयः अध्रुक् अद्रोग्धा यजमानानां ए
वंभूतो योग्निः विश्ववाराणि सर्वैर्वरणीयानि संभजनीयानि शस्यानि द्रविणानि धनानि इन्वति प्रेरयति स्तोतृभ्यो ददातीति यावत्। ईदृशं त्वां हु
वे इति पूर्वत्र संबंधः॥ ॥अथ द्वितीया॥ ॥त्वे वसूनि पुर्वणीक होतर्दोषा वस्तोरेरिरे यज्ञियासः। क्षामेव विश्वा भुवनानि यस्मिन्त्सं सौभगानि द
धिरे पावके॥ ॥हे पुर्वणीक बहुज्वाल हे होतः देवानामाह्वातः अग्ने त्वयि दोषा रात्रौ वस्तोरहनि च यज्ञियासो यज्ञार्हा यजमानाः वसूनि हविर्ल
क्षणानि धनानि एरिरे आभिमुख्येन प्रेरयंति उक्तेत्यर्थः। विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि क्षामेव क्षमायां भूम्यामिव यस्मिन्
पावके शोधके सौभगानि धनानि संदधिरे देवाः सम्यङ्निहितवंतः अग्नौ वसु सन्न्यदधादिति ब्राह्मणं। तस्मिंस्त्वयीति पूर्वत्र योज्यं॥ ॥अथ तृतीया॥ ॥
त्वं विक्षु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणां। अत इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि॥ ॥हे अग्ने त्वं प्रदिवः पुराणानामेतत्
पुरातनकालीनासु विक्षु प्रजासु आसु परिदृश्यमानासु सीदः सीदसि। विश्वांतरात्मना वर्तसे तथा क्रत्वा आत्मीयेन कर्मणा वार्याणां वरणीयानां धना राम
नां रथीः अभवः रंहिता यजमानेभ्यः प्रापयिता भूः अतः कारणात् हे चिकित्वो विद्वन् जातवेदः जातानां प्राणिनां वेदितः अग्ने विधते परिचरते यजमानाय ११९

वसूनि धनानि आनुषक् अनुषक्तं सततं यथा भवति तथा वि इनोषि विविधं प्रेरयसि॥ ॥प्रवर्ग्येभिष्टवे यो नः सनुत्य इति तृचः सूचितं च। यो नः सनुत्यो अ
भिदासदग्ने भवा नो अग्ने सुमना उपेताविति द्वाविति॥ ॥तत्र प्रथमा सूक्ते चतुर्थी॥ ॥यो नः सनुत्यो अभिदासदग्ने यो अंतरो मित्रमहो वनुष्यात्॥
तमजरेभिर्वृषभिस्तव स्वैस्तपा तपिष्ठ तपसा तपस्वान्॥ ॥हे अग्ने यः शत्रुः सनुत्यः सनुतरित्यंतर्हितनाम अंतर्हिते देशे वर्तमानान्नोस्मान् अभिदास
त् उपक्षयति वा बाधते यः अंतरः आभ्यंतरवर्ती सन् हे मित्रमहः अनुकूलदीप्ते मित्राणां अहर्भिश्च यथा वा वनुष्यात् तमुभयविधं हे तपिष्ठ तप
स्वितम अतपसा तेजसा तपस्वान् तेजस्वितम अजरेभिर्जरारहितैः वृषभिः वृष्टेर्हेतुभूतैः तव स्वैः असाधारणैस्तेजोभिः तथा दह॥ ॥अथ पंचमी॥ ॥
यस्ते यज्ञेन समिधा य उक्थैरर्केभिः सूनो सहसो ददाशत्॥ स मर्त्येष्वमृत प्रचेता राया द्युम्नेन श्रवसा वि भाति॥ ॥हे सहसः सूनो बलस्य पुत्राग्ने यो
यजमानः यज्ञेन यागेन ददाशत् परिचरति। यश्च समिधा समिंधनसाधनेनैधनेन इध्मः यश्च उक्थैः शस्त्रैः अर्केभिरर्चनीयैः स्तोत्रैश्च परिचरति हे
अमृत मरणधर्मरहिताग्ने स यजमानः मर्त्येषु मनुष्येषु प्रचेताः प्रकृष्टज्ञानः सन् राया धनानि द्युम्नेन द्योतमानेन श्रवसा श्रवणीयेनान्नेन य
शसा वा विभाति विशेषेण प्रकाशते॥ ॥अथ षष्ठी॥ ॥स तत्कृधीषितस्तूयमग्ने स्पृधो बाधस्व सहसा सहस्वान्। यच्छस्यसे द्युभिरक्तो वचोभिस्तज्जु
षस्व जरितुर्घोषि मन्म॥ ॥हे अग्ने स त्वं इषितः प्रेषितः सन् तूयं क्षिप्रं तत् कृधि कुरु किं तदित्यत आह। सहस्वान् बलवांस्त्वं स्पृधः स्पर्धमानान्
सहसा बलेन परेषामभिभवसमर्थेन तेजसा वा बाधस्व विनाशय द्युभिर्द्योतमानैस्तेजोभिरक्तो सिक्तो वचोभिः स्तुतिरूपैर्वाक्यैः यच्छस्यसे स्तूयसे
स्तोत्रमुद्दिश्य यत्स्तोत्रं स्तोतृभिः क्रियत इत्यर्थः तन्मम मननीयं घोषि श्रूयमाणं घोषि॥ जरितुः जुषस्व सेवस्व॥ अग्नये कामाय पुरोडाशमष्टाकपालमित्यस्य

ऋ०भा० अश्यामेत्येषा याज्या। सूजितेच॥ अश्याम तं काममग्ने तवोतीति कामायेति॥ ॥सैषा सप्तमी॥ ॥ अश्याम तं काममग्ने तवोती अश्याम रयिं रयिवः सुवी
रं॥ अश्याम वाजमभि वाजयंतो अश्याम द्युम्नमजराजरं ते॥ ॥हे अग्ने ते तव संबंधिन्या ऊती ऊत्या रक्षया तं कामम् अश्याम प्राप्नुयाम तमेव कामं वि
११९ शिनष्टि हे रयिवः धनवन्नग्ने सुवीरं पुत्रादियुक्तं रयिं धनं अश्याम प्राप्नुयाम तथा वाजयंतः वाजमन्नमात्मन इच्छंतो वयं वाजं त्वया दत्तमन्नं अ
भिमुख्येन अश्याम प्राप्नुयाम हे अजर जरारहिताग्ने त्वदीयमजरं जरारहितं द्युम्नं द्योतमानं अश्याम प्राप्नुयाम॥ ॥इति चतुर्थस्य पंचमे सप्त
मो वर्गः॥ ॥प्र नव्यसेति सप्तर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं प्र नव्यसेत्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥ ॥
॥तत्र प्रथमा॥ ॥प्र नव्यसा सहसः सूनुमच्छा यज्ञेन गातुमव इच्छमानः। वृश्चद्वनं कृष्णयामं रुशंतं वीती होतारं दिव्यं जिगाति॥ ॥गातुं उपग
तव्यं स्तोत्रं नव्यसा सहसः सूनुं बलस्य पुत्रमग्निं अवः अन्नं रक्षणं वा इच्छमान इच्छन् स्तोता नव्यसा नवीयसा नवतरेण यज्ञेन युक्तः सन् अच्छ आभि
मुख्येन प्रजिगाति प्रकर्षेण गच्छति कीदृशमग्निं वृश्चद्वनं वृक्णं निर्दग्धं वनं येन तादृशं कृष्णयामं कृष्णवर्त्मानं रुशंतं श्वेतवर्णं वीती वीत्या कांतेन
यज्ञेन होतारं यष्टारं दिव्यं दिवि भवं॥ ॥अथ द्वितीया॥ ॥स श्वितानस्तन्यतू रोचनस्था अजरेभिर्नानदद्भिर्यविष्ठः। यः पावकः पुरुतमः पुरूणि
पृथून्यग्निरनुयाति भर्वन्॥ ॥सोग्निः श्वितानः श्वेतमानः श्वेतवर्णो वर्तते तन्यतुः शब्दं करोति रोचनस्थाः रोचंतेऽस्मिन् ग्रहनक्षत्रादीनीति राम
रोचनं अंतरिक्षं तत्रावस्थितः अजरेभिः जरारहितैः नानदद्भिरत्यर्थं शब्दं कुर्वद्भिर्मरुद्भिर्युक्तो रश्मिभिर्वा यविष्ठो युवतमो यः पावकः शोधकोग्निः ११९
पुरुतमः अतिशयेन प्रभूतः सन् पुरूणि बहूनि पृथूनि स्थूलानि काष्ठानि भर्वन्। अनुयाति अनुगच्छति स इत्थं वर्तत इति पूर्वत्र संबंधः॥ ॥गाह

यनीयोग्निः तमांसि नैशान्यंधकाराणि परिणयत् परिनयति परितो गमयति सर्वस्मादपि दीप्तोग्निर्निवर्तयतीत्यर्थः॥ ॥अथ सप्तमी॥ ॥
त्वां हि मंद्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने। इंद्रं न त्वा शवसा देवता वायुं पृणंति राधसा नृतमाः॥ ॥अग्ने मंद्रतमं अत्यंतस्तुत्यं
त्वां अर्कशोकैः अर्चनीयैः पूजनीयैः शोकैर्दीप्तिभिर्युक्तं हि यस्मात् ववृमहे संभजामहे यद्वा अर्कशोकैः अर्चनीयैः प्रशस्यैर्दीप्तैः कि
रणैः स्तोत्रैः साधनभूतैः त्वां संभजामहे तस्मात् महि महत् नोस्मदीयं स्तोत्रं श्रोषि शृणु हि हे अग्ने नृतमाः स्तुतीनां नेतृतमाः ऋत्विजः श
वसा बलेन वायुमिव शवसा बलयुक्तमिंद्रमिव देवता त्वां राधसा हविर्लक्षणेन धनेन पृणंति प्रीणयंति देवता श
ब्दात् द्वितीयायाः सुपां सुलुगिति लुक्॥ ॥अथाष्टमी॥ ॥नू नो अग्नेऽवृकेभिः स्वस्ति वेषि रायः पथिभिः पर्ष्यंहः। ता सूरिभ्यो गृणते रा
सि सुम्नं मदेम शतहिमाः सुवीराः॥ ॥हे अग्ने नोस्मान् अवृकेभिः वृकाः स्तेनाः तद्रहितैः पथिभिर्मार्गैः रायो धनानि निक्षिप्तं स्वस्ति क्षे
मेण वेषि गमनाय प्रापय अंहः अंहसः पापात् पर्षि। उक्तलक्षणैर्मार्गैः पारय। अस्मान्निवारय। सूरिभ्यः स्तोतृभ्यो देयानि सुम्नानि सुखा
नि गृणते स्तुवते मह्यं रासि देहि। वयं च शतहिमाः शतहेमंतान् संवत्सरान् सुवीराः वीर्या जायंत इति वीराः पुत्रादयः शोभनपुत्रादि
सहिताः संतो मदेम हृष्याम॥ ॥इति चतुर्थस्य पंचमे षष्ठो वर्गः॥ ॥हुवे व इति सप्तर्चं पंचमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं तथा चा
नुक्रम्यते। हुवे वः सप्तेति प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः॥ ॥तत्र प्रथमा॥ ॥हुवे वः सूनुं सहसो युवानमद्रोघवाचं मतिभिर्य

॥मूर्धानमिति सप्तर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं वैश्वानरमग्निदेवताकं षष्ठी सप्तम्यौ जगत्यौ शिष्टाः पंच त्रिष्टुभः तथा चानुक्रांतं मूर्धानं वैश्वानरी
यं हि द्विजगत्यंतमिति गतः सूक्तविनियोगः॥ विषुवत्याग्निमारुते आद्यस्तृचो वैकल्पिकस्तोत्रियः तथैव सूत्रितं मूर्धानं दिवो अरतिं पृथिव्या मूर्धा
दिवो नाभिरग्निः पृथिव्या इति चेति॥ ॥तत्र प्रथमा॥ ॥मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निं॥ कविं सम्राजमतिथिं जनाना
मासन्ना पात्रं जनयंत देवाः॥ ॥मूर्धानं शिरोभूतं कस्य दिवो द्युलोकस्य पृथिव्याः प्रथितायाः भूमेः अरतिं गंतारं यद्वा गंतव्यस्वामिनं वैश्वानरं वि
श्वेषां नराणां संबंधिनं ऋते ऋतमिति सत्यस्य यज्ञस्य वा नाम निमित्तसप्तम्येषा ऋतनिमित्तं आभिमुख्येन जातं स्थ्यादावुत्पन्नं कविं क्रांतदर्शि
नं सम्राजं सम्यग्राजमानं जनानां यजमानानां अतिथिं हविर्वहनाय सततं गंतारं यद्वा अतिथिवत् पूज्यं आसन् आसनि आस्ये आस्यद्वितीया राम
१२०

येयं सप्तमी आस्यभूतमग्निलक्षणेनास्येन हि देवा हवींषि भुंजंते पात्रं पातारं रक्षकं यद्वा आस्येन धारकं एवंगुणविशिष्टं वैश्वानराग्निं देवाः स्तोतारः ऋत्वि
जः देवा एव वा अजनयंत यज्ञाभिमुख्येनाजीजनत। अरण्योः सकाशादुदपादयन्॥ ॥अथ द्वितीया॥ ॥नाभिं यज्ञानां सदनं रयीणां महामाहाव
मभि सं नवंत॥ वैश्वानरं रथ्यमध्वराणां यज्ञस्य केतुं जनयंत देवाः॥ ॥यज्ञानां ज्योतिष्टोमादियागानां नाभिं नहनं बंधकं तथा रयीणां धनानां स्था
नमेकनिलयं महां आहावं आह्वयंते स्मिन्नाहावः तादृशं यद्वा वृष्ट्युदकधारणं आहावं निपानस्थानीयं एवंभूतमग्निं अभि सं नवंत स्तोतारः सम्य
क्स्तुवंति तथा वैश्वानरं विश्वेषां नराणां संबंधिनं अध्वराणां यज्ञानां संबंधिने रथ्ये रथिने यथा रथी स्वरथं नयति तद्वन्नेतारं गृहीतारं यज्ञस्य के
तुं प्रज्ञापकं एवंविधमग्निं देवाः स्तोतार ऋत्विजो देवा एव वा अजनयंत जनयंति मथनेनोत्पादयंति॥ ॥अथ तृतीया॥ ॥त्वद्विप्रो जायते वाज्यग्ने त्व
द्वीरासो अभिमातिषाहः॥ वैश्वानर त्वमस्मासु धेहि वसूनि राजन्स्पृहयाय्याणि॥ ॥हे अग्ने वाजी हविर्लक्षणमन्नवान् पुरुषः त्वत् त्वत्तः सकाशा
त् विप्रो मेधावी जायते तुभ्यं हविर्दानेन मेधावी भवतीति तथा वीरासो वीराः त्वत् त्वत्तः अभिमातिषाहः अभिमातीनां शत्रूणां अभिभवितारो जायंते यस्मा
देवं तस्मात् हे वैश्वानर राजन् राजमानाग्ने त्वं अस्मासु स्पृहणीयानि वसूनि धनानि धेहि निधेहि॥ ॥अथ चतुर्थी॥ ॥त्वां विश्वे अमृत जायमानं
शिशुं न देवा अभि सं नवंते॥ तव क्रतुभिरमृतत्वमायन्वैश्वानर यत्पित्रोरदीदेः॥ ॥हे अमृत अमरणधर्मरहिताग्ने विश्वे सर्वे देवाः स्तोतारः जाय
मानं अरण्योः सकाशादुत्पद्यमानं त्वां शिशुं न पुत्रमिव अभि सं नवंते अभि संगच्छंते अभि संस्तुवंति यद्वा दीव्यंतीति देवा रश्मयः ते सर्वे जायमानं

ऋ०वे०भा०

१२२ तां अभिसंनवंते आप्तिसंगच्छंते यथा पितरः पुत्रमभिगच्छंति अपि च हे वैश्वानराग्ने यत्त्वं यदा पित्रोः पालयित्र्योर्द्यावापृथिव्योर्मध्ये अदीदेः दीप्यसे तदा
नीं तव त्वदीयैः क्रतुभिः ज्योतिष्टोमादिभिर्यागैरमृतं देवत्वं आयन्यजमानाः प्राप्नुवंति॥ ॥अथ पंचमी॥ ॥वैश्वानर तव तानि व्रतानि महान्यग्ने
नकिरा दधर्ष॥ यज्जायमानः पित्रोरुपस्थेऽविंदः केतुं वयुनेष्वह्नां॥ ॥हे वैश्वानर विश्वेषां नराणां संबंधिन्नग्ने तव त्वदीयानि तानि प्रसिद्धानि व्रतानि
कर्माणि महानि महांति नकिरा दधर्ष॥ ॥न न कश्चनान्यो धर्षति बाधते यत्त्वं यदा त्वं पित्रोर्द्यावापृथिव्योरुपस्थे उपस्थाने अंतरिक्षे वयुनेषु गंत
व्येषु मार्गेषु यजमानः सन् अह्नां केतुं प्रज्ञापकं सूर्यस्य भानुं नाहृतं अविंदः अलंभयः तमोरूपमसुरं हत्वा तेजसा निवारय ज्योतिस्थापयत्र इत्यर्थः॥
तदानानि व्रतानीति पूर्वत्रान्वयः॥ ॥अथ षष्ठी॥ ॥वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना॥ तस्येदु विश्वा भुवनाधि मूर्धनि
वयाइव रुरुहुः सप्त विस्रुहः॥ ॥वैश्वानरस्याग्नेः चक्षसा तेजसा अमृतस्य उदकस्य केतुना प्रज्ञापकेन दिवो द्युलोकस्य सानूनि समुच्छ्रि
तस्थानानि नक्षत्ररूपाणि विमितानि निर्मितानि यद्वा दिवोंतरिक्षस्य सानूनि समुच्छ्रितप्रदेशाः मेघात्मकाः विमितानि निर्मिताः धूमविका
रत्वात् तेषां तस्येदु तस्यैव वैश्वानरस्य समुच्छ्रितप्रदेशानि मूर्धनि मूर्धस्थानीये उपरि वर्तमाने धूमे मेघात्मना परिणते विश्वानि व्याप्तानि भुव
नानि भुवनानि उदकानि उपरि देशे सर्वाभूतजातानि अधिवसंति। यद्वा वैश्वानरात्मकस्य परब्रह्मणो मूर्धनि उपरिप्रदेशे सर्वाणि भूतजाता राम
न्यधिवसंति तथा वयाइव पक्षिण इव सप्त सर्पणशीलाः सप्तसंख्याका वा विस्रुहः नद्यः गंगाद्याः रुरुहुः रोहंति अस्मादेव वैश्वानरात् १२१

पत्न्यादीनां मिथः संसर्गे अग्नये विविचये इष्टिः कर्तव्या तत्र वि तद्येषानुवाक्या॥ ॥सैषा तृतीया॥ ॥वि ते विष्वग्वातजूतासो अग्ने भामासः शुचे शुचयश्च
रंति॥ तुविम्रक्षासो दिव्या नवग्वा वना वनंति धृषता रुजंतः॥ ॥हे शुचे शुद्ध दीप्ताग्ने ते त्वदीयाः वातजूतासः वातेन प्रेरिताः शुचयो निर्मलाः भा
मासः दीप्तयः विष्वक् विचरंति विविधं गच्छंति। तुविम्रक्षासः तुविकाष्ठानि स्पृशंतः दिव्या द्योतमानाः नवग्वाः नूतनगमनाः रश्मयो वना वना
नि वनंति संभजंते दहंतीत्यर्थः। किं कुर्वंतः धृषता धर्षकेण तेजसा रुजंतः वनानि धक्ष्यंतः॥ ॥अथ चतुर्थी॥ ॥यते शुक्रासः शुचयः शुचि
ष्मः क्षां वपंति विषितासो अश्वाः॥ अध भ्रमस्त उर्विया वि भाति यातयमानो अधि सानु पृश्नेः॥ ॥हे शुचिष्म दीप्तिमन्नग्ने ते तव शुक्रासः शु
भ्राः येशुचयो दीप्तयः क्षां पृथिवीं भूमिं वपंति मुंडयंति। केशस्थानीयान् ओषधिवनस्पतीन् दहंतीत्यर्थः। अग्निर्ह दाति रोमा पृथिव्या इति नि
गमांतरं तेर श्मयः विषितासः विमुक्ता अश्वा इव इतस्ततो गच्छंतीत्यर्थः। अध अस्मिन्काले ते त्वदीयः भ्रमो भ्रमणशीलो ज्वालासमूहः पृश्नेः
नानारूपाया भूमेरधि उपरि सानु समुच्छ्रितदेशं पर्वताग्रादिकं प्रतियातयमानः स्वकीयमनुग्रहं व्यापारयन् उर्विया उरु बहुलं विभाति विशे
षेण प्रकाशते॥ ॥अथ पंचमी॥ ॥अध जिह्वा पापतीति प्र वृष्णो गोषुयुधो नाशनिः सृजाना॥ शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते
वनानि॥ ॥अध अपि च वृष्णो वर्षितुरग्ने जिह्वा ज्वाला पापतीति प्रकर्षेण

ऋ० भा० वा चारु शोभनाम तिर्मनः स्तुतिश्च अस्मै वैश्वानराय अग्नये पवते तत्सकाशात् सर्वो चारु स्वयमेव निर्गच्छतीत्यर्थः । सोम इव यथा सोमो दशापवित्रेण स्रवति
तद्वत् ॥ अथ द्वितीया ॥ ॥ स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत ॥ व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत् ॥
१२२ ॥ स वैश्वानरोऽग्निः व्रतपाः व्रतस्य पालकः परमे उत्कृष्टे व्योमनि आकाशे जायमानः सूर्यात्मना प्रादुर्भवन् व्रतानि व्रतकर्माणि लौकिकानि
वैदिकानि वा अरक्षत् रक्षति । अन्तरिक्षं च व्यमिमीत एतदुपलक्षितान् त्रीन् लोकान् निर्मितवान् तथा सुक्रतुः शोभनकर्मा वैश्वानरोऽग्निः महिना
स्वमहिम्ना तेजसा नाकं द्युलोकं अस्पृशत् स्पृशति स्म ॥ ॥ अथ तृतीया ॥ ॥ व्यस्तभ्नाद्रोदसी मित्रो अद्भुतोऽन्तर्वावदकृणोज्ज्योतिषा तमः ॥ वि
चर्मणीव धिषणे अवर्तयद्वैश्वानरो विश्वमधत्त वृष्ण्यं ॥ ॥ मित्रो मित्रभूतः सर्वेषां अद्भुतो महान् आश्चर्यभूतो वा वैश्वानरोऽग्निः रोदसी
द्यावापृथिव्यौ व्यस्तभ्नात् विशेषेण स्तंभितवान् यथा अधो न पततः तथा स्वकीयदेशे स्थापितवानित्यर्थः । तथा ज्योतिषा तेजसा तमोऽन्धकारं
अन्तर्वावत् अन्तर्हितं तिरोहितं अकृणोत् अकरोत् । वावदिति वातेर्गतिकर्मणो यङ्लुगन्तस्य रूपं । अपि च धिषणे धारयित्र्यौ द्यावापृथिव्यौ चर्मणीव
यथा पशोर्विशसिते द्वे चर्मणी शोषणार्थं प्रसारयति तथा व्यवर्तयत् विवृते विस्तृते अकरोत् । किं बहुना वैश्वानरोऽयमग्निर्विश्वं सर्वं वृष्ण्यं वीर्यं अ
धत्त धारयति ॥ ॥ अथ चतुर्थी ॥ ॥ अपामुपस्थे महिषा अगृभ्णत विशो राजानमुप तस्थुर्ऋग्मियं ॥ आ दूतो अग्निमभरद्विवस्वतो वैश्वानरं मा राम
तरिश्वा परावतः ॥ ॥ अपामित्यन्तरिक्षनाम अपां अन्तरिक्षस्य उपस्थे उपस्थाने मध्ये महिषाः महान्तो मरुतः अगृभ्णत अगृह्णन् १२२

इमं वैश्वानरं वैद्युतात्मना वर्तमानमजीजनन्नित्यर्थः । गृहीत्वा च विशः प्रजाः राजानं स्वामिनं ऋग्मियं अर्चनीयं उपतस्थुः स्तुवन् । अपि च वैश्वा
नरमग्निं परावतः सूर्यसमीपे विद्यमानं दूतः वेगवान् देवानां दूतो दूरदेशात् विवस्वतः आदित्यात् अभरत् प्रसाजभार इमं लोकं प्रत्याहरत् ॥
॥ अथ पंचमी ॥ ॥ युगेयुगे विदथ्यं गृणद्भ्योऽग्ने रयिं यशसं धेहि नव्यसीं ॥ पव्येव राजन्नघशंसमजर नीचा नि वृश्च वनिनं न तेजसा ॥ ॥ हे अग्ने युगे
युगे काले काले विदथ्यं विदथाय यज्ञाय हितं गृणद्भ्यः स्तुवद्भ्यः अस्मभ्यं रयिं धनं यशसं यशस्विनं पुत्रं च धे
हि विधेहि कुरु । किं च हे राजन् राजमान अजर जरारहित अग्ने पव्येव वज्रेणेव आलीयेन तेजसा वनिनं वृक्षमिव अघशंसं अघस्यानर्थस्य शं
सितारं शत्रुं नीचा नीचीनः न्यूनो यथा भवति तथा निवृश्च नि धेहि ॥ ॥ अथ षष्ठी ॥ ॥ अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजरं सुवीर्यं ॥
वयं जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः ॥ ॥ हे अग्ने अस्माकं सम्बन्धिषु पुष्टेषु अस्मासु मघवत्सु हविर्लक्षणेन धनेन युक्तेषु
क्षत्रं धनं धारय कीदृशं अनामि अनमनीयं अनपहार्यं अजरं जरारहितं अनश्वरं सुवीर्यं शोभनवीर्योपेतं किं च हे वैश्वानराग्ने तवोतिभिः ल
बधिभी रक्षणैः वयं शतिनं शतसंख्यायुक्तं शतपुरुषयुक्तं वा तथा सहस्रिणं वाजमन्नं जयेम लभेमहि ॥ ॥ अथ सप्तमी ॥ ॥ अदब्धेभिस्तव गोपा
भिरिष्टेऽस्माकं पाहि त्रिषधस्थ सूरीन् ॥ रक्षा च नो ददुषां शर्धो अग्ने वैश्वानर प्र च तारीः स्तवानः ॥ ॥ हे इष्टे एष्टव्य एषणीय वा त्रिषधस्थः त्रिषु लो
केषु सहावस्थायिन् यद्वा आहवनीयादिषु त्रिष्वायतनेषु यष्टव्ये देवैः सहावतिष्ठमानाग्ने अदब्धेभिः केनाप्यहिंसितैः तवत्वदीयैर्गोपाभिर्गोपकैः

ऋ०भा०
१२३ स्तैस्तेजोभिः अस्माकंसूरीन् अस्मदीयान्स्तोतॄन्पाहिरक्षहेवैश्वानराग्नेददुषांहवींषिदत्तवतांनोस्माकंआर्योबलंरक्षचस्तवानःस्तूयमानस्त्वंप्रच
तारीःप्रवर्धयच॥इतिचतुर्थस्यपंचमेदशमोवर्गः॥ ॥अहश्चेतिसप्तर्चंनवमंसूक्तंभरद्वाजस्यार्षंवैश्वानराग्निदेवताकंअनुक्रांतंचाअहश्च
त्रिष्टुब्हेदशरात्रेषष्ठेहनिआग्निमारुतशस्त्रेवैश्वानरनिविधानमिदंसूत्र्यतेहिअहश्चकृष्णंमध्वोवोनामेति॥ ॥तत्रप्रथमा॥ ॥अहश्चकृष्ण
महरर्जुनंचविवर्तेतेरजसीवेद्याभिः॥वैश्वानरोजायमानोनराजावातिरज्ज्योतिषाग्निस्तमांसि॥ ॥अहरितिपुरुषोक्तिन्कर्मणोस्यहःकृष्णं
कृष्णवर्णंएतत्सामानाधिकरण्यादहःशार्वरीरात्रिर्वाचकःतमसाकृष्णवर्णारात्रिश्चअर्जुनेनसौरेणतेजसाशुक्लवर्णंअहोदिवसश्चरजसी
स्वस्वभासास्वंजगद्रक्षयांतौवेद्याभिःअनुकूलतयाज्ञातव्याभिःवेदितव्याभिःस्वप्रवृत्तिभिःविवर्तेतेविविधंपर्यावर्तेतेयद्वारजसीद्यावापृथि
व्यौउपलक्षणमेतत्लोकत्रयंपर्यावर्तेतेएतत्सर्ववैश्वानराग्नेराज्ञयइतिशेषःसहिदेवतात्वेनाप्रतिपाद्यःसचवैश्वानरोग्निःजायमानोनरा
जाप्रादुर्भवन्प्रवर्धमानोराजेवज्योतिषातेजसातमांसिअवातिरत्अवतिरत्वधकर्माअवतिर्विनाशयति॥ ॥अथद्वितीया॥ ॥नाहंतंतुंनविजाना
म्योतुंनयंवयंतिसमरेतमानाः॥कस्यस्वित्पुत्रइहवक्त्वानिपरोवदात्यवरेणपित्रा॥ ॥वैश्वानरस्यमहत्वमाख्यास्यन्ऋषिःतदर्थंयज्ञंवस्त्रात्मक
तयानिरूपयन्तस्यदुर्ज्ञानत्वमनयाप्रतिपादयतीतियज्ञवादिनोमन्यंतेतंतुंतंतवःपटस्यप्रागायतानिसूत्राणितानिचयज्ञात्मकस्यवस्त्रस्यगा राम
यत्र्यादीनिछंदांसिकृतशस्त्राणिचतान्यहंनविजानामितथाओतुंओतवेतिरश्चीनानिचान्यजूंषिआध्वर्यवाणिचकर्माणितान्यहंनविजाना १२३

दुर्ज्ञेयंइतिआहुतिद्वारासकलंजगदग्नेःसकाशादुत्पद्यतइत्यर्थः॥ ॥अथसप्तमी॥ ॥वियोरजांस्यमिमीतसुक्रतुर्वैश्वानरोविदिवोरोचनाकविः॥
परियोविश्वाभुवनानिपप्रथेदब्धोगोपाअमृतस्यरक्षिता॥ ॥सुक्रतुःसुकर्मावैश्वानरःविश्वेषांनराणांहितोयोग्निःरजांसिउदकानिलोकान्वा
व्यमिमीतनिर्मितवान्तथादिवोद्युलोकस्यसंबंधीनिरोचनारोचमानानिदीप्यमानानिनक्षत्रादीनिकविःक्रांतदर्शीसन्योग्निर्व्यमिमीत
यश्चविश्वासर्वाणिभुवनानिभूतजातानियद्वाउदकानिवापरिपप्रथेपरितःप्रथयतसोयमदब्धःकेनाप्यहिंसितःगोपाःसर्वस्यगोपयितार
क्षिताअमृतस्यअमरणस्यहेनोउदकस्यरक्षितापालयितासन्वर्ततइतिशेषः॥ ॥इतिचतुर्थस्यपंचमेनवमोवर्गः॥ ॥पृक्षस्येतिसप्तर्चंदशमं
सूक्तंभरद्वाजस्यार्षंवैश्वानराग्निदेवताकंआद्याःषड्जगत्यःसप्तमीत्रिष्टुप्तथाचानुक्रांतंपृक्षस्यांत्यात्रिष्टुबितिचानुविंशेकेहन्याग्निमारु
तमितिविषुवत्याग्निमारुतेइदमेवसूक्तंवैश्वानरनिविधानंसूत्रितंचपृक्षस्यवृष्णोवृष्णेशर्धायेतिमहोजाइत्याग्निमारुतइतिविषुवत्याग्नि
मारुतेआद्योत्कृष्टोत्रियानुरूपोसूत्रितंचपृक्षस्यवृष्णोअरुषस्यनूसहइतिस्तोत्रियानुरूपाविति॥ ॥तत्रप्रथमा॥ ॥पृक्षस्यवृष्णोअरु
षस्यनूसहःप्रनुवोचंविदथाजातवेदसः॥वैश्वानरायमतिर्नव्यसीशुचिःसोमइवपवतेचारुरग्नये॥ ॥पृक्षस्यसंपृक्तस्यव्याप्तस्ययद्वा
पृक्षंहविर्लक्षणमन्नंतद्वतःवृष्णःवर्षितुःअरुषस्ययजमानस्यजातवेदसःजातानिवेदितुःवैश्वानराग्नेःसहःबलंभवनसमर्थंविदथा
विदथेयज्ञेनुक्षिप्रंप्रनुवोचंप्रब्रवीमिप्रकर्षेणस्तौमीत्यर्थः॥एकोनुशब्दःपूरकःनव्यसीनवतराशुचिःनिर्मलायद्वास्तोतॄणांशोधयित्री

च०भा० प्रतिपादयतिसइद्वसएववैश्वानरोग्निः तंतुंतंतुस्थानीयानिगायत्र्यादीनिछंदांसिकृत्स्नान्याणिविजानातितथासएवतंतुस्थानीयानिपत्रंध्या
१२४ ध्वर्यवानिचकर्माणिसएवजानाति ऋतुथाकालेकालेतत्तदनुष्ठानसमयेएववक्तानिवक्तव्यानिचतानिवदातिवदेत्योयंवैश्वानरः अमृतस्य
गोपाः गोपायितारक्षिता अवः अवस्ताद्लोकेचरन्पार्थिवाग्निरूपेणसंचरन्परः परस्तात्दिवि अनेनसूर्यात्मनापश्यन्सर्वंजगत्प्रका
शयन्ईदृमानिपरिदृश्यमानानिसर्वाणिचिकेततज्जानातिसएववेतिपूर्वत्रसंबंधः। यद्वासइत्तसएवतंतुस्थानीयानिसूक्ष्मभूतानिविजानातिनान्यः
कश्चित्तथाओतुंतंतुस्थानीयानिस्थूलानिभूतानिचसएवजानातिसएववक्तानिवक्तव्यान्युपदेष्टव्यानीमानिऋतुथाकालेकालेयदायदासंप्रदा
योच्छेदस्तदावदातिवदेत्। कोसौयोविजानीयात्तदवेत्यत आह योवैश्वानरः विश्वनरात्मकः परमात्मा अमृतस्य अमृतत्वस्यविमोक्षणस्यगोपार
क्षिता अवः अवस्तात्संसारदशायांचरन् अंतः करणोपेतेनजीवात्मभावेनसंचरन्परः परस्तादविद्यायाऊर्ध्वंवर्तमानेनानेनउक्तलक्षणेननि
रुपाधिकेनसच्चिदादिलक्षणेनरूपेणपश्यन्सर्वंजगत्प्रकाशयन्ईदृमानिचिकेततज्जानातितथाचपरमात्मानंप्रकृत्यश्रूयतेतमेवभांतम
नुभातिसर्वंतस्यभासासर्वमिदंविभातीति॥ ॥अथचतुर्थी॥ ॥अयंहोताप्रथमः पश्यतेममिदंज्योतिरमृतंमर्त्येषु॥ अयंसजज्ञेध्रुवआनिषत्तोऽ
मर्त्यस्तन्वावर्धमानः॥ ॥अयंवैश्वोग्निः प्रथमः आद्योहोतामानुषोहिहोताद्वितीयः हेमनुष्याः तमिमंपश्यतभजतेत्यर्थः। मर्त्येषुमरणस्वभा राम
वशरीरेषुअमृतंमरणरहितंइदंवैश्वानराख्यंज्योतिर्जाठररूपेणवर्ततइत्यर्थः। अपिचसोयमग्निः ध्रुवोनिश्चलः आसमंतान्निपन्नोनिषण्णः १२४

सर्वव्यापी अतएवमर्त्यः मरणरहितोपितन्वाशरीरेणसंबंधात्जज्ञेजायतेवर्धमानश्चभवतीत्युपचर्यते॥ ॥अथपंचमी॥ ॥ध्रुवंज्योतिर्निहितंदृशयेकं
मनोजविष्ठंपतयत्स्वंतः। विश्वेदेवाः समनसः सकेताः एकंक्रतुमभिवियंतिसाधु॥ ॥ध्रुवंनिश्चलंमनः मनसः तस्मादपिजविष्ठं अतिशयेनवेगवत्तं
इदंवैश्वानराख्यंज्योतिः पतयत्सुगच्छत्सुजंगमेषुप्राणिषु अंतर्मध्येनिहितंप्रजापतिनास्थापितंकिमर्थंदृशयेकंदर्शनार्थंकिंचविश्वेसर्वेदेवाश्च
समनसः समानमनस्काः सचेताः समानप्रज्ञाश्चसंतः एकंमुख्यंगंतारंवाक्रतुंकर्मणांकर्तारंसाधुसम्यगभिवियंति आभिमुख्येनविविधंप्राप्नु
वंतिसेवंतइत्यर्थः॥ यद्वापतयत्सुगच्छत्सुप्राणिषुअंतर्मध्येहृदयेमनोजविष्ठंमनसोप्यतिशयेनगमनयुक्तंध्रुवंनिश्चलंनिर्विकारंतथाचवाजसने
यके अनेजदेकंमनसोजवीयइति। ज्योतिश्चेतन्यंनिहितंनकेनचित्स्थापितंयोवेदनिहितंगुहायांपरमेव्योमन्नितिहिश्रूयते। किमर्थंदृशयेदर्श
नार्थंज्ञानेनहिसर्वंजानाति अपिचदृश्यंतेतिदेवाः इंद्रियाणिविश्वेसर्वेदेवाःसर्वाणींद्रियाणिचक्षुरादीनि समनसः मनसासहवर्तमानाः सकेताः
सतेजस्काः सं तः एकमद्वितीयं क्रतुंसृष्ट्यादीनांकर्मणांकर्तारंविश्वानरात्मकंपरमात्मानमभिलक्ष्यसाधुसम्यग्वियंतिविविधंगच्छंति। देवाएववा
इमंअभिवियंति आभिमुख्येनविविधमुपयंति उपासतइत्यर्थः तथाचश्रूयतेतद्देवाज्योतिषांज्योतिरायुर्होपासतेमृतमिति॥ ॥अथषष्ठी॥ ॥विमे
कर्णापतयतोविचक्षुर्वीदंज्योतिर्हृदयआहितंयत्॥ विमेमनश्चरतिदूरआधीः किंस्विद्वक्ष्यामिकिमुनूमनिष्ये॥ ॥वैश्वानरंज्ञातुकामस्यममम
कर्णौकर्णौविपतयतः विविधंगच्छतः श्रोतव्यानांत्वदीयगुणानांबहुत्वात्तथावैश्वानरंदिदृक्षमाणस्यममचक्षुरिंद्रियंविपततिविविधंगच्छतिइद

च०भा० यो वैदीयरूपाणां बहुत्वात् तथा ज्योतिः प्रकाशकं हृदये हृदयपुंडरीके आहितं निहितं यद्बुध्यादिसाक्षितत्त्वं इदमपि विपतयति विविधं गच्छति वैश्वा
१२५ नरात्मानं ज्ञातुं अपि च दूरे आधीः दूरे प्रकृष्टे विषये आधी राध्यानं यस्य तादृशी धीः सो लिंगयस्य सः । ये मदीयमनश्च विचरंति विविधं प्रवर्तंते
एवमहमि कया सर्वेष्विंद्रियेषु किंस्विदहं वैश्वानरस्य रूपमिति वक्ष्यामि किमु नु किमु खलु संप्रति मनिष्ये मनसा प्रपद्ये वैश्वानरस्य गुणानाम
नंतत्वात् । मंदप्रज्ञेन मया ज्ञातुं न शक्यं तदित्यर्थः ॥ ॥ अथ सप्तमी ॥ ॥ विश्वे देवा अनमस्यन्भियानास्त्वामग्ने तमसि तस्थिवांसं ॥ वैश्वानरोऽवतूत
ये नो मर्त्यो वतूतये नः ॥ ॥ हे वैश्वानर तमस्यंधकारे तस्थिवांसं स्थितवंतं त्वां विश्वे सर्वे देवाः अनमस्यन् नमस्कुर्वंति कुतो हेतोः भियानाः अंध
कारात् भीताः तादृशो अमर्त्यो मरणरहितो वैश्वानरोऽग्निः नोऽस्मानू ऊतये उत्यरक्षणेन अवतु रक्षतु पुनरुक्तिरादरार्था ॥ ॥ इति चतुर्थस्य पंचमे
एकादशो वर्गः ॥ ॥ पुरो व इति सप्तर्चं दशमं सूक्तं भरद्वाजस्यार्षमाग्नेयं सप्तमी विशिका द्विपदा विराट् शिष्टास्त्रिष्टुभः तथा चानुक्रांतं पुरो
वो द्विपदांतं प्रातरनुवाके आग्नेये क्रतौ त्रैष्टुभे छंदसि इदमादीनि चत्वारि सूक्तानि सूत्रितं च । पुरो वो मंद्रमित्यादि चत्वारि तं सुप्रतीकमिति षळिति ॥
॥ तत्र प्रथमा ॥ ॥ पुरो वो मंद्रं दिव्यं सुवृक्तिं प्रयति यज्ञे अग्निमध्वरे दधिध्वं ॥ पुर उक्थेभिः स हि नो विभावा स्वध्वरा करति जातवेदाः ॥ ॥ हे ऋत्वि राम
ग्यजमाना वो यूयं मंद्रं मोदनं स्तुत्यं वा दिव्यं दिवि भवं सुवृक्तिं सुष्ठु दोषैर्वर्जितं सुखेनावर्जनीयं वा एवं गुणमग्निं प्रयति प्रयच्छति प्रवर्तमानेऽध्वरे १२५
रक्षः प्रभृतिभिरहिंस्ये हिंसाप्रत्यवायरहिते वास्मिन्यज्ञे पुरो दधिध्वं पुरस्तादाहवनीयरूपेण धारयत यद्वा पुरो धत्तं कुरुत उक्थेभिः स्तोत्रैः

भिश्चापि च एतदुभयसाध्यं पटं यज्ञलक्षणं न विजानामि यं पटं यज्ञलक्षणं समरे संगमने देवयजने अतमानाः सततं चेष्टमानाः ऋत्विजो वयंति तंतु
लेखो कं पटे तन्वंति वस्त्ररूपेण निष्पादयंतीत्यर्थः इहास्मिन् लोके कस्य स्वित् इति वितर्के कस्य खलु पुत्रो मनुष्यः वक्त्वानि वक्तव्यानि तानि मानि
परः परस्तादमुष्मिन् लोके वर्तमानो यः सूर्यः तस्य पित्रा अवरेण अवस्तादस्मिन् लोके वर्तमानेन वैश्वानराग्निना अनुशिष्टः सन् वदाति वदे
त् नेनकश्चिदपि प्रवदितुं शक्नोतीत्यर्थः । एतच्च संप्रदायविद्भिरुक्तं ॥ वैश्वानरस्य पुत्रोऽसौ पुरस्ताद्दिवि यः स्थितः छंदांस्यध्वरवस्त्राणि तंतवश्च
जूंषि चेष्टाश्चोतुरस्माभिर्दत्त यमध्वरः परः परास्थितः सूर्यः पिताग्निः पार्थिवो मतः इति तथा जगत्स्रष्टे ईशानत्वमित्यनया प्रतिपादयंती
त्यात्मविदो मन्यते तंतुं तंतून् तंतुस्थानीयानि सूक्ष्माणि वियदादीन्यपंचीकृतानि भूतानि न विजानामि तंतुं तून् पंचीकृतानि स्थूलानि तंतु
स्थानीयानि न च तत्कार्यपटस्थानीयान्यपि वियदादीनि न विजानामि न च तत्कार्यपटस्थानीयं प्रपंचं समरे तं कृता ओतानां च संगमने अ
तमानाः सततं चेष्टमानाः संसारिणः वयंति उत्पादयंति तेषां भोगार्थं ईश्वरः सृजतीति कर्तृत्वमुपचर्यते । इहास्मिन् विषये परः परस्ताद्बुधे
र विषये वर्तमानानि च वक्त्वानि वक्तव्यानि अवरेण अर्वाचीनेन मृत्युतरकालमुत्पन्नेन पित्रा स्वजनकेन अनुशिष्टः सन् कस्य स्वित् कस्य खलु
पुत्रः वदाति वदेत् । स्वात्मतः प्राचीनं तत्त्वं अजानानः कश्चिदपि न वदेदित्यर्थः ॥ ॥ अथ तृतीया ॥ ॥ स इत्तंतुं स विजानात्योतुं स वक्त्वान्यृतुथा वदा
ति । य ईं चिकेतदमृतस्य गोपा अवश्चरन्परो अन्येन पश्यन् ॥ ॥ यद्यप्युक्तेन प्रकारेण दुर्ज्ञानानि तथाप्येतानि वैश्वानरोऽग्निर्जानाति वदति च यत्नया

च०भा० वद्भ्यो हविर्लक्षणधनयुक्तेभ्यो नोऽस्मभ्यं पुरुवाजेभिः बहुभिरन्नैः ऊती ऊतिभिः रक्षणैः चित्रं चायनीयं रयिं धनं तुविष्प्रं देहि धेहि प्रयच्छ। चशब्दाद्वक्ष्यमाणे
१२६ न समुच्चयार्थः। येन राधसा साधनेन श्रवसा अन्नेन च सुवीर्येभिः शोभनवीर्यैः अन्या जनान् मनुष्यान् अतिशयेनाभिसंति। अभिभवंति तादृशा
न्पुत्रांश्चास्मभ्यं देहीत्यर्थः॥ ॥अथ षष्ठी॥ ॥इमं यज्ञं चनो धा अग्न उशन्यं त आसानो जुहुते हविष्मान्॥ भरद्वाजेषु दधिषे सुवृक्तिमवीर्वाज
स्य गध्यस्य सातौ॥ ॥हे अग्ने उशन् कामयमानस्त्वं इमं पुरोवर्तिनं यज्ञं यागसाधनं चनो हविर्लक्षणमन्नं धाः धेहि स्वात्मनि धारय। यं चरुपुरोडा
शादिकं आसानः आसीनः उपविशन् हविष्मान् हविर्युक्तो यजमानः ते तुभ्यं त्वदर्थं जुहुते जुहोति तमिमम् इत्यन्वयः। अपि च भरद्वाजेषु ऋषि
षु सुवृक्तिं सुष्ठु दोषैर्वर्जितां स्तुतिं दधिषे धारय गध्यस्य गध्यतिर्मिश्रीभावकर्मा। मिश्रणीयस्य प्राप्यस्य वाजस्यान्नस्य सातौ संभजननिमित्ते अवीः
अस्मानृषीनवासीः॥ ॥अथ सप्तमी॥ ॥वि द्वेषांसीनुहि वर्धयेळां मदेम शतहिमाः सुवीराः॥ ॥हे अग्ने द्वेषांसि द्वेष्टॄन् शत्रून् वि नुहि विविधं ग
मय। इळां अन्नं चास्मदीयं वर्धय वयं च सुवीराः शोभनवीर्यैः पुत्रपौत्रादिभिरुपेताः संतः शतमिहाः शतहेमंतान् शतसंवत्सरान् मदेम तृप्ता
भूयास्म॥ ॥इति चतुर्थस्य पंचमे द्वादशो वर्गः॥ ॥यजस्व होतरिति षड्ऋचमेकादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं। अनुक्रम्यते च। यज राम
स्व षडिति प्रातरनुवाके आश्विने शस्त्रे चोक्तो विनियोगः। यजस्व होतुरिति सूक्तं॥ ॥तत्र प्रथमा॥ ॥यजस्व होतरिषितो यजीयानग्ने बाधो मरुतां १२६
न प्रयुक्ति॥ आ नो मित्रावरुणा नासत्या द्यावा होत्राय पृथिवी ववृत्याः॥ ॥हे होतर्देवानामाह्वातरग्ने यजीयान् यष्टृतमस्त्वं इषितः अस्माभिः प्रे

र्षितः सन्नुनेति संप्रत्यर्थे संप्रति प्रयुक्ति प्रयुक्तौ प्रयुज्यमाने यज्ञे मरुतां देवानां बाधः शत्रूणां बाधकं गणं यजस्व। यद्वैतद्वाक्यद्वयं हे होतरग्ने यजस्व दे
वानित्येकं वाक्यं प्रयुज्यत इति प्रयुक्ति बलं मरुतां बलमिव अस्मच्छत्रून् बाधो बाधस्वेति द्वितीयं वाक्यं॥ अपि च मित्रावरुणा अहरभिमानी देवो मित्रः व
रुणः रात्र्यभिमानी तौ च नासत्या सत्यस्य नेतारौ सत्यस्वभावौ वा नासिकाप्रभवौ वा अश्विना द्यावापृथिवी दिवं पृथिवीं च एतांश्च देवान् होत्राय युष्म
दीयाय तदर्थं आववृत्याः आवर्तयामहे चेत्यर्थः॥ ॥अथ द्वितीया॥ ॥त्वं होता मंद्रतमो नो अध्रुगन्तर्देवो विदथा मर्त्येषु॥ पावकया जुह्वा वह्नि
रासाग्ने यजस्व तन्वं तव स्वां॥ ॥हे अग्ने त्वं मर्त्येषु मनुष्येषु अंतर्मध्ये वर्तमानो विदथा विदथेषु यज्ञे होता देवानामाह्वाता भवसि। कीदृशः त्वं मंद्रत
मः स्तुत्यतमः नोऽस्माकं अध्रुक् अद्रोग्धा अस्मदर्थं द्रोहरहितो वा सर्वदा मित्रभूत इत्यर्थः। देवो दानादिगुणकः अपि च हे अग्ने जुह्वाऽऽहूयंते अस्यामाहुत
य इति जुह्वा ज्वालया पावकया शोधयित्र्या आसा आस्येन देवानामास्यभूतया अग्निर्हि विश्वो वोढा तवस्वां स्वभूतां स्विष्टकृतां स्वां तन्वं तनुं यजस्व॥
॥ ॥अथ तृतीया॥ ॥धन्या चिद्धि त्वे धिषणा वष्टि प्र देवाञ्जन्म गृणते यजध्यै॥ वेपिष्ठो अंगिरसां यद्ध विप्रो मधु च्छंदो भनति रेभ इष्टौ॥ ॥धन्या धनमिवं
ती धनहेतुभूता धनं लभमाना वा धनगणं लब्धेति यत्र धिषणा स्तुतिः हे अग्ने त्वे त्वां वष्टि कामयते विदिष्यत तत्सदप्रेरणं। किमर्थं देवान् युष्म्यानिंद्रादी
न् प्र यजध्यै प्रकर्षेण यष्टुं सदीयजन्म प्रादुर्भावं गृणते स्तुवते यजमानाय ईदृग्भूतयजमानार्थं यद्वा यद्वा खलु अंगिरसां ऋषीणां मध्ये वेपिष्ठः अति
शयेन स्तुतः प्रेरयिता विप्रो मेधावी रेभः स्तोता भरद्वाजः इष्टौ यज्ञे मधुमधुवन्मदकरं छंदः स्तोत्रं भनति उच्चारयति। तदा धिषणा वष्टीत्यन्वयः॥ अथ चतुर्थी॥ ॥

ऋं०वे०भा० अदिद्युतत्स्वपाको विभावाग्ने यजस्व रोदसी उरूची॥ आयुं न यं नमसा रातहव्या अंजंति सुप्रयसं पंच जनाः॥४॥ ॥ अयमग्निः सु अदिद्युतत् सुष्ठु द्यो
१२७ तते दीप्यते कथंभूतः अपाकः पाकः पक्तव्यप्रज्ञो मूर्खः तद्विलक्षणो ऽपाकः विभावा दीप्तिमान् उक्तोपि प्रत्यक्षकृतः हे अग्ने स त्वं उरूची उरु विस्तीर्णे
अंचत्यौ विस्तृते रोदसी द्यावापृथिव्यौ यजस्व हविषा पूजय॥ आयुं न मनुष्यमतिथिमिव पंच जना मनुष्याः ऋत्विग्यजमानलक्षणाः रातहव्याः
दत्तहविष्काः संतः सुप्रयसं शोभनहविर्लक्षणान्नं अग्निं नमसानेन हविर्लक्षणेन अंजंति सिंचंति तर्पयंति सर्वे यजस्वेत्यन्वयः॥ ॥ अथ पंचमी॥ ॥
वृंजे ह यन्नमसा बर्हिरग्नावयामि स्रुग्घृतवती सुवृक्तिः॥ अम्यक्षि सद्म सदने पृथिव्या अश्रायि यज्ञः सूर्ये न चक्षुः॥५॥ ॥ यद्यदा खलु नमसा
हविषा सह अस्मो अग्निसमीपे बर्हिः वृंजे वृजि छेदनार्थः छिद्यते आस्तीर्यत इत्यर्थः सुवृक्तिः सुप्राप्ययजमाने अम्यक्षि आप्तो भवति तत्र हद्दो
नः सूर्ये न चक्षुः यथा सूर्ये सर्वस्य प्रेरके आदित्ये प्रकाशो तेजः समवेति तद्वत्॥ ॥ अथ षष्ठी॥ ॥ दशस्या नः पुर्वणीक होतर्देवेभिरग्ने अग्निभि
रिधानः॥ रायः सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः॥६॥ ॥ हे पुर्वणीक बहुज्वाल होतर्देवानामाह्वातरग्ने देवैर्द्योतमानै रश्मिभिः अग्निभिः
तद्विभूतिभूतैः सार्धं इधानः इध्यमानो दीप्यमानः सन् नो अस्मभ्यं रायो धनानि दशस्य प्रयच्छ हे सहसः सूनो बलस्य पुत्र वावसानाः हविषा राम
लो आच्छादयंतो वयं वृजनं वर्जनीयं वृत्रमिव अंहः पापं अति स्रसेम अतिगच्छेम अतिक्रामेमेत्यर्थः॥ ॥ इति चतुर्थस्य पंचमे त्रयोदशो वर्गः॥ ॥ मध्ये १२७
होतेति षडृचं द्वादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं मध्य इत्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥ ॥ तत्र प्रथमा॥ ॥

स्वेष्व पुरो दधिध्वं विभावा विशेषेण दीप्यमानः जातवेदाः जातानां वेदिता सो ऽग्निः हि यस्मात् नो ऽस्मान् स्वध्वराः शोभनयागान् करोति करोतीति तस्मात् सु पुरो दधिध्वमि
त्यन्वयः॥ ॥ अथ द्वितीया॥ ॥ तमु द्युमः पुर्वणीक होतरग्ने अग्निभिर्मनुष इधानः॥ स्तोमं यमस्मै ममतेव शूषं घृतं न शुचि मतयः पवंते॥ ॥ हे द्यु
मः दीप्तिमन् पुर्वणीक बहुज्वाल होतर्देवानामाह्वातरग्ने अग्निभिः तवावयवभूतैरग्निभिः सार्धं इधानः समिध्यमानो दीप्तः सन् मनुष्यो मनुष्य
स्य स्तोतुस्त्वमुत स्तोमं शृण्विति शेषः उ इति पदपूरणं यं स्तोमं स्तोत्रं शूषं सुखकरं घृतं न पवित्राभ्यामुत्पूतं घृतमिव शुचिं शुद्धं अस्मा अस्मै अग्नये मत
यः मंतारः स्तोतारः ममतेव ममता नाम ऋषिः सा यथा दीर्घतमसो माता सेव पवंते पुनंति स्तुवंति दोषवर्जितमुच्चारयंतीत्यर्थः तं स्तोममभिशृण्वित्यन्वयः॥
॥ अथ तृतीया॥ ॥ पीपाय स श्रवसा मर्त्येषु यो अग्नये ददाश विप्र उक्थैः॥ चित्राभिस्तमूतिभिश्चित्रशोचिर्व्रजस्य साता गोमतो दधाति॥ ॥ सोयं
यजमानः मर्त्येषु मनुष्येषु मध्ये श्रवसान्नेन पीपाय वर्धते हे विप्र मेधावी यो यजमानः उक्थैः स्तुतिभिः गोमतः गोभिर्युक्तस्य व्रजस्य गोष्ठस्य सातासा
तौ संभजने दधाति धारयति॥ ॥ अथ चतुर्थी॥ ॥ आ यः पप्रौ जायमान उर्वी दूरेदृशा भासा कृष्णाध्वा॥ अध बहु चित्तम ऊर्म्यायास्तिरः शोचिषा
ददृशे पावकः॥ ॥ कृष्णाध्वा कृष्णवर्त्मा यो ऽग्निः जायमानः प्रादुर्भवन् उर्वी विस्तीर्णे द्यावापृथिव्यौ दूरेदृशा दूरे दृश्यमानया भासा दीप्त्या आपप्रौ आ
पूरयति। स पावकोग्निः अध अनंतरं ऊर्म्यायाः रात्रिनामैतत् रात्रेः संबंधि बहु चित् बहुलमपि तमः अंधकारं शोचिषा दीप्त्या तिरस्कुर्वन् ददृशे दृश्यते॥
॥ अथ पंचमी॥ ॥ नू नश्चित्रं पुरुवाजाभिरूती अग्ने रयिं मघवद्भ्यश्च धेहि॥ ये राधसा श्रवसा चात्यन्यान्सुवीर्येभिश्चाभि संति जनान्॥ ॥ हे अग्ने मघ

सं॰भा॰ १२८

न्तोदः सर्वस्य प्रेरकः। सूर्य इव अध्वानि समार्गे अंतरिक्षे अधौत् प्रकाशते अपि च अद्रोघो न अद्रोघ इव यद्वा प्राणरूपेण सर्वेषामद्रोग्धा वायुरिव नाहशः
अमर्त्यो मरणरहितः। सोऽग्निः। ओषधीषु ओषधयो धीयंत इत्योषधानि वनानि तेषां इविता शीघ्रगामी सन्। अवर्चकेनाप्यवारणीयः पश्व भवन्
न् आत्मना स्वप्रकाशेनैव चेतति चेतयति सर्वं जगत् ज्ञापयति॥ ॥अथ चतुर्थी॥ ॥साम्याकेभिरेतरी न शूषैरग्निः ष्टवे दम आ जातवेदाः। द्रुन्नो
वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः॥ ॥जातवेदाः जातधनो जातप्रज्ञो वा सोऽग्निः। अस्माकेभिः अस्मदीयैः स्तोत्रभिः एतरी न एतृरिया जमा-
नपुरुषे विद्यमानानि स्तोत्राणि तथात्यंतं सुखकराणि तथा शूषैः सुखकरैः स्तोत्रैः दमे अस्मदीययज्ञगृहे आभिमुख्येन स्तवैः स्तूयते। अपि च
द्रुन्नः द्रुमः स एव अन्नं यस्य स तथोक्तः। अत एव वन्वन् वनानि संभजन् क्रत्वा न क्रतुना आत्मीयेन कर्मणा च अर्वा गंताश्ववान्। तत्र दृष्टांतः। उस्रः
पितेव पिता पालयिता वत्सानां जनको वा उस्रो वृषभः स इव स यथा मिथुनार्थं शीघ्रं गच्छति तद्वत्। यज्ञैः यज्ञवद्भिर्यजमानैः अजारयायि स्तूयते जर-
ते। स्तुतिकर्मण एतद्रूपं॥ ॥अथ पंचमी॥ ॥अध स्मास्य पनयंति भासो वृथा यत्तक्षदनुयाति पृथ्वीं। सद्यो यः स्पंद्रो विषितो धवीयानृणो न तायुरति ध-
न्वा राट्॥ ॥अधास्मिन् लोके स्म इति पूरणः। अस्याग्नेर्भासो रश्मीन् पनयंति स्तोतारः। स्तुवंति यद्यदा वृथा अनायासेन तक्षत् तनूकुर्वन् वनानि
सद्यः दहन् पृथिवीं विस्तीर्णां अरणिरूपां अनुयाति अनुगच्छति तदानीं पनयंतीत्यन्वयः। सोऽग्निः। स्पंद्रः स्पंदनवान् विषितः विमुक्तः प्रतिबं- राम १२८
धरहितः। अत एव सद्यः शीघ्रं धवीयान् गंतृतमो भवति कइव ऋणो न तायुः। ऋणोतिर्गतिकर्मा। तायुरिति स्तेननाम यथा स्तेनः शीघ्रं गंताभ-

वतिं तद्वत् सोऽयमग्निः। धन्वा मरुभूमिमतिक्रम्य राट् राजते। यद्वा धन्वं अस्मात् आपद्यति धन्वांतरिक्षं अति अत्रायेनांतरिक्षमतिक्रम्य राजते॥ ॥अथ षष्ठी॥ ॥
॥स त्वं नो अर्वन्निदाया विश्वेभिरग्ने अग्निभिरिधानः। वेषि रायो वि यासि दुच्छुना मदेम शतहिमाः सुवीराः॥ ॥हे अर्वन् अंतरात्मेसतता इवा त्वं
निदायाः निंदित्र्याः प्रजायाः निंदाया एव वा यद्दाहेति शेषः। कथंभूतः सन्। विश्वेभिः सर्वैरग्निभिः त्वच्छाखाभूतैः इधानः इध्यमानः सन् रा-
यो धनानि चास्मान् गमय। यद्वा हविर्लक्षणानि धनानि वेषि कामयसे दुच्छुनाः दुःखकारिणीः शत्रुसेनाः वियासि च विविधं गमयसि। वयं
च सुवीराः शोभनपुत्रपौत्राः संतः शतहिमाः शतसंवत्सरान् मदेम॥ ॥इति चतुर्थस्य पंचमे चतुर्दशो वर्गः॥ ॥त्वद्विश्वेति षळृचं त्रयोद-
शं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमाग्नेयं त्वद्विश्वेत्यनुक्रांतं प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥ ॥तत्र प्रथमा॥ ॥त्वद्विश्वा सुभग सौ-
भगान्यग्ने वि यंति वनिनो न वयाः। श्रुष्टी रयिर्वाजो वृत्रतूर्ये दिवो वृष्टिरीड्यो रीतिरपां॥ ॥हे सुभग शोभनधनाग्ने विश्वा विश्वानि सर्वाणि सौ-
भगानि धनानि त्वत् त्वत्तः वियंति विविधं निर्गच्छंति हिरण्यमूलत्वात् सर्वेषां धनानां हिरण्यं चाग्नेः सकाशादुत्पन्नं तस्य रेतः परापत-
त् तद्धिरण्यमभवदिति श्रुतेः। निर्गमने दृष्टांतः। वनिनो न वयाः यथा वृक्षात् शाखा विविधं निर्गच्छंति तद्वत्। यथा रयिः पृथु संघस्त्वत्सहे
व श्रुष्टी क्षिप्रं वेति निर्गच्छंति। पश्वादौ वेरयिः पश्वन्नेवा वरूध इति ते निरीयके॥ वृत्रतूर्ये वृत्राणां शत्रूणां हिंसके शत्रून्जेतुं वाजो बलं च त्वत्त
एवेति। दिवोंऽतरिक्षाद्या वृष्टिः सापि च त्वत्तः त्वत्त एवेति। अग्नेः प्रास्ता हुतिः सम्यगादित्यमुपतिष्ठति। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा

ऋ०भा० इति स्मरणात्॥ अत त्वमीज्यः सर्वैः स्तुत्यः सन् अपामुदकानां रीतिं गमयिता भवसि॥ ॥अथ द्वितीया॥ ॥त्वं भगो न आ हि रत्नमिषे परिज्मेव क्षयसि
दस्मवर्चाः॥ अग्ने मित्रो न बृहत ऋतस्यासि क्षत्ता वामस्य देव भूरेः॥ ॥हे अग्ने भगो भजनीयस्त्वं नोऽस्मभ्यं रत्नं रमणीयं धनं आ इषे आगमय प्रयच्छ
१२९ इत्यगता विद्युत्स्येतद्रूपं हीति पूरणः दस्मवर्चाः दर्शनीयदीप्तिः त्वं परिज्मेव परितो गंता वायुरिव क्षयसि सर्वत्र निवससि यद्वा क्षयतिरैश्वर्यकर्मा
सर्वस्येशिषे हे अग्ने मित्रो न प्रमीतेस्त्रायको देव इव बृहतो महत ऋतस्य सत्यस्य यज्ञस्य वा क्षत्ता सिक्षदतिः स्वदानकर्मा दाता भवसि तथा
हे देव द्योतमानाग्ने भूरेः बहुलस्य वामस्य वननीयस्य धनस्य च दाता भवसीत्यनुषंगः॥ ॥अथ तृतीया॥ ॥स सत्पतिः शवसा हंति वृत्रमग्ने
विप्रो विपणेर्भर्ति वाजं॥ यं त्वं प्रचेत ऋतजात राया सजोषा नप्त्रापां हिनोषि॥ ॥हे अग्ने सत्पतिः सतां पालयिता स पुरुषः वृत्रमावरकं शत्रुं शव
सा बलेन हंति स च विप्रो मेधावी सन् पणेर्वणिजः एतन्नाम्नोऽसुरस्य वाजमन्नं बलं वा विभर्ति वियुज्य हरति हृत्यहोर्भर्तृ इति भर्त्वं हे प्रचेतः प्र
कृष्टमनः हे ऋतजात ऋतमिति यज्ञनाम तदर्थं जाताग्ने अपां नप्त्रा नपात् पित्रा पुत्रेण मध्यमस्थानेन वैद्युतेनाग्निना सजोषाः सततं स्वयं पुरु
षं राया चतुर्थ्यर्थे तृतीया धनार्थं हिनोषि प्रेरयसि स हंतीत्यन्वयः॥ ॥अथ चतुर्थी॥ ॥यस्ते सूनो सहसो गीर्भिरुक्थैर्यज्ञैर्मर्तो निशितिं वे राम
द्यानट्॥ विश्वं स देव प्रति वारमग्ने धत्ते धान्यं पत्यते वसव्यैः॥ ॥हे सहसः सूनो बलस्य पुत्राग्ने तव निशितं तैक्ष्ण्यं मर्तो मनुष्यो यजमानः गी १२२
र्भिः स्तुतिभिः उक्थैः शस्त्रैः यजमानः साधनैर्हविर्भिश्च वेद्या वेद्यायां यज्ञभूमौ आनट् प्रापयति समर्त्तः हे देव द्योतमानाग्ने विश्वं सर्वं पर्याप्तं वारं

मध्ये होता दुरोणे बर्हिषो राळग्निस्तोदस्य रोदसी यजध्यै॥ अयं स सूनुः सहस ऋतावा दूरात्सूर्यो न शोचिषा ततान॥ ॥होता देवानामाह्वाता बर्हि
षो यज्ञस्य राट् राजा अग्निः तोदस्य तुद्यते तपसा पापीयतां इति तोदो यजमानः दुरोणे गृहमध्ये निषीदतीति शेषः किमर्थं रोदसी द्यावापृथिव्यौ यजध्यै
यष्टुं सलाद अयं सहसः सूनुः सहसः पुत्रः ऋतावा सत्यवान् यज्ञवान्वा अग्निः सूर्यो न सूर्य इव दूरात् दूरत एव शोचिषा तेजसा ततान आततनोति
विस्तारयति दूरदेशे वर्त्तमानोपि सूर्य इव सर्वं जगद्भासयतीत्यर्थः॥ ॥अथ द्वितीया॥ ॥आ यस्मिन्त्वे स्वपाके यजत्र यक्षद्राजन्सर्वतातेव नु द्यौः॥
त्रिषधस्थस्ततरुषो न जंहो हव्या मघानि मानुषा यजध्यै॥ ॥द्यौः स्तोता सर्वतातेव इव शब्देन यजमानो नामेतत् सर्वताता सर्वैः स्तायमाने यज्ञे यद्वा
सर्वशब्दात् स्वार्थिके तातिप्रत्ययः सर्वः स्तोता हे यजत्र इष्टव्य राजन् राजमानाग्ने स्वपाके त्वे यस्मिन् त्वयि नु अस्यंत क्षिप्रं आ यक्षत् आयज
ति हवींषि जुहोति त्रिषधस्थः त्रिषु लोकेषु सह स्थितः यद्वा गार्हपत्यादि रूपेण त्रिधा अवस्थितः तादृशः त्वं ततरुषो न तरिता सूर्य इव जंहः शीघ्र
गंता भव जंह इति हंतेर्गतिकर्मणो रूपं यद्वा प्लवनतरणयोरित्यस्मात् क्वसौ रूपं ततरुषः ततर्वानिति तस्य षष्ठ्यां रूपमेतत् ततरुष इति तितुः
सूर्यस्य व जंहो वेगवान्स्तव भवतीत्यर्थः किमर्थं मघानि मंहनीयानि प्रशस्यानि मानुषा मनुष्याणां संबंधीनि हव्या हव्यानि हवींषि यजध्यै यष्टुं दे
वेभ्यो दातुं॥ ॥अथ तृतीया॥ ॥तेजिष्ठा यस्यारतिर्वनेराट् तोदो अध्वन्न वृधसानो अद्यौत्॥ अद्रोघो न द्रविता चेतति त्मन्नमर्त्योऽवर्त्र ओषधीषु॥
यस्याग्नेः अरतिर्गंत्री ज्वाला तेजिष्ठा अतिशयेन तेजस्विनी सती वनेराट् दावरूपेणारण्ये राजमाना वर्त्तते वृधसानो वर्धमानः सोऽग्निः तोदो अध्वे

दृश्चार्थे धान्यं च प्रतिधत्ते वसव्यैः वसुभिः प्रपसृते संगच्छते॥ ॥अथ पंचमी॥ ॥ता नृभ्य आ सौश्रवसा सुवीराग्ने सूनो सहसः पुष्यसे धाः॥ कृणोषि य
च्छवसा भूरि पश्वो वयो वृकायारये जसुरये॥ ॥हे सहसः सूनो सहसस्पुत्राग्ने सुवीरा शोभनैः पुत्रैरुपेतानि सौश्रवसा सुश्रवांसि शोभनान्यन्नानि ता
तानि नृभ्यः शत्रुजनेभ्यः आहृत्य धाः अस्मासु धेहि। किमर्थं पुष्यसे पोषणार्थं। यद्वा नृभ्यः स्तुतीनां नेतृभ्योऽस्मभ्यं आधेहि आभिमुख्येन प्रय
च्छ॥ शवसा बलेन युक्तस्त्वं भूरि बहुलं पश्वः पशोः संबंधि दध्यादिलक्षणं यद्वयो न्नं वृकाय अदातेजसुरये उपक्षयित्रेऽरातेवेकरूपाणि करोषित
द्दन्माहृत्वास्मभ्यं प्रयच्छेत्यर्थः॥ ॥अथ षष्ठी॥ ॥वद्मा हि सूनो सहसो नो विहाया ऽग्ने तोकं तनयं वाजि नो दाः॥ विश्वाभिर्गीर्भिरभि पूर्तिमश्यां
मदेम शतहिमाः सुवीराः॥ ॥हे सहसः सूनो अग्ने विहायाः महन्नामैतत् महांस्त्वं नोऽस्माकं वद्मा वदिता हितोपदेष्टा भव। अपि च तोकं पुत्रं तन
यं तत्पुत्रं च वाजि अन्नयुक्तं नोऽस्मभ्यं दाः देहि। अहं स्तोता विश्वाभिः सर्वाभिर्गीर्भिः स्वविषयाः पूर्तिं कामानां संपूर्तिं अभ्यश्यां अभिप्राप्नुयां।
अन्यदुक्तं॥ ॥इति चतुर्थपंचमे पंचदशो वर्गः॥ ॥अग्न्याय इति षल्चं चतुर्दशं सूक्तं भरद्वाजस्यार्षमाग्नेयं षष्ठी शाक्करी। शिष्टाः पंचानुष्टु
भः। तथा चानुक्रांतं अग्न्याय आनुष्टुभं शाक्कर्यंतमिति॥ प्रातरनुवाकाग्नेये क्रतावाश्विन शस्त्रे चेदं सूक्तं। सूत्रितं च। अग्न्यायो होताजनिष्टेति
अतिरात्रेष्वनुवीरारव्ये चतुरात्रे हीने तृतीयेऽहनीदं सूक्तं आज्यशस्त्रं सूत्रितं च। अग्न्या यो मर्त्यो दुव इति॥ ॥तत्र प्रथमा॥ ॥अग्न्या यो मर्त्यो दु
वो धियं जुजोष धीतिभिः॥ भसन्नु ष प्र पूर्व्य इषं वुरीतावसे॥ ॥यो मर्त्यो मनुष्यः अग्ना अग्नौ अग्निविषयं दुवः परिचरणं धियं कर्म च

ऋ०वे०भा० शादिलक्षणं धीतिभिः स्तुतिभिः सार्धं जुजोषत् सेवते आ चरति समर्यः पूर्व्यः पूर्वेषां मुख्यः स नूक्षि प्रंप्र भसत् प्रभासेत प्रकृष्टप्रकाशवान् भवेत् अवसे पुत्रा
दीनी रक्षणार्थं इषमन्नं च वुरीत वृणीत संभजेत शत्रुसकाशान्न लभेतेत्यर्थः॥ ॥अथ द्वितीया॥ ॥अग्निरिद्धि प्रचेता अग्निर्वेधस्तम ऋषिः। अग्निं होता
१३० रमीळते यज्ञेषु मनुषो विशः॥ ॥अग्निरित् अग्निरेव प्रचेताः प्रकृष्टज्ञानेवान्नान्यः कश्चित् हि यस्मादेवं तस्मात् वेधस्तमो विधातृतमः अतिशयेन हवि
र्दानादीनां कर्मणां कर्ता ऋषिः सर्वस्य द्रष्टा भवति। मनुषो मनुष्यस्य यजमानस्य विशः प्रजाः ऋत्विग्लक्षणाः होतारं देवानामाह्वातारं तादृशमग्निं यज्ञे
षु यागेषु ईळते स्तुवंति॥ ॥अथ तृतीया॥ ॥नाना ह्यग्नेऽवसे स्पर्धंते रायो अर्यः। तूर्वंतो दस्युमायवो व्रतैः सीक्षंतो अव्रतं॥ ॥हे अग्ने अर्यः अरेः पुत्रो रायो ध
नानि अवसे च रक्षणार्थं नाना त्वत्सकाशात् पृथग्भूताः स्पर्धंते अहमेव पालयानीति स्पर्धां कुर्वंति आयवो मनुष्याः स्तोतारः दस्युं उपक्षपि
तारं शत्रुं तूर्वंतो हिंसंतः व्रतैः व्रतैर्दैवत्यैर्यागैः अव्रतं व्रतविरोधिनं यागविरोधिनं च पुरुषं शासितं शीक्षंतः सोढुमभिभवितुमिच्छंतः सेवंते॥ ॥अथ चतुर्थी॥ ॥
अग्निरप्सामृतीषहं वीरं ददाति सत्पतिं। यस्य त्रसंति शवसः संचक्षि शत्रवो भिया॥ ॥अयमग्निः वीरं पुत्रं ददाति स्तोतृभ्यः प्रयच्छति कीदृशं पुत्रमप्सां अ
पां महद्यानां कर्मणां सनितारं संभक्तारं ऋतीषहं ऋतीनामरातीनां सोढारं अभिभवितारं सत्पतिं सतां कर्मणां पालयितारं यस्य संचक्षि संदर्शने सति राम
शवसो बलात् भिया भीत्या शत्रवस्त्रसंति उद्विजंति। तं वीरमित्यन्वयः॥ ॥अथ पंचमी॥ ॥अग्निर्हि विद्मना निदो देवो मर्तमुरुष्यति। सहावा यस्यावृतो रयि १३०
र्वाजेष्ववृतः॥ ॥सहावा सहो बलं तद्वान् देवो दानादिगुणयुक्तोऽग्निः विद्मना ज्ञानेन युक्तः सन् तं मर्तं मनुष्यं यजमानं निदो निंदकात् उरुष्यति रक्षति हीति प्र

रकं॥ यस्य मर्त्यस्य रयिः हविर्लक्षणं धनं अदृतः रक्षःप्रभृतिभिरनाक्रान्तं वाजेयज्ञेषु अदृतः अन्यैर्यजमानैरसंभक्तं तस्यैवासाधारणं हविष्येति यजमानं उरुष्य
तीत्यन्वयः॥ ॥अथ षष्ठी॥ ॥ अच्छा नो मित्रमहो देव देवानग्ने वोचः सुमतिं रोदस्योः। वीहि स्वस्तिं सुक्षितिं दिवो नॄन्द्विषो अंहांसि दुरिता तरेम ता तरेम तवावसा त
रेम॥ ॥व्याख्यातेयं॥ अक्षरार्थस्तु। अनुकूलदीप्तिदानादिगुणयुक्त अग्ने द्यावापृथिव्योरभिगतस्त्वं अस्मदीयं सुष्टुतिं यष्टव्यान्देवान्प्रति वोचः प्रब्रूहि हि
वः स्तूयते नॄनस्मान्सुनिवासे अविनाशं गमय। वयं त्वया प्रदत्तेन द्वेष्टॄन्पापानि तत्फलानि दुर्गमाणि चातिक्रमेम। व्यवहितानि जन्मान्तरकृतानि च
अतिक्रमेम त्वदीयेन रक्षणेनायं तं क्रामति॥ ॥इति चतुर्थस्य पंचमे षोडशो वर्गः॥ ॥इमामू षु व इत्येकोनत्रिंशदृचं पंचदशं सूक्तं। आंगिरसस्य वीतहव्य
स्य भरद्वाजस्यार्षं आग्नेयं आद्यो नव जगत्यः। तृतीया षष्ठ्यौ शाक्वर्यौ तिस्रः शक्वर्यौ पंचदशी सप्तदश्यावनुष्टुभौ। अष्टादशी बृहती। दशम्याद्याः पंचमी षोडशी एकोनविं
शी चेति सप्त त्रिष्टुभः। तथा चानुक्रान्तं। इममू ष्वेकोना वीतहव्य ऋषिः ऋषिर्वा जागतं शाक्वर्यौ दशम्यास्तृतीयापंचदश्यौ शाक्वर्यौ षष्ठ्यतिशक्वरी अनुष्टुप्बृहत्यावनु
पांत्येति। प्रातरनुवाके आग्नेये क्रतौ आश्विनशस्त्रे आद्यो मध्ये चः सूत्रितं च। इममू षु वो अतिथिमुषर्बुधमिति नवेति। दशरात्रे पंचमेहनि आद्यं नव चैतत्सूत्रि
तं च इममू षु वो अतिथिमुषर्बुधमिति नवाज्यमिति॥ ॥तत्र प्रथमा॥ ॥इममू षु वो अतिथिमुषर्बुधं विश्वासां विशां पतिमृंजसे गिरा। वेतीद्दिवो जनुषा क
च्चिदा शुचिर्ज्योक् चिदत्ति गर्भो यदच्युतं॥ ॥ हे वीतहव्य ऋषे भरद्वाज वा त्वं विभक्तिवचनयोर्व्यत्ययः। इममु इममेवाग्निं गिरा स्तुत्या सु ऋंजसे सुष्टु प्रसा
धय। ऋंजतिः प्रसाधनकर्मेति यास्कः। कीदृशं अतिथिं सततं गंतारं यद्वा अतिथिवत्पूज्यं उषर्बुधं उषसि प्रबुद्धं विश्वासां सर्वासां विशां प्रजानां पतिं पालयिता

ऋ० दे० भा० रं जनुषा जन्मना स्वत एव शुचिः शुद्धो निर्मलो वाग्निः कश्चित् कदाचित् कस्मिंश्चिद्यागकाले द्विषो हस्तो कात्र आ वेति आगच्छति तदानीं प्रसाधयेत्यन्वयः एवं प्रसा
दितो ऽग्निर्गर्भः अरण्योर्मध्ये भवत्तु वर्तमानः यद्वा द्यावापृथिव्योर्गर्भभूतः सन्नूयत् हविः अच्युतं च्युतिरहितं नित्यं वा अग्निहोत्रादिसाधनभूतं पयः प्रभृतित
१३१ तू ज्योक्चित् चिरकालं अतिभक्षयति ॥ ॥ अथ द्वितीया ॥ ॥ मित्रं न यं सुधितं भृगवो दधुर्वनस्पताविड्यमूर्ध्वशोचिषं ॥ स त्वं सुप्रीतो वीतहव्ये अद्भुत प्र
शस्तिभिर्महयसे दिवे दिवे ॥ ॥ वनस्पतावरण्यां सुधितं सुष्ठु निहितं ईड्यं स्तुत्यं ऊर्ध्वशोचिषं उच्छ्रिततेजस्कं यमग्निं वां मित्रेन मित्रमिव सखिभूत
मिव भृगवो महर्षयः दधुरादधुः । गृहे स्थापितवंतः । हे अद्भुत भगवन्नग्ने स ताहशस्त्वं वीतहव्ये एतत्संज्ञके ऋषौ सुप्रीतः सुष्ठु प्रियमाणो भ
वः दिवे दिवे प्रतिदिनं प्रशस्तिभिः प्रकृष्टैः स्तोत्रैः महयसे पूज्यसे । भरद्वाज ऋषिश्चेत्वीतहव्येदत्तहविष्को भरद्वाज इति योजनीयं ॥ ॥ अथ तृतीया ॥ ॥
स त्वं दक्षस्यावृको वृधो भूरर्यः परस्यांतरस्य तरुषः ॥ रायः सूनो सहसो मर्त्येष्वा छर्दिर्यछ वीतहव्याय सप्रथो भरद्वाजाय सप्रथः ॥ ॥ हे अग्ने स त्वं
स ताहशः अवृको बाधकरहितः त्वं दक्षस्यानुष्ठानसमर्थस्य वृधो वर्धयिता भूर्भवसि । तथा परस्य विप्रकृष्टस्य अर्यः अरेः शत्रोः अंतरस्यांति
कतरस्य निकृष्टस्य शत्रोः अंतरस्यांतिकतरस्य निकृष्टस्य शत्रोः तरुषः तरिता भवसि । अतः कारणात् हे सहसः सूनो सप्रथः सर्वतः पृथुस्त्वं मर्त्ये राम
षु मनुष्येषु मध्ये भरद्वाजाय संभृतहविर्लक्षणायान्नाय । वीतहव्याय वीतं हविर्येन ताहशाय भरद्वाजाय रायो धनानि छर्दिर्गृहं च आ यछ प्रय
छ सप्रथ इति पुनरुक्तिरादरार्था ॥ ॥ अथ चतुर्थी ॥ ॥ द्युतानं वो अतिथिं स्वर्णरमग्निं होतारं मनुषः स्वध्वरं ॥ विप्रं न द्युक्षवचसं सुवृक्तिभि १३१

॥ दशमेहन्याग्निमारुते समिध्यमिति तत्रो जातवेदस्य निविद्धानार्थः॥ सूत्रितं चासमिध्यमग्निं समिधा गिरा गृणइति तत्र चप्रेति तत्र प्रथमा सूक्ते सप्तमी॥ ॥ समिध्य
मग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवं॥ विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसं॥ ॥ समिध्यं सम्यग्दीप्तमग्निं समिधा समिधनहे
तुभूतया गिरा स्तुत्या गृणे स्तौमि। यद्वा समिधा समिद्भिर्दारुभिः समिध्यं सम्यगिध्यं अपि च शुचिं शुभ्रं पावकं सर्वेषां शोधनं ध्रुवं निश्चलं अग्निं अध्वरे यज्ञे पुर
स्करोमीति शेषः विप्रं मेधाविनं होतारं देवानामाह्वातारं पुरुवारं बहुभिर्वरणीयं अद्रुहं अद्रोग्धारं सर्वेषामनुकूलं कविं क्रांतदर्शिनं जातवेदसं जातानां वेदितार
मग्निं सुम्नैः सुखकरैः स्तोत्रैः ईमहे संभजामहे॥ यद्वा द्वितीयार्थे तृतीया॥ सुम्नानि धनानि ईमहे याचामहे॥ ॥ अथाष्टमी॥ ॥ त्वां दूतमग्ने अमृतं युगेयु
गे हव्यवाहं दधिरे पायुमीड्यं॥ देवासश्च मर्तासश्च जागृविं विभुं विश्पतिं नमसा नि षेदिरे॥ ॥ हे अग्ने त्वां देवासो देवाश्च मर्तासो मनुष्याश्च दूतं दधिरे कृतवंतः कीदृशं
त्वां अमृतं अमरणं युगेयुगे काले काले यागानुष्ठानसमये हव्यवाहं हव्यानां हविषां वोढारं पायुं पालयितारं ईड्यं स्तुत्यं ते च उभयविधाः जागृविं जागर
णशीलं विभुं व्याप्तं विश्पतिं विशां प्रजानां पालयितारं तमग्निं नमसा नमस्कारेण हविर्लक्षणेनान्नेन वा नि षेदिरे उपसेदिरे॥ ॥ अथ नवमी॥ ॥ विभूषन्नग्न
उभयाँ अनु व्रता दूतो देवानां रजसी समीयसे॥ यत्ते धीतिं सुमतिमावृणीमहेऽध स्मा नस्त्रिवरूथः शिवो भव॥ ॥ हे अग्ने उभयान् उभयविधान् देवान् मनुष्यां
श्च विभूषन् विशेषेण भूषयन्नलंकुर्वन् त्वं अनु व्रता अनुव्रतेषु कर्मसु यागेषु देवानां दूतः सन् रजसी द्यावापृथिव्यौ समीयसे संचरसि। देवानां नेतुं द्युलोकं
गच्छसि। अर्वाचं नेतुं इमं लोकं चायन्यस्मात्तुभ्यं त्वदर्थं धीतिं कर्म सुमतिं शोभनां स्तुतिं च आवृणीमहे वयं संभजामहे। अध अतः कारणात् त्रिवरूथः त्रिस्थानो

नोऽस्माकं शिवः सुखकरो भवेत्येतत्सदशरणं॥ ॥ प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ त्रैष्टुभे छंदसि तं सुप्रतीकमित्याद्याः षड्ऋचः सूत्रितं च। तं सुप्रतीकमिमु
तिषड्ति तत्र प्रथमा सूक्ते दशमी॥ ॥ तं सुप्रतीकं सुदृशं स्वञ्चमविद्वांसो विदुष्टरं सपेम॥ स यक्षद्विश्वा वयुनानि विद्वान्प्र हव्यमग्निरमृतेषु वोचत्॥ ॥ अविद्वांसो
वैदुष्यरहिताः अल्पमतयो वयं विदुष्टरं विद्वत्तरं सर्वज्ञं तमग्निं सपेम संपरिचरेम। कीदृशं सुप्रतीकं शोभनांगं सुसंदृशं शोभनदर्शनं स्वञ्चं सुष्ठु अंचितं गमनं किंच
स नाहूतोऽग्निः यक्षत् देवान्यजतु। विश्वा सर्वाणि वयुनानि ज्ञाननामैतत् इह तु ज्ञातव्येषु वर्तते ज्ञातव्यान्यर्थजातानि विद्वान् जानन्नग्निरमृतेषु मरणरहितेषु दे
वेषु अस्मदीयं हविः प्र वोचत् प्रब्रवीतु। युष्मदर्थं हविः कल्पितं तदर्थं यूयमागच्छतेत्ययं कथयतु॥ ॥ इति चतुर्थस्य पंचमे सप्तदशो वर्गः॥ ॥ अथैकादशी॥ ॥
॥ तमग्ने पास्युत तं पिपर्षि यस्त आनट् कवये शूर धीतिं॥ यज्ञस्य वा निशितिं वोदितिं वा तमित्पृणक्षि शवसोत राया॥ ॥ हे अग्ने तं पुरुषं पासि रक्षसि उत अपि
च तं पिपर्षि कामैः पूरयसि। यः पुरुषः हे शूर शौर्यवन् अग्ने कवये क्रांतदर्शिनाय ते तुभ्यं त्वदर्थं धीतिं कर्म स्तुतिं वा आनट् प्राप्नोति। यद्वा क्रियाग्रहणं कर्तव्य
मिति कर्मणः संप्रदानत्वाच्चतुर्थी। निशितिं तां धीतिं आनट् प्रापयति तं पासीत्यन्वयः। उत अपि च ते यज्ञस्य यागस्य वा तत्साधनभूतस्य हविषो वा निशि
तिं वा निशितिः संस्कारः तं वा उदितिं उद्गमनं वा आनट् प्रापयति। तमित्तमेव शवसा बलेन पृणक्षि पूरयसि उत अपि च राया धनेन पूरयसि॥ ॥ अथ द्वादशी॥ ॥
त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्॥ सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥ ॥ हे अग्ने त्वं वनुष्यतो हिंसकाच्छत्रोः नितरा
मस्मान् रक्ष हे शवसावन् बलवन्नग्ने त्वमु त्वमेव नोऽस्मान् अवद्यात् पापात् नि पाहि त्वा त्वां ध्वस्मन्वत् ध्वसनवत् ध्वस्तदोषं पाथो हविर्लक्षणं अस्माभिर्दत्त

सं०भा० म त्वं सम भ्येतु सम्यगभिगच्छतु। स्पृहयाय्यः स्पृहणीयः सहस्त्री सहस्रसंख्यया युक्तः रयिः त्वया दत्तं धनं सम्यगभिगच्छतु॥ कृत्स्ने दशरात्रे पंचमेहन्याग्निवैदी
१३३ नैतित्वं चो जातवेदसमिति विधानीयः सूत्रितं च। अग्निर्होता गृहपतिः स राजेति तिस्र इति॥ पत्नीसंयाजेषु गृहपतिरायाज्यानुवाक्याः सूत्रितं च। अग्निर्होता गृहप
तिः स राजा हव्यवाळग्निरजरः पिता न इति पत्नीसंयाजा इति। आश्विनशस्त्रस्यैव प्रतिपत् सूत्रितं च। अग्निर्होता गृहपतिः स राजेति प्रतिपदेकया विनि
योग इति॥ सैषा सूक्ते त्रयोदशी॥ ॥ अग्निर्होता गृहपतिः स राजा विश्वा वेद जनिमा जातवेदाः॥ देवानामुत यो मर्त्यानां यजिष्ठः स प्र यजतामृतावा॥ ॥
होता देवानामाह्वाता राजा राजमानः सोग्निः गृहपतिः गृहाणां पतिरधिपतिर्भवति। तथा विश्वा विश्वानि सर्वाणि जनिमा जन्मानि जन्मवंति भूतजा
तानि जातवेदाः जातप्रज्ञः सन् वेद वेत्ति जानातीत्यग्निः देवानामिंद्रादीनां उतापि च मर्त्यानां मनुष्याणां च मध्ये यजिष्ठः अतिशयेन यष्टा भवति ऋतावा
ऋतं सत्यं यज्ञो वा तद्वान् सोग्निः प्र यजतां प्रकर्षेण देवान् यजतु॥ ॥ अग्ने यदद्येति दर्शपूर्णमासयोः स्विष्टकृतो याज्या सूत्रितं च। अग्ने यदद्य विशो अध्व
रस्य होतरित्यनवानं यजति॥ ॥ सैषा सूक्ते चतुर्दशी॥ ॥ अग्ने यदद्य विशो अध्वरस्य होतः पावकशोचे वेष्ट्वं हि यज्वा॥ ऋता यजासि महिना वि यद्भू
र्हव्या वह यविष्ठ या ते अद्य॥ ॥ अध्वरस्य होतः यज्ञस्य निष्पादक पावकशोचे शोधकदीप्ते एवंभूत हे अग्ने अद्यास्मिन्काले विशो मनुष्यस्य यजमा राम
नस्य यत्कर्तव्यं तत् वेः कामयस्व। हि यस्मात्त्वं यज्वा देवानां यष्टा भवसि। तस्मात्त्वं ऋता ऋतेन यज्ञेन यजासि देवान्यजसि। अपि च महिना महिम्ना स्वमा १३२
हात्म्येन यत् यस्मात् विभूः व्याप्तो भवसि। अतः कारणात् हे यविष्ठ युवतमाग्ने ते तुभ्यं त्वदर्थं अद्य इदानीं या यानि हव्या हव्यानि जुहुमः तानि हव्यानि ह

भिर्हव्यवाहमरतिं देवमृंजसे॥ ॥ हे वीतहव्य त्वं सुवृक्तिभिः शोभनाभिः स्तुतिभिः ईड्यवाहं हविषां वोढारं देवमग्निं ऋंजसे प्रसाधय कीदृशं द्युतानं दीप्यमानं शेयु
भागमतिथिवत्पूज्यं स्वर्णरं स्वर्गस्य नेतारं मनुषो मनोः प्रजापतेर्यज्ञे होतारं देवानामाह्वातारं स्वध्वरं शोभनयज्ञं विप्रं मेधाविनं विपश्चितमिव घृक्षव चसं दीप्त
वचोभूतं धुक्षंतो दहशो वाक्योपेतं अरतिं अर्यं स्वामिनं॥ ॥ अथ पंचमी॥ ॥ पावकया यश्चितयंत्या कृपा क्षामन्रुरुच उषसो न भानुना॥ तूर्वन्न यामन्नेतशस्य नूरण
आ यो घृणे न ततृषाणो अजरः॥ ॥ योऽग्निः पावकया शोधयित्र्या चितयंत्या प्रज्ञापयंत्या कृपा दीप्त्या क्षामन् भूम्यां रुरुचे दीप्यते उषसो न भानुना यथा उषसः
प्रकाशेन भासा तद्वत्। अपि च यामन् यामनि संग्रामे तूर्वन् शत्रून् हिंसन् एतशस्य एतत्संज्ञकस्य ऋषेः रणे सूर्येण सह संमिश्रे संग्रामार्थं योऽग्निर्नु क्षिप्रं आ
घृणे आदीप्यते प्रैतशं सूर्यं पस्पृधानमिति निगमांतरं॥ नूनं सर्वे देवास्तस्य साहाय्यमकार्षुः यश्च ततृषाणः तृषितः प्रभाते सर्वभक्षणशीलः अजरः जरार
हितश्च भवति॥ तं देवमृंजस इति पूर्वस्यामृचि संबंधः॥ ॥ इति चतुर्थस्य पंचमे सप्तदशो वर्गः॥ ॥ अथ षष्ठी॥ ॥ अग्निमग्निं वः समिधा दुवस्यत प्रियंप्रियं
वो अतिथिं गृणीषणि॥ उप वो गीर्भिरमृतं विवासत देवो देवेषु वनते हि वार्यं देवो देवेषु वनते हि नो दुवः॥ ॥ हे अस्मदीयाः स्तोतारः वो यूयं प्रियंप्रियं अत्यंतंप्रि
यं वो युष्माकमतिथिं अतिथिवत्पूज्यं गृणीषणि शब्देन यं स्तुत्यं अग्निमग्निं अग्निमेव नान्यं चेत्यर्थः समिधा समिंधनेन समिद्भिर्वा दुवस्यत परिचरत यद्वा गृणी
षणीति सप्तम्यंतं गृणीषणि स्तोत्रविषयतया वर्तमानं अपि च वो यूयं अमृतं अमरणमग्निं गीर्भिः स्तुतिभिरुप उपेत्य विवासत परिचरत हि यस्मात् देवेषु मध्ये देवो दा
नादिगुणयुक्तोऽग्निः वार्यं वरणीयं समिदादिकं वनते संभजते। हि यस्मात् देवेषु मध्ये देवोऽग्निः नोस्माकं दुवः परिचरणं वनते संभजते तस्मात् दुवस्यतेत्यन्वयः॥

ऋ०भा० वीतिरात्रिनाम। तत्र भवाः तमस्य संहतयः रयाः यः तास्यः सकाशात् आनयन्न् आगमयन् तं मथ्नंतीत्यन्वयः॥ ॥अथाष्टादशी॥ ॥जनिष्ठा देववीतये सर्व
१२४ ताता स्वस्तये। आ देवान्वक्ष्यमृतौँ ऋतावृधो यज्ञं देवेषु पिस्पृशः॥ ॥हे अग्ने सर्वताता सर्वैः स्तूयमाने यज्ञे मथ्यमाने त्वं जनिष्ठ प्रादुर्भव। किमर्थं देववी
तये देवान्कामयमानाय यजमानाय षष्ठ्यर्थे चतुर्थी॥ ईदृशस्य यजमानस्य स्वस्तये अविनाशार्थं जनिष्ठाः च अमृतान्मरणरहितान् ऋतावृधः यज्ञ
स्य वर्धयितॄन् देवान् आवक्षि आवह। तदनंतरं एषु देवेषु अस्मदीयं यज्ञं पिस्पृशः। प्रापयेत्यर्थः॥ ॥अथैकोनविंशी॥ ॥वयमु त्वा गृहपते जनानामग्ने
अकर्म समिधा बृहंतं॥ अस्थूरि नो गार्हपत्यानि संतु तिग्मेन नस्तेजसा संशिशाधि॥ ॥हे गृहपते यज्ञानां पालकाग्ने जनानां प्राणिनां मध्ये वयमु
एमेव त्वा त्वां समिधा समिंधनेन बृहंतं महांतं अकर्म कृतवंतः स्म अतः कारणात् नोऽस्माकं गार्हपत्यानि गृहपतित्वानि अस्थूरि अस्थुरीणि एकाश्वयुक्तः
शाकटः स्थूरिरित्युच्यते। तद्विपरीतो बहुभिरश्वैरुपेतः शाकटोऽस्थूरिः तेन च संपूर्णता लक्ष्यते॥ अस्थूरीणि पुत्रपश्वादिभिः संपूर्णानि भवंतु।
अपि च नोऽस्मान् तिग्मेन तीक्ष्णेन तेजसा संशिशाधि सम्यक् तीक्ष्णीकुरु संयोजयेत्यर्थः॥ ॥इति चतुर्थे पंचमे विंशो वर्गः॥ ॥इति षष्ठे मंडले प्रथमो
नुवाकः॥ ॥द्वितीयेऽनुवाकेऽष्टसूक्तानि। तत्र त्वमग्ने यज्ञानामिति अष्टचत्वारिंशदृचं सूक्तं भरद्वाजस्यार्षं आग्नेयं आद्या षष्ठी च वर्धमाना गायत्री ष
ट्सप्तकाष्टकाः सा वर्धमानेत्युक्तलक्षणोपेतत्वात्। सप्तविंश्यनुष्टुप्। अग्निरग्ने अग्निं देवास इत्येते ऋचौ अनुष्टुभौ तयोः पूर्वा वीती पादेवमिति राम
त्रिष्टुप्। त्रिष्टाश्चत्वारिंशाद्याश्च गायत्र्यः। तथा चानुक्रांतं। त्वमग्नेऽष्टाचत्वारिंशाग्नायत्रं वर्धमानाद्या षष्ठी च सप्तविंश्यनुष्टुप् त्रिष्टुप् पूर्वे चांत्य इति। प्रात १२४

रनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ गायत्रे छंदसि इदं सूक्तं। तत्रोत्तमास्तिस्र ऋचः उद्धर्तव्याः सूत्र्यते हि त्वमग्ने यज्ञानामिति तिस्र उत्तमा उद्धरेदिति विश्वजि
ग्नि ति आग्निमारुते बृहत्सामपृष्ठे होमः स्यात्तदानीमाद्या पङ्क्तिः स्तोत्रियानुरूपार्थः। सूत्रितं हि त्वमग्ने यज्ञानामिति स्तोत्रियानुरूपाविति॥ तत्र प्रथमा॥ ॥
॥त्वमग्ने यज्ञानां होता विश्वेषां हितः॥ देवेभिर्मानुषे जने॥ ॥हे अग्ने त्वं विश्वेषां सर्वेषां सप्तसंस्थारूपाणां भिन्नानां यज्ञानां होता होमनिष्पादकोऽसि।
यद्वा यज्ञानां संबंधी देवानामाह्वाता भवसि कुत इत्यत आह। यस्मात्त्वं मानुषे मनोः संबंधिनि जने यजमाने देवेभिः देवैः हितः होतृत्वे निहितोऽसि त
स्मादित्यर्थः॥ ॥अथ द्वितीया॥ ॥स नो मंद्राभिरध्वरे जिह्वाभिर्यजा महः॥ आ देवान्वक्षि यक्षि च॥ ॥हे अग्ने स त्वं नोऽस्माकं अध्वरे यज्ञे मंद्राभिर्म
दकारिभिः स्तुतिभिः जिह्वाभिर्ज्वालाभिः महो महतो देवान् यज हविर्भिः तर्पय। कथं तदित्युच्यते। देवान् यष्टव्यानिंद्रादीन् आवक्षि आवह ततो
यक्षि च यज च। हवींषि तेभ्यो देहीत्यर्थः॥ ॥पाथिकृत्यां अग्नेः पथिकृतोऽनुवाक्यावेदेति। सूत्रितं च। वेत्था हि वेधो अध्वन आ देवानामपि पंथामग
न्मेति॥ ॥सेषा तृतीया॥ ॥वेत्था हि वेधो अध्वनः पथश्च देवांजसा॥ अग्ने यज्ञेषु सुक्रतो॥ ॥हे वेधो विधातः सुक्रतो शोभनकर्मन् देवदानादि
गुणयुक्ताग्ने त्वं दर्शपूर्णमासादियागेषु अध्वनां महामार्गान् पथः क्षुद्रमार्गांश्च अंजसा अवेन वेत्थ जानासि॥ ॥अथ चतुर्थी॥ ॥त्वामीळे अध
द्विता भरतो वाजिभिः शुनं॥ ईजे यज्ञेषु यज्ञियं॥ ॥हे अग्ने त्वां भरतः दौष्यंतिः एतत्संज्ञको राजा वाजिभिः वाजो हविर्लक्षणमन्नं तद्वद्भिः ऋत्विग्भिः
सह द्विता द्विविधं दृष्टपापनिष्टपरिहाररूपेण द्विधा मित्रं शुनं सुखं बुद्धिद्वय ईळे स्तुतवान् स्तुत्वा च यज्ञियं यज्ञार्हं त्वां यज्ञेषु तृतीयार्थे सप्तमी यज्ञैः

सं०भा० ईजे इष्ट्वान् । तस्मै त्वमुभयविधं सुखं प्रादा दित्यर्थः ॥ ॥ अथ पंचमी ॥ ॥ त्वमिमा वार्या पुरु दिवोदासाय सुन्वते ॥ भरद्वाजाय दाशुषे ॥ ॥ हे अग्ने त्वमि
मानीमानि हूयमानानि पुरु पुरूणि बहूनि वार्या वार्याणि वरणीयानि संभजनीयानि निधनानि दिवोदासाय सुन्वते । सुन्ताय ममेतत् । यथा सोमा
१२५ भिषवं कुर्वते दिवोदासाय दिवोदासाख्याय राज्ञे प्रादाः । तथा दाशुषे हवींषि दत्तवते भरद्वाजाय ऋषये देहीति शेषः ॥ ॥ इति चतुर्थस्य पंचमे एकवि
शो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ त्वं दूतो अमर्त्य आ वहा दैव्यं जनं ॥ शृण्वन्विप्रस्य सुष्टुतिं ॥ ॥ अमर्त्य मरणरहित त्वं दूतो भूत्वा दैव्यं देवसंबंधिजनं आ
वह अस्मद्यज्ञमानय किं कुर्वन् विप्रस्य मेधाविनो भरद्वाजस्य सुष्टुतिं शोभनां स्तुतिं शृण्वन् ॥ ॥ अथ सप्तमी ॥ ॥ त्वामग्ने स्वाध्यो३ मर्तासो देववीतये ॥
यज्ञेषु देवमीळते ॥ ॥ हे अग्ने देवं द्योतमानं त्वां स्वाध्यः शोभनध्यानाः मर्तासो मनुष्याः देववीतये देवानां तर्पणार्थं यज्ञेषु ईळते स्तुवंति याचयंत इ
तिवा ॥ ॥ अथाष्टमी ॥ ॥ तव प्र यक्षि संदृशमुत क्रतुं सुदानवः ॥ विश्वे जुषंत कामिनः ॥ ॥ हे अग्ने तव संदृशं सम्यग्दर्शनीयं यद्वा सम्यग्द्रष्टारं सर्वस्य
भासकं तेजः प्र यक्षि प्रयक्षे प्रकर्षेण पूजयामि । उतापि च सुदानवः सुदानोः शोभनदानस्य तव क्रतुं कर्म प्रज्ञानं वा पूजयामि । न केवलमहमेवअ
न्ये विश्वे सर्वे यजमानाः कामिनः त्वदनुग्रहाभिलाषिणः कामैरुपेताः संतः जुषंत त्वदीयं संदृशं क्रतुं सेवंते ॥ ॥ अथ नवमी ॥ ॥ त्वं होता मनुर्हितो वह्नि
रासा विदुष्टरः ॥ अग्ने यक्षि दिवो विशः ॥ ॥ हे अग्ने त्वं होता होतृत्वेन मनुर्हितः मनुना आहितोऽसि आसा आस्येन आस्यभूतया ज्वालया वह्नि राम
र्हविषां वोढा विदुष्टरः अतिशयेन विद्वान् अतः कारणात् त्वं दिवः द्युलोकसंबंधिनीर्विशः देवीः प्रजाः प्र यक्षि यज ॥ ॥ दर्शपूर्णमासयोः सामि १२५

धेनीषु चतुर्थीयां स्विष्टकृद्याज्यांतनुंशापय ॥ ॥ अथ पंचदशी ॥ ॥ अग्निः प्रयांसि सुधितानि हि ख्यो नि त्वा दधीत रोदसी यजध्यै ॥ अवा नो मघवन्वाजसा
ताव अग्ने विश्वानि दुरिता तरेम ता तरेम तवावसा तरेम ॥ ॥ हे अग्ने सुधितानि सुहितानि वेद्यामासादितानि प्रयांस्यन्नानि हविर्लक्षणानि अभिख्यः अभि
पश्यसि हि पूरकः सा तादृशं त्वां रोदसी द्यावापृथिव्यौ एतदुपलक्षितान् सर्वान् देवान् यजध्यै यष्टुं दधीत । अयं यजमानो निहितवान् हे मघवन्नग्ने नोऽस्मा
न् वाजसातौ संग्रामे अन्यकृते ॥ ॥ इति चतुर्थस्य पंचमे एकोनविंशो वर्गः ॥ ॥ अग्निप्रणयने विश्वेभिरित्येषानुवाक्या । सूत्रितं च । अग्ने विश्वेभिः स्व
नीक देवैरित्यर्धर्चं आरमेदिति ॥ सैषा सूक्ते षोडशी ॥ ॥ अग्ने विश्वेभिः स्वनीक देवैरूर्णावंतं प्रथमः सीद योनिं ॥ कुलायिनं घृतवंतं सवित्रे यज्ञं न
य यजमानाय साधु ॥ ॥ हे स्वनीक सुज्वालाग्ने विश्वेभिर्विश्वैः सर्वैर्देवैः सह ऊर्णावंतं योनिं उत्तरवेदिलक्षणं स्थानं प्रथमः सर्वेषु देवेषु मुख्यः स्वं
सीद उपविश कीदृशं योनिं कुलायिनं नीडं तद्वद् दृढं गुग्गुल्वादिसंभरणोपेतं तथा च श्रूयते कुलायमिव ह्येतद्यज्ञे क्रियते यत्पैतुदारवाः परिधयो गुल्गु
लूर्णास्तुका सुगंधितेजनानीति । घृतवंतं व्याघारणाज्ययुक्तं । एवमुत्तरवेद्यां निषद्य त्वं सवित्रे हविषां प्रेरयित्रे यजमानाय षष्ठ्यर्थे चतुर्थी ईदृशस्य
यजमानस्य यज्ञं साधु आर्जवेन नय देवान् आपय ॥ ॥ अथ सप्तदशी ॥ ॥ इममु त्यमथर्ववदग्निं मंथंति वेधसः ॥ यमंकूयंतमानयन्नमूरं श्याव्या
भ्यः ॥ ॥ वेधसः कर्मणां धातारः ऋत्विजः इमं दृश्यमानं त्यं तं पूर्वोक्तगुणमग्निं अथर्ववत् यथा अथर्वाख्य ऋषिः पुरा अमथ्नात् तथा मंथंति अरण्योः
सकाशात् जनयंति । अंकूयंतं कुटिलं चनं गमनं अंकुतदात्मन इच्छंतं देवेभ्यो निर्गत्य इतस्ततः पलायमानं अमूरं अमूढं यमग्निं श्याव्याभ्यः श्या

च०भा० र्लोहि प्रजातिः । भूमिमप्रथयत् तत्पुष्करपर्णं प्रथयद्विति श्रुतेः ॥ भूमिश्च सर्वजगत आधारभूतेति पुष्करपर्णस्य जगद्धारकत्वं । अत्र पुष्करशब्देन पुष्करपर्णम
१३६ भिधीयत इति एतच्च तैत्तिरीयके विस्पष्टमाम्नातं ॥ त्वामग्ने पुष्करादधीत्याह पुष्करपर्णे ह्येनमुपश्रितमविंददिति ॥ ॥ अथ चतुर्दशी ॥ ॥ तमु त्वा दध्यङ्ङृ
षिः पुत्र ईधे अथर्वणः ॥ वृत्रहणं पुरंदरं ॥ ॥ हे अग्ने यत्तं कं तमु तमेव त्वां अथर्वणः पुत्रः दध्यङ् एतन्नामक ऋषिः ईधे दीपितवान् कीदृशं वृत्रहणं
आवरकाणां शत्रूणां हंतारं पुरंदरं असुराणां दारयितारं ॥ ॥ अथ पंचदशी ॥ ॥ तमु त्वा पाथ्यो वृषा समीधे दस्युहंतमं ॥ धनंजयं रणेरणे ॥ ॥ पाथ्यो
वृषा कश्चिदृषिः स्तौति हे अग्ने तमु तमेव त्वां समीधे साधु समदीपयत् कीदृशं दस्युहंतमं अतिशयेन दस्यूनामुपक्षपयितॄणां हंतारं रणेरणे युद्धेयु
द्धे धनंजयं धनानां जेतारं ॥ ॥ इति चतुर्थस्य पंचमे त्रयोविंशो वर्गः ॥ ॥ उक्थ्ये क्रतौ तृतीयसवने मैत्रावरुणस्य एह्यू ष्वित्यादिकौ तृचौ स्तोत्रिया
नुरूपौ अभिप्लविकेषु उक्थ्येषु एतावेकाह्निकौ स्तोत्रियानुरूपौ आभिप्लविकेषूक्थ्येषु सूत्रितं च । एह्यू षु ब्रवाणि ते अग्न इत्थेतरा गिर इति पा
नराधेयिक्यामिष्टौ उत्तराज्यभागस्य एह्यू ष्विति अनुवाक्या सूत्रितं च । एह्यू षु ब्रवाणि त इत्याग्नेयावाज्यभागाविति । सैषा सूक्ते षोडशी ॥ ॥ एह्यू
षु ब्रवाणि ते ॥ अग्न इत्थेतरा गिरः ॥ एभिर्वर्धास इंदुभिः ॥ ॥ हे अग्ने एहि आगच्छ ते तुभ्यं त्वदर्थं गिरः स्तुतीः इत्था इत्थमनेन प्रकारेण सु सु ब्रवा
णीत्यागत्य आस्थापयिता स्तुतीः शृण्वित्यर्थः ॥ उ इत्येतत्पूरकः । इतराः असुरैः कृताः स्तुतीः शृण्विति शेषः । यद्वा इत्था अमुत्र इतरत एव इतराः असुर्याणि राम
रः संतु नाः अस्मदीया एवेत्यर्थः ॥ तथा च ब्राह्मणं । अग्न इत्थेतरा गिर इत्यसुर्या ह वा इतरा गिर इति । अपि च आगतं त्वां एभिः एतैः इंदुभिः सोमैः १३६

वर्धासि वर्धस्व ॥ ॥ अथ सप्तदशी ॥ ॥ यत्र क्व च ते मनो दक्षं दधस उत्तरं ॥ तत्रा सदः कृणवसे ॥ ॥ हे अग्ने ते तव मनः अनुग्रहात्मकं मंतः करणं यत्रास्मिन्दे
शे क्व च कस्मिंश्चिद्यजमाने वर्तते तत्र तस्मिन्यजमाने उत्तरं उत्कृष्टतरं श्रेष्ठं दक्षं बलकरमन्नं वा दधसे धारयसि । तथेदं स्थानं च कृणवसे । तस्मिन्यजमा
ने करोषि ॥ ॥ अथाष्टादशी ॥ ॥ नहि ते पूर्तमक्षिपद्भुवन्नेमानां वसो ॥ अथा दुवो वनवसे ॥ ॥ हे अग्ने त्वदीयं पूर्तं पूरकं तेजः अक्षिपत् अक्ष्णोः पातकं
विनाशकं न हि भुवत् न भवतु । सर्वदास्माकं दृष्टौ निःसामर्थ्यं हि नेमानां वसो नेमशब्दः अर्धवाची मनुष्याणां मध्ये कतिपयानां यजमानानां वासके
अथ अतः कारणात् दुवः अस्माभिर्यजमानैः कृतां परिचरणं वनवसे संभजस्व ॥ ॥ अथैकोनविंशी ॥ ॥ अग्निरगामि भारतो वृत्रहा पुरुचेत
नः ॥ दिवोदासस्य सत्पतिः ॥ ॥ अयमग्निः आ अगामि अस्मत्स्तुतिभिः अभ्यगम्यत कीदृशः भारतः हविषां भर्ता दिवोदासस्य एतन्नामकस्य रा
ज्ञः वृत्रहा वृत्राणां शत्रूणां हंता पुरुचेतनः पुरूणां बहूनां चेतयिता सर्वज्ञ इत्यर्थः सत्पतिः सतां यजमानानां पालयिता ॥ ॥ अथ विंशी ॥ ॥ स हि वि
श्वाति पार्थिवा रयिं दाशन्महित्वना ॥ वन्वन्नवातो अस्तृतः ॥ ॥ स हि स खलु अग्निः विश्वा विश्वानि सर्वाणि पार्थिवा पृथिव्यां विद्यमानं रयिं धनं अ
ति दाशात् । अतिशयेन ददातु । कीदृशः अग्निः महित्वना महित्वेन तेजसा वन्वन् कोष्ठानि शत्रून् हिंसन् अवातः अन्यैः शत्रुभिरप्रतिगतः अस्तृतः
केनाप्यहिंसितः ॥ ॥ इति चतुर्थस्य पंचमे चतुर्विंशो वर्गः ॥ ॥ अथैकविंशी ॥ ॥ स प्रत्नवन्नवीयसाग्ने द्युम्नेन संयता ॥ बृहत्ततंथ भानुना ॥ हे अ
ग्ने यः पूर्वोक्तगुणविशिष्टः स त्वं प्रत्नवत् प्रत्नेन पुराणेन नवीयसा नवतरेण द्युम्नेन द्योतमानेन संयता संगच्छता सम्यग्व्याप्नुवता भानुना

च०भा० तेजसा बृहन्महद्देतरिक्षं ततंथ। विषूद्विस्तारयसि॥ ॥अथद्वाविंशी॥ ॥प्र वः सखायो अग्नये स्तोमं यज्ञं च धृष्णुया॥ अर्च गाय च वेधसे॥ ॥हे सखा
१३१ यः समानख्याना ऋत्विजः वो यूयं धृष्णुया प्रगल्भ्या शत्रूणां धर्षकाय वेधसे विधात्रे अग्नये स्तोमं स्तोत्रं गायत। यथायज्ञं यजमानसाधनं हविश्च प्रयच्छ॥
॥अथत्रयोविंशी॥ ॥स हि यो मानुषा युगा सीदद्धोता कविक्रतुः॥ दूतश्च हव्यवाहनः॥ ॥स हि सखा अग्निः सीदत् सीदतु अस्मदीये यज्ञे बर्हिष्युप
विशतु। यो ऽग्निः होता देवानामाह्वाता कविक्रतुः क्रांतप्रज्ञः मानुषा युगा मानुषाणि युगानि मनुष्यसंबंधिनो यज्ञान् हविः कालविशेषानूये युगाग
दयो अनुष्ठीयंते अत्यंतसंयोगे द्वितीया एतावंतं कालं देवानां दूतः स हव्यवाहनः हविषो वोढा च भवति॥ ॥अथचतुर्विंशी॥ ॥ता राजाना शुचिव्रतादि
त्यान्मारुतं गणं॥ वसो यक्षीह रोदसी॥ ॥तौ प्रसिद्धौ राजानौ शुचिव्रतौ शुचिकर्माणौ मित्रावरुणौ आदित्यान् अदितेः पुत्रान् मारुतं गणं मरुतां सं
घं च रोदसी द्यावापृथिव्यौ च एतान् देवान् हे वसो वासक अग्ने इहास्मिन्यागे यक्षि यज॥ ॥अथपंचविंशी॥ ॥वस्वी ते अग्ने संदृष्टिरिषयते मर्त्याय॥
ऊर्जो नपादमृतस्य॥ ॥हे ऊर्जो नपात् बलस्य पुत्र अमृतस्य मरणरहितस्य ते तव संदृष्टिः दीप्तिर्दृष्टिः वस्वी वासयित्री प्रज्ञास्येत्यर्थः॥ सः मर्त्याय मनु
ष्याय यजमानाय इषयते अन्नमिच्छते ददासीत्यर्थः॥ इति चतुर्थस्य पंचमे पंचविंशो वर्गः॥ ॥अथषड्विंशी॥ ॥क्रत्वा दा अस्तु श्रेष्ठोद्य त्वा वन्वन्त्सु
रेक्णाः॥ मर्त आनाश सुवृक्तिं॥ ॥हे अग्ने अद्येदानीं क्रत्वा कर्मणा परिचरणात्मना त्वां वन्वन् संभजन् दाः हविषां दाता यजमानः श्रेष्ठः अतिशये राम
न प्रशस्यः सुरेक्णाः शोभनधनश्चास्तु तथा स मर्तो मनुष्यः सुवृक्तिं त्वद्विषयां सुष्टुतिं च व्याप्नोतु। तत्सर्वं दास्तोता भवतीत्यर्थः॥ ॥अथसप्तविंशी॥ ॥ १३१

घनीपु अग्न आयाहीत्याद्यास्तिस्रः सूक्तिं तं च। अग्न आयाहि वीतये गृणानो जमदग्निना ईळेन्यो नमस्यस्तिर इति गार्हपत्याहवनीययोर्मिथः सं
सर्गे अग्नये वीतये ष्टाकपालः पुरोडाशः तस्य अग्न आयाहीत्येषा याज्यानुवाक्या। सूत्रितं च। अग्न आयाहि वीतये यो अग्निं देववीतय इति॥ ॥
॥सैषा सूक्ते दशमी॥ ॥अग्न आयाहि वीतये गृणानो हव्यदातये॥ नि होता सत्सि बर्हिषि॥ ॥हे अग्ने त्वं आयाहि आगच्छ। किमर्थं वीतये हविषां रस
पानार्थं किं च हव्यदातये हव्यानि हवींषि देवेभ्यो दातुं गृणानः स्तूयमानस्त्वं बर्हिषि आस्तीर्णे दर्भे होता सन् सत्सि निषीद उपविश॥ ॥इति चतुर्थस्य
पंचमे षड्विंशो वर्गः॥ ॥अथैकादशी॥ ॥तं त्वा समिद्भिरंगिरो घृतेन वर्धयामसि॥ बृहच्छोचा यविष्ठ्य॥ ॥हे अंगिरः अंगनादिगुणयुक्त अंगा
ररूप वा अंगिरसः पुत्रो वा अग्ने तं पूर्वोक्तगुणं त्वा त्वां समिद्भिः समिंधनहेतुभिर्दारुभिः घृतेन चाज्येन वर्धयामसि वर्धयामः अतो हे यविष्ठ्य
युवतम बृहत् महत् त्वं शोचा दीप्यस्व च॥ ॥अथद्वादशी॥ ॥स नः पृथु श्रवाय्यमच्छा देव विवाससि॥ बृहदग्ने सुवीर्यं॥ ॥हे देव द्योतमानाग्ने स पूर्वोक्तगु
णस्त्वं पृथु विस्तीर्णं श्रवाय्यं प्रशस्यं बृहन्महत् सुवीर्यं शोभनवीर्योपेतं धनं नो ऽस्मान् अच्छ विवाससि अभिगमय। अत्र वाजसनेयकं। अच्छ देव
विवाससीत्येतन्नो गमयेत्येवैतदाहेति॥ अग्निमंथने त्वामग्ने पुष्करादधीत्याद्याः सूत्रितं च त्वामग्ने पुष्करादधीति तिसृणामथ चैनं निष्क्वारभेदिति॥ ॥
॥तत्र प्रथमा सूक्ते त्रयोदशी॥ ॥त्वामग्ने पुष्करादध्यथर्वा निरमंथत॥ मूर्ध्नो विश्वस्य वाघतः॥ ॥हे अग्ने अथर्वा एतत्संज्ञक ऋषिः त्वां पुष्करादधि
पुष्करपर्णे निरमंथत। अरण्योः सकाशादजनयत। कीदृशात् पुष्करात् मूर्ध्नः मूर्धवद्धारकात् विश्वस्य सर्वस्य जगतः वाघतः वहतः पुष्करप

रक्ष॥ ॥अथ द्वात्रिंशी॥ ॥स्वं तं देव जिह्वया परि बाधस्व दुष्कृतं॥ मर्तो यो नो जिघांसति॥ ॥हे देव द्योतमानाग्ने त्वं तं वक्ष्यमाणं दुष्कृतकर्मकारिणं मनुष्यं जि
ह्वया ज्वालया परि बाधस्व सर्वतो जहि यो मर्तो मनुष्यः नोस्मान् जिघांसति हंतुमिच्छति॥ ॥अथ त्रयस्त्रिंशी॥ ॥भरद्वाजाय सप्रथः शर्म यच्छ सहंत्य॥
अग्ने वरेण्यं वसु॥ ॥हे सहंत्य शत्रूणामभिभवितरग्ने भरद्वाजाय मह्यमृषये सप्रथः सर्वतः पृथु विस्तीर्णं शर्म सुखं वा प्रयच्छ देहि तथा वरेण्यं वरणी
यं वसु धनं च देहि पौर्णमास्यामाग्नेयाज्यभागस्यानुवाक्या अग्निर्वृत्राणीत्येषा सूत्रितं च। अग्निर्वृत्राणि जंघनदिति पूर्वस्याज्यभागानुवाक्ये
ति दृष्टपत्नुसोमेषु च यज्ञ वृधन्वंतो पुष्टिमंता वित्यादि विशेषविधिर्न दृश्यते तत्र सर्वत्र एषैव प्रथमाज्यभागानुवाक्या सायंकाले तस्यतु एषै
व याज्या सूत्रितं च। अग्निर्वृत्राणि जंघनद्य उग्र इव शर्यहेति विपर्यासो याज्यानुवाक्यानामिति॥ ॥सेषा चतुस्त्रिंशी॥ ॥अग्निर्वृत्राणि जंघनद्द्रवि
णस्युर्विपन्यया॥ समिद्धः शुक्र आहुतः॥ ॥विपन्यया स्तुत्या स्तूयमानः द्रविणस्युर्द्रविणं धनं स्तोतॄणामिच्छन् यद्वा हविर्लक्षणं धनमात्मन
इच्छन्नग्निः वृत्राण्यावरकाणि रक्षः प्रभृतीनि तमांसि वा जंघनत् भृशं हंतु कीदृशोग्निः समिद्धः सम्यग्दीप्तः अत एव शुक्रः शुक्लवर्णः आहु
तः हविर्भिरिति शेषः॥ ॥अथ पंचत्रिंशी॥ ॥गर्भे मातुः पितुष्पिता विदिद्युतानो अक्षरे॥ सीदन्नृतस्य योनिमा॥ ॥अत्र मातृपितृशब्दाभ्यां भू
द्यावा अभिधीयेते। द्यौर्वः पिता पृथिवी मातेति श्रुतेः। मातुर्भूम्या गर्भे गर्भस्थाने मध्ये अक्षरे क्षरणरहिते वेद्याख्ये स्थाने विदिद्युतानः विशेषेण
दीप्यमानः पितुः पिता द्युलोकस्यापि पालयिता हविषां प्रदानेन एवंभूतोग्निः ऋतस्य यज्ञस्य योनिं स्थानं वेद्याख्यं विष्टपं सप्तम्यर्थे द्वितीया आसी

दन्। अग्निर्वृत्राणि जंघनदित्यत्र च यः॥ ॥इति चतुर्थस्य पंचमे सप्तविंशो वर्गः॥ ॥अथ षट्त्रिंशी॥ ॥ब्रह्म प्रजावदा भर जातवेदो विचर्षणे॥ अग्ने
यद्दीदयद्दिवि॥ ॥हे जातवेदः जातानां वेदितः विचर्षणे विशेषेण द्रष्टरग्ने प्रजावत् पुत्रपौत्रसहितं ब्रह्म अन्नं आ भर आहर यत् ब्रह्म दिवि द्युलो
के दीदयत् दीप्यते देवेषु मध्ये यद्यशः तमन्नं राजते तदाहरेत्यर्थः॥ ॥अथ सप्तत्रिंशी॥ ॥उप त्वा रण्वसंदृशं प्रयस्वंतः सहस्कृत॥ अग्ने ससृज्महे गिरः॥
॥हे सहस्कृत सहसा बलेन उत्पाद्य प्रयस्वंतः हविर्लक्षणान्नवंतो वयं रण्वसंदृशं रमणीयसंदृशं त्वा त्वां स्तोतव्यं दर्शनीयं वा उपप्रति गिरः स्तुतीः ससृ
ज्महे सृजामः उच्चारयाम इत्यर्थः॥ ॥अथाष्टात्रिंशी॥ ॥उप छायामिव घृणेरगन्म शर्म ते वयं॥ अग्ने हिरण्यसंदृशः॥ ॥हे अग्ने हिरण्यसंदृशः हित
रमणीय तेजस्क हिरण्यवद्रोचमान तेजसो वा घृणेर्दीप्तस्य ते तव शर्म शरणं आश्रयणं सुखं वा उपागन्म उपगच्छाम तत्र दृष्टांतः। छायामिव यथा
घर्मार्ताः संतप्ताः छायामुपगच्छंति तद्वत्॥ ॥उपसदि प्रातःकालीनस्याग्नेयस्य य उग्र इव इत्येषा याज्या। सायंकालीनस्य सैव स्वानुवाक्या। सूत्रितं
च। अग्निर्वृत्राणि जंघनद्य उग्र इव शर्यहेति सेषात्र एकोनत्रिंशी॥ ॥य उग्र इव शर्यहा तिग्मशृंगो न वंसगः॥ अग्ने पुरो रुरोजिथ॥ ॥उग्र उद्गूर्णबलो
धन्वी शर्यहा शर्याः बाणाः तैः शत्रूणां हंता तिग्मशृंगो न वंसगः। तीक्ष्णशृंगो वननीयगतिर्वृषभ इव हे अग्ने सत्वं पुरः आसुरीस्तिस्रः पुरीः रुरोजि
थ भग्नवानसि रुद्रो वा एष यदग्निरिति श्रुतेः रुद्रकर्तृकमपि त्रिपुरदहनं अग्निकृतमेवेत्यग्निः स्तूयते। यद्वा त्रिपुरदहनसाधनभूते बाणेऽग्नेरनीकत्वे
नावस्थानात्। अग्निः पुराणि भग्नवानित्युच्यते देवासुराः वा एषु लोकेषु समयतंत ते सौदिकं ब्राह्मणमनुसंधेयं। अग्निर्मथना जायमानेऽग्नो आयं
हस्त इत्येषानुवाक्या सूत्रितं च। आयं हस्तेन खादिनमित्यर्धर्चे आरमेदिति॥ ॥अथ चत्वारिंशी॥ ॥आयं हस्तेन खादिनं शिशुं जातं न बिभ्रति॥

ऋ॰भा॰ विश्वा मग्निं स्वध्वरं ॥ ॥ मथनेनोत्पन्नमयमग्निः धियं जातं पुत्रमिव हस्ते आ बिभ्रति । हस्तेषु अभिमुखं धारयंत्यध्वर्यवः पूर्वेण न ईड्यः पुरस्तादुपचारोपु
ष्पमार्थिनः खादिनं भक्षकं व्याघ्रादिमिव पथ्यासु बिभ्रतः पुरुषाः अजिह्मताः तथाभूता इत्यर्थः । यद्वा अस्मै प्रत्यक्षं संप्रतीदानीं खादिनं हविषां भक्षकं
१३९ यमग्निं हस्ते धारयंति विश्वा जनानां स्वध्वरं शोभनयागस्य निष्पादकं तमग्निं हे ऋत्विजः परिचरतेति शेषः ॥ ॥ इति चतुर्थस्य पंचमेऽष्टाविंशो व
र्गः ॥ ॥ अग्निमंथनजातस्याग्नेराहवनीये प्रहरणसमये प्र देवं देववीतय इति द्वे अग्निनाग्निः समिध्यान इति ॥ ॥ तत्र प्रथमा सूक्ते एकच
त्वारिंशी ॥ ॥ प्र देवं देववीतये भरता वसुवित्तमं ॥ आ स्वे योनौ नि षीदतु ॥ ॥ हे अध्वर्यवः देवं द्योतमानं वसुवित्तमं वसूनां धनानां वेदयितारं लं
भयितारमग्निं प्रभरत प्रहरत । आहवनीये प्रक्षिपत । किमर्थं देववीतये देवानां भक्षणार्थं तथा च ब्राह्मणं प्र देवं देववीतये भरता वसुवि
त्तममिति प्रह्रियमाणायाभिरूपा यद्यज्ञेऽभिरूपं तत्समृद्धमिति । स चाग्निः स्वे योनौ कारणे स्थाने आहवनीये आ निषीदतु । आभिनिषण्णो भव
तु ब्राह्मणं च भवति ॥ ॥ अथ द्विचत्वारिंशी ॥ ॥ आ जातं जातवेदसि प्रियं शिशीतातिथिं ॥ स्योन आ गृहपतिं ॥ ॥ अतिथिं सुप्तोपममेतत् । अ
तिथिमिव प्रियं अत एव गृहपतिं गृहाणां स्वामिनं अग्निं जातवेदसि जातप्रज्ञे स्योने सुखकरे आहवनीयेऽग्नौ आ शिशीत अतणीत एयर्थस्य
शिशु एतद्रूपं शिशीत स्थापयत । यद्वा शोऽगताविष्य स्य छांदसं रूपं गमयत प्रापयतेत्यर्थः । शीत तनूकरण इत्यस्य वा रूपं शिशीत तीक्ष्णी राम
कुरुत प्रहरतेति यावत् । द्वितीय आकारः पूरकः । जातेष्वितरो जातवेदा इत्यादिकं ब्राह्मणमत्रानुसंधेयं ॥ ॥ अथ त्रिचत्वारिंशी ॥ ॥ अग्ने युक्ष्वा १३९
हि ये तवाश्वासो देव साधवः ॥ अरं वहंति मन्यवे ॥ ॥ हे देव द्योतमानाग्ने तानश्वान् युंक्ष्व आत्मीये रथे योजय । तव त्वदीयाः साधवः साधकाः सुष्ठु

ते ते अग्ने त्वोता इषयंतो विश्वमायुः ॥ तरंतो अर्यो अरातीर्वन्वंतो अर्यो अरातीः ॥ ॥ हे अग्ने ते त्वदीयाः ये त्वां स्तुवंति ते स्तोतारः त्वोताः त्वया कृतर
क्षिताः अत एव इषयंतः इषमात्मन इच्छंतः विश्वं सर्वमायुरन्नं लभंतामिति शेषः । आयुरेव वा शतवर्षलक्षणं । इषयंतः इच्छंतः प्राप्नुवंतीति शेषः । अ
र्यः अरातीः अभिगंत्रीः अरातीः कश्चिच्छत्रुसेनाः तरंतः अतिक्रामंतः अरातीः काश्चिच्छत्रुसेनाः वन्वंतो हिंसंतश्च भवंतीति शेषः ॥ अथाष्टादशी ॥ ॥
अग्निस्तिग्मेन शोचिषा यासद्विश्वं न्यत्रिणं ॥ अग्निर्नो वनते रयिं ॥ ॥ अयमग्निः तिग्मेन तीक्ष्णेन शोचिषा तेजसा विश्वं सर्वं अत्रिणं अत्तारं राक्षसा
दिकं नि आ सत् निहंतु अपि च नोऽस्मभ्यं रयिं धनं वनते ददातु ॥ ॥ अथैकोनविंशी ॥ ॥ सुवीरं रयिमा भर जातवेदो विचर्षणे ॥ जहि रक्षांसि सु
क्रतो ॥ ॥ हे जातवेदः जातप्रज्ञ जातधनो वा विचर्षणे विशेषेण द्रष्टरग्ने सुवीरं शोभनवीरैः पुत्रपौत्रादिभिरुपेतं रयिं धनं आ भर आहर तथा
सुक्रतो सुकर्मन्नग्ने रक्षांसि च जहि विनाशय ॥ ॥ अथ विंशी ॥ ॥ त्वं नः पाह्यंहसो जातवेदो अघायतः ॥ रक्षा णो ब्रह्मणस्कवे ॥ ॥ हे जातवेदस्त्वं
नोऽस्मान् अंहसः पापात् पाहि रक्ष तथा हे ब्रह्मणस्कवे स्तुतिरूपस्य मंत्रस्य कवे केवलयितरग्ने अग्निर्हि शब्दमुत्पादयति तथा च स्मर्यते मनः कायो
ग्निमाहंति स प्रेरयति मारुतं । मारुतस्तूरसि चरन्मंद्रं जनयति स्वरमिति । तादृशाग्ने अघायतः अनर्थमस्माकमिच्छतः शत्रोश्च नोऽस्मान् रक्ष ॥ ॥ इति
चतुर्थस्य पंचमे षड्विंशो वर्गः ॥ ॥ अथैकविंशी ॥ ॥ यो नो अग्ने दुरेव आ मर्तो वधाय दाशति ॥ तस्मान्नः पाह्यंहसः ॥ ॥ हे अग्ने दुरेवो दुष्टाभिप्रायो
यामर्तो मनुष्यः वधाय स्वस्यायुधाय नोऽस्मान् आदाशति । आभिप्रयच्छति । आयुधेनास्मान् हंतीत्यर्थः । तस्मात् मनुष्यात् अंहसः पापात् नोऽस्मान् पाहि

लावा अश्वासो अश्वाः अरं अलं पर्याप्तं वहंति किमर्थं मन्यवे यष्टव्यत्वेन देवान् वेति मन्युर्यागस्तदर्थं तानश्वान् रथे युंक्ष्वेत्यर्थः हिरवत्सु॥ ॥अथ चतुश्चत्वा
रिंशी॥ ॥अच्छा नो याह्या वहाभि प्रयांसि वीतये॥ आ देवान्सोमपीतये॥ ॥हे अग्ने नोस्मान् अच्छाभिमुखेन याहि आगच्छ तथा प्रयांसि हविर्लक्षणान्य
न्नान्यभिलक्ष्य देवानावह किमर्थं वीतये तेषां हविषां स्वादनार्थं तथा सोमपीतये सोमपानार्थं च तान्देवानावह॥ ॥अथ पंचचत्वारिंशी॥ ॥उदग्ने
भारत द्युमदजस्रेण दविद्युतत्॥ शोचा वि भाह्यजर॥ ॥हे भारत हविषां भर्त्तरग्ने उच्छोच उत्कृततरं दीप्यस्व त्वं दविद्युतदिति अजर जरारहिताग्ने
दविद्युतत् भृशं द्योतमानस्त्वं द्युमत् दीप्तिमत् सुपां सुलुगिति तृतीयालुक् अजस्रेण अविच्छेदेन तेजसा विभाहि विशेषेण प्रकाशस्व। यद्वा भाति
रत्रांतर्णीतण्यर्थः त्वं प्रथममुद्दीप्यस्व। पश्चाद्दालीयेन तेजसा सर्वं जगत्प्रकाशयेति योजनीयत्वं॥ ॥इति चतुर्थस्य पंचमे एकोनत्रिंशो वर्गः॥
॥ ॥अथ षट्चत्वारिंशी॥ ॥वीती यो देवं मर्तो दुवस्येदग्निमीळीताध्वरे हविष्मान्॥ होतारं सत्ययजं रोदस्योरुत्तानहस्तो नमसा विवासेत्॥
॥ ॥यो मर्त्तो मनुष्यो हविष्मान् हविर्भिर्युक्तो यजमानो वीती वीत्या कांतेन हविर्लक्षणान्नेन यं कं च न देवं दुवस्येत् परिचरेत् तस्मिन्नध्वरे यज्ञे
अग्निमीळीत स्तुवीत सर्वेषु यागेष्वग्निः पूज्यत इत्यर्थः। कीदृशमग्निं रोदस्योर्द्यावापृथिव्योर्लोकद्वये वर्त्तमानानां देवानां होतारमाह्वातारं स
त्ययजं सत्येन अवितथेन हविषा यष्टारं किं चायं यजमानः ईदृशमग्निं उत्तानहस्तः कृतांजलिपुटः सन् नमसा नमस्कारेण हविषा वा आ
विवासेत् परिचरेत्॥ ॥अथ सप्तचत्वारिंशी॥ ॥आ ते अग्न ऋचा हविर्हृदा तष्टं भरामसि॥ ते ते भवंतूक्षण ऋषभासो वशा उत॥ ॥

०भा० ॥ अनया धाय्यनेप्रशस्यते इत्याश्वलायनो मन्यते। हे अग्ने ते तुभ्यं हृदा हृदयेन तष्टं संस्कृतं ऋचा ऋग्रूपेण वर्त्तमानं हविः ऋचमेव हविः कृ
त्वा आभरामसि आहरामसि तच्छब्देन प्रकृष्टमृग्रूपं हविः परामृश्यते। प्रतिनिर्दिश्यमानापेक्षया पुंस्त्वं ब कुर्वे ऋग्रूपं तद्धविः ते तुभ्यं
१०० उक्षणः उक्षणाः सेचनसमर्थाः ऋषभासः ऋषभाः उताः पि च वशाश्च भवंतु। ऋषभवशारूपेण परिणतं सत् त्वद्भक्षणाय भवत्विति
शेषः॥ ॥ अथाष्टाचत्वारिंशी॥ ॥ अग्निं देवासो अग्रियमिंधते वृत्रहंतमं॥ येना वसून्याभृता तृळ्हा रक्षांसि वाजिना॥ ॥ अग्रियं मुख्यं वृ
त्रहंतमं अतिशयेन वृत्रस्य हंतारं इममग्निं देवासो देवाः इंधते दीपयंति येनाग्निना वसूनि असुरैरपहृतानि धनानि हविर्लक्षणान्य
न्यानि वा आभृता असुरसकाशात् अस्माद्यजमानाद्वा आहृतानि येन च वाजिना बलवताग्निना रक्षांसि यज्ञविरोधीनि तृह्ळा हढा
निहिंसितानि तमग्निमिंधत इत्यन्वयः॥ ॥छ॥ ॥ इति चतुर्थस्य पंचमे त्रिंशो वर्गः॥ ॥छ॥ ॥ वेदार्थस्य प्रकाशेन तमो हार्दं नि
वारयन्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥छ॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्त्तकश्रीवीरबु
क्कभूपालसाम्राज्यधुरंधरेण सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके पंचमोध्यायः॥ राम
॥छ॥ ॥छ॥ ॥छ॥ ॥श्री शुभं भवतु॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥श्रीसांबसदाशिवार्पणमस्तु॥ ॥छ॥ ॥छ॥ ॥ १४०

२८

ऋ॰भा॰ मतीनां॥ यो गोत्रभिद्वज्रभृद्यो हरिष्ठाः स इंद्र चित्रां अभितृंधि वाजान्॥ ॥हे इंद्र ऋजीषी ऋजीषेन गतरसः सोमोऽभिधीयते तद्वान् गतसारमपि सोम
मपरित्यजन् यस्त्वं तरुत्रः शत्रूणां तारकोऽसि यस्त्वं शिप्रवान् शोभनहनूरसि यस्त्वं मतीनां स्तोतॄणां मन्यते स्तुतिकर्मणः कर्त्रेति वृषभः का
१४१ मानां वर्षितासि स त्वं ईं एनं सोमं पाहि पिब हे इंद्र यस्त्वं वज्रभृत् वज्रधारकः यस्त्वं गोत्रभित् गोत्राणां पर्वतानां मेघानां वा भेत्तासि यस्त्वं हरिष्ठाः
हर्योः स्थातासि। हे इंद्र स त्वं चित्रान् विचित्रान् वाजान् अन्नानि अभितृंधि अस्मभ्यं प्रकाशय॥ ॥अथ तृतीया॥ ॥एवा पाहि प्रत्नथा मंदतु
त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः॥ आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इंद्र तृंधि॥ ॥हे इंद्र त्वं प्रत्नथा प्रत्नान् पुराणान् सो
मान् पाहि पिब स पीतः सोमः त्वां मंदतु मदयुक्तं करोतु ब्रह्म अस्माभिः कृतं स्तोत्रं श्रुधि शृणु उत अपि च गीर्भिः स्तुतिरूपाभिर्वाग्भिः वावृध
स्व वर्धस्व। अपि च सूर्यं सर्वस्य प्रेरकं देवं आविष्कुरु वयं सूर्यं यथा पश्येम तथा कुर्वित्यर्थः। इषः अन्नानि च पिपीहि अस्मभ्यं आप्यायय शत्रू
न् अस्मत्सपत्नान् जहि नाशय हे इंद्र त्वं पणिभिरपहृताः गाः अभितृंधि प्रकाशय॥ ॥अथ चतुर्थी॥ ॥ते त्वा मदा बृहदिंद्र स्वधाव इमे पीता उक्षयंत
द्युमंतं॥ महामनूनं तवसं विभूतिं मत्सरासो जर्हृषंत प्रसाहं॥ ॥हे स्वधावः अन्नवन् इंद्र मदाः मदकराः ते इमे पीताः सोमाः द्युमंतं दी
प्तिमंतं त्वां बृहदत्यंतं उक्षयंत सेचयंतु अपि च हे इंद्र त्वां मत्सरासः मदकराः सोमाः जर्हृषंत भृशं हर्षयंतु कीदृशं महां महांतं प्रभूतं अ राम
नूनं सर्वगुणेन न्यूनता रहितः संपूर्णगुणमित्यर्थः। तवसं वृद्धं विभूतिं विभववंतं प्रसाहं शत्रूणामभिभवितारं॥ ॥अथ पंचमी॥ ॥येभिः सूर्यमु १४१

षसं मंदसानोऽवासयोऽप दृळ्हानि दर्दृत्॥ महामद्रिं परि गा इंद्र संतं नुत्था अच्युतं सदसस्परि स्वात्॥ ॥हे इंद्र येभिः यैः सोमैः मंदसानः मोदमानस्त्वं
सूर्यं सर्वस्य प्रेरकं देवं उषसं उषो देवतां च अवासयः स्वस्थाने न्यवासयः। अथवा सूर्योषसौ यथा तमांसि विवासयतस्तथा माकार्षीः। किं कु
र्वन् दृळ्हानि तमांसि अपदर्दृत् अपदारय। किं च हे इंद्र त्वं पणिभिरपहृता गाः परिसंतं परितो विद्यमानं महां महांतं अद्रिं पर्वतं नुत्थाः अनुदः कीदृ
शं स्वात् स्वकीयात् सदसः स्थानात् परितः अच्युतं अविचालितं विनाशरहितं स्थिरमित्यर्थः॥ ॥इति चतुर्थषष्ठे प्रथमो वर्गः॥ ॥अथ षष्ठी॥ ॥
॥तव क्रत्वोत तव तद्दंसनाभिरामासु पक्वं शच्या नि दीधः॥ और्णोर्दुर उस्रियाभ्यो वि दृळ्होदूर्वाद्गा असृजो अंगिरस्वान्॥ ॥हे इंद्र तव क्रत्वा त्वदी
यया प्रज्ञया तव दंसनाभिः त्वदीयैः कर्मभिः शच्या सामर्थ्येन आमासु अपक्वासु गोषु पक्वं परिणतं तत्प्रसिद्धं पयः निदीधः नितरां धारया। अ
पि च हे इंद्र त्वं उस्रियाभ्यो गोभ्यः तादर्थ्ये चतुर्थी अंगिरसां गाः नियमितुमित्यर्थः। दृळ्हात् दृढानि बलेन पाषाणादिभिः दृढीकृतानीत्यर्थः। दु
रो द्वाराणि व्यौर्णोः उद्घाटितवानसि अंगिरस्वान् अंगिरोभिर्युक्तः त्वं ऊर्वात् समूहात् गोष्ठादित्यर्थः। गाः उदसृजः उदगमयः॥ अथ सप्तमी॥ ॥
॥पप्राथ क्षां महि दंसो व्युर्वीमुप द्यामृष्वो बृहदिंद्र स्तभायः॥ अधारयो रोदसी देवपुत्रे प्रत्ने मातरा यह्वी ऋतस्य॥ ॥हे इंद्र महि महत् दंसः
दंससा कर्म उर्वीं विस्तीर्णां क्षां भूमिं वि पप्राथ विशेषेण पूरितवानसि। प्रा पूरणे इति धातुः हे इंद्र ऋष्वो महांस्त्वं बृहत् बृहती द्यां दिवं उपस्तभा
यः। उपस्तभ्नासि निरालंबं नेह पतति द्यौर्यथा न पतति इंद्रस्तथा करोतीत्यर्थः। अपि च त्वं रोदसी द्यावापृथिव्यौ अधारयः। पोषणेन धारयसि कीदृ

ऋ० भा० ऽयोदेवपुत्रेदेवाः पुत्राययोस्तेप्रत्नपुराणेमातरामातरौनिर्माताऽह्नतस्योदकस्यवायद्दीयद्यौयद्याविश्वस्यमातरोऽन्नस्यत्रत्वप्तः यद्वीपुत्रो
यकूरिस्यस्यनामैतत्॥ ॥अथाष्टमी॥ ॥अधत्वाविश्वेपुरइंद्रदेवाएकंतवसंदधिरेभराय॥ अदेवोयदभ्योहिष्टदेवान्स्वर्षातावृणतइंद्रमत्र॥
१४२ ॥अथाधुनास्मिन्कालेविश्वेदेवाःसर्वेपह्नाः इयः हेइंद्रएकंमुख्यंतवसंवृद्धंबलवंतंत्वात्वांभरायसंग्रामायपुरोदधिरेपुरस्ताच्चक्रिरे। यद्य
दाअदेवोवृत्रोसुरःदेवान्अभ्योहिष्टसंग्रामार्थमभिगतवान्ओहतिर्गतिकर्मा। किंचास्मिन्कालेस्वर्षातास्वर्षातौसंग्रामेइंद्रवृणतेसंभजं
तेस्ममरुतइतिशेषः महत्तोमहेइंद्रदेवेषुसमभजन्नित्यर्थः। अत्रअधुनापुरोदधिरेइतिसंबंधः॥ ॥अथनवमी॥ ॥अधद्यौश्चित्तेअपसानु
वज्राद्द्वितानमद्भियसास्वस्यमन्योः। अहिंयदिंद्रोअभ्योहसानंनिचिद्विश्वायुःशयथेजघान॥ ॥सापसिद्धादेवानामाश्रयत्वेनद्यौ
श्चित्द्युलोकोपिहेइंद्रअधुनास्मिन्कालेत्वदीयाद्वज्रात्स्वस्याःत्वदीयान्मन्योः क्रोधाच्चभियसाभयेनद्वितात्द्विःप्रकारेणकांछेनमन
साचापानमत्अपननामत्चिदितिपूरणः। विश्वायुः वर्द्धन्नइंद्रयद्वदाअभ्योजसातमभ्यगच्छंतंवृत्रंशयथेशायनेनिमित्तेमरणायेत्य
र्थः जघानन्यवधीत्चिदितिपूरणः यदावृत्रंजघानतस्मिन्कालेद्यौर्ननामेतिसंबंधः॥ ॥अथदशमी॥ ॥अधत्वष्टातेमहउग्रवज्रंस राम
हस्रभृष्टिंववृतच्छताश्रिं॥ निकाममरमणसंयेननवंतमहिंसंपिणगृजीषिन्॥ ॥अध अधुनाहेउग्रउद्गूर्णबलेइंद्रमहोमहतेत्वावत्वष्टादे १४२
वशिल्पीवज्रंववृतत्न्यवर्तयत् निष्पन्नंकृतवान्। कीदृशंसहस्रभृष्टिंसहस्रधारंशताश्रिंशतपर्वाणंहेऋजीषिन् यतरससोमवन्निंद्र

॥श्रीवेदपुरुषायनमः॥ ॥यस्यनिःश्वसितंवेदायोवेदेभ्योखिलंजगत्॥ निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥ ॥अथचतुर्थाष्टकेषष्ठोध्यायआ
रभ्यते॥ षष्ठेमंडलेद्वितीयेनुवाकेप्रथमंसूक्तंव्याख्यातं॥ तत्रपिबासोममितिद्वितीयंसूक्तंभरद्वाजस्यार्षंत्रैष्टुभंअंत्याद्विपदाविराट्तथाचानु
क्रांतंपिबपंचोनैंद्रंत्रैष्टुभंद्विपदांतमिति॥ अभिजितिमरुत्वतीयशस्त्रेएतन्निविद्धानंसूत्रितंच। पिबासोमंतमुष्टुहीतिमध्यंदिनइतिसमूळ्हदशरा
४ अं सू रात्रेष्टमेहनिमरुत्वतीयशस्त्रेएतदाद्यंतितंचापिबासोममभितमस्यद्यावापृथिवीइतिसूर्यस्तुतनाम्न्येकाहेमरुत्वतीयएतत्सूक्तंनिविद्धानं। सूर्य
तेहिसूर्यस्तुतायशस्त्रकामःपिबासोममभीति। महाव्रतेपिमरुत्वतीयएतत्सूक्तं। तथैवपंचमारण्यकेसूत्रितंच। पिबासोममभियमुग्रतर्दइ
कयाशुभासवयसःसनीळाइतिमाध्यंदिनेसवनेआग्नीध्रस्याहोत्रमैत्रावरुणब्राह्मणाच्छंसिनोप्रस्थितयाज्याःसूत्रितंच। पिबासोमम
भियमुग्रतर्दइतितिस्रोर्वाङेहिसोमकामंत्वाहुरितितत्रप्रथमा॥ ॥पिबासोममभियमुग्रतर्दऊर्वंगव्यंमहिगृणानइंद्र॥ वियोधृष्णोव
धिषोवज्रहस्तविश्वामित्रममित्रियाशवोभिः॥ ॥हेउग्रउद्गूर्णबलेइंद्रगृणानःअंगिरोभिःस्तूयमानः स्वयंसोममभिउद्दिश्यपातुमित्यर्थः।
महिमहद्गव्यंगोसंबंधिऊर्वंपणिभिराहृतंसमूहंतर्दः प्रकाशितवानसि। तर्दिर्हिंसाकर्मात्रप्रकाशनार्थः। तेसोमंपिबपानंकुरुहेधृष्णो
शत्रूणांधर्षकवज्रहस्तवज्रपाणेहेइंद्रयस्त्वंशवोभिर्बलैःसहितःसन्विश्वाविश्वेवृत्रंआवरणंअमित्रियाअमित्रंयंशत्रुंअमित्राशत्रुद्वि
तीयेकवचनस्यायादेशः। विवधिषःव्यवधीःसत्वंसोमंपिबेतिसंबंधः॥ ॥अथद्वितीया॥ ॥सईंपाहियऋजीषीतरुत्रोयःशिप्रवान्वृषभोयो

ऋ०भा० त्वन्नव्यमवसे ववृत्यात् ॥ ॥ हे इंद्र त्वां नव्यं नूतनमन्यैरकृतपूर्वं ब्रह्म अस्माभिः कृतं स्तोत्रं अवसे अस्माकं रक्षणाय आववृत्यात् । आवर्त्तयतु ।
कीदृशं त्वां एवमेवमुक्तप्रकारेण नानानि प्रसिद्धानि विश्वा विश्वानि सर्वाणि कर्माणि चकृवांसं कृतवंतं इंद्रमीश्वरं महां महांतं उग्रमोजस्वि
१४३ नं अजुर्यमजरं सहो बलस्य दातारं सुवीरं शोभनवीरमस्तुतोपस्यतं स्वायुधं शोभनायुधं सुवज्रं शोभनवज्रोपेतं ॥ ॥ अथ चतुर्दशी ॥ ॥
स नो वाजाय श्रवस इषे च राये धेहि द्युमत इंद्र विप्रान् ॥ भरद्वाजे नृवत इंद्र सूरीन्दिवि च स्मैधि पार्ये न इंद्र ॥ ॥ हे इंद्र स त्वं कमतो दीप्तिमतः
विप्रान्मेधाविनो नोऽस्मान्वाजाय बलाय श्रवसे इषे चान्नाय राये धनाय धेहि धारय । अपि च हे इंद्र भरद्वाजे मयि नृवतो मनुष्यवतः परि
चारकयुक्तानित्यर्थः । सूरीन्स्तवकर्तॄन् पुत्रपौत्रानिति शेषः । हे इंद्र त्वं पार्ये पारणीये आगामिनि च दिवि दिवसे एधि स्म नोऽस्माकं एधि
रक्षिता खलु भवेत्यर्थः । षष्ठेहनि तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे अनुरूपत्वेनास्या अयावाजमिति तृतीया । सूत्रितं च । अयावाजं देवहितं
सनेमेति स्तोत्रियानुरूपाविति ॥ ॥ सैषा पंचदशी ॥ ॥ अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ॥ ॥ अया अनया स्तुत्या देव
हितं देवेन द्योतमानेनेंद्रेण दत्तं वाजमन्नं सनेम वयं संभजेम । अपि च सुवीराः शोभनपुत्रोपेताः वयं शतहिमाः शतसंवत्सरान्मदेम हृष्यामः ॥
॥ ॥ इति चतुर्थस्य षष्ठे तृतीयो वर्गः ॥ ॥ तमु ष्टुहीति पंचदशर्चं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं तथा चानुक्रम्यते । तमु ष्टुहीति अ राम
भिजिति निष्केवल्ये एतन्निविद्धानं सूत्रितं च तिष्ठा हरी तमु ष्टुहीति माध्यंदिन इति महाव्रतेऽपि निष्केवल्ये तथैव पंचमारण्यके सूत्रितं च । तमु ष्टु १४३

हि यो अभिभूत्योजा सुत इत्त्वं निमिश्ल इंद्र सोम इति त्रीणीति ॥ ॥ तत्र प्रथमा ॥ ॥ तमु ष्टुहि यो अभिभूत्योजा वन्वन्नवातः पुरुहूत इंद्रः ॥ अ
षाळ्हमुग्रं सहमानमाभिर्गीर्भिर्वर्ध वृषभं चर्षणीनां ॥ ॥ अभिभूत्योजाः अभिभावुकतेजाः वन्वन् शत्रून् हिंसन् अवातः शत्रुभिरहिंसितः वनो
तेर्निष्पन्नस्य नेऽपूर्वस्य रूपं यद्वा वातेर्वा सिमभिगतः पुरुहूतः बहुभिराहूतः य इंद्रोऽस्तीति शेषः । हे भरद्वाज तमु ष्टुहि तमेवेंद्रं स्तुहि । अपि च आ
भिर्वक्ष्यमाणाभिर्गीर्भिः स्तुतिरूपाभिर्वाग्भिः तमिंद्रं वर्धय कीदृशं अषाळ्हं अनभिभूतं उग्रं उद्गूर्णमोजस्विनं वा सहमानं शत्रूनभिभवंतं च
र्षणीनां प्रजानां संबंधिनं वृषभं वर्षितारं ॥ ॥ अथ द्वितीया ॥ ॥ स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी ॥ बृहद्रेणुश्च्यवनो मा
नुषीणामेकः कृष्टीनामभवत्सहावा ॥ ॥ बृहद्रेणुः महतो रेणोः पांसोरुत्थापकः संग्रामे क्षितियावत् कीदृशः युध्मो योद्धा सत्वा दाता सनो
तेरिदं रूपं खजकृत् खजानां संग्रामाणां कर्ता खज इति संग्रामनामैतत् समद्वा यजमानैः सहमदः समवत्तद्वान् तुविम्रक्षः प्रक्षतिः से
स्नेहनकर्मा तुवीनां बहूनां वर्षणेन स्नेहनकर्मा नदनुमान् शब्दवान् ऋजीषी ऋजीषशब्देन सवनद्वयाभिषुतः सोम उच्यते तद्वान् ॥ ॥ अथ
तृतीया ॥ ॥ त्वं ह नु त्यदद्मायो दस्यूँरेकः कृष्टीरवनोरार्याय ॥ अस्ति स्विन्नु वीर्यं तत्त इंद्र न स्विदस्ति तदृतुथा विवोचः ॥ ॥ हे इंद्र त्यत्तत्स्य स
र्वं त्यदिति तच्छब्दपर्यायोऽत्र लिंगव्यत्ययः दस्यून् कर्महीनान् जातान् नु क्षिप्रं अदमयः दांतानकरोः ह शब्दः पूरणार्थः । अपि च एको मुख्यः
त्वं पुत्रदारादीन् आर्याय कर्मकृते जनाय अवनोः अददाः । एवं कृतवतस्तव पाविरिंद्र यद्दानाद्यासीत्तत्तदा तस्य वीर्यसद्भावे विचिकित्समानः प्रो

ऋ०भा० ऽमाह।हेइंद्रतेनवज्रेर्वमुक्तंवीर्यंसामर्थ्यंअस्तिस्वित्किंस्विद्भवतिस्विदितिवितर्के।सायांयज्ञानांनिस्वित्तद्बलंऋतुथाकालेकालेविवाचःविप्रो
पेणब्रूहि॥ ॥अथचतुर्थी॥ ॥सदिद्धितेतुविजातस्यमन्येसहःसहिष्ठतुरतस्तुरस्य॥ उग्रमुग्रस्यतवसस्तवीयोऽरध्रस्यरध्रतुरोबभूव॥ ॥
१४४ पूर्वमंत्रेइंद्रस्यबलसद्भावंसंदिह्यामेवबलमस्त्येवेत्यवधारयन्नाह।हियस्मात्कारणात्हेसहिष्ठबलवत्तमइंद्रतुविजातस्यबहुषुयज्ञेषुप्रादु
र्भूतस्यतुरतःअस्मान्हिंसितुस्तेतवसहोबलंसंदिह्यमानमेवाहंमन्येतुरस्यओजस्विनःतवसःप्रवृद्धस्यशत्रुभिर्वशीकर्तुमशक्यस्यर
धर्वशीकरणार्थस्यरध्रस्य।रध्रतुरःवशीकरणीयानांसंपन्नानांहिंसकस्यतवबलंबभूवभवत्येव।कीदृशमुग्रंउदूर्णंतवीयःप्रवृद्धतरंयत
स्त्वंवृत्रादीन्शत्रून्हंसिअतस्तेबलंविद्यतएवेत्यर्थः॥ ॥अथपंचमी॥ ॥तन्नःप्रत्नंसख्यमस्तुयुष्मेइत्थावदद्भिर्वलमंगिरोभिः॥ हन्न
च्युतच्युद्दस्मेषयंतमृणोःपुरोविदुरोअस्यविश्वाः॥ ॥प्रत्नंपुराणंचिरकालानुवर्तीत्यर्थः।तत्प्रसिद्धंनोऽस्मदीयंसख्यमस्तुत्वल
क्षणंसखित्वंहेइंद्रयुष्मेयुष्मासुअस्तुपूजार्थंबहुवचनं।हेअच्युतअच्युतानांअविचालितानांच्यावकहेदस्मदर्शनीयइंद्रइषयंतंआ
युधानिप्रेरयंतंबलमेतन्नामानमसुरंइत्थासत्यमेववदद्भिः ... पुराणांद्वारांश्चविवृणोः॥ ॥इतिचतुर्थस्यषष्ठेचतुर्थोवर्गः॥ ॥अथषष्ठी॥ ॥ राम
सहिधीभिर्हव्योअस्त्युग्रईशानकृन्महतिवृत्रतूर्ये॥सतोकसातातनयेसवज्रीवितंतसाय्योअभवत्समत्सु॥ ॥उग्रःओजस्वीईशान
कृत्स्तोतॄन्समर्थान्करोतीतीशानकृत्।सइंद्रःमहतिप्रभूतेवृत्रतूर्येसंग्रामेवृत्रतूर्यइतिसंग्रामनामैतत्।धीभिःस्तोत्रैःस्तुतिभिर्वा १४४

येनवज्रेणनिकामंनियतःकामोयस्यतंअरमणंत्वंशत्रूणांअरंअभिगंतारमनोयस्यतंनवंतंशाशयमानंअहिंवृत्रमसुरंसंपिणक्संपिष्टवान्
सितंवज्रंकृतवानित्यर्थः॥ ॥इतिचतुर्थस्यषष्ठेद्वितीयोवर्गः॥ ॥वर्धान्यंविश्वेमरुतःसजोषाःपचच्छतंमहिषाँइंद्रतुभ्यं॥पूषाविष्णुस्त्रीणि
सरांसिधावन्वृत्रहणंमदिरमंशुमस्मै॥ ॥सजोषाःसहप्रीयमाणाःविश्वेमरुतःसर्वेदेवाःहेइंद्रयंत्वांवर्धान्स्तोत्रैर्वर्धयंति।हेइंद्रअस्मै
तुभ्यंपूषाएतन्नामकोदेवःविष्णुःएतन्नामकश्चशतंशतसंख्याकान्महिषान्व्यश्नन्अपचत्अपचेतअपिचतस्मैतुभ्यंसरांसिद्रोणकल
शापूतभृदाधवनीयाख्यानिपात्राणित्रीणिअंशुंसोमंधावन्गच्छन्सोमपात्राणिपर्यंतीत्यर्थः।कीदृशंसोमंमदिरंमदकरंवृत्रहणंवृत्राणांशत्रू
णांहंतारंअत्रवृत्रहन्शब्देनसोमोऽभिधीयतेपीतेहिसतिसोमेवृत्राणिहंतुमिंद्रःसमर्थोभवतीतियावत्॥ ॥अथद्वादशी॥ ॥आक्षोदो
महिवृतंनदीनांपरिष्ठितमसृजऊर्मिमपां॥तासामनुप्रवतइंद्रपंथांप्रार्दयोनीचीरपसःसमुद्रं॥ ॥हेइंद्रत्वंमहीमहत्वृत्रेणपरिवृत
मावृतंपरिष्ठितंनदीनांसिंधूनांसंबंधिक्षोदःउदकंअसृजःआसमंतात्सृष्टवानसियेननद्यःपूर्णाःप्रवहेयुरित्यर्थः।अपामुदकानामू
र्मिंसमूहंसृष्टवानसिपुनर्वचनमादरार्थंहेइंद्रतासांनदीनांसंबंधिपंथांपंथानंमार्गान्प्रवतःप्रवणान्चकार्षीरितिशेषः।अन्वित्युपस
र्गयोग्यक्रियाध्याहारः।किंचनीचीःप्रवणाभिमुखीवेगयुक्ताइत्यर्थः।अपसःअपउदकानिअपसइत्यपएवार्थवंति।समुद्रमुदधिंप्रार्दयः
प्रागमयःअर्दयतिर्नयनकर्मा॥ ॥अथत्रयोदशी॥ ॥एवाताविश्वाचकृवांसमिंद्रंमहामुग्रमजुर्यंसहोदां॥सुवीरंत्वास्वायुधंसुवज्रमाब्र

ऋ०भा० भिप्रमंस्पुरुदंच्चमायाः॥ हे इंद्र त्वं दावता अंछुता अवतिर्गतिकर्मा त्वक्षसा शत्रूणां तनूकर्त्रापन्यसा स्तुत्यं तरेण बलेन युक्तस्त्वं हत्व

१४५ ायशत्रुहननाय स्वकीयं रथं तिष्ठ आरोह तत्था दक्षिणया दक्षिणहस्तेन पाणौ वज्रं स्वकीयमायुधं आधिष्व। आधस्व तदनंतरं

हे पुरुदत्र बहुधनेंद्र त्वं आसुरीर्माया अभि अभिगम्य प्रमंदप्रकर्षेण जहि। अत्र मदतिर्वधकर्मा॥ ॥ अथ दशमी॥ ॥ अग्निर्न शुष्कं वनमिं

द्र हेती रक्षो नि धक्ष्यशनिर्न भीमा॥ गंभीरय ऋष्वया यो रुरोजाध्वानयद्दुरिता दंभयच्च॥ ॥ अग्निर्न अग्निरिव न उपमार्थीयः तथा

ग्निः शुष्कं नीरसं वनं दहति। हे इंद्र हेती त्वदीयं वज्रं तदुक्तं त्वा शायति देवाह अशनिर्न भीमा यथा अशनिर्भीमा भवति तद्वद्भयंकर

स्त्वं रक्षः राक्षसं नि धक्षि वज्रेण नितरां दह। य इंद्रः गंभीरया शत्रुभिरधर्षणीयया ऋष्वया महत्या ऋष्व इति महन्नामैतत्। महत्या

रुरोज शत्रून्बभंज। अध्वनयत् उद्गलत्स्वरणं गर्जनं करोति तथा च दुरितानि दंभयच्च भिनत्ति स त्वं रक्षो नि धक्षीति पूर्वेणान्वयः॥

॥ इति चतुर्थस्य षष्ठे पंचमो वर्गः॥ ॥ अथैकादशी॥ ॥ आ सहस्रं पथिभिरिंद्र राया तुविद्युम्न तुविवाजेभिरर्वाक्॥ याहि सूनो स

हसो यस्य नू चिददेव ईशे पुरुहूत योतोः॥ ॥ हे तुविद्युम्न बहुधन सहसः सूनो बलस्य पुत्र इंद्र ओजसो जातमुत मन्य एनमिति निगमां

तरे बलस्य पुत्रं त्वं राया धनेन युक्तः सहस्रं सहस्रेण बहुभिरित्यर्थः। तुविवाजेभिः बहुतेंद्रस्य तव योतोः बलादिति पृथक्करणं अद राम

वस्थित असुरः नू चिदपि शाने छो। अत्र नू चिदिति निषेधार्थः॥ ॥ अथ द्वादशी॥ ॥ प्र तुविद्युम्नस्य स्थविरस्य घृष्वेर्दिवो ररप्शे महिमा पृथिव्याः॥ १४५

नास्य शत्रुर्न प्रतिमानमस्ति न प्रतिष्ठिः पुरुमायस्य सह्योः॥ ॥ तुविद्युम्नस्य बहुयशसो बहुधनस्य वा स्थविरस्य प्रवृद्धस्य घृष्वेः शत्रूणां

धर्षकस्येंद्रस्य महिमा महत्त्वं दिवो द्युलोकात् पृथिव्या भूमेश्च प्र ररप्शे प्रविवेचे विरप्शीति महन्नामसु पाठात्। नाम्नां नाम्ध्येयेण धातुजत्वात्

प्रातिरच्यति शायवाची पुरुमायस्य बहुप्रज्ञस्य सह्योः शत्रूणामभिभवितुरस्येंद्रस्य शत्रुः शातयिता नास्ति प्रतिमानं प्रतिनिधिर्नास्ति

अस्य प्रतिष्ठिः प्रतिष्ठा आश्रयो नास्ति स एव सर्वस्य प्रतिष्ठेत्यर्थः॥ ॥ अथ त्रयोदशी॥ ॥ प्र तत्ते अद्या करणं कृतं भूत्कुत्सं यदायुमतिथि

ग्वमस्मै॥ पुरू सहस्रा नि शिशा अभि क्षामुत्तूर्वयाणं धृषता निनेथ॥ ॥ अद्येदानीमपि हे इंद्र ते त्वया सत्तं करणं तत्कर्म प्रभूत्प्रभवति

प्रकाशते किं तदिति उच्यते। कुत्सं कुत्सनाम्ना राजानं एतन्नामानमृषिं च आयुं शत्रुभ्यः सकाशात् एतत्संज्ञकं पौरूरवसं अतिथीनामभिगंतारं दि

वोदासं च अस्मै वरात् ररक्षथेति यवे इति कर्तव्यं तत्स भवतीति पूर्वेण संबंधः रक्षथेति द्वितीया श्रुतेरुचितक्रियाध्याहारः अपि चास्मै अनं

तरोक्तायातिथिग्वाय पुरु पुरूणि बहूनि सहस्राणि शंबरस्य घनानि शिशाः अददाः इंद्रः शंबरं हत्वा तस्य धनानि दिवोदासाय ददावित्य

र्थः। तथा हे इंद्र धृषता धर्षकेण त्वदीयेन वज्रेण शंबरं हत्वा क्षां पृथिवीं अभि अभिलक्ष्य पृथिव्यां वर्तमानं तूर्वयाणं त्वरितगमनं दिवोदा

सं शत्रुभिर्निनेथ आपद्भ्य उद्गमयः अनुक्रियानाम्ब्येकाहे मरुत्वतीयशास्त्रे अनु त्वाहिघ्न इति सूक्तमुखीया सूत्रितं च। अनु त्वाहिघ्ने अध

देव देवान् अनु ते दायि मह इंद्रियायेति स्तोषा सूक्ते चतुर्दशी॥ ॥ अनु त्वाहिघ्ने अध देव देवा मदन्विश्वे कवितमं कवीनां॥ करो यत्र वरि

वो बाधिताय द्विवे जनाय तन्वे गृणानः॥ हे देव द्योतमानेंद्र त्वां अध अस्मिन् काले विश्वे सर्वे देवाः स्तोतारः अहिं मेघं हननाय वृष्टिप्र
दानायेत्यर्थः। अनु मदन् अनुमदंति अनुस्तुवंति कीदृशं त्वां कवीनां मेधाविनां मध्ये कवितमं अयस्तं कवियत्र यस्मिन् काले गृणानः स्तो
तृभिः स्तूयमानस्त्वं व्याधिना दारिद्र्यादिभिः पीडिताय द्विवे स्तोत्रे जनाय तन्वे स्तोतॄणां तथा वरिवः धनं करः अकरोः अददाः। अथवा हे देवें
द्र अध अस्मिन् काले विश्वे सर्वे देवाः सुराः अहिं वृत्रं एको च्यते तस्य हननाय कवीनां कवितमं त्वां अनुमदंति यत्र यस्मिं स्तोत्रे सति बाधिताय
असुरैः पीडिताय द्विवे द्युलोकनिवासाय जनाय तन्वे शोभायै वृहताते नत वे शोभार्थं वरिवश्चकर्थ॥ ॥अथ पंचदशी॥ ॥अनु द्यावापृ
थिवी तत आ जो अमर्त्या जिहत इंद्र देवाः॥ कृष्वा कृत्नो अकृतं यत्ते अस्त्युक्थं नवीयो जनयस्व यज्ञैः॥ ॥हे इंद्र ते त्वदीयं तत्प्रसिद्धमोजो
बलं द्यावापृथिवी अनु जिहाते अमर्त्या अमरणधर्मा देवाः त्वदीयं बलमनु जिहते अनुगच्छंति। कृत्नो बहूनां कर्मणां कर्तः ते त्वदीयं अ
कृतं यत्कर्मास्ति तत् कृष्व कुरु घातनदनंतरं यज्ञैर्यज्ञे पुनर्नवीयो नवतरं उक्थं स्तोत्रं जनयस्व॥ ॥इति चतुर्थस्य षष्ठे षष्ठो वर्गः॥ ॥महाँ इंद्र इति
त्रयोदशर्चं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं॥ अनुक्रांतं च। महानृचा नेति माध्यंदिने सवने सोमातिरेके शास्त्रं भवति। तच्चेदं सूक्तं
सूचितं च। महाँ इंद्रो नृवदिति निष्केवल्ये हि द्वितीये छंदोमे मरुत्वतीयशास्त्र एतत्सूक्तं सूचितं च। महाँ इंद्रो नृवदिति मरुत्वतीय
मिति तत्र प्रथमा॥ ॥महाँ इंद्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः॥ अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत्॥

हव्यः जयार्थिभिराह्वातव्यः। अस्ति भवति हित्वा शूरः पदपूरणः। तोकस्य साता तोकस्य पुत्रस्य सातौ सातेन निमित्तेन पुत्रे निमित्ते सति स इंद्र
आह्वातव्योस्ति। वज्री वज्रवानिंद्रः समत्सु संग्रामेषु वितंतसाय्यः विशेषेण विस्तार्यः स्तोत्रैर्वंदनीयो भवत् भवति। यद्वा वितंतसाय्यः
शत्रूणां हिंसकः तंतस इति धातुर्हिंसाकर्मा तस्य कर्तरीदं रूपं॥ ॥अथ सप्तमी॥ ॥स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे॥
स द्युम्नेन स शवसोत राया स वीर्येण नृतमः समोकाः॥ ॥स इंद्रः अमर्त्येन विनाशरहितेन नाम्ना शत्रूणां नमयित्रा मज्मना बलेन
मज्मनेति बलनामैतत्। मानुषाणां जनिम जन्मसंबंधमित्यर्थः अतिप्रसर्स्रे अतिप्रपेदे स इंद्रः द्युम्नेन यशसा समोकाः समानस्थानो
भवति किंच स इंद्रः शवसा बलेन समोका भवति। उतापि च नृतमो नेतृतमः स इंद्रः राया धनेन वीर्येण सामर्थ्येन च समोका भवति॥
॥ ॥अथाष्टमी॥ ॥स यो न मुहे न मिथू जनो भूत्सुमंतुनामा चुमुरिं धुनिं च। वृणक् पिप्रुं शंबरं शुष्णमिंद्रः पुरां च्यौत्नाय शयथाय नू चि
त्॥ ॥स य इंद्रः न मुहे संग्रामे कदापि न मुह्यति यश्च मिथु मिथ्या वृथा जनो जनयिता न भूत् न भवति किंतु सुमंतुनामा प्रज्ञाननामा प्र
ख्यातनामेत्यर्थः। स इंद्रः पुरां शत्रुसंबंधिनीनां पुराणां च्यौत्नाय च्यवनाय नाशाय यथा च शत्रूणां मरणाय नू चित् शीघ्रमेव कर्म कु
रुत इति शेषः। तथा चुमुरिं धुनिं च एतन्नामकावसुरौ वृणक् हिंसितवानस्ति। वृणक्ति हिंसाकर्मा अपि च पिप्रुं शंबरं शुष्णं एतन्नामका
न्त्रीनसुरान् हिंसितवानस्ति॥ ॥अथ नवमी॥ ॥उदावता त्वक्षसा पन्यसा च वृत्रहत्याय रथमिंद्र तिष्ठ॥ धिष्व वज्रं हस्त आ दक्षिणत्रा

च॰भा॰ ॥नूनमघवइहास्मिन्यज्ञेवाजयंतः अन्नमिच्छंतोवयंस्तोतारः शाकैः शाकैः समर्थैः अस्यतव सहायैर्मरुद्भिः सहितंवतिनंशत्रूणांघातकं
१४१ नाशकमित्यर्थः॥ इंद्र परमेश्वरंवः प्रसिषेतांकुर्वेमस्तुमः॥ यथा चिद्यथैवपूर्वपुरातनाः जरितारः स्तोतारः अनेद्याः अनंद्याः अनवद्याः
अवद्यरहिताः अरिष्टाः अहिंसिताश्च आसुः बभूवुः हे इंद्र त्वत्प्रसादाद्वयमपितथैव भवेमेत्यर्थः॥ ॥अथपंचमी॥ ॥धृतव्रतोध
नदाःसोमवृद्धःसहिवामस्यवसुनः पुरुक्षुः॥ संजग्मिरेपथ्या रायोअस्मिन्त्समुद्रेनसिंधवोयादमानाः॥ ॥सहिखल्विंद्रः धृतव्र
तोधृतकर्माधनदाःसएवधनप्रदः कीदृशस्य धनस्येत्याकांक्षायांउपसर्जनीभूतस्यापिधनस्यविशेषणंवामस्यवसुनइति।वाम
स्यवननीयस्यवसुनः श्रेष्ठस्ययद्वावसुनः धनस्यस्वामीइतिशेषः।सोमवृद्धःसएवसोमेनप्रवृद्धः पुरुक्षुः बहून्नः सएवअस्मिन्निंद्रे
इएवपथ्याः पोषणेहितानिरायोधनानिसंजग्मिरेसंगच्छंतेतत्रदृष्टांतः सिंधवोनद्यः समुद्रेनयथासमुद्रेयादमानाः अभिगच्छं
त्यस्तद्वत्॥ ॥इतिचतुर्थस्यषष्ठेसप्तमोवर्गः॥ ॥अथषष्ठी॥ ॥आविद्धंनःआभरशूरशवओजिष्ठमोजोअभिभूतउग्रं॥ विश्वा
द्युम्नावृष्ण्यामानुषाणामस्मभ्यंदाहरिवोमादयध्यै॥ ॥हे शूरविक्रांतेंद्र शविष्ठं बलवंतं शवो बलं नोस्मभ्यं आभर। आहर। हे अभि
भूते शत्रूणामभिभावुकेंद्र उग्रं अप्रसह्यं ओजिष्ठमोजस्विनं ओजोदीप्तिमस्मभ्यं आभर विश्वा विश्वानि सर्वाणि वृष्ण्या वृष्ण्यानि राम
विवेचनसमर्थानिद्युम्ना द्युम्नानिद्योतमानानिमानुषाणांमनुष्याणांभोग्यतयाकल्पितानिहेहरिवः हरिवन्निंद्र तानिधनानिमा १४१

दयध्यैमादयितुमस्मभ्यंदाः प्रयच्छ॥ ॥अथसप्तमी॥ ॥यस्तेमदः पृतनाषाळमृध्रइंद्रतंन आभरशूशुवांसं॥ येनतोकस्यतनयस्यसातौ
मंसीमहिजिगीवांसस्त्वोताः॥ ॥पृतनाषाट् शत्रुसेनामभिभविता अमृध्रः अहिंसितः योमदोहर्षः हे इंद्र ते तवास्ति शूशुवांसंप्रवृद्धंतं
दमस्मभ्यमाभर आहर त्वोताः त्वयारक्षिताः जिगीवांसः जितवंतोवयंतोकस्यपुत्रस्यतनयस्यतत्पुत्रस्य च साता लाभनिमित्तेसतियेन
नहर्षेणमंसीमहि स्तोकहीमहितमाभरेतिपूर्वेणान्वयः॥ ॥अथाष्टमी॥ ॥आनोभरवृषणंशुष्ममिंद्रधनस्पृतंशूशुवांसंसुदक्षं॥
येनवंसामपृतनासुशत्रून्तवोतिभिरुतजामीरजामीन्॥ ॥हेइंद्र त्वं वृषणं वर्षितारं शुष्मं सेनालक्षणं बलं नोस्मभ्यं आभर आहर
धनस्पृतंधनस्यपालकं शूशुवांसंप्रवृद्धं सुदक्षं शोभनबलं हे इंद्र तवोतिभिः त्वदीयाभिरक्षाभिः पृतनासुसंग्रामेषु पृतनाइति
संग्रामनाम येनबलेनशत्रून्वंसामहनाम उतेत्यन्यक्रमः जामीन् बंधून् उतापि च अजामीन् शत्रून् अपि येनशुष्मेनवंसाम
तंशुष्ममाभरेतिपूर्वेणसंबंधः॥ ॥अथनवमी॥ ॥आतेशुष्मोवृषभएतुपश्चादोत्तरादधरादापुरस्तात्॥ आविश्वतोअभिसमेत्व
र्वाङिंद्रद्युम्नंस्वर्वद्धेह्यस्मे॥ ॥हे इंद्र वृषभः वर्षितातेत्वदीयंशुष्मोबलं अर्वाङस्मदभिमुखः सन्पश्चात्पश्चिमभागात् एतु आगच्छतु
अधरादक्षिणात् एतु पुरस्तात्पूर्वभागात् आगच्छतुविश्वतः सर्वस्मात्दिग्भागात् अभि अस्मानभिलक्ष्य आसमेतुसम्यगागच्छतु हे
इंद्रत्वं विश्वतः सर्वतः सुखयुक्तं द्युम्नं धनं अस्मे अस्मभ्यं धेहि प्रयच्छ॥ ॥अथदशमी॥ ॥नृवत्तइंद्रनृतमाभिरूतीवंसीमहिवामं

ऋ०भा० अोमतेभिः॥ ईक्षे हि वस्व उभयस्य राजन् धा रत्नं महि स्थूरं बृहंतं॥ ॥नृवत् मनुष्यैः परिचारकजनैर्युक्तैः स्थोमतेभिः अश्वैः मद्भिः० सहि
१४९ तं वामं वननीयं धनं हे इंद्र दत्ते त्वं तत्र० नृतमाभिः० नेतृतमाभिः ऊती ऊतिभिरक्षाभिः० वसीमहि वयं संभजेमहि हि यस्मात्कारणात्
हे राजन् राजमान इंद्र त्वं उभयस्य पार्थिवस्य दिव्यस्य च वस्व० धनस्य ईक्षे ईशिषे तस्मात्कारणात् महि महांतं स्थूरं विपुलं बृहंतं गुणैः०
परिवृढं रत्नं रमणीयं धनं अत्र रत्नशब्दः० पुल्लिंगः धाः धेहि॥ ॥ अथैकादशी॥ ॥मरुत्वंतं वृषभं वावृधानमकवारिं दिव्यं शासमिंद्रं॥
विश्वासाहमवसे नूतनायोग्रं सहोदामिह तं हुवेम॥ ॥इहास्मिन् यज्ञे नूतनाय अभिनवाय अवसे रक्षणाय तं प्रसिद्धं हुवेम कं मरु०
आह्वयामो वा कीदृशं मरुत्वंतं मरुद्भिर्युक्तं वृषभं कामानां वर्षितारं वावृधानं प्रवृद्धं अकवारिं अकुत्सितशत्रुं दिव्यं द्योतमानं शासं शा
सितारं विश्वासाहं विश्वस्य लोकस्याभिभवितारं उग्रमोजस्विनं सहोदां बलप्रदं॥ ॥ अथ द्वादशी॥ ॥जनं वज्रिन्महि चिन्मन्यमान
मेभ्यो नृभ्यो रंधया येष्वस्मि॥ अधा हि त्वा पृथिव्यां शूरसातौ हवामहे तनये गोष्वप्सु॥ ॥येषु येषां नृणां मध्ये अहमस्मि एको भवामि
हे वज्रिन् वज्रवन्निंद्र एभ्यो नृभ्यो मनुष्येभ्यः० महि महदत्यंतमात्मानं मन्यमानं जनं बहु मन्यमानमित्यर्थः० रंधय वशी कुरु चिदिति
पूरणः० अध अधुना पृथिव्यां भूम्यां शूरसातौ युधि प्रवृत्ते सति तनये पुत्रे पुत्रनिमित्ते च गोषु पशुषु अप्सु उदकेषु च निमित्तेषु हे इंद्र
त्वं द्युलोके स्थितं हवामहे वयमाह्वयाम॥ ॥अथ त्रयोदशी॥ ॥वयं त एभिः० पुरुहूत सख्यैः० शत्रोः० शत्रोरुत्तर इत्स्याम॥ घ्नंतो वृत्राण्युभ राम १४९

॥न्वत्त्वयथा नेता राजा मृत्यादिकामानां पूरयिता तद्वत् चर्षणिप्रा चर्षणीनां लोकजनानां कामानां पूरकः० महान् प्रभूतः० इंद्र आगच्छतु आ इत्यु
पसर्गदर्शनात् गच्छत्वित्याख्यातस्याध्याहारः०। उतापि च द्विबर्हा द्वयोर्लोकयोः० परिवृढः० सहोभिः० शत्रुबलैः० अमिनः० अहिंसितो यः इंद्र०
अस्मद्र्यक् अस्मदभिमुखं यथा भवति तथा वीर्याय वीरकर्मकारणाय च वृधे वर्धतउरुः० शरीरेण विस्तीर्णः० पृथुः० गुणैः० प्रथितः० कर्तृभि
र्यजमानैः० सुकृतो भूत् सुष्ठु परिभाविता भवति॥ ॥ अथ द्वितीया॥ ॥इंद्रमेव धिषणा सातये धाद्बृहंतमृष्वमजरं युवानं॥ अषाळ्हेन शव
सा शूशुवांसं सद्यश्चिद्यो वावृधे असामि॥ ॥धिषणा अस्मदीया स्तुतिः० सातये दानाय इंद्रमेव धात् धारयति। कीदृशं बृहंतं महांतं ऋष्वं
गंतारं अजरं जरारहितं युवानं नित्यतरुणं अषाळ्हेन शत्रुभिरनभिभूतेन शवसा बलेन शूशुवांसं प्रवृद्धं श्रूयते रिदं रूपं इंद्रः० सद्य
श्चित् सद्य एव जातमात्रः० स नु असामि अनल्पं अधिकं यथा भवति तथा वावृधे वर्धयते॥ ॥ अथ तृतीया॥ ॥पृथू करस्ना बहुला गभस्ती अ
स्मद्र्यक् सं मिमीहि श्रवांसि॥ यूथेव पश्वः पशुपा दमूना अस्माँ इंद्राभ्या ववृत्स्वाजौ॥ ॥हे इंद्र त्वं पृथू विस्तीर्णौ करस्नौ कर्मणां कर्तारौ
बहुला बहुप्रदौ गभस्ती त्वदीयौ बाहू श्रवांसि अन्नानि दातुमिति शेषः०। अस्मद्र्यक् अस्मदभिमुखं सं मिमीहि कुरु तं किंच हे इंद्र दमूनाः० दां
तमनाः त्वं आजौ संग्रामे अस्मान् अभ्याववृत्स्व अभ्यावर्तस्व। तत्र दृष्टांतः० पशुपाः० पशूनां पालकः पश्वः० पशून् यूथेव यूथानि यूथानां वर्तय
ति तद्वत्॥ ॥ अथ चतुर्थी॥ ॥तं व इंद्रं चतिनमस्य शाकैरिह नूनं वाजयंतो हुवेम॥ यथा चित्पूर्वे जरितार आसुरनेद्या अनवद्या अरिष्टाः॥

च॰भा॰ असुर्यं असुरत्वं बलं देवेभिः देवैः स्तोतृभिः अनु धायि अकारि स्तोत्रैः स्वमानानां देवानां बलवती भवतीत्यर्थः हे ऋजीषिन् विगतरस
१४९ सोमे इंद्र विह्रुताः सत्तानः संगच्छमानः स्वं पचसमवायु इति धातोः रूपं यद्यदा सूर्यस्य लापः उदकानि वव्रिबो संपरि सृजद्वंतं अहिमागस
हंतारं वृत्रमसुरं हन्नू अवधीः तद्धलु वध्यो धादिति पूर्वेण संबंधः ॥ अथ तृतीया ॥ त्वं ओजीयो न वसस्तवीयान्कृत ब्रह्मेंद्रो वृद्ध
महाः ॥ राजाभवन्मधुनः सोम्यस्य विश्वासां यत्पुरां दर्त्नुमावत् ॥ यद्यदा इंद्रो विश्वासां पुरां असुरपुरीणां दर्त्नु दारकं वज्रं आव
त प्रापत् तदा सोम्यस्य मधुनः मधुररसस्य राजा भवत् स्वाम्यासीत् कीदृशः त्वं नु हिंसकानुं हिंसन् ओजीयान् अतिशयेन ओ
जस्वीतवसो बलवतः तवीयान् बलवत्तरः कृतब्रह्मा कृतं ब्रह्म स्तोत्रं यस्मै स्तोतृभिः सः अथवा कृतं दत्तं अन्नं येन स्तोतृभ्यः वृद्धम
हाः वृद्धतेजाः एवंभूतः इंद्रो राजाभवदिति ॥ अथ चतुर्थी ॥ शतैरपद्रन्पणय इंद्रात्र दशोणये कवयेर्कसातौ ॥ वधैः शुष्णस्या
शुषस्य मायाः पित्वो नारिरेचीत्किंचन प्र ॥ अत्रास्मिन्नर्कसातौ अर्कमन्नं प्राप्यते यस्मिन् तदर्कसातिर्युद्धं तस्मिन् दशोणाय अवतेस्त
र्पणार्थाच्छांदसो णिः दशोणये बहुहविष्कान्न कवये मेधाविनः पंचम्यर्थे चतुर्थी हे इंद्र त्वत्सहायात् कुत्सात्तद्विभ्यतः पणयः एतन्ना
मका असुराः शतैः शतसंख्याकैर्बलैः सार्धमपद्रन् पलायंत । पद्यतेर्दं रूपं अपि च इंद्रः अशुषस्य अशुष्कस्य संपूर्णबलस्येत्यर्थः राम
शुष्णस्य तन्नामकासुरस्य कुत्सस्य शत्रोः मायाः कपटानि वधैः हननसाधनैरायुधैः न प्रारिरेचीत् परिक्रान्तं करोत् । पित्वोन्नस्य १४९

पितुरित्यन्ननामैतत् किंचन किंचिदपि प्रारिरेचीत् तदीयमन्नं सर्वमप्यपहारयत् ॥ अथ पंचमी ॥ महो द्रुहो अपविश्वायु धायि वज्र
स्य यत्पतने पादि शुष्णः ॥ उरु ष सरथं सारथये करिंद्रः कुत्साय सूर्यस्य सातौ ॥ यद्यदा सः शुष्णो वज्रस्य पतने पादि आगच्छत् अद्रि
यतेत्यर्थः तदा महो महतः द्रुहो द्रोग्धुः शुष्णस्य संबंधि विश्वायु सर्वगतमिति शेषः अपधायि अपहितमकारि तिरस्कृतमित्यर्थः
स इंद्रः सारथये सारथिभूताय कुत्साय सरथं समानरथं सूर्यस्य सातौ भजने मित्रभूते उरु विस्तीर्णं यथा भवति तथा कः अकरोत्
तथा चाम्नं । कुत्साय इंद्रासुरं शुष्णं जिघांसुः कुत्समात्मनः सारथ्यं कल्पयित्वास्य शत्रुं शुष्णं महत्वातः ॥ कुत्सस्य रक्षां बहुलां चका
र स्वनयाचतद्रति ॥ इति चतुर्थस्य षष्ठे नवमो वर्गः ॥ अथ षष्ठी ॥ प्र श्येनो न मदिरमंशुमस्मै शिरो दासस्य नमुचेर्मथायन् ॥
प्रावन्नमी साप्यं ससंतं पृणग्राया समिषा सं स्वस्ति ॥ श्येनः सुपर्णः श्व अत्र न कारः शब्दः समुच्चये वर्तते । अस्मा इंद्राय मदिरं मदकरं अंशुं
सोमं प्रति आउं अ इत्यस्यार्थे वर्तते । आहरत् उपसर्ग दर्शनाद्याख्यातमध्याह्रियते किं वाय मिंद्रो दासस्य पालिना मुपक्षयितुर्नमुचेरे
तन्नाम्नो सुरस्य शिरः शीर्षं मथायन् मथनं कुर्वन् साप्यं सपस्य पुत्रं ससंतं स्वपंतं नमिं एतत्संज्ञकमृषिं प्रावत् शारक्षत् स्वस्यविनाशे
नराया पश्चादि धनेनइषा अन्नेन चतमृषिं संपृणक् स्वस्ति सम्यग्योजयत् ॥ अथ सप्तमी ॥ वि पिप्रोरहिमायस्य दृह्लाः पुरो वज्रिंछव
सा न दर्द्ः ॥ सुदामन्तद्रेक्णो अप्रमृष्यमृजिश्वने दात्रं दाशुषे दाः ॥ हे वज्रिन् वज्रवन्निंद्र त्वं अहिमायस्य आहन्यामायायस्य पिप्रोरे

सं०भा० तन्नाम्नो ऽसुरस्य संबंधिनी दृह्लाः दृह्लानि पुरः प्राकारादि दुर्गाणि शवसा बलेन विदर्दः विदारितवानसि ॥ नेति पदपूरणः ॥ प्राकृजः
शतं भूमिरायसीभिर्नि षाहीति दर्शनात् । अपि च हे सुदामन् शोभनदाने इंद्र त्वं दाशुषे हविर्लक्षणं धनं ददुषे दत्तवते ऋजिश्वने एतन्नामका
१५० य राजर्षये अप्रमृष्यं केनाप्यबाध्यं तस्य स्वभूतं रेक्णः धनं दाः अदाः दत्तवानसि ॥ ॥ अथाष्टमी ॥ ॥ स वेतसुं दशमायं दशोणिं तूतुजिमिं
द्रः स्वभिष्टिसुम्नः ॥ आ तुग्रं शश्वदिभं द्योतनाय मातुर्न सीमुप सृजा इयध्यै ॥ ॥ स्वभिष्टिसुम्नः सुष्ठु अन्वेषणीयान्यभिगम्यानि सुम्ना
नि सम्यानि देयानि स इंद्रः दशमायं बहुवचनं वेतसुं वेतसुनामानमसुरं दशोणिं एतन्नामकं तूतुजिं तूतुजिं तूतुजिनामकं च अपि च
तुग्रं तुग्रनामकमसुरं तथा इभं एतन्नामकमसुरं च इयध्यै एतुं द्योतमानाय एतत्संज्ञकाय राज्ञे आभ्यतः उपसृज उपासृजत् वशी
चकार तत्र दृष्टांतः । मातुर्न मातुर्जनन्या इव पुत्रं यथा मात्रे पुत्रो वशी भवति तद्वत् वशं चकारेत्यर्थः ॥ सीमिति पदपूरणः ॥ ॥ अथ नवमी ॥ ॥
॥ स ईं स्पृधो वनते अप्रतीतो बिभ्रद्वज्रं वृत्रहणं गभस्तौ ॥ तिष्ठद्धरी अध्यस्तेव गर्ते वचोयुजा वहत इंद्रमृष्वं ॥ ॥ गभस्तौ हस्ते वृत्रहणं वृ
त्राणां शत्रूणां हंतारं वज्रं स्वकीयमायुधं बिभ्रत् धारयन् अप्रतीतः शत्रुभिरप्रतिगतः स इंद्रः स्पृधः स्पर्धमानान् ईं एनं वृत्रप्रभृती
न् वनते हिनस्ति हरी स्वकीयावश्वौ अधितिष्ठत् आरोहति तत्र दृष्टांतः अस्तेव गर्ते यथा क्षेप्ता शूरः रथे अधितिष्ठति तद्वत् तथा वचोयुजा वा राम
मात्रेणा युज्यमानौ यद्वा स्तोतृणां स्तुतिभिर्युज्यमानौ तौ हरी ऋष्वं महांतं इंद्रं वहतः ॥ ॥ अथ दशमी ॥ ॥ सनेम ते ऽवसा नव्य इंद्र प्र पूरवः स्तवंत १५०

यानि शरद्याम देम बृहता स्तोताः ॥ ॥ हे पुरुहूत इंद्र एभिः प्रसिद्धैः सर्वैः स्तोतृलक्षणैः सुरविकर्मभिः ते त्वया सह वयं उभयानि जामि
रूपाण्यमित्राणि घ्नतः हिंसतः शत्रोः सर्वस्मात् शत्रोः उत्तरः स्याम अधिका एव भवेमहि । हे शूर विक्रांत इंद्र स्तोताः वयं त्वया रक्षिताः संतो बृ
हता महता राया धनेन मदेन हृष्याम ॥ ॥ इति चतुर्थस्य षष्ठे षष्ठो वर्गः ॥ ॥ द्यौर्न इंद्र इति त्रयोदशर्चं पंचमं सूक्तं भरद्वाजस्यार्षं ऐंद्रं त्रैष्टु
भं विपिशोरित्याद्या आक्षरं चैतुष्टय युक्ता विराट् अनुक्रम्यते च । द्यौर्न विंपिप्राविराडिति । पृष्ठ्यस्य षडहस्य पृष्ठे हानि तृतीयसवने उक्थ्यस्तो
त्राणि यद्विपदाः सुस्तुवीरन् यद्वा अग्निष्टोमसंस्थः स्यात् तदानीं माध्यंदिने सवने अछावाकः शस्त्रे आरंभणीयाभ्य ऊर्ध्वमेतत्सू
क्तं च । द्यौर्न य इंद्र त्यछावाक इति इदमेव सूक्तमिंद्राविष्णोरुक्तो तिनान्येकाहे निष्केवल्य निविधानं द्यौर्न य इंद्रेति माध्यंदिन इति ॥
॥ तत्र प्रथमा ॥ ॥ द्यौर्न य इंद्राभि भूमार्यस्तस्थौ रयिः शवसा पृत्सु जनान् ॥ तं नः सहस्रभरमुर्वरासां दद्धि सूनो सहसो वृत्रतुरं ॥ ॥ यो रयिः
पुत्ररूपं धनं शवसा बलेन पृत्सु संग्रामेषु अर्यः अरीन् शत्रून् जनानभितस्थौ आक्रामत् तत्र दृष्टांतः । द्यौर्न द्योतमानः सूर्य इव यथा भूमि भू
तानि आक्रामति तद्वत् सहसः सूनो बलस्य पुत्र हे इंद्र त्वं तं पुत्रं नो ऽस्मभ्यं दद्धि देहि कीदृशं सहस्रभरं सहस्रस्य धनस्य भर्तारं उर्वरासां उर्व
राणां सस्याढ्यानां भूमीनां सनितारं संभक्तारं वृत्रतुरं वृत्राणां शत्रूणां तरितारं तु वितारं ॥ ॥ अथ द्वितीया ॥ ॥ दिवो न तुभ्यमन्विंद्र सत्रा
सुर्यं देवेभिर्धायि विश्वं ॥ अहिं यद्वृत्रमपो वव्रिवांसं हन्नृजीषिन्विष्णुना सचानः ॥ ॥ दिवो न सूर्य इव हे इंद्र तुभ्यं सत्रा सत्यमेव विश्वं व्याप्तं

च०भा० विश्वमा ओसस्तो धुनीचुमुरी याहक्षिषुप्राब्दीदयच्छित्त्युम्यं सोमेभिः सुन्वंदभीतिरिध्मभृतिः पक्थ्यर्कैः॥ ॥हे इंद्र ओजो संग्रामे तव हन
१५१ वे वृष्ण्यं व्याप्तं कृत्स्नानाहशं कर्म भवति कीदृशमित्यत उच्यते यायो धुनी चुमुरी चेत्येतन्नामकावसुरौ स्विपूत्र्श्वापयत्तावसुरौ सत्तः
संग्रामे सुप्तवंतौ भूतावित्यर्थः॥ भूतार्थे व्यत्ययेन लट्॥ हित्वीयो हवार्इः पदपूरणः॥ तदनंतरं हे इंद्र त्युम्यं तदर्थं सुन्वन्नु सोमानुपक्थीप
क्थ्यानूहवींषि पचनवानूइध्मभृतिः इध्मानां भर्ता आहर्ता विदभीतिर्नाम राजर्षिः सोमेभिः सोमैः अर्कैः हविर्लक्षणैरन्नैः दीदयत् दीप्य
त एवं धुनी चुमुरिं च ततंथेत्यर्थः॥ त्वंनिदस्युं चुमुरिं धुनिं चेति दर्शनात्॥ ॥इति चतुर्थस्य षष्ठे दशमो वर्गः॥ ॥इमा उ त्वेति द्वादशर्चं षष्ठं
सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं नवमी एकादशी च वैश्वदेव्यौ तथा चानुक्रांतं॥ ॥इमा उ द्वादश नवम्येकादश्यौ वैश्वदेव्याविति॥ उपहव्या
नाम्न्येकाहे इंद्रं सूक्तं मरुत्वतीयनिविद्धानं सूत्रितं च इमा उ त्वा धीर्नय इंद्रेति माध्यंदिन इति तृतीयत्वं दोमेपि मरुत्वतीय इदं सूक्तं सूत्रितं
च प्रमं दिन इमा उ त्वेति मरुत्वतीयमिति॥ ॥तत्र प्रथमा॥ ॥इमा उ त्वा पुरुतमस्य कारोर्हव्यं वीर हव्या हवंते॥ धियो रथेष्ठामजरं नवीयो
रयिर्विभूतिरीयते वचस्या॥ ॥पुरुतमस्य बहुलं कामं कांक्षतः तमु अभिकांक्षायामिति धातुः कारोः स्तोतुर्भरद्वाजस्य संबंधिन्यः हव्याः
स्तुत्याः प्रशस्याः इमा धियः स्तुतयः हे वीर त्वा रेंद्र हव्यं त्वां आह्वयंते ह्वयंति कीदृशं रथेष्ठां रथे स्थितं अजरं जरारहितं नवीयो नवीयांसं राम
नवतरं उ इति पूरणः अपि च वचस्या स्तुत्याश्रेष्ठा विभूतिः जगतो भवहेतुः हविर्लक्षणं धनं ईयते त्वां अभिगच्छंति॥ ॥अथ द्वितीया॥ ॥ १५१

तमु स्तुष इंद्रं यो विदानो गिर्वाहसं गीर्भिर्यज्ञवृद्धं॥ यस्य दिवमति मह्ना पृथिव्याः पुरुमायस्य रिरिचे महित्वं॥ ॥य इंद्रः विदानो उ सर्वं
विद्वान् सर्वैर्ज्ञायमानो वा गिर्वाहसं गीर्भिर्वहनीयं यज्ञवृद्धं यज्ञैः प्रवृद्धं तमुतमेवेंद्रं स्तुषे स्तवे पुरुमायस्य बहुप्रज्ञस्य बहुवचनस्य वा य
स्येंद्रस्य वा महित्वं माहात्म्यं दिवं द्युलोकात् पंचम्यर्थे द्वितीया पृथिव्याः भूलोकानु मह्ना महिम्ना अतिरिरिचे अतिरिच्यते तं स्तुव इति सं
बंधः॥ ॥अथ तृतीया॥ ॥स इत्तमोवयुनं ततन्वत्सूर्येण वयुनवच्चकार॥ कदा ते मर्ता अमृतस्य धामेयक्षंतो न मिनंति स्वधावः॥ ॥स इत्
स एवेंद्रः अवयुनं अप्रज्ञानं प्रज्ञाननाशनमित्यर्थः ततन्वत् विस्तीर्यमाणं तमोंधकारं दिवि सूर्येण दिव्यारोपितेन देवेन वयुन
वत् प्रकाशवत् चकार कृतवान् परोक्षवचः प्रत्यक्षकृतः हे स्वधावः बलवन्निंद्र मर्ता मनुष्या अमृतस्य नित्यस्य तव त्वदीयं धाम स्थ
नस्थानं तत्र स्थानं देवानित्यर्थः इतः यक्षमिच्छंतः कदा कदाचन सर्वदेत्यर्थः न मिनंति किमपि प्राणिजातं न हिंसंति॥ ॥अथ चतुर्थी॥ ॥
॥यस्ता चकार स कुह स्विदिंद्रः कमा जनं चरति कासु विक्षु॥ कस्ते यज्ञो मनसे शं वराय को अर्क इंद्र कतमः स होता॥ ॥य इंद्रः तानि
ता नि प्रसिद्धानि वृत्रवधादीनि कर्माणि चकार अकरोत् स इंद्रः कुह स्वित् क्व स्थितः वर्धते कं जनं कमपि देशं आ चरति कासु विक्षु प्रजासु
वर्तते इतीद्रस्य विभूतिमत्त्वान्न निश्चेतुं शक्यं अथ प्रत्यक्षकृतः हे इंद्र कः कीदृशो यज्ञः ते तव मनसे चेतसे शं सुखकरो भवति व
राय तव वरणाय कः कीदृशो मित्रः समर्थो भवति यो होता आह्वाता भवति वरणाय समर्थो भवति स होता कतमः भवति॥ ॥अथ पंचमी॥ ॥

ऋ०भा० ॥ इदा हि ते वेविषतः पुराजाः प्रत्नास आसुः पुरुकृत् सखायः ॥ ये मध्यमास उत नूतनास उतावमस्य पुरुहूत बोधि ॥ ॥ पुराजाः पूर्वस्मि
न्काले जाताः प्रत्नासः पुराणाः अंगिराप्रभृतयः इदा हि इदानीमिव हि तद्रूपमार्थं वर्त्तते वेविषत कर्माणि प्राप्नुवंतः हे पुरुकृत् बहू
१५२ नां कर्मणां कर्त्तरिंद्र ते तव सखायः स्तोतार आसुः बभूवुः ये मध्यमासो मध्यकालजाः उतापि च ये नूतनासोऽद्यतनाः यत्स्तेपि स
खायः स्तोतारो बभूवुः अतः कारणात् उतापि च अवमस्य अर्वाचीनस्य ममापि स्तोत्रं हे पुरुहूत बहुभिराहूतेंद्र त्वं बोधि बुध्यस्व ॥ इति च
र्थस्य षष्ठे एकादशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ तं पृच्छंतोऽवरासः पराणि प्रत्ना त इंद्र श्रुत्यानु येमुः ॥ अर्चामसि वीर ब्रह्मवाहो यादेव विद्म
तात्त्वा महांतं ॥ ॥ हे वीर शूर ब्रह्मवाहः अन्नमभिमंत्रैर्वहनीयेंद्र अवरासो अर्वाचीना मनुष्याः तं तु कर्मणां प्रणेतारं त्वां पृच्छंतो चैतः पृच्छंतिर
र्चितिकर्मपराणि प्रकृष्टानि प्रत्नानि पुराणानि श्रुत्यानि श्रोतव्यानि ते त्वदीयानि कर्माणि अनुयेमुः अनुयमनं निबंधनं कृतिस्त्वामि
र्वाग्भिर्निबबंधुः तथा वयमपि महांतं प्रभूतं त्वां त्वां अर्चामसि अर्चामः स्तुमः यदेव यान्येव कर्माणि विद्म अज्ञानीम तानि तैः कर्मभिः स्तुम
इति संबंधः ॥ ॥ अथ सप्तमी ॥ ॥ अभि त्वा पाजो रक्षसो वि तस्थे महि जज्ञानमभि तत्सु तिष्ठ ॥ तव प्रत्नेन युज्येन सख्या वज्रेण धृष्णो
अप ता नुदस्व ॥ ॥ रक्षसो रक्षसां संबंधि पाजः सेनालक्षणं बलं हे इंद्र त्वामभि त्वामभिमुखं वितस्थे प्रतिष्ठते तथा त्वमपि महि महत् राम
जज्ञानं प्रादुर्भवत्तद्बलं अभिमुखः सन् सु तिष्ठ स्थिरो भव स्थित्वा च हे धृष्णो शत्रूणां धर्षकेंद्र तव त्वदीयेन वज्रेण ता बलमपनु १५२

एनायज्ञैः ॥ सप्त यत्पुरः शर्म शारदीर्दर्द्धन्दासीः पुरुकुत्साय शिक्षन् ॥ ॥ हे इंद्र ते त्वदीयेनावसा रक्षणेन नव्यो नवीयो नवतरं त्वया दीयमानं
धनं सनेम वयं स्तोतारो भजेमहि । पूरवो मनुष्याः स्तोतारः एना अनेन स्तोत्रेण युक्तैर्यज्ञैः प्रशस्तवंतः त्वां स्तुवंति । यद्यस्मात्कारणात्त्वं दासीः
कर्मणामुपक्षपयित्रीः शत्रुप्रजाः हन् घ्नन् हिंसन् पुरुकुत्साय राज्ञे शिक्षन् धनानि प्रयच्छन् हे इंद्र त्वं शारदीः शरन्नाम्नो
सुरस्य संबंधिनीः सप्त सप्तसंख्याकाः पुरः पुरीः शर्म शर्मणा वज्रेण दर्द्धः विदारितवानसि । तस्मात्कारणात्त्वां स्तोतारोऽस्तुवत इत्यर्थः ॥ ॥
॥ अथैकादशी ॥ ॥ त्वं वृध इंद्र पूर्व्यो भूर्वरिवस्यन्नुशने काव्याय ॥ परा नववास्त्वमनुदेयं महे पित्रे ददाथ स्वं नपातं ॥ ॥ हे इंद्र पूर्व्यः पुरातनस्त्वं
काव्याय कविपुत्रायोशने उशनसे भार्गवाय वरिवस्यन् धनमिच्छन् वृधो वर्द्धकस्तोतॄणां वर्धको भवसि । अनुदेयमनुदातव्यं धनेन त्वं वा
स्त्वं एतन्नामकमसुरं पराहत्य स्वकीयमौशनसं नपातं युद्धे शत्रूणां गृहीतं पुत्रं महे महते पित्रे पालयितव्यायोशनसे परा ददाथ तस्य
शत्रुहस्तादपकर्षणाद्दत्तवानसि ॥ ॥ अथ द्वादशी ॥ ॥ त्वं धुनिरिंद्र धुनिमतीर्ऋणोरपः सीरा न स्रवंतीः ॥ प्र यत्समुद्रमति शूर पर्षि पारया तु
र्वशं यदुं स्वस्ति ॥ ॥ हे इंद्र धुनिः शत्रूणां कंपयिता त्वं धुनिमतीः धुनिर्नामासुराय युद्धनिरोधकः तया विद्यते ताः अपः उदकानि सीरा न नदी
रिव स्रवंतीः प्रवहंतीः ऋणोः अगमयः । धुनिं हत्वा तेन निरोधितान्युदकानि प्रवाहयतीत्यर्थः । हे शूर वीरेंद्र यद्यदा समुद्रमति अतिक्र
म्य प्रपर्षि प्रतीर्णो भवसि तदा समुद्रपारे तिष्ठतः तुर्वशं यदुं च स्वस्ति क्षेमेण पारय समुद्रमेव तारय ॥ ॥ अथ त्रयोदशी ॥ ॥ तव ह त्यदिंद्र

ऋ०भा० त्वं श्रुधि श्रुत्कर्ण बलवान्त्वत्सदृशो देवस्त्वदन्यो नास्ति ॥ ॥ अथैकादशी ॥ ॥ नू म आ वाचमुप याहि विद्वान्विश्वेभिः सूनो सहसो यजत्रैः ॥ ये अग्नि
१५२ जिह्वा ऋतसाप आसुर्ये मनुं चक्रुरुपरं दसाय ॥ ॥ इत्युक्तं चैवैभ्यो देवीः कर्म । हे सहसः सूनो बलस्य पुत्र इंद्र विद्वान्सर्वज्ञस्त्वं यजत्रैर्यजनीयैः वि
श्वेभिः सर्वैर्देवैः सह नु क्षिप्रं मम मदीयाः वाचः स्तुतिरूपाणि वचांसि उप अभ्यायाहि आगच्छ एवंभूतमिंद्रं प्रार्थयते ऐंद्रलोकस्य सूक्तस्य ये देवाः
मनुं राजर्षिं उपरं दसाय दस्यूनामुपरिभवं चक्रुः कृतवंतः तैः सहागच्छेति पूर्वेण संबंधः ॥ ॥ अथ द्वादशी ॥ ॥ स नो बोधि पुरएता सुगेषूत दु
र्गेषु पथिकृद्विदानः ॥ ये अश्रमास उरवो वहिष्ठास्तेभिर्न इंद्राभि वक्षि वाजं ॥ ॥ पथिकृत्वर्त्मनां कर्ता विदानः सर्वं विद्वान्स त्वं सुगेषु सुखे
न गंतव्येषु उतापि च दुर्गेषु दुःखेन गंतव्येषु च मार्गेषु नोऽस्माकं पुरएता पुरोगंता बोधि भव बोधीति भवतेर्लोटि मध्यमपुरुषैकवचनस्य
छांदसं रूपं अश्रमासः श्रमरहिताः उरवो महांतः वहिष्ठाः वोढृतमाः तव ये अश्वाः हे इंद्र तेभिस्तैरश्वैः नोऽस्मान् वाजमन्नं अभि वक्षि अ
भिवह ॥ ॥ इति चतुर्थस्य पंचमे द्वादशो वर्गः ॥ ॥ य एक इत्येकादशर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं तथा चानुक्रांतं य एक एकादश
ति आभिप्लविके प्रथमेहनि दशरात्रस्य प्रथमेहनि च माध्यंदिनसवने ब्राह्मणाच्छंसिनोऽत्र अहीनसूक्तस्य स्थाने त्रीणि संपातसूक्तानि
तेष्विदं सूक्तं सूत्रितं च य एक इद्धव्यस्तिग्मशृंग इति । उपहव्यनाम्न्येकाहेपीदं निष्केवल्ये विधानं सूत्रितं च य एक इदिति माध्यंदिन इति त राम
त्र प्रथमा ॥ ॥ य एक इद्धव्यश्चर्षणीनामिंद्रं तं गीर्भिरभ्यर्च आभिः ॥ यः पत्यते वृषभो वृष्ण्यावान्त्सत्यः सत्वा पुरुमायः सहस्वान् ॥ १ ॥ १५२

॥ य इंद्रः चर्षणीनां प्रजानां आपत्सु एक इत् एक एव हव्यः आह्वातव्यः आभिर्गीर्भिः स्तुतिरूपाभिर्वाग्भिः तमिंद्रं अभ्यर्च अभिष्टोमि य इंद्रः पत्य
ते स्तोतॄनभिगच्छति यद्वा पत्यते लोकानामीष्टे कीदृशः वृषभः कामानां वर्षिता वृष्ण्यावान् बलवान् सत्यः अविसंवादी सत्वा शत्रूणां साद
यिता कामानां दाता वा सदेर्वा सनोतेर्वेदं रूपं पुरुमायो बहुप्रज्ञः सहस्वान् अभिभवनवान् तमिंद्रमभिष्टोमीति संबंधः ॥ ॥ अथ द्वितीया ॥
॥ तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयंतः ॥ नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठं ॥ ॥ पूर्वे पूर्वतनाः न
वग्वाः नवभिर्मासैः सत्रमनुष्ठितवंतः सप्त सप्तसंख्याकाः विप्रा मेधाविनो वाजयंतः वाजमन्नं हविर्लक्षणं इंद्रस्य कुर्वंतः इंद्रं वा वाजिनं
बलिनं कुर्वंतः करोतीति एवंभूता नोऽस्माकं पितरोऽङ्गिरसः तमु तमेवेंद्रं मतिभिः स्तुतिभिरभितुष्टुवुरिति शेषः कीदृशं नक्षद्दा
भं नक्षतिर्गतिकर्मा अभिगच्छंतं शत्रूणां दंभितारं हिंसितारं ततुरिं तरितारं पर्वतेष्ठां पर्वते मेघे अवस्थितं अद्रोघवाचं अद्रोघ
या अनतिक्रमणीयया वाचा युक्तं शविष्ठं बलवत्तमं ॥ ॥ अथ तृतीया ॥ ॥ तमीमह इंद्रमस्य रायः पुरुवीरस्य नृवतः पुरुक्षोः ॥
यो अस्कृधोयुरजरः स्वर्वान्तमा भर हरिवो मादयध्यै ॥ ॥ पुरुवीरस्य बहुपुत्रपौत्रयुक्तस्य नृवतः परिचारकजनसहितस्य पुरुक्षोः ब
हु अन्नस्य बहुयशसो वा अस्य रायः इदं धनं द्वितीयार्थे षष्ठी तमिंद्रमीमहे याचामहे यो रयिः अस्कृधोयुः अविच्छिन्नः अजरो जरार
हितः स्वर्वान् सुखयुक्तः हे हरिवः हरिवन् स्वकायाश्वोपेत इंद्र त्वं तं रयिं मादयध्यै । अस्मान्मादयितुं आभर आहर ॥ ॥ अथ चतुर्थी ॥ ॥

च०भा० ॥तन्नोविवोचोयदित्तपुराचिज्जरितारआनशुःसुम्नमिंद्र॥कस्तेभागःकिंवयोदुध्रखिद्वःपुरुहूतपुरूवसोऽसुरघ्नः॥ ॥हेइंद्रयदित्तेन
१५४ पुराचित्पूर्वस्मिन्कालेजरितारस्तोतारःसुम्नंसुखंआनशुःतत्सुखंनोऽस्माकंविवोचःविब्रूहिदुध्रदुर्धरहेखिद्वःशत्रूणांखेदयि
तःहेपुरुहूतहेपुरूवसोइंद्रअसुरघ्नःअसुराणांहंतुस्तेतवयज्ञेषुकोभागःवयःहविर्लक्षणमन्नंकिंकृतंयदिकेचिच्चिरंतनाःपूर्वका
लेपित्वनःसकाशात्सुखंलेभिरेतर्ह्यहमपितत्सुखंतत्सुखंलप्स्यवइतिविचार्यसुखप्राप्तिविलंबोममासोढव्योभवेदित्यर्थः॥ ॥अथ
पंचमी॥ ॥तंपृच्छंतीवज्रहस्तंरथेष्ठामिंद्रंवेपीवक्वरीयस्यनूगीः॥ ॥तुविग्राभंतुविकूर्मिंरभोदांगातुमिषेनक्षतेतुम्रमच्छ॥ ॥पूर्वयोपाल
ध्यइंद्रःऋषयेकामान्यायच्छततःसकामपूर्णऋषिराहवज्रहस्तंवज्रपाणिंरथेष्ठांरथस्थितंतमिंद्रंपृच्छंतीअर्चंतीपृच्छतिरर्चतिक
र्मावेपीवेपोयागादिलक्षणंकर्मतद्वतीवक्वरीगुणानांवक्त्रीगीःइदृशीस्तुतिर्यस्ययजमानस्यभवतिकीदृशमिंद्रंपृच्छंतीतुविग्राभंतु
वीनांबहूनांग्रहीतारंतुविकूर्मिंबहुकर्माणंरभोदांरभसोबहुलस्यदातारंतुइतिपूरणः।सयजमानःगातुंसुखंइषेगच्छतिकिंचतु
म्रंग्लापयितारंशत्रुंअच्छाभिमुखेननक्षतेगच्छति॥ ॥इतिचतुर्थस्यषष्ठेत्रयोदशोवर्गः॥ ॥अथषष्ठी॥ ॥अयाहत्यंमाययावावृधानं
मनोजुवास्वतवःपर्वतेन।अच्युताचिद्वीळितास्वोजोरुजोविदृळ्हाधृषताविरप्शिन्॥ ॥हेस्वतवःस्वभूतबलेंद्रत्वंमनोजुवामनोव
त्शृताअनेनपर्वतेनबहुपर्वणास्वकीयेनायुधेनवज्रेणशतपर्वणेतिदर्शनात्अयाअनयामाययावावृधानंवर्धमानंत्यंतंप्रसिद्धं राम
१५४

रस्वउपगतंप्रेरयस्विंधीत्यर्थः।कीदृशेनप्रत्नेनपुराणेनयुज्येनसख्यानिसहायेन॥ ॥अथाष्टमी॥ ॥सतुश्रुधींद्रनूतनस्यब्र
ह्मण्यतोवीरकारुधायः।त्वंह्या३पिःप्रदिविपितॄणांशश्वद्बभूथसुहवएष्टौ॥ ॥हेकारुधायःकारूणांस्तोतॄणांधारकहेइंद्रसप्रसि
द्धस्त्वंनूतनस्येदानींतनस्यब्रह्मण्यतःब्रह्मस्तोत्रंकर्तुमिच्छतोममस्तोत्रंतुक्षिप्रंश्रुधिशृणुयस्मात्कारणात्हेइंद्रत्वंआइष्टौ
आयजनेअभिकामचरेवासतिसुहवःशोभनाह्वानःसनःप्रदिविपूर्वस्मिन्कालेपितॄणामंगिरसामापिर्बंधुःशश्वच्चिरकालं
बभूथाभूःतस्मात्कारणात्मदीयंस्तोत्रंश्रुधीतिसंबंधः॥ ॥अथनवमी॥ ॥प्रोतयेवरुणंमित्रमिंद्रंमरुतःकृष्वावसेनोअद्य॥प्रपू
षणंविष्णुमग्निंपुरंधिंसवितारमोषधीःपर्वतांश्च॥ ॥अस्यामृचिविश्वेदेवाःस्तूयंते।हेभरद्वाजअद्येदानींवरुणंतदभिमानिनंमित्रंच
महरभिमानिनंचप्रसिद्धंमरुतोमरुद्गणांश्चनोऽस्माकमूतयेतर्पणायअवसेरक्षणायचकृधिअभिमुखीकुरुष्व।किंचपूषणंए
तल्लोकंचविष्णुंसर्वव्यापिनंदेवंचपुरंधिंपुरुकर्माणंअग्निंचसवितारंसर्वस्यप्रेरकंदेवंओषधीःओषध्यभिमानिनोदेवानस्माकं
तर्पणायरक्षणायच।प्रकृष्टस्तोत्याभिमुखीकुरु॥ ॥अथदशमी॥ ॥इमउत्वापुरुशाकप्रयज्योजरितारोअभ्यर्चंत्यर्कैः॥श्रुधीहवमा
हुवतोहुवानोनत्वावाँअन्योअमृतत्वदस्ति॥ ॥हेपुरुशाकबहुशक्तेइंद्रहेप्रयज्योप्रकृष्टयजनीयेंद्रत्वात्वामिमेजरितारस्तोतारःअ
र्कैरर्चनीयैःस्तोत्रैःअभ्यर्चंतिअभिष्टुवंति।तथाहेअमृतअमरणशीलेंद्रहुवानस्तूयमानस्त्वंआहुवतोअभिष्टुवतोममहवंस्तो

ऋ० भा० बधिषि त्वेतं निहितेन वज्रेण विश्वाः सर्वाः अजुर्यः आसुरीः पुरीर्विदयसे विबाधयसे। दयतिर्नाहिंसागतिरक्षणेष्विति धातुः। हे इंद्र अजु
१५५ र्य जरयितुमशक्यं इंद्र त्वमिति योषः॥ ॥अथ दशमी॥ ॥आ संयतमिंद्र णः स्वस्तिं शत्रुतूर्याय बृहतीममृध्रां॥ यया दासान्यार्याणि वृत्राकरो
वज्रिन्त्सुतुका नाहुषाणि॥ ॥हे इंद्र शत्रुतूर्याय शत्रूणां तरणाय बृहतीं महतीं अमृध्रां अहिंसितां सेयं तं सचिवेन संगच्छमानां स्वस्ति
क्षेमलक्षणां संपदं इंद्र नो स्मभ्यं वज्रिन्नु वज्रवन्निंद्र यया स्वस्त्या दासानि कर्महीनानि मनुष्यजातानि आर्याणि करः करोः नाहुषा
णि मनुष्यसंबंधीनि नहुषा इति मनुष्यनामैतत्॥ वृत्राहृ त्राणि शत्रून् सुतुका सुतुकानि शोभनहिंसोपेतान्यकरोः॥ अथैकादशी॥
॥स नो नियुद्भिः पुरुहूत वेधो विश्ववाराभिरागहि प्रयज्यो॥ न या अदेवो वरते न देव आभिर्याहि तूयमामद्र्यद्रिक्॥ ॥हे पुरुहूत हे वे
धः विधातः हे प्रयज्यो प्रकर्षेण यजनीय इंद्र स त्वं विश्ववाराभिः विश्वैर्वरणीयाभिः संभजनीयाभिः नियुद्भिरश्वैः नोस्माना गहि आ
गच्छ। अदेवो सुरः याः यानि तूयं क्षिप्रमेव अश्वान् वरते देवः आभिर्नियुद्भिः तूयं क्षिप्रमेव मद्र्यद्रिक् अभिमुखः सन् आयाहि आगच्छ।
मद्र्यद्रिगिति द्विर्वचनं छांदसं॥ ॥इति चतुर्थस्य षष्ठे चतुर्दशो वर्गः॥ ॥सुत इति दशर्चमष्टमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं अ
नुक्रांतं। विषुवति निष्केवल्ये इदं सूक्तं सूत्रितं च सुत इत्त्वमेष प्रपूर्व्य इति। महाव्रतेपि निष्केवल्ये इदमिति तथैव पंचमारण्यके सूत्रितं। राम
सुत इत्त्वं निमिश्ल इंद्र सोम इति च। तत्र प्रथमा॥ ॥सुत इत्त्वं निमिश्ल इंद्र सोमे स्तोमे ब्रह्मणि शस्यमान उक्थे॥ यद्वा युक्ताभ्यां म १५५

घवन्हरिभ्यां बिभ्रद्वज्रं बाह्वोरिंद्र यासि॥ ॥सोमे सुत इत् अभिषुत एव सति ब्रह्मणि मंत्रकृते स्तोत्रे उच्चार्यमाणे सति उक्थे शस्त्रे शस्यमाने
सति हे इंद्र त्वं निमिश्लः सन् संयोजयन् हे मघवन् धनवन्निंद्र बाह्वोर्हस्तयोर्वज्रं स्वकीयमायुधं बिभ्रत् धारयन् युक्ताभ्यां रथे नियु
क्ताभ्यां हरिभ्यामश्वाभ्यां यासि यद्वा आगच्छसि यद्वा तत्सोमे अभिषुत इति संबंधः॥ ॥अथ द्वितीया॥ ॥यद्वा दिवि पार्ये सुष्विमिंद्र वृत्र
हत्येवसि शूरसातौ॥ यद्वा दक्षस्य बिभ्युषो अबिभ्यदरंधयः शर्धत इंद्र दस्यून्॥ ॥हे इंद्र त्वं दिवि द्युलोके शूरसातौ शूरैर्भटैः संभ
जनीये वृत्रहत्ये युद्धे च पार्ये प्राप्तव्ये सति सुष्विमभिषोतारं यजमानं अवसि रक्षसि यद्वा दक्षस्येति यच्च वेति समुच्चये यच्च दक्षस्य यज्ञादि
षु समर्थस्य बिभ्युषः शत्रुभ्यो बिभ्यतो जनस्य शर्धतः संग्रामं उत्सहमानान् दस्यून् उपक्षपयितॄन् हे इंद्र अबिभ्यत् भीतिरहितः सन्
अरंधयः वशीकरोषि तिय त्वं सर्वं सोमे अभिषुत इति पूर्वेण संबंधः तथा चोक्तं यद्वोक्ताद्धारयन्वज्रं हरिभ्यां यासि वृत्रहत्ये पश्चाद्रक्ष
ति संग्रामे यत् सोममभिषुण्वतः यच्च कर्मसु दक्षस्य यजमानस्य चारयः वशीकरोषि तौ स्मै बिभ्यते भीतिवर्जितः त सोमेभिषुते
स्तोत्र शस्त्रयोः प्रवृत्तयोः इति अं चायमेकोर्थः। सुत इत्त्वमिति द्वयं इति॥ ॥अथ तृतीया॥ ॥पाता सुतमिंद्रो अस्तु सोमं प्रणेनीरु
ग्रो जरितारमूती॥ कर्ता वीराय सुष्वय उ लोकं दाता वसु स्तुवते कीरये चित्॥ ॥इंद्रः सुतमभिषुतं सोमं पाता अस्तु पानशीलो भवतु
तृनंतत्वान्न लोकाव्ययेति षष्ठीप्रतिषेधः। कीदृशः उग्रः ऊती ऊत्या मार्गेण जरितारं स्तोतारं प्रणेनीः प्रकर्षेण नेता उग्रः उद्गूर्णः वीराय

श्रादिकर्मसु दक्षाय सुन्वते सोमाभिषवं कुर्वते यजमानाय लोकं स्थानं कर्ता दातेत्यर्थः। उ इति पदपूरणः। स्तवते स्तोत्रं कुर्वते कीरये चि
त्। विदिति चार्थे स्तोत्रे चकीरिति स्तोतृनामैतत् वसु धनं दातास्ति॥ ॥अथ चतुर्थी॥ ॥गन्तेयान्ति सवना हरिभ्यां बभ्रिर्वज्रं पपिः सोमं द
दिर्गाः। कर्ता वीरं नर्यं सर्ववीरं श्रोता हवं गृणतः स्तोमवाहाः॥ ॥इन्द्रः हरिभ्यां स्वकीयाभ्यां इयन्ति हृदयस्थानि त्रीणि सवनानि सवना
नि गन्ता गमनशीलो भवतु। कीदृशः वज्रं स्वीयमायुधं बभ्रिः भर्ता धारकः सोमम् अभिषुतं पपिः पाता गाः ददिर्दाता। नर्यं मनुष्यहितं स
र्ववीरं बहुपुत्रोपेतं वीरं पुत्रं कर्ता यजमानाय दाता गृणतः स्तोतुः संबंधि हवं स्तोत्रं श्रोता श्रावकः स्तोमवाहाः स्तोत्रैर्वहनीयः॥ ॥
॥अथ पंचमी॥ ॥अस्मे वयं यद्वावान तद्विविष्म इन्द्राय यो नः प्रदिवो अपस्कः। सुते सोमे स्तुमसि शंसदुक्थेन्द्राय ब्रह्म वर्धनं यथा
सत्॥ ॥प्रदिवः पुराणोयमिन्द्रः नोस्मदर्थं अपः पोषणादिकं कर्म कः करोति। अयमिन्द्रः यत् स्तोत्रादिकं ववान कामयते अस्मा इन्द्रा
य वयं तद्धि विविष्मः व्याप्नुमः कुर्म इत्यर्थः। सोमे सुते अभिषुते सति स्तुमसि स्तुमः इन्द्राय स्तोत्राणि कुर्मः उक्था उक्थानि शस्त्राणि शं
सत् प्रथमाबहुवचनस्य लुक्। ब्रह्म हविर्लक्षणमन्नं इन्द्राय इन्द्रार्थं वर्धनं यथा वृद्धिकरं असत् स्यात् तथा कुर्म इत्यर्थः॥ ॥इति चतुर्थ
स्य षष्ठे पंचदशो वर्गः॥ ॥अथ षष्ठी॥ ॥ब्रह्माणि हि चकृषे वर्धनानि तावत्त इन्द्र मतिभिर्विविष्मः। सुते सोमे सुतपाः शंतमानि रा
ण्ड्या क्रियास्म वक्षणानि यज्ञैः॥ ॥हे इन्द्र त्वं हि यस्मात् कारणात् तावत् तावन्ति तादृशानि स्तोत्राणि ते तुभ्यं मतिभिर्बुद्धिभिः वयं विवि

दत्रं यत् रुजः विशेषेण भांक्षीः तथा हे स्वोजः शोभनतेजः हे विराप्शिन् हे महन्निन्द्र त्वं अच्युता अच्युतानि विनाशरहितानि हे तूर्यपि वीलिता वीलि
तानि अशिथिलीकृतानि दृह्ला दृह्लानि पुराणि धृषता धर्षकेण वज्रेण व्यरुजो भग्नवानसि॥ ॥अथ सप्तमी॥ ॥तं वो धिया नव्यस्या श
विष्ठं प्रत्नं प्रत्नवत्परितंसयध्यै। स नो वक्षदनिमानः सुवह्मेन्द्रो विश्वान्यति दुर्गहाणि॥ ॥नव्यस्या नवया धिया स्तुत्या शविष्ठं बलव
त्तमं प्रत्नं पुराणं हे इन्द्र यस्त्वां प्रत्नवत् चिरंतना ऋषय इव परितंसयध्यै परितो विस्तारयितुं अहं प्रवृत्तोस्मीति शेषः। अनिमानोऽपरिमाणः
सुवह्मा शोभनवहनः स इन्द्रः विश्वानि समस्तानि दुर्गहाणि नोस्मभ्यं अतिवक्षत् अतिवहतु॥ ॥अथाष्टमी॥ ॥आ जनाय द्रुह्वणे पार्थि
वानि दिव्यानि दीपयोन्तरिक्षा। तपा वृषन्विश्वतः शोचिषा तान्ब्रह्मद्विषे शोचय क्षामपश्च॥ ॥हे इन्द्र त्वं द्रुह्वणे साधुजनानां द्रोग्धुर्ज
नाय जनस्य राक्षसादेः षष्ठ्यर्थे चतुर्थी। पार्थिवानि पृथिव्यां भवानि दिव्यानि दिवि भवानि अन्तरिक्षा अन्तरिक्षे भवानि स्थानानि आदी
पयः आ समन्तात् दीपय हे वृषन् कामानां वर्षितरिन्द्र त्वं विश्वतः सर्वतो विद्यमानान् तान् रक्षसादीन् शोचिषा त्वदीयया दीप्त्या तप दह किंच
ब्रह्मद्विषे ब्राह्मणद्वेष्ट्रे राक्षसादये ब्रह्मद्विषं द्रोग्धुमित्यर्थः क्षां पृथिवीं अपश्चान्तरिक्षं शोचय दीपय आपद्यन्तेऽन्तरिक्षनामैतत्॥ ॥अथ न
वमी॥ ॥भुवो जनस्य दिव्यस्य राजा पार्थिवस्य जगतस्त्वेषसंदृक्। धिष्व वज्रं दक्षिण इन्द्र हस्ते विश्वा अजुर्य दयसे वि मायाः॥ ॥हे त्वेष
संदृक् दीप्तदर्शन इन्द्र दिव्यस्य दिवि भवस्य जनस्य राजा भुवो भवसि। जगतो जंगमस्य पार्थिवस्य च राजा भवसि। दक्षिणे हस्ते वज्रं धि

च॰भा॰ इंद्राय कृणुविदिति बहुनामैतत् । असति अस्मे किमर्थं नोऽस्माकं भराय भरणाय इंद्र सुष्विं अभिषवणशीले यजमाने अवसेत पणाय
१५७ नमृधाति न बाधते ॥ ॥ अथ दशमी ॥ ॥ एवेदिंद्रः सुते अस्तावि सोमे भरद्वाजेषु क्षयदिन्मघोनः । असद्यथा जरित्र उत सूरिरिंद्रो
रायो विश्ववारस्य दाता ॥ ॥ मघोनो मघवतो हविष्मतो यजमानस्य क्षयत् रक्षकः ईश्वर इंद्रः सोमे सुते अभिषुते सति भरद्वाजेषु भ
रद्वाजेष्वपि एव एवं अस्तावि स्तुतो भूत् । इंद्रः जरित्रे स्तोत्रे सूरिः सन्मार्गप्रेरको यथा असत् उत अपि च विश्ववारस्य विश्ववरणी
यस्य रायो धनस्य दाता यथा भवेत् तथा स्तावीति संबंधः ॥ इत् पूरणः ॥ ॥ इति चतुर्थस्य षष्ठे षोडशो वर्गः ॥ ॥ इति षष्ठे मंडले
द्वितीयोऽनुवाकः ॥ ॥ तृतीयेऽनुवाके विंशति सूक्तानि । तत्र वृषा मद इति दशर्चं प्रथमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं वृषेत्यनु
क्रांतं विषुवति निष्केवल्ये एतत्सूक्तं सूत्रितं च । वृषा मद इति ॥ ॥ तत्र प्रथमा ॥ वृषा मद इंद्रे श्लोक उक्था सचा सोमेषु सुतपा ऋ
जीषी ॥ अर्चत्र्यो मघवा नृभ्य उक्थैर्द्युक्षो राजा गिरामक्षितोतिः ॥ ॥ सोमेषु सोमकर्तृषु यागेषु इंद्रे सोमपानजनितो मदः वृषा यज
मानस्य कामानां वर्षको भवति यद्वा सर्वजनाह्लादकस्य कर्ता भवति उक्थी उक्थानि शस्त्राणि सचा सह श्लोकः स्तोत्ररूपः शब्दः श्र
व्यो भवति सुतपाः अभिषुतसोमस्य पाता ऋजीषी ऋजीषं गतरसमपि सोमं न परित्यजन् मघवा धनवान् स इंद्रो नृभ्यः उक्थैः राम
स्तोत्रैः अर्चनीयो भवति द्युक्षो द्युलोकावासः गिरां स्तुतीनां राजा ईश्वर इंद्रः अक्षितोतिः अक्षीणरक्षश्च भवति ॥ अथ द्वितीया ॥ ॥ १५७

॥ तत्तुरिर्वीरो नर्यो विचेताः श्रोता हवं गृणत उर्व्यूतिः । वसुः शंसो नरां कारुधाया वाजी स्तुतो विदथे दाति वाजं ॥ ॥ वाजी अन्नवानिं
द्रः विदथे यज्ञे अस्माभिः स्तुतः सन् वाजमन्नं दाति ददातीति कीदृश इंद्रः तुतुरिः शत्रूणां हिंसकः वीरो विक्रांतः नर्यो नरेभ्यो हितः विचेताः विविक्त
ज्ञानः हवमस्मदीयं स्तोत्रं श्रोता गृणतः स्तुवतः स्तोतृजनस्य उर्व्यूतिः विस्तृतरक्षः वसुर्वासयिता नरां नृणां स्तोतृजनानां शंसः शंसनीयः
कारुधायाः कारूणां स्तोतृणां धारयिता एवंभूत इंद्रो वाजं ददातीति संबंधः ॥ ॥ अथ तृतीया ॥ ॥ अक्षो न चक्र्योः शूर बृहन्प्र ते मह्ना रिरिचे रो
दस्योः ॥ वृक्षस्य नु ते पुरुहूत वया व्यूतयो रुरुहुरिंद्र पूर्वीः ॥ ॥ हे शूर रविक्रांत इंद्र बृहन् महान् त्वदीयो महिमा रोदस्योः द्यावापृथिव्योः प्रारि
रिचे अतिरिच्यते द्यावापृथिवीभ्यामधिक इत्यर्थः । तत्र दृष्टांतः । चक्र्योः चक्रयोः अक्षो नरथसंबंधी अक्षो यथा चक्राभ्यां बहिर्गतः तद्वत् हे पुरुहूत ब
हुभिराहूत त्वदीयाः पूर्वीः बह्व्य ऊतयो रक्षाः विरुरुहुः विशेषेण रोहंति तद्वत् ॥ ॥ अथ चतुर्थी ॥ ॥ शचीवतस्ते पुरुशाक शाका गवामिव स्रु
तयः संचरणीः ॥ वत्सानां न तंतयस्त इंद्र दामन्वंतो अदामानः सुदामन् ॥ ॥ हे पुरुशाक बहुशक्तिमन्निंद्र शचीवतः प्रज्ञावतस्त्वदीयाः शा
काः शक्तयः कर्माणि वा सर्वतः संचरंतीति शेषः । तत्र दृष्टांतः गवामिवेति धेनूनां स्रुतयो मार्गाः संचरणीः सर्वत्र संचारिणो भवंति तद्वत् ।
अपि च वत्सानां न तंतयः तंततिर्नाम दीर्घप्रसारिता रज्जुः यत्र नियंते विशाखदामभिः बहवो वत्साः बध्यंते पृथक् तां तंतवो बहूनां शत्रूणां बंधकाः
अदामानः स्वयमन्यैरबध्याः ॥ ॥ अथ पंचमी ॥ ॥ अन्यदद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिंद्रः ॥ मित्रो नो अत्र वरुणश्च पूषार्यो वशस्य प

ऋ०भा० येतास्ति॥ ॥अयमिंद्रः अद्यास्मिन् दिवसे अन्यत् कर्वरं कर्म नामैतत् कर्म करोति अन्यदु अन्यदेव उक्तविलक्षमेव कर्म श्वः परस्मिन् दिने क-
१५८ रोति एतदेव विक्रियते असच्च अस्तु भाग्यानि निपातनादिकं शतवर्षवर्षणादिकं शोभनं कर्म च यद्वा त्रिशिरसो विश्वरूपस्य वधादिकमसत्क-
र्म लोकोपद्रवकारिणो वृत्रादेरसुरस्य वधादिरूपं सत्कर्म च मुहुः पुनः असाविंद्रः आ चक्रिः कर्त्ता भवति। एवं परस्परविलक्षणं कर्म स्वम-
हिम्ना पुनः पुनरावर्त्तयन् प्रतिदिवसमन्यदेव परेषामसाधारणं कर्म करोतीत्यर्थः। एवंविध इंद्रः अत्रास्मिन् यज्ञे नोस्माकं वशस्य कामयित-
व्यस्य फलस्य स्वर्गादेः पर्येतास्ति परिगमयिता भवतु। अस्तेर्लेटि रूपं। मित्रो अहरभिमानी देवः वरुणो रात्र्यभिमानी पूषा पोषको देवः अर्यः प्रे-
रकः सवितार एते चेंद्रेण नियम्यमाना अस्मदीयस्य पर्येतापरिगमयितारः संतु यद्वा मित्रादयोप्यत्र स्वप्राधान्येनाभिधीयंते मित्रादय इंद्रः प्र-
त्येकमस्मदीयस्य काम्यस्य पर्येतास्तु। तथा च बृहद्देवतायामुक्तं। पातयेन्यदिति त्वेता वैश्वदेव्यावृचौ स्मृताविति॥ ॥इति चतुर्थस्य षष्ठे सप्त-
दशो वर्गः॥ ॥वि त्वदापो न पर्वतस्य पृष्ठादुक्थेभिरिंद्रानयंत यज्ञैः॥ तं त्वाभिः सुष्टुतिभिर्वाजयंत आजिं न जग्मुर्गिर्वाहो अश्वाः॥ ॥हे इंद्र
त्वत्तः सकाशात् उक्थेभिः उक्थैः शस्त्रैः यज्ञैर्हविर्भिश्च स्तोतारः कामान् आत्मनो व्यनयंत विविधं प्रापयंति। तत्र दृष्टांतः। पर्वतस्याद्रेः पृ-
ष्ठात् उपरिभागात् आपो न आप उदकानि यथा तद्वत् अपि च हे गिर्वाहः गीर्भिः स्तुतिरूपाभिर्वोढव्य वहनीय इत्थं प्रसिद्धं तं त्वां वाजयंतो बलि- राम
नं कुर्वंतो यद्वा वाजमन्नमिच्छंतः भरद्वाजाः स्तोतारः आभिः पूर्वोक्ताभिः सुष्टुतिभिः शोभनाभिः स्तुतिभिः जग्मुः प्रापुः क्षिप्रगमने दृष्टांतः अश्वाः १५८

श्वः आजिमुमः। वर्धनानि स्तोत्राणि मम यथा भवेयुः त्वं तादृशानि कल्पितवानसीत्यर्थः। अपि च हे सुतपाः अभिषुतस्य सोमस्य पातस्त्वं
शंतमानि सुखकृत्तमानि रांत्या रां अतिरमणीयानि यज्ञे हविर्भिर्युक्तानि वक्षणा निवाहकानि स्तोत्राणि क्रियास्म करवाम॥ ॥अ-
थ सप्तमी॥ ॥स नो बोधि पुरोळाशं रराणः पिबा तु सोमं गोऋजीकमिंद्र। एदं बर्हिर्यजमानस्य सीदोरुं कृधि त्वायत उ लोकं॥ ॥
हे इंद्र रराणो रममाणः स त्वं नोस्मदीयं पुरोडाशं एतत्संज्ञकं हविर्बोधि विबुध्यस्व। किं च गोऋजीकं गोविकारं दध्यादिभिः संस्कृतं अभि-
षुतं सोमं तु क्षिप्रं पिब पिब। तदर्थं च यजमानसंबंधीदं बर्हिः सीद उपविश। तदनंतरं त्वायतः त्वामिच्छतो यजमानस्य लोकं स्थानं उ-
रुं विस्तीर्णं कृधि कुरु उ इति पूरणः॥ ॥अथाष्टमी॥ ॥स मंदस्वा ह्यनु जोषमुग्र प्र त्वा यज्ञास इमे अश्नुवंतु। प्रेमे हवासः पुरुहू-
तमस्मे आ त्वेयं धीरवस इंद्र यम्याः॥ ॥हे उग्र उद्गूर्णबल इंद्र स त्वं अनु जोषं कामानुगुणं यथा भवति तथा मंदस्व मोदस्व हि शब्दः
पदपूरणः। हियोगे मंदस्वेत्याख्यातस्य चस्य यास्सर्वोनुदात्तत्वं। इमे यज्ञाः सोमयागाः सोमाः त्वां प्राश्नुवंतु हे पुरुहूत बहुभिराहूत
इत्वां अस्मे अस्मदीया इमे हवासो हवाः स्तोत्राणि प्राप्नुवंतु इयं धीः स्तुतिः त्वां अवसे अस्माकं रक्षणाय आ यम्याः आयच्छतु नियच्छतु।
॥अथ नवमी॥ ॥तं वः सखायः सं यथा सुतेषु सोमेभिरीं पृणता भोजमिंद्रं। कुवित्तस्मा असति नो भराय न सुष्विमिंद्रोवसे मृधाति॥ ॥
हे सखायः स्तोतारो वो यूयं सोमेषु सुतेषु अभिषुतेषु सत्सु भोजं दातारं तमीं एनमिंद्रं सोमेभिः सोमैः यथाकामं संपृणत संपूरयत तस्मा

च॰भा॰ सचस्वनायमवसेअभीकऽइतोवातमिंद्रपाहिरिषः॥ अमाचैनमरण्येपाहिरिषोमदेमशतहिमाःसुवीराः॥ ॥हेइंद्रत्वंनार्यंकर्मणांकर्ती
१५९ नांचनेतारंअभीकेसंग्रामेअवसेरक्षणायसचस्वसेवस्वइतोवाअस्मात्सन्निकृष्टात्रिषःशत्रोःअमुतोविप्रकृष्टाद्वाशत्रोःअवाशाद्वःअ
नुक्तेनविवक्षितेनसमुच्चयःहेइंद्रत्वंस्तोतारंपाहिरक्षअमाचगृहेचअमेतिगृहनामअरण्येकाननेचरिषःशत्रोःपाहिएनंरक्षतदनंतरं
सुवीराःशोभनपुत्राःवयंशतहिमाःशतसंवत्सरान्मदेमहृष्यामः॥ ॥इतिचतुर्थस्यषष्ठेद्वादशोवर्गः॥ ॥यातऊतिरितिनवर्चंद्विती
यंसूक्तंभरद्वाजस्यार्षंत्रैष्टुभमैंद्रं।तथाचानुक्रांतं।यातनवेतिपृष्ठ्याभिप्लवषडहयोःद्वितीयेहनिइदंसूक्तंनिष्केवल्यनिविधानं।सूत्रि
तंच।यातऊतिरवमेतिमध्यंदिनेति॥ ॥तत्रप्रथमा॥ ॥यातऊतिरवमायापरमायामध्यमेंद्रशुष्मिन्नस्ति॥ ताभिरूषुवृत्रहत्येवीर्नएभि
श्चवाजैर्महान्नउग्र॥ ॥हेशुष्मिन्बलवन्इंद्रत्वदीयायाऊतिःपरिरक्षाअवमाअधमास्ति।यापरमाउत्कृष्टास्तियामध्यमास्तिता
भिरूतिभिःवृत्रहत्येयुद्धेनोस्मान्अत्यंतंअवीःपालय।किंचहेउग्रउद्गूर्णेंद्रएभिर्भोज्यसाधनैर्वाजैरन्नैश्चनोस्मान्संयोजयेतिशेषः॥ ॥
॥अथद्वितीया॥ ॥आभिःस्पृधोमिथतीररिषण्यन्नमित्रस्यव्यथयामन्युमिंद्र॥ आभिर्विश्वाअभियुजोविषूचीरार्यायविशोवतारीर्दासीः॥
॥हेइंद्रआभिरस्मदीयाभिरूतिभिःमिथतीःशत्रुसेनानिहिंसंतीःस्पृधःअस्मदीयाःसेनाःअरिषण्यन्अहिंसन्पालयन्नित्यर्थः। राम
अमित्रस्यशत्रोःमन्युंसंग्रामादिषुविद्यमानंकोपंव्यथयनाशयअपिचआभिरूतिभिरेवअभियुजोभियोक्त्रीषुविषूचीःविषुगंचंतीः १५९

विद्यमानादासीःकर्मणामुपक्षपयित्रीःविश्वाःसर्वाविशःप्रजाःआर्याययज्ञादिकर्मकर्त्रेयजमानायअवतारीःविनाशय॥ ॥अथतृतीया॥ ॥
॥इंद्रजामयउतयेऽजामयोर्वाचीनासोवनुषोयुयुज्रे॥ त्वमेषांविथुराशवांसिजहिवृष्ण्यानिकृणुहीपराचः॥ ॥हेइंद्रजामयःज्ञातिरूपाः
सन्निकृष्टायेशत्रवःउतापिचअजामयःदूरदेशस्थिताःयेशत्रवःअर्वाचीनासःअस्मदभिमुखाःवनुषोहिंसंतःयुयुज्रेउद्युक्ताभ
वंतिएषामुभयविधानांशत्रूणांसंबंधीनिशवांसिबलानिविथुराणिदीनानित्वंकुर्वितिशेषः।तथावृष्ण्यानिएषांवीर्याणिजहिनाशय।
किंचपराचःउभयविधान्शत्रून्पराङ्मुखान्कृणुहिकुरु॥ ॥अथचतुर्थी॥ ॥शूरोवाशूरंवनतेशरीरैस्तनूरुचातरुषियत्कृण्वैते॥
तोकेवागोषुतनयेयदप्सुविक्रंदसीउर्वरासुब्रवैते॥ ॥हेइंद्रशूरःत्वदनुगृहीतोवीरःशरीरैरंगैःशूरंवावीरमपिवनतेहंतिवैस्ययमपि
त्यन्यस्यार्थः।यद्वावेस्यनेनविकल्पाभिधायकेनशूरोवात्वदनुगृहीतःसन्वनतेकदावनतेतदाहतनूरुचाशरीरेणशोभमानौपरस्पर
विरोधिनौतरुषियुद्धाययद्यदाकृण्वैतेसंग्रामंकुर्वीतेयद्यदातोकेवापुत्रनिमित्तेवागोषुनिमित्तभूतासुवातनयेपौत्रनिमित्तभूतेवाअप्सुउ
दकेषुनिमित्तभूतेषुउर्वरासुसर्वसस्याढ्यासुनिमित्तासुक्रंदसीक्रंदमानौवाक्रोशंतौविब्रवैतेविवदतेहेइंद्रपुत्रादिलाभायत्वदनुगृही
तस्यभवतीत्यर्थः॥ ॥अथपंचमी॥ ॥नहित्वाशूरोनतुरोनधृष्णुर्नत्वायोधोमन्यमानोयुयोध॥ इंद्रनकिष्ट्वाप्रत्यस्त्येषांविश्वाजातान्यभ्य
स्यतानि॥ ॥हेइंद्रत्वात्वयासहशूरोविक्रांतजनोनहियुयोधनयुध्यतेतथातुरःअन्येषांशत्रूणांहिंसकःअतस्त्वयानयुयोधधृष्णुर्ध

सं॰ भा॰ १९० र्षको न युयोधामन्यमानो युधि कश्चानू योधो भटः। त्वत्तया न युयोध हे इंद्र एषां शूरादीनां मध्ये कश्चन त्वत्तो न किरस्ति प्रतिरोधि नास्ति वि
श्वा विश्वानि जातानि प्रादुर्भूतानि शूरादीनि अभ्यसि अभिभवसि॥ ॥इति चतुर्थस्य षष्ठे एकोनविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥स पत्यत
उभयोर्नृम्णमयोर्यदी वेधसः समिथे हवंते॥ वृत्रे वा महो नृवति क्षये वा व्यचस्वंता यदि वितंतसैते॥ ॥उभयोरनयोर्मध्ये स जनः नृम्णं
धनं पत्यते ईष्टे। कयोर्मध्ये क ईष्टे इति एतदुभयमाह। यदि इयस्य यदीति निपातो यस्यार्थे वर्तते। समिथे यज्ञे वेधसः कर्मणां विधातार ऋ
त्विजः हवंते इंद्रं स्तुवंति स ईष्टे इति संबंधः। महो महतः प्रभूते वृत्रे वा निरोधे निमित्ते वा नृवति परिचारकमनुष्ययुक्ते क्षये वा गृहनिमि
त्ते वा व्यचस्वंता व्यचस्वंतौ यदि तौ जनौ यदीति यावस्यर्थे वर्तते वितंतसैते वियुध्येते तयोर्मध्ये संबंधता स रूप क्षयकर्मणः विपूर्वात्तेः
अतो सैते इति भवति यद्वा तंस इति धातुः कंड्वादिषु पठ्यते। तस्मादिदं रूपमिति॥ ॥अथ सप्तमी॥ ॥अध स्मा ते चर्षणयो यदेजानिंद्र त्रा
तोत भवा वरूता॥ अस्माकासो ये नृतमासो अर्य इंद्र सूरयो दधिरे पुरो नः॥ ॥अध स्मापि च हे इंद्र त्वदीयाश्चर्षणयः यद्यदा एजान् एज
पुमीत्याकंपयः स्वं तेषां त्राता पालको भव। उत अपि च वरूता संभक्ता भव। अस्माकासु अस्मदीयाः नृतमासो नेतृतमाः ये मनुष्याः हे इं
द्र त्वां अर्यो रयः प्राप्तितार इत्यर्थः। तेषां त्राता भव हे इंद्र सूरयो ये स्तोतारः नो अस्मान् पुरो दधिरे पुरस्कुर्वते तेषां च त्राता भवेति॥ ॥साकं राम
मेधे महानाम्न्या मिष्टो इंद्रस्य वृत्रहणेति याज्या। सूत्रितं च। अनु ते दायि मह इंद्रियाय विश्वकर्मन् हविषा वावृधान इति। अनुक्तिनाम्न्ये १९०

वाजाः अजिं न संग्रामं यथा अश्वी घ्नं प्रापुः तद्वत्॥ ॥अथ सप्तमी॥ ॥न यं जरंति शरदो न मासा न द्याव इंद्रमवकर्शयंति॥ वृद्धस्य चिद्वर्धतामस्य
तनूः स्तोमेभिरुक्थैश्च शस्यमाना॥ ॥शरदः संवत्सराः यमिंद्रं न जरंति नापक्षीणयंति तथा मासाश्च नापक्षीणयंति तथा द्यावः दिवसाश्च यमिंद्रं
नावकर्शयंति नात्मीभावयंति वृद्धस्य चित् प्रवृद्धस्यापि यस्येंद्रस्य तनूः शरीरं स्तोमेभिरस्मदीयैः स्तोत्रैरुक्थैश्च शस्त्रैश्च शस्यमाना सती व
र्धतां प्रवृद्धा भवतु॥ ॥अथाष्टमी॥ ॥न वीळवे नमते न स्थिराय न शर्धते दस्युजूताय स्तवान्॥ अज्रा इंद्रस्य गिरयश्चिदृष्वा गंभीरे चिद्भवति
गाधमस्मै॥ ॥स्तवान् अस्माभिः स्तूयमान इंद्रः वीळवे दृढगात्राय यजमानाय न नमते न वशी भवति न स्थिराय अविचलिताय च न शर्धते
उत्सहमानाय दस्युजूताय कर्मवर्जितैः प्रेरिताय यजमानाय न वशी भवति यद्यपि स्तोतारो बहुगुणाः संति तथापींद्रस्तेभ्यो दस्युसहिते
भ्यो न वशी भवतीत्यर्थः। अपि च ऋष्वाः महांतः गिरयश्चित् पर्वता अपि इंद्रस्य अज्राः असुरागमनाः क्षेपणीया भवंति गंभीरे चित् अगा
धेपि स्थाने अस्मा इंद्राय गाधमेव स्थानं विषयो भवति॥ ॥अथ नवमी॥ ॥गंभीरेण न उरुणामत्रिन्प्रेषो यंधि सुतपावन्वाजान्॥ स्था
ऊ षु ऊर्ध्व ऊती अरिषण्यन्नक्तोर्व्युष्टौ परितक्म्यायां॥ ॥हे अमत्रिन् अमत्रं बलं तद्वन् हे सुतपावन् सुतस्य सोमस्य पातरिंद्र गंभीरेण के
नापि दुरवगाहेन उरुणा विस्तीर्णेन मनसा नो अस्मभ्यं इषोन्नानि वाजान् बलानि च प्रयंधि प्रयच्छ। किं च अक्तोः रात्रेः व्युष्टौ विवासे अह्नि
परितक्म्यायां रात्रौ हे इंद्र ऊती अस्माकं रक्षायै हे इंद्र अरिषण्यः सन् अहिंसकः त्वं ऊर्ध्वः उद्यतः स्थाः ऊ षु सुष्टुतिभिः स्तुतो वा॥ अथ दशमी॥ ॥

च॰ भा॰ रसातौ युध्ये समयंते संगच्छंते तदापार्ये अंतिमे अहन्यहनि दिवसे नोऽस्मभ्यं उग्र उद्गूर्णं ओजो रक्षणं दाः। अदाः प्रयच्छ॥ ॥अथ द्वितीया॥
१६१ ॥त्वां वाजी हवते वाजिनेयो महो वाजस्य गध्यस्य सातौ। त्वां वृत्रेष्विंद्र सत्पतिं तरुत्रं त्वां चष्टे मुष्टिहा गोषु युध्यन्॥ ॥वाजी हविर्लक्षण
न्नवान् वाजिनेयो वाजिन्याः पुत्रो भरद्वाजः हे इंद्र त्वां गध्यस्य सर्वैः प्राप्यस्य महो महतो वाजस्य अन्नस्य सातौ लाभे निमित्ते वा हवते स्तौ
ति। अपि च हे इंद्र सत्पतिं सज्जनानां पालकं तरुत्रं दुर्जनानां मारकं त्वां वृत्रेषु उपद्रवेषु निमित्तेषु भरद्वाजो हवते मुष्टिहा मुष्टिबलेन शत्रू
णां हंता गोषु निमित्तभूतासु युध्यन् शत्रुभिः सह युद्धं कुर्वन् भरद्वाजस्त्वां चष्टे। पश्यति प्रविभालयते॥ ॥अथ तृतीया॥ ॥त्वं कविं चो
दयोऽर्कसातौ त्वं कुत्साय शुष्णं दाशुषे वर्क्॥ त्वं शिरो अमर्मणः पराहन्नतिथिग्वाय शंस्यं करिष्यन्॥ ॥हे इंद्र त्वं अर्कसातौ अन्नलाभा
र्थं कविं भार्गवमृषिं चोदयः प्रेरय किंच हे इंद्र दाशुषे हविर्दत्तवते त्वं कुत्साय शुष्णमसुरं वर्क्। छादितवानसि। वर्क् इति वृणक्तेः छाद
नार्थस्य लुङि रूपं। तथा त्वं अतिथिग्वाय अतिथीनाम भिगंत्रे दिवोदासाय शंस्यं स्तुत्यं सुखं करिष्यन् अमर्मणः मर्महीन मात्मानं म
न्यमानस्य शंबरस्य शिरः शीर्षं पराहन् अवधीः॥ ॥अथ चतुर्थी॥ ॥त्वं रथं प्र भरो योधमृष्वमावो युध्यंतं वृषभं दशद्युं॥ त्वं तुग्रं वेतसवे
सचाहन्त्वं तुजिं गृणंतमिंद्र तूतोः॥ ॥हे इंद्र त्वं वृषभं वृषभसंज्ञाय राज्ञो योधं युधसाधनं ऋष्वं महांतं रथं प्रभरः प्रापयः। अपि च युध्यं राम
तं शत्रुभिः सह युद्धं कुर्वंतं दशद्युं दशदिवसान् युध्यंतं तोयस्य गंतारं वृषभमेतदाख्यं राजानमावः। युद्धादपीपालयः। किंच त्वं वेतसवे एतन्ना १६१

म्नो राज्ञे सचा सहायभूतः सन् तुग्रमसुरं हन् हतवानसि। वेतसुर्नाम कः कश्चिदसुरः अत्र तस्मादन्योऽसावुच्यते तत्तृतीयार्थे चतुर्थी। तेना
सुरेण सहितं तुग्रं हतवानसि। तथा च मंत्रांतरे श्रूयते। अहं पितेव वेतसूंरभिष्टये तुग्रं कुत्साय स्मदिभं च रंधयमिति॥ ॥हे इंद्र त्वं गृणंतं स्तु
वंतं तुजिं एतदाख्यं राजानं तूतोः वर्धयः॥ ॥अथ पंचमी॥ ॥त्वं तदुक्थमिंद्र बर्हणा कः प्र यच्छता सहस्रा शूर दर्षि। अव गिरेर्दासं शं
बरं हन् प्रावो दिवोदासं चित्राभिरूती॥ ॥हे इंद्र बर्हणा शत्रूणां हिंसक त्वं तदुक्थं प्रशस्यं तत्कर्म अकः अकरोः। किं तत्कर्मेत्युच्यते हे शूर
वीर इंद्र त्वं शतानि सहस्रा सहस्राणि च शंबरस्यानुचरान् भटान् प्रदर्षि विदारितवानसि। तथा च निगमांतरे। अध्वर्यवो यः शतं शं
बरस्येति तथा त्वं दासं यज्ञादिकर्मणामुपक्षपयितारं गिरेः पर्वतान् निर्गतं शंबरमसुरं अवहन् अवावधीः। तथा च श्रूयते। यः शंबरं पर्वतेषु
क्षियंतमिति। किंच चित्राभिः हे इंद्र त्वं आभिः ऊती ऊतिभिः रक्षाभिः दिवोदासं राजानं प्रावः प्रकर्षेण पालयसि॥ ॥इति चतुर्थस्य षष्ठे
एकोविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥त्वं श्रद्धाभिर्मंदसानः सोमैर्दभीतये चुमुरिमिंद्र सिष्वप्। त्वं रजिं पिठीनसे दशस्यन्षष्टिं सहस्रा
शच्या सचाहन्॥ ॥हे शूर त्वं श्रद्धाभिः श्रद्धापुरःसरमादरातिशयेनानुष्ठितैः कर्मभिः मंदसानो मोदमानः यच्छ्रद्धया युक्तं कर्म तत्सा
रवद्भवति तथा च श्रूयते। यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति सोमैश्च मंदसानस्त्वं दभीतये एतन्नामकाय
राजर्षये चुमुरिं एतन्नामकमसुरं सिष्वप् अस्वापयः अवधीरित्यर्थः। किंच हे इंद्र त्वं पिठीनसे एतन्नामकाय एतदाख्यां कन्यां वरा

ऋ०भा० १६२ ज्यंवरशिखस्यानूपस्यकुलेजाताःप्रकृतयाषष्ठिंषष्ठिसंख्याकानिसहस्रासहस्राणिसचासहयुगपदेवहन्नवधीः॥ ॥अथसप्तमी॥ ॥
॥अहंचनतत्सूरिभिरानश्यांतवज्यायइंद्रसुम्नमोजः॥त्वयायत्तत्त्वंतसधवीरवीरास्त्रिवरूथेननहुषाशविष्ठ॥ ॥हेसधवीरवी
रैःसहितशविष्ठबलवत्तमेंद्रवीराःस्तोतारःत्रिवरूथेनत्रीणिवरूथान्यावरणानिभुवनानियस्यतेननहुषाशत्रूणांबंधकेनत्व
यादत्तंयत्सुम्नंसुखंओजोबलंचनक्षवंतिहेइंद्रत्वयादत्तंज्यायःअतिशयेनप्रशस्यंतत्सुम्नमोजःअहंचनअहमपिभरद्वाजःसू
रिभिर्मदीयैःस्तोतृभिःसहआनश्यांप्राप्नुयां॥ ॥अथाष्टमी॥ ॥वयंतेअस्यामिंद्रद्युम्नहूतौसखायःस्याममहिनप्रेष्ठाः॥प्रातर्द
निःक्षत्रश्रीरस्तुश्रेष्ठोघनेवृत्राणांसनयेधनानां॥ ॥हेमहिनपूजनीयेंद्रतेत्वदर्थंसखायःस्तोतारोवयंअस्यांद्युम्नहूतौअन्नस्य
ननिमित्तेस्तोत्रेप्रेष्ठाःअतिशयेनप्रियाःस्यामभवेम।प्रातर्दनिःप्रतर्दनोराजातस्यपुत्रःक्षत्रश्रीःएतन्नामकोमघवाराजा
श्रेष्ठोस्तुसर्वेषामुत्कृष्टोभवतु।किमर्थंवृत्राणांशत्रूणांघनेवधायचधनानांवसूनांसनयेसंभजनायचश्रेष्ठोभवत्वितिसंबंधः॥ ॥इति
चतुर्थस्यषष्ठेद्वाविंशोवर्गः॥ ॥किमस्यमदइत्यष्टर्चंचतुर्थंसूक्तंभरद्वाजस्यार्षंअनुक्रांतंच।किमस्यान्त्याचायमानस्याभ्यावर्ति
नोदानस्तुतिः॥भरद्वाजऋषिःत्रिष्टुप्छंदःअंत्ययोस्तुदानस्तुतिरूपत्वात्यातेनोच्यतइतिन्यायेनदानमेवदेवताविनियोगोलैं
गिकः॥ ॥तत्रप्रथमा॥ ॥किमस्यमदेकिम्वस्यपीताविंद्रःकिमस्यसख्येचकार।रणावायेनिषदिकिंतेअस्यपुराविविद्रेकिमुनूत राम १६२

काहेनिष्केवल्येएषैवसूक्तमुखीयायाज्या॥सूत्रितंच।अनुतेदायिमहइंद्रियायकथोनुतेपरिचराणिविद्वानितिद्वेइति॥सेषासूक्तेऽष्टमी॥ ॥
अनुतेदायिमहइंद्रियायसत्रातेविश्वमनुवृत्रहत्ये।अनुक्षत्रमनुसहोयजत्रेंद्रदेवेभिरनुतेनृषह्ये॥ ॥हेइंद्रमहेमहतेतुभ्यमिंद्रिया
यऐश्वर्यार्थंअनुदायिअन्वदायिअनुदीयतेस्मवृत्रहत्येवृत्रवधनिमित्तेतेतुभ्यंविश्वंसमस्तंसत्रासत्यमनुदायि।किंकिमनुदायीति
तदुभयमाह।येनविश्वंबिभर्तितत्क्षत्रंबलमनुदायियेनशत्रूनभिभवतिनहुणाविशिष्टंसहोबलमनुदायिहेयजत्रयजनीयेंद्रतेतु
भ्यंनृषाह्येयुद्धेदेवेभिःसर्वैर्देवैःएवंसर्वमनुदायि॥ ॥अथनवमी॥ ॥एवानःस्पृधःसमजासमत्स्विंद्ररारंधिमिथतीरदेवीः॥विद्याम
वस्तोरवसागृणंतोभरद्वाजाउततइंद्रनूनं॥ ॥हेइंद्रत्वमेवएवंस्तुतस्त्वंनोस्मदीयाःस्पृधःशत्रुसेनाःसमत्सुसंग्रामेषुसमजशत्रुव
धार्थंप्रेरय।किंचमिथतीर्हिंसतीःअदेवीरासुरीःसेनाःररंधिअस्मदर्थंवशीकुरु।उतापिचहेइंद्रगृणंतःस्तोत्रंकुर्वंतोभरद्वाजावयंअव
साअन्नेनसहवस्तोःवासस्यनिवासमित्यर्थः।नूनमवश्यंविद्यामलभेमहि॥ ॥इतिचतुर्थस्यषष्ठेत्रयोविंशोवर्गः॥ ॥श्रुधीनइंद्रेत्यष्ट
र्चंतृतीयंसूक्तंभरद्वाजस्यार्षंत्रैष्टुभमैंद्रं।तथाचानुक्रम्यते।श्रुधीनोष्टाविति।विनियोगोलैंगिकः॥ ॥तत्रप्रथमा॥ ॥श्रुधीनइंद्रह्वया
मसित्वामहोवाजस्यसातौवावृषाणाः।संयद्विशोयंतशूरसातातुग्रंनोवःपार्यअहंदाः॥ ॥हेइंद्रवावृषाणाःसोमेनत्वांसिंचंतोवयंस्तो
तारोमहोमहतोवाजस्यान्नस्यसातौलाभार्थंत्वांह्वयामसिआह्वयामः।हेइंद्रत्वंनोस्माकंतद्धानंश्रुधिशृणु।यद्यदाविशोजनाःशूर

रभा० ॥एतत्यत्तइंद्रियमचेतियेनावधीर्वरशिखस्यशेषः॥वज्रस्ययत्तेनिहतस्यशुष्मात्स्वनाच्चिदिंद्रपरमोददार॥१॥हेइंद्रयेनवीर्येणवरशिखस्य
१६३ वरशिखोनामकश्चिदसुरःतस्यशेषःतेषांपुत्रान्शेषइत्यपत्यनामैतत्।अवधीःअहिंसीःतेत्वदीयमेतदिंद्रियंवीर्यंअचेतिअस्माभिर
ज्ञायि।हेइंद्रयस्मात्शुष्मात्बलात्निहितस्यप्रेरितस्यत्वदीयवज्रस्यस्वनाच्चित्ध्वनेरपिपरमःवरशिखस्यपुत्राणांमध्येकश्चिद्बला
धिक्योनोत्कृष्टःकश्चिदसुरःददारअदीर्यत॥॥अथपंचमी॥॥वधादिंद्रोवरशिखस्यशेषोभ्यावर्तिनेचायमानायशिक्षन्॥वृचीवतोय
द्धरीयूपीयायांहन्पूर्वेअर्धेभियसापरोदर्त्॥॥पूर्वोक्तमेवार्थमनयाविवृणोति।अयमिंद्रःचायमानायचायमानस्यराज्ञःपुत्रायअभ्याव
र्तिनेएतन्नामकायराज्ञेशिक्षन्वसूनिप्रयच्छन्वरशिखस्यासुरस्यशेषःपुत्रान्चवधीदवधीत्अहिंसीत्।वरशिखस्यपुत्रान्कथमव
धीदित्युच्यते।यदायदायमिंद्रःहरियूपीयायांहरियूपानामकाचिन्नदीकाचिन्नगरीवातस्याःपूर्वभागेस्थितान्वृचीवतःवृचीवान्नाम
वरशिखस्यकुलोत्पन्नःपूर्वःतज्जातान्वरशिखस्यपुत्रानहन्अवधीत्।तदाअपरोअपरभागेस्थितोवरशिखस्यश्रेष्ठःपुत्रःभिय
साभीत्यादर्त्दीर्णोभूत्॥॥इतिश्रीचतुर्थस्यषष्ठेत्रयोविंशोवर्गः॥॥अथषष्ठी॥॥त्रिंशच्छतंवर्मिणइंद्रसाकंयव्यावत्यांपुरुहूतश्रवस्या॥
वृचीवंतःशरवेपत्यमानाःपात्राभिंदानान्यर्थान्यायन्॥॥इदानीमुक्तमेवार्थंविवृणोति।हेपुरुहूतबहुभिराहूतेंद्रश्रवस्याश्रवोन्नंयशो राम
वातदिच्छयायुधेत्वांजित्वाअन्नंप्राप्नुयामयशोवाप्राप्नुयामेतिकामयमानाःशरवेहिंसायैत्वांहिंसितुमित्यर्थःपत्यमानाःअभिपतंतोगच्छं १६३

तःपात्राणिपात्राणियज्ञसाधनानिभिंदानाभिंदंतःवर्मिणःकवचभृतःत्रिंशच्छतंत्रिंशदधिकशतसंख्याकाःवृचीवंतोवरशिखस्यपुत्राःसाकं
युगपदेवयव्यावत्यांपूर्वोक्तायांहरियूपीयायान्यर्थानिअर्थंइत्यानि आयन्गच्छन्विनाशंप्रापुरित्यर्थः॥॥अथसप्तमी॥॥यस्यगावाव
रुषासूयवस्यूअंतरूषुचरतोरेरिहाणा॥सृंजयायतुर्वशंपरादाद्वृचीवतोदैववातायशिक्षन्॥॥अरुषाअरुषौरोचमानौसूयवस्यूशो
भनतृणानीच्छंतौरेरिहाणालेलिहानौपुनःपुनर्ग्रासमास्वादयंतौयद्वागतिविशेषंकुर्वतौयथेंद्रस्यसंबंधिनोगावश्वौअंतर्द्यावापृथि
व्योर्मध्येअंतरिक्षेचरतोगच्छतःऋजुगमौपुरुषौ।सइंद्रःसृंजयायएतन्नामकायराज्ञेतुर्वशंराजानंपरादात्प्रददौ।किंकुर्वन्वृचीवतः
वारशिखात्दैववातायदेववातस्यापत्यायअभ्यावर्तिनेराज्ञेशिक्षन्वशीकुर्वन्तेषांधनानिप्रयच्छन्नितिवा॥॥अथाष्टमी॥॥द्वयाँअग्नेरथि
नोविंशतिंगावधूमतोमघवामह्यंसम्राट्॥अभ्यावर्तीचायमानोददातिदूणाशेयंदक्षिणापार्थवानां॥॥अधुनाभरद्वाजःस्वस्मैअभ्या
वर्तिनादत्तंधनजातंअग्नयेप्रकथयति।हेअग्नेमघवाधनवान्प्रभूतदानोवासम्राट्राजसूययाजीवायजमानश्चायमानस्यपुत्रोभ्यावर्ती
एतद्द्वयोराजारथिनोरथसहितान्वधूमतःस्त्रीयुक्तान्द्वयान्मिथुनभूतान्विंशतिंविंशतिसंख्याकान्गाःपशून्मह्यंददातिप्रायच्छत्।
●पार्थवानांपृथोर्वंश्यस्याभ्यावर्तिनोराज्ञःसंबंधिनीपूजार्थंबहुवचनं।इयंदक्षिणादुर्नशाकेनाशयितुमशक्याभवति॥॥इतिचतुर्थ
स्यषष्ठेचतुर्विंशोवर्गः॥॥आगावइत्यष्टर्चंपंचमंसूक्तंअत्रेयमनुक्रमणिका।आगावोगव्यंद्वितीयैंद्रीवांस्त्वद्यपादांत्यानुष्टुप्जागतस्तृचो।

ऋ०भा० द्वितीयादिरिंद्रस्तिगवामुपस्कानरतस्तलृकं सूक्तिंतं च। आगावीयमेकेइति॥ ॥तत्रप्रथमा॥ ॥आगावो अग्मन्नुतभद्रमक्रन्त्सीदंतुगोष्ठेरणयंत्व
स्मे॥ प्रजावतीः पुरुरूपाइहस्युरिंद्राय पूर्वीरुषसोदुहानाः॥ ॥गावोआ अग्मन् अस्मदीयंगृहमागछंतु उतापि च भद्रंभजनीयंशुभंम
१६४ क्रन् कुर्वंतु तथागोष्ठे अस्मदीयेगवांस्थानेसीदंतु उपविशंतुतदनंतरं अस्मे अस्मासुरणयंतुरमंतां अपि च इहास्मिन्गोष्ठे पुरुरूपाना
नावर्णागावः प्रजावतीः प्रजावत्यः संततिसहिताः स्युर्भवेयुः इंद्राय इंद्रार्थंउषसः पूर्वीर्दुहानाः सत्यः॥ ॥अथद्वितीया॥ ॥इंद्रोयज्व
नेपृणतेचशिक्षत्युपेद्ददातिनस्वंमुषायति॥ भूयोभूयोरयिमिदस्यवर्धयन्नभिन्नेखिल्येनिदधातिदेवयुं॥ ॥इंद्रोयज्वनेयजनशीला
यपृणतेचस्तुतिभिःप्रीणयित्रेचस्तोत्रेशिक्षति अपेक्षितंधनंददाति नकेवलंसकृदेवदानं अपि चसर्वदेत्याह। उपेद्ददाति उपेत्यसर्व
दाददात्येवयज्वनस्तोतुश्चस्वंस्वभूतंधनंनमुषायतिकदाचिदपिनापहरति। अपि चअस्याभयविधस्यरयिंधनमात्मनादत्तं भूयोभू
यःपुनःपुनर्वर्धयन्नितरद्धिंप्रापयन्नेवदेवयुंदेवमिंद्रमात्मनइच्छंतंजनं अभिन्नेअशुभिरभेद्ये खिल्ये खिलमप्रतिहतंस्थानंदेवखिले
स्वार्थिकोयत् अन्यैर्गंतुमशक्यंस्थानंनिदधातिनिक्षिपतिनिवासयतीत्यर्थः॥ ॥देवीनांहविःसुनतानशंतिनताअर्वतियोदेवतायाज्यापुरा
नुवाक्येगोस्तामेदिमरूलतीयनिक्षेवाज्ययोरेतयोःसूक्तमुख्वीसूक्तेतेच। नताअर्वारेणुककाटोअश्नुतेनतानशंतिनदभातितस्करोरति॥ राम
तत्रतामेतांसूक्तेतृतीयामाह॥ ॥नतानशंतिनदभातितस्करोनासामामित्रोव्यथिरादधर्षति॥ देवांश्चयाभिर्यजतेददातिचज्योगित्ता १६४

नासः॥ ॥भरद्वाजऋषिःफलविलंबनासहिष्णुःसन् अनयेंद्रमाक्षिपति। अस्यसोमस्यमदेसतिइंद्रः किंचकार किंकृतवान्नूकिमुकिं
चअस्यसोमस्यपीतौपानेसतिकिंचकार अस्यसोमस्यसख्येसतित्वेकिंचकारपानात्पूर्वमिंद्रसोमेनसहवसतीत्यर्थः अस्यसोम
स्यनिषदिगृहेरणावायेस्तोतारश्चसंतितेस्तोतारःपुरापूर्वंहइंद्रतेत्वत्तःकिंविविद्रे किंलेभिरेनूतनासःनूतनाइदानीतनास्तोता
रश्चकिमुलेभिरे॥ ॥अथद्वितीया॥ ॥सदस्यमदेसद्वस्यपीताविंद्रःसदस्यसख्येचकार॥ रणावायेनिषदिसत्तेअस्यपुराविवि
द्रेसदुनूतनासः॥ ॥एवमाक्षिप्तइंद्रःतस्मैऋषयेईप्सितंधनंप्रददौतदनंतरमृषिःइंद्रसकाशात्संपूर्णकामःसन्पुरायान्युप
लंभप्रतिपादकानिवाक्यान्युवाचइदानींतानिनिराकरोतिइंद्रःअस्यसोममदेसन्शुभंकर्मचकार अस्यसोमस्यपीतौपानेसतिशु
भंकर्मचकारअस्यसख्येसन्शुभंचकारयेरणावास्तोतारस्तेनिषदिगृहेयज्ञस्यगृहइत्यर्थःपुरापूर्वंइंद्रःत्वत्तःसन्शुभंकर्मनि
विविदेलेभिरेनूतनासःइदानींतनास्तोतारःसदुशुभमेवकर्मलेभिरे॥ ॥अथतृतीया॥ ॥नहिनुतेमहिमनःसमस्यनमघवन्मघ
वत्वस्यविद्म॥ नराधसोराधसोनूतनस्यइंद्रनकिर्ददृशइंद्रियंते॥ ॥हेमघवन्धनवन्निंद्र तेत्वदीयस्यसमस्यसमस्तस्यमहिमनःम
हिमानंनहिविद्म वयंनजानीमःनुशब्दःपूरणः। तथामघवत्वस्यमदीयस्यधनिकत्वस्यचवयंनजानीमः। नूतनस्यनूत्नस्यराधसः
त्वदीयंसर्वंधनंचनजानीमःसर्वत्रद्वितीयार्थेषष्ठी॥ हेइंद्र तेत्वदीयंइंद्रियंसामर्थ्यंनकिःददृशेकेनापिनदृश्यते॥ ॥अथचतुर्थी॥ ॥

भिःसचतेगोपतिःसह॥ ॥नतागावोनशंति अस्मत्सकाशात् न नश्यंतु किंच न तस्करश्चोरोपि न दभाति अस्मदीया गाः नहिंस्यात् तथा आमित्रः अमित्रस्यश
त्रोः संबंधिव्यथिःशत्रुः आसामुइमागाः नादधर्षति। नाधर्षतु। गोपतिः एवंभूतानां गवां स्वामी यजमानः याभिर्गोभिः देवांश्च इंद्रादीनुद्दिश्य यजते य
जनं करोति यागा इंद्रार्थं ददाति च प्रयच्छति च ताभिस्ताहशीभिर्गोभिः सह ज्योगित् चिरकालमेव सचते संगच्छते॥ ॥अथ चतुर्थी॥ ॥नता अर्वा
रेणुककाटो अश्नुते न संस्कृतत्रमुप यंति ता अभि॥ उरुगायमभयं तस्य ता अनु गावो मर्तस्य वि चरंति यज्वनः॥ ॥रेणुककाटः रेणोः पा
र्थिवस्य रजसः उद्भेदकः कुदिभेदनकर्मा। अर्वा च युद्धार्थमागता अश्वः ता गाः नाश्नुते न प्राप्नुयात् तथा ता गावः संस्कृतत्रं विशसनादि संस्कारं
नाभ्युपयंति नाभिगच्छंतु अपि च ता गावः यज्वनो यजनशीलस्य मर्तस्य मनुष्यस्य उरुगायं विस्तीर्णगमनं अभयं भयवर्जितं प्रदेशमनुदिश्य वि
चरंति विशेषेण गच्छंतु॥ ॥अथ पंचमी॥ ॥गावो भगो गाव इंद्रो मे अच्छान्गावः सोमस्य प्रथमस्य भक्षः। इमा या गावः स जनास इंद्र इच्छामीधृ
दा मनसा चिदिंद्रं॥ ॥गाव एव मह्यं भगो धनं भवतु इंद्रश्च मे मह्यं गा वा मे अच्छानूयच्छतु छदेऽदं रूपं गावः प्रथमस्य हविषां श्रेष्ठस्य सोमस्य भक्षो
भक्षणं भवंतु। अभिषुतस्य हि सोमस्य गव्येनाज्यादिना संस्क्रियमाणत्वात् हे जनासो जनाः इमा एवंभूता या गावः सेति ता इत्यर्थः। ता एव गावः इं
द्रो भवति दधि घृतादिरूपेण इंद्रस्याप्यायनत्वात्। एवंभूतमिंद्रं हृदा श्रद्धायुक्तेन मनसा चित् चिदप्यर्थे इच्छामीत् कामय एव साधनभूताभिर्गोभिः एवंभू
तमिंद्रं यष्टुमिच्छामीत्यर्थः॥ ॥अथ षष्ठी॥ ॥यूयं गावो मेदयथा कृशं चिदश्रीरं चित्कृणुथा सुप्रतीकं॥ भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्य

तेसभासु॥ ॥हे गावो यूयं मेदयथ पुष्टिं आप्यायनं कुरुतेत्यर्थः॥ तथा कृशं चित् कृशमपि अश्रीरं चित् अश्रीकमपि अमंगलांगमपि सुप्रतीकं शोभनांगं कृणुथ कुरुथ।
हे भद्रवाचः कल्याणध्वन्युपेताः स्नेहयथ॥ गावः अस्मदीयं गृहं भद्रं कल्याणं कृणुथ गोभिरुपेतं कुरुथ सभासु प्रवर्त्तु हे गावो युष्माकं बृहत् महत् वयो अन्नं
सर्वैर्दीयत इत्यर्थः॥ ॥अथ सप्तमी॥ ॥प्रजावतीः सूयवसं रिशन्तीः शुद्धा अपः सुप्रपाणे पिबन्तीः॥ मा व स्तेन ईशत माघशंसः परि वो हेती रुद्रस्य वृ
ज्याः॥ ॥हे गावो यूयं प्रजावतीः प्रजा वत्सास्तैर्वत्साभियुक्ता भवंतीति शेषः॥ सूयवसं शोभनतृणं रिशन्तीः रिशंत्यः भक्षणार्थं हिंसत्यो भवत्यः सुप्रपाणे
सुखेन पातव्ये तडागे॥ शुद्धाः निर्मलाः अपः उदकानि पिबन्तीः पिबन्त्यश्च भवेत् वो युष्मान् स्तेनस्तस्करः मा ईशत मा ईशिष्ट ईश्वरो मा भूत् तथा अघ
शंसः व्याघ्रादिः शत्रुः मा ईशत अपि च वो युष्मान् रुद्रस्य कालात्मकस्य परमेश्वरस्य हेतिरायुधं च परि वृज्याः परिवृणक्तु परिहरतु॥ ॥अथाष्टमी॥ ॥उपे
दमुपपर्चनमासु गोषूप पृच्यताम्॥ उप ऋषभस्य रेतस्युपेन्द्र तव वीर्ये॥ ॥आसु गोषु इदमुपपर्चनं आप्यायनमुपपृच्यतां हे इन्द्र तव वीर्ये त्वदीयवीर्यनि
मित्ते ऋषभस्य गवां गर्भमादधानस्य वृषभस्य रेतसि इदमुपपर्चनं गोषु आप्यायितासु सतीषु तत्क्षीरादिहविर्द्वारेणेन्द्र आप्यायितो भवतीत्य
र्थः॥ उपेति पुनर्वचनं पादभेदानां पूरणार्थमिति॥ ॥इति चतुर्थस्य षष्ठे पंचविंशो वर्गः॥ ॥२५॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारय
न्॥ पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥छ॥ ॥इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्य
धुरंधरेण सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये चतुर्थाष्टके षष्ठोऽध्यायः॥ ॥छ॥ ॥श्रीसांबसदाशिवार्पणमस्तु॥ ॥

॥श्रीसरस्वत्यैनमः॥ ॥यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥ ॥अथ सप्तमाध्याय आरभ्यते॥
षष्ठस्य मंडलस्य तृतीयानुवाके पंच सूक्तानि व्याख्यातानि। इंद्रं व इति षळृचं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं अनुक्रम्यते च इंद्रं षळिति।
गतो विनियोगः॥ ॥तत्र प्रथमा॥ ॥इंद्रं वो नरः सख्याय सेपुर्महो यंतः सुमतये चकानाः॥ महो हि दाता वज्रहस्तो अस्ति महामु रण्वमव
से यजध्वं॥ ॥हे यजमानाः वो युष्माकं संबंधिनः नरो नेतार ऋत्विजः सख्याय सखिभावार्थं इंद्रं सेपुः परिचरंति। स्पृशंति वा। कथंभूताः महो
महांति स्तोत्राणि यंत उपयंतः प्राप्नुवंतः कुर्वंत इत्यर्थः। तथा सुमतये सुमतिः शोभना अनुग्रहात्मिका तदीया बुद्धिः तां चकानाः कामयमा
नाः क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानसंज्ञा चकाना इति कामयतेश्छांदसं रूपं। यद्वा महो महत्कर्म यंतः गच्छंतः अनुतिष्ठंतः सुम
तये सुमतिं शोभनां स्तुतिं चकानाः शब्दयंतः कै गै शब्दे इत्यस्माल्लिटः कानचि रूपं हि यस्मात् वज्रहस्तो वज्रपाणिरिंद्रः महो महतो धनस्य
दाता अस्ति भवति तस्मात् रण्वं रमणीयं महां महांतमेव अवसे रक्षणाय यजध्वं हविर्भिः पूजयत॥ ॥अथ द्वितीया॥ ॥आ यस्मिन्हस्ते नर्या मि
मिक्षुरा रथे हिरण्यये रथेष्ठाः॥ आ रश्मयो गभस्त्योः स्थूरयोराध्वन्नश्वासो वृषणो युजानाः॥ ॥यस्मिन्निंद्रे नर्याः नृभ्यो हिताः सोमाः
आ मिमिक्षुः आसिंचंते आश्रयंते व्यत्ययेन कर्मणि कर्तृप्रत्ययः इंद्रकु चेति चेत् हस्ते तदीयबाहौ यद्वैतत्समानाधिकरणमिंद्रस्य विशे
षणं हस्ते व्यत्ययेन हंतेर्यस्मिन्निंद्र इत्यर्थः। उक्तं च यास्केन। हस्तो हंतेः प्राशुर्हनने इति यद्वा इंद्रो यस्मिन्निंद्रे वर्तमाना नरातयः आमिमि

ऋ०भा०
१९९

शुः आसिंचंति आपूरयंति स्तोतॄन् यश्चेंद्रः रथेष्ठाः रथस्थाता नक्षमावः सन् हिरण्यये सुवर्णमये रथे आतिष्ठति यद्वा रथेष्ठाः रथे स्थितारा
याधनानि हिरण्मये रथे तिष्ठन् आसिंचत्यभिवर्षयति यस्य च स्कूरयोर्गभस्त्योः बाहूनामैतत् बाह्वोरुभयोरभीशवः आसिंचंते आश्रीयंते
यस्य चाश्वासोम्याः वृषणः सेक्तारो युज्जानाः रथे युज्यमानाः अध्वन् अध्वनि मार्गे आमिमिक्षुः आसिंचंति आपूरयंति आगच्छंतीत्यर्थः तमिं
द्रं स्तुम इति शेषः॥ ॥ अथ तृतीया॥ ॥ श्रियेते पादा दुव आमिमिक्षुर्धृष्णुर्वज्री शवसा दक्षिणावान्॥ वसानो अत्कं सुरभिं दृशे कं स्वर्ण
नृत विषिरो बभूथ॥॥ हे इंद्र श्रिये ऐश्वर्यार्थं ते त्वदीययोः पादयोः दुवः परिचरणं आमिमिक्षुः आसिंचंति समर्पयंति भरद्वाजः समर्पयंति
व्यत्ययेन बहुवचनं। यद्वा ते तव पादौ श्रिये श्रयितुं सेवितुं दुवः परिचरणं आसिंचंति अनुतिष्ठंति यत्त्वं शवसा बलेन धृष्णुः शत्रूणां धर्षकः
वज्री वज्रवान् दक्षिणावान् दक्षिणा स्तोतृभ्यो दातव्यं धनं तद्वान् हे नृतो नेतरिंद्र स त्वं सुरभिं प्रशस्तं अत्कं सततगमनशीलं आत्मीयं रूपं
दृशे सर्वेषां दर्शनार्थं वसानः आच्छादयन् स्वर्णः सूर्य इव इषिरो गंता एषणीयो वा बभूथ भवसि कमिति पूरकः॥ ॥ अथ चतुर्थी॥ ॥ सत्रा
म आमिश्लतमः सुतो भूद्यस्मिन्पक्तिः पच्यते संति धानाः॥ इंद्रं नरस्तुवंतो ब्रह्मकारा उक्था शंसंतो देववाततमाः॥ ॥ यः सोमो वक्ष्यते सत्रा
मः सुतोभिषुतः सन् आमिश्लतमः आभिमुख्येन मिश्रिततमो भूत् इंद्रेणात्यर्थं संगच्छते यस्मिन्सोमेभिषुते सति पक्तिः पक्तव्यः पुरोडाशादिः प राम
च्यते भक्ष्या वा धानास्ताश्च संति इह विरर्थं संस्कृता भवंति यस्मिंश्च सोमेभिषुते नरो नेतारः ब्रह्मणान्नस्य हविर्लक्षणस्य काराः कर्तारः कृत्वि १९९

ऋ०भा०
१६७

भूयइपंचेत्यनुक्रांतं। अग्निष्टोमेमाध्यंदिनसवने अछावाकशास्त्रे एतत्सूक्तं शंसनीयं सूत्रितं च। उदिन्न्वस्यरिच्यते भूयइद्वावृध इति। महाव्रतेपिनि
ष्केवल्य एतत्सूक्तं तथैव पंचमारण्यके सूत्रितं च। भूयइद्वावृधेवीर्याय नृणामुक्तेति॥ ॥तत्र प्रथमामाह॥ ॥भूयइद्वावृधेवीर्यायाँ एको अजुर्यो
दयतेवसूनि॥ प्ररिरिचेदिवइंद्रःपृथिव्या अर्धमिदस्य प्रतिरोदसीउभे॥ ॥अयमिंद्रः भूयइत् बहुतरमेव वावृधे प्रवृद्धो भूत्। किमर्थं वीर्याय
वीरकर्माणि वृत्रवधादीनि कर्तुं एको मुख्यः अजुर्यो जरयितुमशक्यः स चेंद्रः वसूनि धनानि दयते स्तोतृभ्यो ददाति। तथा दिवो द्युलोका
त् पृथिव्याश्च सकाशाद्यमिंद्रः प्ररिरिचे। किंचास्येंद्रस्य उभे रोदसी द्यावापृथिव्यौ अर्धमित् अर्धमेव प्रति अस्येंद्रस्यार्धभागः द्यावापृथिव्यौ
प्रतिनिधिर्भवतीत्यर्थः॥ ॥अथ द्वितीया॥ ॥अधा मन्ये बृहदसुर्यमस्य यानि दाधार नकिरा मिनाति। दिवेदिवे सूर्यो दर्शतो भूद्वि सद्मान्यु
र्विया सुक्रतुर्धात्॥ ॥अधाधुना अस्येंद्रस्य बृहन्महत् असुर्यं असुरहननशीलं बलं मन्ये स्तोमि मन्यतिः स्तुतिकर्मा। स चेंद्रः यानि क
र्माणि दाधार धारयति तानि नकिरामिनाति न कश्चिदपि हिनस्ति कानि पुनस्तानीत्युच्यंते। दिवेदिवे प्रतिदिनं वृत्रेणावृतः सूर्यः दर्शतो द
र्शनीयो भूद्भवति। आवरकस्यासुरस्य वधेन सूर्यः प्रकाशितवानित्येकं कर्म सुक्रतुः शोभनकर्मा स इंद्रः सद्मानि भुवनानि उर्विया उ
रूणि विस्तीर्णानि व्यधात् विधात् अकार्षीत् इदमपरं कर्म। एतदादीनि बहूनि कर्माणि कृतवानित्यर्थः॥ ॥अथ तृतीया॥ ॥अद्या चिन्नूचि
त्तदपो नदीनां यदाभ्यो अरदो गातुमिंद्र। नि पर्वता अद्मसदो न सेदुस्त्वया दृळ्हानि सुक्रतो रजांसि॥ ॥हे इंद्र अद्याचित् अद्यापि नूचित् पुरापि

राम
१६७

तत् नदीनां नदीनां संबंधिकं तदपः कर्म वर्तते आभ्यो नदीभ्यः गातुं मार्गं आरदः प्रवहनार्थं व्यलिखः तिय(?)त्कर्म तत्सर्वदानुपक्षीणं संवर्तत इत्यर्थः।
अपि च त्वदाज्ञया पर्वता गिरयो निषेदुः निषण्णाः उत्पतनं परित्यज्य क्वचिदेव स्थाने नैश्चापल्येनोपविष्टा बभूवुः। अद्मसदो न अद्म अदनीय
मन्नं तदर्थं सीदंतः पुरुषा इव यथा भोजनार्थं सीदंतश्चापल्येन सतते तथेत्यर्थः। अतःकारणात् हे सुक्रतो शोभनकर्मन्निंद्र त्वया रजांसि सर्वे
लोकाः दृळ्हानि दृंहितानि स्थिरीकृता आसन्॥ ॥अथ चतुर्थी॥ ॥सत्यमित्तन्न त्वावाँ अन्यो अस्तींद्र देवो न मर्त्यो ज्यायान्। अहन्नहिं परिश
यानमर्णोवासृजो अपो अच्छा समुद्रं॥ ॥हे इंद्र वक्ष्यमाणं सत्यमित् सत्यमेव त्वावान् त्वत्सदृशोन्यो देवो नास्ति न मर्त्यो मनुष्योपि ना
स्ति ज्यायान् अधिकोपि देवो मनुष्यो न खल्वस्तीति यत् गीयते तत्सत्यमेवेत्यर्थः। अपि च त्वं अर्णः उदकं परिशयानं परिवृत्य शयानं अहिं मेघं अह
न् वधीः हत्वा च समुद्रं अंतरिक्षं जलधिं वा अभिमुखेन अपः उदकानि अवासृजः अवाङ्मुखतया विसृष्टवानसीत्यर्थः॥ ॥अथ पंचमी॥ ॥त्वम
पो वि दुरो विषूचीरिंद्र दृळ्हमरुजः पर्वतस्य। राजाभवो जगतश्चर्षणीनां साकं सूर्यं जनयन्द्यामुषासं॥ ॥हे इंद्र त्वं दुरः वृत्रेणावृता अपः विषूचीः
विविधं गंत्र्यः यथा सर्वतः प्रसृता भवंति तथा विसृजः। यतस्त्वं पर्वतस्य पर्ववतो मेघस्य दृळ्हं दृढं अपां बंधकं प्रदेशं अरुजः अभांक्षीः अपि च त्वं
जगतः संबंधिनीनां चर्षणीनां प्रजानां राजा भवः अधिपतिर्भवसि किं कुर्वन् सूर्यं द्यां द्युलोकं उषसं च तमसा प्रावृतमेतत्त्रितयं साकं युगपदेव
अजनयन् प्रादुर्भावयन् प्रकाशयन्नित्यर्थः॥ ॥इति चतुर्थस्य सप्तमे द्वितीयो वर्गः॥ ॥अभूरेकइति पंचर्चं षष्ठं सूक्तं भरद्वाजस्यार्षंउपा

ऋ॰भा॰
१६६

त्याः शाक्वरी द्विशिष्टास्त्रस्त्रैष्टुभ अष्टौ सूक्तानि शंसनीयानि। तथा च पंचमारण्यके। अभूरेक इति रयिपते रयीणामिति सप्तो सूक्तानि निष्केवल्य षष्ठेहनि
निष्केवल्य इदं सूक्तं निविधानं सूत्रितं च एंद्र याक्रूपनः प्रयान्चस्याभूरेक इति निष्केवल्यमिति विश्वजिति माध्यंदिने अच्छावाकशस्त्रे साम सूक्तो
स्यमेतच्छंसनीयं सूत्रितं च अभूरेको रयिपते रयीणामिति साम सूक्तानि तत्र प्रथमा॥ ॥ अभूरेको रयिपते रयीणामा हस्तयो रधिथा इंद्र कृष्टीः॥
वि तोके अप्सु तनये च सूरेऽवोचंत चर्षणयो विवाचः॥ ॥ हे रयिपते धनपालक इंद्र एकः प्रधानभूतस्त्वं रयीणां धनानां स्वामी अभूः भवसि यद्वा र
यीणां रयिपत इति संबंधः। एको रयिपतिरेक इत्यनुवादः। यथा गवामसि गोपतिरेक इंद्र इति। तदानीमेको मुख्यस्त्वं भवसीति योजनीयं। अपि च हे इंद्र
त्वं हस्तयोरात्मीययोर्बाह्वोः आ अधिथाः आधत्से सर्वं जगत् त्वदाज्ञया वर्तत इत्यर्थः। किंच चर्षणयो मनुष्याः तोके पुत्रे अप्सु उदकेषु सूरे शत्रू
णां प्रेरके तनयेषु पुत्रेषु च एतेषु निमित्तभूतेषु सत्सु विवाचः विशिष्टाः स्तुतीः व्यवोचंत विविधं कुर्वंति॥ ॥ अथ द्वितीया॥ ॥ त्वद्भियेंद्र पार्थिवा
नि विश्वाच्युता चिच्च्यावयंते रजांसि॥ द्यावाक्षामा पर्वतासो वनानि विश्वं दृळ्हं भयते अज्मन्ना ते॥ ॥ हे इंद्र त्वत् त्वत्तो भिया भयेन विश्वा विश्वा
नि व्यापकानि पार्थिवानि पृथिवी अंतरिक्षं नामैतत् तत्र भवानि रजांसि उदकानि अच्युता च्यावयितुमशक्यान्यपि च्यावयंते मेघाः प्रच्याव
यंति वर्षंतीत्यर्थः। अपि च हे इंद्र ते तव अज्मन् आगमने सति द्यावाक्षामा द्यावापृथिव्यौ पर्वतासो गिरयो वनानि वृक्षाश्च भयं प्राप्नुवंति किं
बहुना विश्वं सर्वं दृळ्हं स्थिरं प्राणिजातं भयते बिभेति॥ ॥ अथ तृतीया॥ ॥ त्वं कुत्सेनाभि शुष्णमिंद्राशुषं युध्य कुयवं गविष्टौ॥ दश प्रपित्वे अध राम
१६६

जः इंद्रं स्तोत्रैः स्तुवंतः उक्थानि उक्थानि शास्त्राणि शंसंतः उच्चारयंतः देववाततमाः देवान् अतिशयेनोपगता भवंति स सोम इंद्रे प्रासं मिश्रि
तो भूदित्यन्वयः॥ ॥ अथ पंचमी॥ ॥ न ते अंतः शवसो धाय्यस्य वि तु बाबधे रोदसी महित्वा॥ आ ता सूरिः पृणति तूतुजानो यूथेवाप्सु स
मीजमान ऊती॥ ॥ हे इंद्र ते तव अस्योक्तगुणस्य शवसो बलस्य अंतः अवसानं न धायि अन्येकेनापि दधातिरिव पूर्वार्थो द्रष्टव्यः नाव
धापि अस्माभिर्ज्ञातुमित्यर्थः। यद्वा त्वं रोदसी द्यावापृथिव्यौ महित्वा महत्त्वेन तु क्षिप्रं विबाबधे यस्माद्बलात् द्यावापृथिव्यौ विभीत इत्य
र्थः। ता तद्बलं सूरिः स्तोता तूतुजानः त्वरितः सन् ऊती ऊत्या तर्पकेण हविषा समीजमानः सम्यग्यजन् आ पृणाति पूरयति तत्र दृष्टांतः
यूथेव अप्सु उदके गवां यूथानीव यथा गोपालोऽपः पाययन् अद्भिस्तर्पयति तद्वत्॥ ॥ अथ षष्ठी॥ ॥ एवेदिंद्रः सुहव ऋष्वो अस्तूती
अनूती हिरिशिप्रः सत्वा॥ एवा हि जातो असमात्योजाः पुरू च वृत्रा हनति नि दस्यून्॥ ॥ एव एवमुक्तेन प्रकारेण ऋष्वो महान् इंद्रः सु
हवोऽस्तु सुखेनाह्वातव्यो भवतु। इदिति पूरणः। हिरिशिप्रः शिप्रे हनू नासिके वा हितवर्णे शिप्रे यस्य तादृश इंद्रः ऊती ऊत्या आगम
नेनास्मान् आगमयिता भवति धनानां स्वयमागतोऽनागतोऽपि स्तोतृभ्यो धनं प्रयच्छतीत्यर्थः। एवा हि एवं हि जातः प्रादुर्भूतोयमिंद्रः असमात्यो
जाः असमाति समानमनुपममनुपमं ओजो बलं यस्य तादृशः सन् पुरूणि बहूनि वृत्राण्यावरकाणि रक्षः प्रभृतीनि हनति हंतु तथा द
स्यून् उपक्षपयितॄन् शत्रून् निहंतु॥ ॥ इति चतुर्थस्य सप्तमे प्रथमो वर्गः॥ ॥ भूय इद्वावृध इति पंचर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं

सूर्यस्य मुषाय चक्रमविवेरपांसि ॥ ॥ हे इंद्र त्वं कुत्सेन सह युध्यमानं अशुषं शोषयितुमशक्यं प्रबलं शुष्णं सर्वस्य प्रशोषकमेतत्संज्ञकम
सुरं अभियुध्य अभ्ययुध्यः कुत्सस्य सहायार्थं तेनासुरेण सह युद्धं कृतवानसीत्यर्थः तथा गविष्टौ गावः बाणाः इष्यंते गविष्टिः संग्राम
स्तस्मिन् कुयवं एतत्संज्ञकमसुरं दशः अदशः हिंसितवानसि। दशा दशनं इत्यस्मात्छांदसो लोटि रूपं अथ अपि च प्रपित्वे प्रपतने युद्धे सू
र्यस्य चक्रं रथावयवभूतं मुषायः अमुष्णाः तदा प्रभृति सूर्यस्य रथो एकचक्रभूतस्तथा चाम्नातं। सप्त युंजंति रथमेकचक्रमिति। एतत्सां
ख्यस्य ऋषेः सूर्येण सह युद्धे तत्सहायार्थमागत इंद्रः सूर्यचक्रमपहृतवानित्याख्यानं। सूरश्चक्रं प्रवृहज्जात ओजसा प्रपित्वे इति
च निगमांतरं। अपि च रपांसि पापकारीणि रक्षः प्रभृतीनि अविवेः अस्माल्लोकादगमयः। अवधीरित्यर्थः। अथ चतुर्थी ॥ ॥ त्वं श
तान्यव शंबरस्य पुरो जघंथाप्रतीनि दस्योः ॥ अशिक्षो यत्र शच्या शचीवो दिवोदासाय सुन्वते सुतक्रे भरद्वाजाय गृणते वसूनि ॥ ॥ हे इंद्र शता ते
नि शतसंख्यानि अस्योपक्षपयितुरसुरस्य शंबरस्य एतत्संज्ञकस्य पुरः पुरीः अप्रतीनि लिंगव्यत्ययः केनाप्यप्रतिगताः अवजघंथ अवाहन् हे
शचीवः प्रज्ञावन् हे सुतक्रे अभिषुतेन सोमेन क्रीतेंद्र यत्र यस्मिन्काले सुन्वते सोमाभिषवं कुर्वते दिवोदासाय शच्या प्रज्ञया अशिक्षो धना
नि प्रादाः गृणते स्तुवते भरद्वाजाय वसूनि प्रादाः तस्मिन्काले शंबरीः पुरो वजघंथेत्यन्वयः ॥ ॥ अथ पंचमी ॥ ॥ स सत्यसत्वन्महते रणाय
रथमा तिष्ठ तुविनृम्ण भीमं ॥ याहि प्रपथिन्नवसोप मद्रिक् प्र च श्रुत श्रावय चर्षणिभ्यः ॥ ॥ हे सत्यसत्वन् सत्याः सत्वानो भटाः यस्य स तथो

ऋ॰भा॰ कः। हे तुविनृम्णा तुवि बहुलं नृम्णं धनं यस्य स तथोक्तः। हे तादृश इंद्र स त्वं महते रणाय संग्रामाय तदर्थं भीमं भयंकरमात्मीयं रथं आतिष्ठ प्रति
१६६ नृ प्रकृष्टमार्ग इंद्र अवसा रक्षणेन सह हे नर रथेन आयाहि आगच्छ मद्रिक् मदभिमुखः। तथा हे श्रुत विश्रुत इंद्र चर्षणिभ्यः प्रजाभ्यः प्रख्यापय च अ
स्मान् प्रख्यापय च सर्वासु प्रजासु मध्ये अस्मान्प्रख्यातान्कुर्वित्यर्थः॥ ॥इति चतुर्थस्य सप्तमे तृतीयो वर्गः॥ ॥अपूर्व्येति पंचर्चं नवमं सू
क्तं त्रैष्टुभमैंद्रं द्वितीये छंदोमिकेहनि निष्केवल्य एतत्सूक्तं। सूत्रितं च। अपूर्व्या पुरुतमानि तासु ते कीर्तिमिति। महाव्रतेपि निष्केवल्ये
अस्य सूक्तस्य विनियोग उक्तः॥ ॥तत्र प्रथमा॥ ॥अपूर्व्या पुरुतमान्यस्मै महे वीराय तवसे तुराय॥ विरप्शिने वज्रिणे शंतमानि वचांस्या
सा स्थविराय तक्षं॥ ॥अपूर्व्या अपूर्व्याणि रक्षितानि भूतजातानि पुरुतमानि बहुतमानि शंतमानि सुखतमानि वचांसि स्तुतिरूपाणि वा
क्यानि आसा आस्येन अस्मै इंद्राय तक्षं तक्षं करोमि। कीदृशायेत्यत्र महे महते वीराय विविधशत्रूणां मारयित्रे तवसे तवस्विने बलवते तुरा
य त्वरमाणाय विरप्शिने विप्रोषेण स्तुत्याय वज्रिणे वज्रवते स्थविराय प्रवृद्धाय॥ ॥अथ द्वितीया॥ ॥स मातरा सूर्येणा कवीनामवासयद्रु
जदद्रिं गृणानः॥ स्वाधीभिर्ऋक्वभिर्वावशानः उदुस्रियाणामसृजन्निदानं॥ ॥स इंद्रः मातरा मातरौ दिवं च पृथिवीं च कवीनां क्रांतदर्शिनां
मंगिरसामर्थाय सूर्येण अवासयत् प्रकाशयत्। किं कुर्वन् अद्रिं गवामदर्शनाय बिले नस्थापितं रुजत् भंजन् यद्वा कवीनां अंगिरसामि राम
ति तृतीयार्थे षष्ठी। अंगिरोभिर्गृणानः स्तूयमान इति संबंधः। अपि च स्वाधीभिः शोभनध्यानैर्ऋक्वभिः अंगिरोभिर्वावशानः पुनः पुनः का १६६

ष्यमाणः सन् उस्रियाणां बलवद्भिः पणिभिरपहृतानां गवां निदानं बंधनं तद्दस्युजेतृ अमो चयत्॥ ॥अथ तृतीया॥ ॥स वह्निभिर्ऋक्वभिर्गोषु शश्व

न्मितज्ञुभिः पुरुकृत्वा जिगाय॥ पुरः पुरोहा सखिभिः सखीयन् दृळ्हा रुरोज कविभिः कविः सन्॥ ॥पुरुकृत्वा बहुकर्मकृत् स इंद्रः वह्निभि

र्हविषां वोढृभिः ऋक्वभिः स्तोतृभिः शश्वत् सर्वदा मितज्ञुभिः संकुचितजानुभिः अंगिरोभिः सह गोषु निमित्तभूतेषु जिगाय असुरान् जित

वान् जित्वा च पुरोहा पुराणां हंता स इंद्रः सखिभिः समानख्यानैः कविभिः सह सखीयन् सखित्वमात्मन इच्छन् कविः सन् स्वयमपि क्रांतप्र

ज्ञो भवन् दृळ्हाः स्थिराः पुरः असुरीः पुरीः रुरोजिथ॥ ॥अथ चतुर्थी॥ ॥स नीव्याभिर्जरितारमच्छा महो वाजेभिर्महद्भिश्च शुष्मैः॥ ॥पुरुवीरा

भिर्वृषभ क्षितीनामा गिर्वणः सुविताय प्र याहि॥ ॥हे इंद्र प्रभ कामानां वर्षक हे गिर्वणः गिरा स्तुत्या संभजनीय इंद्र स त्वं महद्भिर्वाजैरन्नैः मह

द्भिः शुष्मैर्बलैश्च सह क्षितीनां प्रजानां मध्ये जरितारं स्तोतारं अच्छाभिमुख्येन नीव्याभिः नव्याभिर्नवतराभिः पुरुवीराभिः पुरूणां बहूनां वी

रयित्रीभिः आ प्र याहि आगच्छ किमर्थं सुविताय शोभनाय सुखप्राप्त्यर्थमित्यर्थः॥ ॥अथ पंचमी॥ ॥स सर्गेण शवसा तक्तो अत्यैरप इंद्रो द

क्षिणतस्तुराषाट्॥ इत्था सृजाना अनपावृदर्थं दिवेदिवे विविषुरप्रमृष्यं॥ ॥तुराषाट् तुराणां हिंसकानां सोढा अभिभविता स इंद्रः सर्गेण

सर्वदोषकेन शवसा बलेन अत्यैरश्वैः सततगामिभिर्मरुजोभिर्वा तक्तः संगतः सन् दक्षिणतः दक्षिणायातः अप उदकानि सृजतीति शेषः।

इत्था इत्थमनेन प्रकारेण सृजानाः सृज्यमानाः स्ताः आपः अर्थं अर्थेन गंतव्यं अप्रमृष्यं अप्रमृष्यमाणा रक्षोभ्यः समुद्रं दिवेदिवे प्रतिदिनं यन

ऋ०भा० पाहृत अप्यवर्जनं पुनरागमनं यथा न भवति तथा विविष्णुः व्याप्नुवंति अर्तेः स्कान्नत्य यानं तस्य रूपमर्थमिति॥ ॥इति चतुर्थस्य सप्तमे चतुर्थो वर्गः॥ ॥
१७० य ओजिष्ठ इति पंचर्चं दशमं सूक्तं शुनहोत्रस्यार्षं त्रैष्टुभमैंद्रं अनुक्रम्यते च। य ओजिष्ठः शुनहोत्र इति। महाव्रते निष्केवल्य उक्तो विनियोगः॥
॥तत्र प्रथमा॥ ॥य ओजिष्ठ इंद्र तं सु नो दा मदो वृषन्त्स्वभिष्टिर्दास्वान्॥ सौवश्व्यं यो वनवत्स्वश्वो वृत्रा समत्सु सासहदमित्रान्॥ ॥हे वृषन् कामानां
वर्षितरिंद्र त्वं यः पुत्रः ओजिष्ठः ओजस्वितमो बलवत्तमः मदः तव मादयिता स्तुतिभिः स्तोतेत्यर्थः। स्वभिष्टिः शोभनाभ्येषणो दास्वान् हविषां
दाता च तं तादृशं पुत्रं सु नः दाः देहि। यः पुत्रः स्वश्वः सन् समत्सु संग्रामेषु सौवश्व्यं शोभनाश्वानां समूहं वनवत् हिंस्यात्त न
था वृत्रान् वारयितॄन् अमित्रान् शत्रून् सासहत् अत्यर्थमभिभवेत्। तं दा इत्यन्वयः॥ ॥अथ द्वितीया॥ ॥त्वां हींद्रावसे विवाचो हवंते च
र्षणयः शूरसातौ॥ त्वं विप्रेभिर्वि पणीँरशायस्त्वोत इत्सनिता वाजमर्वा॥ ॥हे इंद्र त्वां हि त्वामेव विवाचः विविधाः स्तुतिरूपा वाचो येषां ते तादृशा
श्चर्षणयो मनुष्याः शूरसातौ शूरैः संभजनीये संग्रामे अवसे रक्षार्थं हवंते आह्वयंति किं च त्वं विप्रेभिर्विप्रैर्मेधाविभिरंगिरोभिर्वा सार्धं पणीन् बल
स्यानुचरान् असुरान् पणयः तान् व्यशायः विशेषेण अशाययः अस्वापयः हतवानित्यर्थः। अतः त्वोत इत् त्वया कृतो रक्षित एव सनिता संभक्ता
पुरुषः वाजमन्नं अर्वा अभिगंता भवेति॥ ॥अथ तृतीया॥ ॥त्वं ताँ इंद्रोभयाँ अमित्रान्दासा वृत्राण्यार्या च शूर॥ वधीर्वनेव सुधितेभिरत्कैरा पृ राम
त्सु दर्षि नृणां नृतम॥ ॥हे इंद्र त्वं तान् वक्ष्यमाणान् उभयान् उभयविधान् द्विप्रकारान् अमित्रान् शत्रून् वधीः आहिंसीः के ते उभयविधाः दासाः उपक्ष १७०

ऋ०भा० स्तव संबंधिनि विद्योतमाने पार्ये दुःखस्य पारके शर्मन् शर्मणि सुखे स्याम वर्तमाना भवेम ॥ ॥ इति चतुर्थस्य सप्तमे पंचमो वर्गः ॥ ॥ सं च
त्वे जग्मुरिति पंचर्चमेकादशं सूक्तं शुनहोत्रस्यार्षं सं च त्व इत्यनुक्रांतं। तृतीये छांदोमिकेहनि इदमादिके द्वे सूक्ते। सूत्रितं च। सं च त्वे ज
२७१ ग्मुरिति सूक्ते इति। महाव्रतेपि निष्केवल्ये उक्तो विनियोगः ॥ ॥ तत्र प्रथमा ॥ ॥ सं च त्वे जग्मुर्गिर इंद्र पूर्वीर्वि च त्वद्यंति विभ्वो मनीषाः ॥ पुरा
नूनं च स्तुतय ऋषीणां पस्पृध्र इंद्रे अध्युक्थार्का ॥ ॥ हे इंद्र पूर्वीर्बह्वीर्गिरः स्तुतयश्च त्वे संजग्मुः संगच्छंते। त्वत्तस्त्वत्तः विभ्वो विभूता मनीषाः
स्तोतृणां मतयश्च वियंति विविधं निर्गच्छंति। शेषः परोक्षकृतः। पुरा पूर्वस्मिन्काले नूनमद्य च ऋषीणामतींद्रियदर्शिनां भरद्वाजादीनां स्तु
तयः स्तोत्राणि इंद्रे अधिकं पस्पृध्रे अहमहमिकया इंद्रस्य स्तवने त्वरिता बभूवुरित्यर्थः। तथा उक्थार्का उक्थशस्त्राणि तद्रूपाण्यर्काणि अर्चन
साधनानि स्तोत्राणि च पस्पृध्रे अस्पर्धंत ॥ ॥ अथ द्वितीया ॥ ॥ पुरुहूतो यः पुरुगूर्त ऋभ्वाँ एकः पुरुप्रशस्तो अस्ति यज्ञैः ॥ रथो न महे शव
से युजानोऽस्माभिरिंद्रो अनुमाद्यो भूत् ॥ ॥ पुरुहूतः पुरुभिर्बहुभिराहूतः पुरुगूर्तः बहुभिरुद्यमितः ऋभ्वा य एकः प्रधानभूतः एवं गुण
विशिष्टो य इंद्रः यज्ञैः यष्टृभिः पुरुषैः यजनसाधनैः स्तोत्रैर्वा पुरुप्रशस्तोऽस्ति बहुधा प्रशस्तः स्तुतो भवति स इंद्रः रथो न रथ इव महे महते
शवसे बलाय तदर्थं युजानोऽस्मत्स्तुतिभिर्युज्यमानः सन्नस्माभिः स्तोतृभिः अनुमाद्यो भूत् सर्वदा स्तुत्यो भवतु ॥ ॥ अथ तृतीया ॥ ॥ राम
न यं हिंसंति धीतयो न वाणीरिंद्रं नक्षंतीदभि वर्धयंतीः ॥ यदि स्तोतारः शतं यत्सहस्रं गृणंति गिर्वणसं शं तदस्मै ॥ ॥ यं इंद्रं धीतयः कर्म २७१

णि परिचरणानि स्तोत्राणि च बाधंते वाण्यः स्तुतयश्च यं न बाधंते दातुमसमर्थः पुरुषः अन्यकृतैः परिचरणैः स्तुतिभिश्च शक्य
ते अस्य चेंद्रस्य बहुधनत्वाद्दातृत्वाच्च तस्मिन्प्रयुज्यमानानि परिचरणानि स्तोत्राणि च बाधहेतवो न भूवन्नित्यर्थः। किं तर्हि अतआ
हतमिंद्रं वर्धयंती अभि नक्षंती अभिगच्छंति अपि च गिर्वणसं गीरां संभक्तारमिंद्रं शतं शतसंख्याकाः स्तोतारो यदि गृणंति स्तुवंति यत्
यदि च सहस्रं सहस्रसंख्याकाः स्तोतारः स्तुवंति तत्सर्वं स्तोत्रमस्मा इंद्राय शं सुखकरं भवति ॥ ॥ अथ चतुर्थी ॥ ॥ अस्मा एतद्दिव्य१र्
चेव मासा मिमिक्ष इंद्रे न्ययामि सोमः ॥ जनं न धन्वन्नभि सं यदापः सत्रा वावृधुर्हवनानि यज्ञैः ॥ ॥ एतत् एतस्मिन् दिवि दिवसे
सौत्येहनि अर्चेव अर्चनसाधनेन स्तोत्रेणेव मासा सामानेन इंद्राय त्वा हन्त्र घ्न इत्यादिमंत्रसाध्येन युक्तः मिमिक्षः च सती वृयकं धना
ख्याभिरद्भिरासिक्तः सोमः अस्मै विभक्तिव्यत्ययः। अस्मिन्निंद्रे न्ययामि नियतो भूत् यद्वा अस्मा इंद्राय एतत्स्तोत्रं ब्रवाणीति शेषः।
दिवि द्युलोके अर्चेव अर्कः सूर्य इव मासा लुप्तोपममेतत् मा इति परिच्छिनत्तीति मासश्चंद्रमाः स इव मिमिक्षो वृद्धुदकानां सेक्ता य इं
द्रो वर्तते अस्मिन्निंद्रे अभिषुतः सोमो न्ययामि नियम्यते स्म किं च तमिंद्रं यज्ञैर्यजनसाधनैः पुरोडाशादिभिर्हविर्भिः सार्धं हवनानि स्तो
त्राणि सत्रा सह वावृधुः अवर्धयन् तत्र दृष्टांतः। धन्वन् धन्वनि मरुदेशे अभि आभिमुख्येन संयत् सम्यग्गच्छंत्यो आपः जनं न प्राणिन
मिव यथा मरुदेशे उपलभ्यमाना आपः प्राणिनं वर्धयंति तद्वत् ॥ ॥ अथ पंचमी ॥ ॥ अस्मा एतन्मह्यांगूषमस्मा इंद्राय स्तोत्रं मतिभि

ऋ०भा० रवाणि॥ असद्यथा महति वृत्रतूर्य इंद्रो विश्वायुरविता वृधश्च॥ ॥अस्मा इंद्राय महि महत् एतत् आंगूष्यं स्तोत्रं मतिभिः स्तोतृभिर्
वाचि उक्तमभूत्। अस्मायद् इंद्राय स्तोत्रमिति पुनरुक्तिरादरार्था। विश्वायुः सर्वं गंता स इंद्रः महति प्रभूते वृत्रतूर्ये संग्रामे यथा
१७२ येन प्रकारेण अस्माकम् अविता रक्षकः वृधो वर्धयिता च असत् भवेत् तथा अवाची स्यन्चयः॥ ॥इति चतुर्थस्य सप्तमे षष्ठो वर्गः॥
॥कदा भुवन्निति पंचर्चं द्वादशं सूक्तं शुनहोत्रस्यार्षं त्रैष्टुभमैंद्रं तथा चानुक्रांतं कदा नरस्कृ इति ततीये छंदोमे महाव्रते च निष्के-
वल्यमुक्तो विनियोगः॥ ॥तत्र प्रथमा॥ ॥कदा भुवन् रथक्षयाणि ब्रह्म कदा स्तोत्रे सहस्रपोष्यं दाः॥ कदा स्तोमं वासयोऽस्य राया क-
दा धियः करसि वाजरत्नाः॥ ॥ब्रह्म ब्रह्माणि स्तोत्राण्यस्मदीयानि रथक्षयाणि रथनिवासानि कदा कस्मिन्काले भुवन् भवे-
युः रथेव स्थितं स्तोत्रं कदा कस्मिन्काले स्तोत्रे स्तुवंतं मह्यं सहस्रपोष्यं सहस्रसंख्याकपुरुषपोषकं गोसमूहं पुत्रं वा दाः कदा
च अस्य मम स्तोतुः स्तोमं स्तोत्रं राया धनेन वासयः व्यापय धियः कर्माणि चाग्निहोत्रादीनि वाजरत्नाः वाजैरन्नै रमणीयाः कदा
कस्मिन्काले करसि कुर्याः। एवं स्तोता फलस्य विलंबमसहमानः सन्नू इंद्रमनया पृच्छत्॥ ॥अथ द्वितीया॥ ॥कर्हि स्वित्तदिं-
द्र यन्नृभिर्नॄन्वीरैर्वीरान्नीळयासे जयाजीन्। त्रिधातु गा अधि जयासि गोष्विंद्र द्युम्नं स्वर्वद्धेह्यस्मे॥ ॥फलस्याविलंबमानः ऋषिः राम
अनया इंद्रं पृच्छति हे इंद्र कर्हि स्वित् कदा खलु तद्भवेत् नृभिरस्मदीयैः पुरुषैः नॄन् शत्रुपुरुषान् तथा वीरैरस्मदीयैः पुत्रैः वीरान् १७२

भिन्त्स्व कर्मविरोधिनो बलप्रभृतीनसुरान् सुपां सुलुगिति त्रास आकारः। आर्या आर्याणि कर्मानुष्ठानत्वेन श्रेष्ठानि वृत्राणि आव-
रकाणि विश्वरूपादीनि च तानुभयविधान् हे शूर त्वं हतवानित्यर्थः। नृणां नेतॄणां मध्ये नृतम अतिशयेन नेतः हे इंद्र दृष्टस्कू सं-
ग्रामेषु सुधितेभिः सुष्ठु निहितैः अकैः रात्नीयैरायुधैः आदर्षि अन्यानपि शत्रून् विदारयसि। तत्र दृष्टांतः वनेव वनानीव य-
था वृक्षजातानि कुठारादिभिः छिंदंति तद्वत्॥ ॥अथ चतुर्थी॥ ॥स त्वं न इंद्राकवाभिरूती सखा विश्वायुरविता वृधे भूः॥ स्वर्षाता
यद्ध्वयामसि त्वा युध्यंतो नेमधिता पृत्सु शूर॥ ॥हे इंद्र सनात् शूरस्त्वं अकवाभिः अकुत्सिताभिः ऊतिभीर रक्षाभिः नोऽस्माकं वृ-
धे वर्धनाय अविता रक्षिता भूर्भव तथा विश्वायुः सर्वतो गंता त्वं अस्माकं सखा च भव नेमधिता नेमशब्दोऽर्धवाची उक्तं च त्वो नेम इ-
त्यर्धस्येति अर्धाः कतिपयाः पुरुषाः धीयंते एष्विति नेमधितयः संग्रामाः शताद्रो पुपृ स्वपृतनासु संग्रामेषु युध्यंतो युद्धं कुर्वंतो वयं
स्वर्षाता स्वः सुष्ठु अरणीयं धनं तस्य भजनार्थं हे शूर त्वां यद्यदा ह्वयामसि आह्वयामः तदानीं त्वं अविता सखा च भवेत्यर्थः॥ ॥अ-
थ पंचमी॥ ॥नूनं न इंद्रापराय च स्या भवा मृळीक उत नो अभिष्टौ॥ इत्था गृणंतो महिनस्य शर्मन् दिवि ष्याम पार्ये गोषतमाः॥ ॥हे इं-
द्र त्वं नूनं अद्य नोऽस्माकं स्याः अस्मदीयो भव अपराय च अपरस्मिन्नपि यस्मिन्नपि काले अस्मदीयो भव उत अपि च त्वं नोऽस्माकमभिष्टौ
अभिगमने सति मृळीकः सुखयिता भव। इत्था इत्थमनेन प्रकारेण गृणंतः स्तुवंतो वयं गोषतमाः गवां संभक्ततमाः महिनस्य महत

ऋ०भा०
१७२

नेवप्रकारेण सर्वे जीवंति तद्विलक्षणप्रकारं मरणाख्यं प्रापयेत्यर्थः। आकारः पूरकः। हे शक्र सर्वकार्येषु शक्तेंद्र शूर शौर्योपेतस्त्वं दुरः वि
शेषेण दारयिता शत्रूणां यद्यदा दुरो द्वाराणि शत्रुसंबंधीनि विघटयसे यस्मात् गृणीषे अस्माभिः स्तूयसे तस्मात्कारणात् शुक्रदुघस्य शुक्रा
णां निर्मलानां दोग्धुरिंद्रस्य धेनोर्वचसो वाचः नूनं मा निररं मा निर्गच्छेयं अरमित्याख्यातं गतौ विषयस्य रूपं सर्वदास्मो स्तुवन्निवसन्नित्य
र्थः। हे विप्र प्राज्ञेंद्र आंगिरसान् अंगिरोगोत्रजानस्मान् ब्रह्मणान्नेन जिन्व प्रीणय॥ ॥ इति चतुर्थस्य सप्तमे सप्तमो वर्गः॥ ॥ सत्राम
दास इति पंचर्चं त्रयोदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं सत्रेत्यनुक्रांतं। पृष्ठस्य पंचमेहनि निष्केवल्य एतत्सूक्तं सूत्रितं च।
प्रेदं ब्रह्म इंद्रो मदाय सत्रामदास इति निष्केवल्यं इति विश्वजिति माध्यंदिनसवने प्रशास्तुः शास्त्रे इदं साम सूक्तं स्वयं शंस
नीयं। सूत्रितं च। सत्रा मदासो यो जात एवाभूरेक इति साम सूक्तानीति। महाव्रतेपि निष्केवल्य उक्तो विनियोगः॥ तत्र प्रथमा॥
॥ सत्रा मदासस्तव विश्वजन्याः सत्रा रायोध ये पार्थिवासः। सत्रा वाजानामभवो विभक्ता यद्देवेषु धारयथा असुर्यं॥ ॥ हे इं
द्र तव त्वदीया मदासः सोमपानजनिता मदाः सत्रा सत्यनामैतत् सत्यं विश्वजन्याः सर्वजनहिता भवंति यद्वा सत्रेति महन्नाम म
हांतस्तव मदा इति योज्यं। अपि च पार्थिवासः पृथिव्युपलक्षितलोकत्रये भवाः त्वदीया ये रायो धनसमूहाः संति तेपि सत्रा सत्यं वि
श्वजनहिता भवंतीति संन्वयः। किंच वाजानाम् अन्नानां सत्रा सत्यं विभक्ता दाता अभवो भवसि। यद्वा सत्रा महांतं वाजानामिति योज्यं। राम १७२

यत् यस्मात्त्वं देवेषु मध्ये असुर्यं बलं धारयथाः अतः कारणात्त्वमेवं करोषीत्यर्थः॥ ॥ अथ द्वितीया॥ ॥ अनु प्र येजे जन ओजो
अस्य सत्रा दधिरे अनु वीर्याय। स्यूमगृभे दुधयेर्वते च क्रतुं वृंजंत्यपि वृत्रहत्ये॥ ॥ अस्येंद्रस्य ओजो बलं जना यजमानाः अनु प्र ये
जे संततं प्रकर्षेण यजंत पूजयंति। अपि च तमिंद्रं वीर्याय वीरकर्मणे कर्तुं सत्रा सत्यं अनु दधिरे पुरो दधिरे यजमानाः यद्वा सत्रा स
हेति योज्यं। अपि च स्यूमगृभे स्यूमः स्यूतानां अवच्छेदनेन वर्तमानानां शत्रूणां गृभे दुधये दुधिर्हिंसाकर्मा तेषां हिंसकाय च अर्वते श
त्रूणामभिगंत्रे च तस्मा इंद्राय क्रतुं कर्मपरिचरणात्मकं वृंजंति निष्पादयंति किमर्थं वृत्रहत्ये वृत्रस्यावरकस्य शत्रोर्हननं निमित्तं॥
॥ ॥ अथ तृतीया॥ ॥ तं सध्रीचीरूतयो वृष्ण्यानि पौंस्यानि नियुतः सश्चुरिंद्रं। समुद्रं न सिंधव उक्थशुष्मा उरुव्यचसं गिर आ विशं
ति॥ ॥ तमिंद्रं ऊतयो मरुतः सध्रीचीः सहाचंत्यः संगता भूत्वा सश्चुः सचंते सेवंते। यद्वा ऊतयः तर्पकाण्यन्नानि सहवर्तमानानि
भूत्वा सेवंते। तथा वृष्ण्यानि वीर्याणि पौंस्यानि बलानि च नियुतो रथे नियुज्यमाना वडवाश्च तमिंद्रं सेवंते। अपि च उक्थशुष्मा उ
क्थं शास्त्रं तदेव बलं यासां ता ईदृशा गिरः स्तुतयः उरुव्यचसं विस्तीर्णव्याप्तिकं तमिंद्रं आविशंति प्रविशंति तत्र दृष्टांतः समुद्रं न सिं
धवः यथा स्यंदनशीला नद्यः समुद्रमाविशंति आविश्य प्रविभक्ततया न दृश्यंते एवं सर्वा अपि स्तुतयः इंद्रेणैकीभवंतीत्यर्थः॥ ॥ अ
थ चतुर्थी॥ ॥ स रायस्खामुप सृजा गृणानः पुरुश्चंद्रस्य त्वमिंद्र वस्वः। पतिर्बभूथासमो जनानामेको विश्वस्य भुवनस्य राजा॥ ॥

ऋ॰भा॰
१७४

॥ हे इंद्र गृणानः स्तूयमानः सखे रायो धनस्य खां न दीनामेनत्। अत्र तत्संधा धारा लक्ष्यंते। धारा उखां उपसृज विमुंच आत्माभिः सहयो
जयेत्यर्थः। कीदृशस्य धनस्य पुरुश्चंद्रस्य बहूनां आह्लादकस्य वस्वः निवासकस्य अपि च असमः अनुपमः पूर्वोक्तजनानां सर्वेषां
प्राणिनां पतिरधिपतिः बभूथ तथा विश्वस्य सर्वस्य भुवनस्य भूतजातस्य एक आसाधारणः राजा ईश्वरश्च बभूथ॥ ॥अथ पंचमी॥ ॥
॥ स तु श्रुधि श्रुत्या यो दुवोयुर्द्यौर्न भूमाभि रायो अर्यः। असो यथा नः शवसा चकानो युगेयुगे वयसा चेकितानः॥ ॥ हे इंद्र श्रुत्या
निश्रोतव्यानि स्तोत्राणि तुभ्यं प्र श्रुधि शृणु यस्त्वं दुवोयुः अस्मदीयं परिचरणमात्मन इच्छन् अर्यः अरेः संबंधीनि रायो धनानि भू
म बहुतराणि अर्यो न सूर्य इवाभिभवसि स त्वं स्पृधीत्युत्वयः अपि च शवसा आत्मीयेन बलेन स्तोतव्येन युक्तः चकान स्तूयमानः
युगेयुगे काले काले वयसा हविर्लक्षणेनान्नेन चेकितानः ज्ञायमानस्त्वं यथा येन प्रकारेण नोऽस्माकमवधारणे सति तथा असः
स्याः॥ ॥इति चतुर्थस्य सप्तमेऽष्टमो वर्गः॥ ॥ अर्वाग्रथमिति पंचर्चं चतुर्दशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं। अर्वाग्रथमित्य
नुक्रांतं। महाव्रते निष्केवल्ये तस्योक्तो विनियोगः॥ ॥तत्र प्रथमा॥ ॥अर्वाग्रथं विश्ववारं त उग्रेंद्र युक्तासो हरयो वहंतु। कीरिश्चिद्धि
त्वा हवते स्वर्वान् ऋधीमहि सधमादस्ते अद्य॥ ॥हे उग्र उद्गूर्णबलेंद्र युक्तासो रथे नियुक्ताः हरयोऽश्वाः ते त्वदीये विश्ववारे विश्वैर्वर
णीये रथं अर्वाक् अस्मदभिमुखं वहंतु। आनयंतु हि यस्मात् स्वर्वान् स्वः सुष्ठु वरणीयं गुणजातं तद्वान् कीरिश्चित् स्तोता भरद्वाजस् राम
१७४

त्रानु पुत्रांश्च यन्नीलया सेत्वं संग्रामान् कदा जयकदा च गोष्वभिगंतृषु विद्यमानाः त्रिधातु त्रिधातूनां क्षीरदधिघृतानां त्रयाणां
धारयित्रीर्गाः अधि जयासि अधिकं जयेः। हे इंद्र त्वं स्वर्वत् व्याप्तिमत् द्युम्नं धनं अस्मे अस्मासु कदा धेहि धारयेः॥ ॥अथ तृतीया॥ ॥
॥कर्हि स्वित्तदिंद्र यज्जरित्रे विश्वप्सु ब्रह्म कृणवः शविष्ठ। कदा धियो न नियुतो युवासे कदा गोमघा हवनानि गच्छाः॥ ॥अनयापि क
तिचित् प्रश्नाः क्रियंते हे इंद्र कर्हि स्वित् कदा खलु तद्भवेत् हे शविष्ठ बलवत्तमेंद्र त्वं जरित्रे स्तोत्रे विश्वप्सु बहुविधरूपं ब्रह्मान्नं कृणवः क
रोषीति यत्तत्कदा भवेदिति वितर्कः कदा च धियः कर्माणि न नियुतः नियतं कृतीश्च युवासे आत्मनि योजयेः। कदा च त्वं गोमघा
गोमघानि गवां संगृहीणि मंहतेर्दानार्थस्य रूपमुत्तरपदं हवनानि स्तोत्राणि गच्छाः अभिगच्छेः॥ ॥अथ चतुर्थी॥ ॥स गोमघा जरि
त्रे अश्वश्चंद्रा वाजश्रवसो अधि धेहि पृक्षः। पीपिहीषः सुदुघामिंद्र धेनुं भरद्वाजेषु सुरुचो रुरुच्याः॥ ॥हे इंद्र स त्वं जरित्रे स्तोत्रे
गोमघाः गवां दात्रीः अश्वश्चंद्राः अश्वैराह्लादिताः वाजश्रवसः वाजैर्बलैः प्रसिद्धाः एवंभूताः पृक्षोऽन्नानि भरद्वाजेषु भरद्वा
जपुत्रेषु अस्मासु अधि धेहि धारय। तथा इषः बहून्यन्नानि सुदुघां शोभनदोग्ध्रीं गां हे इंद्र पीपिहि पायय अपि च ता इषो गो
श्च सुरुचः शोभनदीप्तीर्युक्ताश्च ताः संदीप्तयेत्यर्थः॥ ॥अथ पंचमी॥ ॥तमा नूनं वृजनमन्यथा चिच्छूरो यच्छक्र वि दुरो गृणीषे। मा
निररं शुक्रदुघस्य धेनोरांगिरसान् ब्रह्मणा विप्र जिन्व॥ ॥हे इंद्र त्वं नूनमद्य तत्र वृजनं बाधकमस्मदीयं शत्रुं अन्यथा चित् अन्योन्ये

वे० भा० स्य यजमानस्य दक्षिणां पुरंदेदातर्यंद्रय अंत्रेप्रेरय । तियद्वामघोनामिति अस्मे इत्यनेन समानाधिकरणं वचनव्यत्ययः । मघोनो हविष्म
१७५ तो यजमानस्येत्यर्थः । शेषः प्रत्यक्षकृतः । हे वरिवः वज्रवन्निंद्र यया दक्षिणया दत्तया अंहः पापं यजमानसंबंधि परियासि विना
शयसि । हे वृषभो धर्षक मघा मघानि धनानि सूरीन्स्तोतॄन् पुत्रांश्च यया च दक्षिणया विदयसे प्रयच्छसि तां दक्षिणां प्रेरय
गी सीत्यर्थः ॥ ॥ अथ पंचमी ॥ ॥ इंद्रो वाजस्य स्थविरस्य दातेंद्रो गीर्भिर्वर्धतां वृद्धमहाः । इंद्रो वृत्रं हनिष्ठो अस्तु सत्वा ता सूरिः
पृणति तूतुजानः ॥ ॥ अयमिंद्रः स्थविरस्य वाजस्यान्नस्य बलस्य वा दाता भवतु स चेंद्रो वृद्धमहाः प्रवृद्धतेजस्कः सन् गीर्भिरस्म
दीयाभिः स्तुतिभिः वर्धतां स त्वाशात्रूणां शातयिता स इंद्रः वृत्रं आवरकं शत्रुं हनिष्ठः हंतृतमो अस्तु भवतु ॥ अपि च सूरिः स इंद्रः तू
तुजानः त्वरमाणः ता तानि धनानि आपृणाति अस्मभ्यं प्रयच्छतु ॥ ॥ इति चतुर्थस्य सप्तमे नवमो वर्गः ॥ ॥ आपादितद्वृति पंच
र्चं चतुर्दशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं आयाहित्यनुक्रांतं च ॥ ॥ महाव्रते निष्केवल्ये उक्तो विनियोगः ॥ ॥ तत्र प्रथमा ॥ ॥ अ
पादित उडुनश्चित्रतमो महीं भर्षद्द्युमतीमिंद्रहूतिं ॥ पन्यसीं धीतिं दैव्यस्य यामं जनस्य रातिं वनते सुदानुः ॥ ॥ चित्रतमः चा
यनीयतमः आश्चर्यतमो वा स इंद्रः नोस्मदीयान् इतः अस्मत् जुहात् चमसादेः अपात् सोमं पिबतु यद्वा इतोस्माच्छत्रोः नोस्मान्
पातु रक्षतु । उरुः इस्य नो पूरणो । तथा महीं महतीं धीतिं दीप्तिं द्युमतीं इंद्रहूतीं इंद्रस्याह्वानं इंद्रस्य स्तुतिं भर्षत् स इंद्रो बिभ्रत धारय राम
१७५

तु । दैव्यस्य देवसंबंधिनो जनस्य यामन् यामनि यज्ञे क्रियमाणां पन्यसीं स्तुत्यतमां धीतिं परिचरणरूपां क्रियां रातिं दातव्यं हविश्च
सुदानुः शोभनदान इंद्रः वनते संभजतु ॥ ॥ अथ द्वितीया ॥ ॥ दूराच्चिदा वसतो अस्य कर्णा घोषादिंद्रस्य तन्यति ब्रुवाणः ॥ एय
मेनं देवहूतिर्ववृत्यान्मद्र्यगिंद्रमियमृच्यमाना ॥ ॥ अस्येंद्रस्य कर्णा कर्णौ दूरात्चित् दूरदेशादपि आवसतः स्तोत्रश्रवणार्थ
मागच्छतः इंद्रस्य घोषात् घोषणीयात् स्तोत्राद्धेतोः ब्रुवाणः स्तुवन् स्तोता तन्यति शब्दं करोति यद्वा सर्वत्र विस्तारयति देवहूतिः
देवस्येंद्रस्य आह्वानरूपा इयं स्तुतिः ऋच्यमाना स्तूयमाना प्रेर्यमाणा सती एनमिंद्रं मद्र्यक् मदभिमुखं आववृत्यात् आवर्तयतु पुन
रायं पुरणः ॥ ॥ अथ तृतीया ॥ ॥ तं वो धिया परमया पुराजामजरमिंद्रमभ्यनूष्यर्कैः । ब्रह्मा च गिरो दधिरे समस्मिन्महांश्च स्तो
मो अधि वर्धदिंद्रे ॥ ॥ हे इंद्र तं त्वां वः व्यत्ययेन बहुवचनं । परमया उत्कृष्टया स्तुत्या अर्कैः अर्चनसाधनैर्हविर्भिः सार्धं
अभ्यनूषि अभिष्टौमि कीदृशं पुराजां पूर्वस्मिन्काले जातं चिरंतनं अजरं जरारहितं नित्यं अतः कारणात् अस्मिन्निंद्रे ब्रह्मा
णि हविर्लक्षणान्यन्नानि गिरः स्तुतयश्च संदधिरे संधीयंते संश्लिष्यंते महान् प्रवृद्धः स्तोमश्च अधिकं वर्धते ॥ ॥ अथ चतुर्थी ॥ ॥
वर्धाद्यं यज्ञ उत सोम इंद्रं वर्धाद्ब्रह्म गिर उक्था च मन्म । वर्धाहैनमुषसो यामन्नक्तोर्वर्धान्मासाः शरदो द्याव इंद्र ॥ ॥ यमिं
द्रं यज्ञो यागः वर्धात् वर्धयति उतापि च तत्साधनभूतः सोमः अयमिंद्रं वर्धयति तथा ब्रह्म हविर्लक्षणमन्नं चरुपुरोडाशादिकं

यमिंद्रं वर्धयति। गिरः स्तोत्राणि मन्म मननीयानि उक्थानि शस्त्राणि वयं वर्धयंति एनमिंद्रं उषसश्च अक्तोः रात्रेः यामन् यामानि गमने स
ति वर्धयंति। मासाः शरदः संवत्सराश्च द्यावो दिवसाश्च एनमिंद्रं वर्धवर्धयति॥ ॥अथ पंचमी॥ ॥एवा जज्ञानं सहसे असामि वावृ
धानं राधसे च श्रुताय। महामुग्रमवसे विप्र नूनमा विवासेम वृत्रतूर्येषु॥ ॥हे विप्र मेधाविन् इंद्र एव एवं जज्ञानं प्रादुर्भवंतं सहसे
शत्रूणामभिभवार्थं असामि बहुलं वावृधानं वर्धमानं महो महांतं उग्रं उद्गूर्णबलं तं नूनं अद्य वृत्रतूर्येषु संग्रामेषु विश्रुताय विश्रु
ताय राधसे धनाय च अवसे रक्षणाय च आविवासेम परिचरेम॥ ॥इति चतुर्थस्य सप्तमे दशमो वर्गः॥ ॥मंद्रस्येति पंचर्चं षोड
शं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं इंद्रस्येत्यनुक्रांतं गतो विनियोगः॥ ॥तत्र प्रथमा॥ ॥मंद्रस्य कवेर्दिव्यस्य वह्नेर्विप्रमन्मनो वच
नस्य मध्वः॥ अपा नस्तस्य सचनस्य देवेषो युवस्व गृणते गोअग्राः॥ ॥मंद्रस्य मोदनस्य मदकरस्य वा कवेः क्रांतस्य दिव्यस्य दि
वि भवस्य वह्नेः वोढुः विप्रमन्मनः विप्रा मेधाविनः मन्म मननीयानि स्तोतारो यस्य स तथोक्तः तस्य वचनस्य वचनीयस्य स्तुत्यस्य तस्य सर्व
त्र प्रसिद्धस्य सचनस्य सेव्यस्य एवंभूतस्य मध्वो मधुनः सोमस्य क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी।
एवंभूतमस्मदीयं सोमं इंद्र त्वमपाः पिब। अपि च हे देव द्योतमान इंद्र गृणते स्तुवते तृतीयार्थे चतुर्थी॥ स्तुवता मया गोअग्राः गावः
अग्रे प्रमुखे यासां ता इषः अन्नानि युवस्व योजय॥ ॥अथ द्वितीया॥ ॥अयमुशानः पर्यद्रिमुस्रा ऋतधीतिभिर्ऋतयुग्युजानः॥

विः स्वामहवते आह्वयति तस्मात्कारणात्त्वदीयं रथमभिमुखं वह हे त्वित्यर्थः। वयं च अद्येदानीं ते त्वया सधमादः सहसामाद्यतः
ऋधीमहि समृद्धा भवेम। तृतीये पर्याये अच्छावाकस्य द्रोणे इत्येषा शस्त्रयाज्या सूत्रितं च द्रोणे हरयः कर्माग्मन्निति याज्ये इ
ति॥ सैषा द्वितीया॥ ॥द्रोणे हरयः कर्माग्मन् पुनानास ऋज्यंतो अभूवन्॥ इंद्रो नो अस्य पूर्व्यः पपीयाद्द्युक्षो मदस्य सोम्यस्य रा
जा॥ ॥हरयो हरितवर्णाः सोमाः कर्म अस्मदीयं यज्ञं द्रोणं अग्मन् प्रकर्षेण गच्छंति प्राप्नुवंति। प्राप्य च पुनानासः पूयमानाः द्रोणे द्रोण
कलशे ऋज्यंतः ऋजुगच्छंतो अभूवन् भवंति पूर्व्यः पुरातनः द्युक्षो दीप्तो निवासभूतः द्युस्थानो वा अस्य मदस्य मदकरस्य सोम्यस्य
सोमरसस्य राजा ईश्वरः एवंभूत इंद्रः अस्य इमं सोमं पपीयात् पिबतु॥ ॥अथ तृतीया॥ ॥आसस्राणासः शवसानमच्छेंद्रं सुच
क्रे रथ्यासो अश्वाः॥ अभि श्रव ऋज्यंतो वहेयुर्नू चिन्नु वायोरमृतं वि दस्येत्॥ ॥आसस्राणासः परितो गच्छंतः रथ्यासो रथे
युक्ता अश्वाः ऋजुगमनाः संतः सुचक्रे शोभनचक्रे रथे स्थितं शवसानं बलमिवाचरंतमिंद्रं श्रवणीयमस्मदीयं हविरच्छाभिमु
खेन अभिभवेयुः नू चिदिति निपातो निषेधे अत्र वर्तते। अमृतं अमरणहेतुभूतं सोमलक्षणं हविः विदस्येत् वहेयुरित्यर्थः॥
॥ ॥अथ चतुर्थी॥ ॥वरिष्ठो अस्य दक्षिणामियर्तींद्रो मघोनां तुविकूर्मितमः॥ यथा वज्रिवः परियास्यंहो मघा च धृष्णो दयसे वि
सूरीन्॥ ॥वरिष्ठः उरुतमः तुविकूर्मितमः अतिशयेन बहुविधकर्मा इंद्रः मघोनां मघवतां हविर्लक्षणधनोपेतानां मध्ये अ

ऋ०भा०
२११

रोचयत् प्रकाशयति तथा पूर्वीर्बर्हीः रूपस् च अयमिंद्रः ऋतेन सत्यभूतेन सर्वत्रगमनशीलेन वातेजसा विवासयत् व्यापयति तत्र
स्थानि तत्रत्यानि तमांसि निवर्तयतीत्यर्थः। तथा ऋतयुग्भिः ऋतेन स्तोत्रेण युज्यमानैरश्वैः नाभिना सनद्धेन स्वर्विदा सुष्टुवर
णीयस्य धनस्य लंभकेन रथेन चर्षणिप्राः चर्षणीनां मनुष्याणां कामैः पूरयिता सन्नयमेवेंद्रः ईयते गच्छति॥ अथ पंचमी॥ नृव
णो नो गृणते प्रत्नराजन्निषः पिन्व वसुदेयाय पूर्वीः। अप ओषधीरविषा वनानि गा अर्वतो नॄन् ऋचसे रिरीहि॥ हे प्रत्न पुरातन राजन्
राजमानेंद्र गृणानस्स्तूयमानस्त्वं वसुदेयाय वसूनि धनानि त्वया देयानि यस्मै तादृशाय गृणते पूर्वीर्बह्वीः इषोन्नानि नृवत् पिन्व
सिंच प्रयच्छेत्यर्थः। किं च ऋचसे अर्चयित्रे अपः वृष्टिलक्षणान्युदकानि ओषधीः व्रीह्यादीन् अविषा विषरहितानि रक्षकानि वा व
नानि वृक्षजातानि गाः नृन् मनुष्यान् हीनगाः अर्वतोश्वान् मनुष्यांश्च कर्मकरान् रिरीहि देहि॥ इति चतुर्थस्य सप्तमे एकादशो वर्गः॥
॥ इंद्र पिबेति पंचर्चं सप्तदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रं इंद्र पिबेत्यनुक्रांतं गतः सूक्तविनियोगः। प्रथमे रात्रिपर्याये अच्छावाकस्य
आज्यशस्त्रयाज्या सूत्रितं च। इंद्र पिब तुभ्यं सुतो मदायेति याज्येति॥ सैषा प्रथमा॥ इंद्र पिब तुभ्यं सुतो मदायाव स्य हरी वि मुचा
सखाया। उत प्र गाय गण आ निषद्याथा यज्ञाय गृणते वयो धाः॥ हे इंद्र त्वं सोमं पिब यः सोमः तुभ्यं मदाय मदार्थं सुतोभिषुतः
यस्त्वया सोमः पातव्यः अतः कारणात् सखाया समानख्यानौ मित्रभूतौ वा हरी अश्वौ अवस्य अव स्थापय तदनंतरं वि मुंच रथा राम १११

द्विमुंच उत अपि च गणे अस्मत्स्तोतृसंघे अभिमुख्येन निषद्योपविश्य प्रगाय अस्माभिः कृतं स्तोत्रमनुप्रश्लोकय। अथानंतरं यज्ञाय य
जमानाय गृणते स्तुवते वयोन्नं धाः देहि॥ द्वितीये रात्रिपर्याये अच्छावाकस्यास्य पिबेति शस्त्रयाज्या सूत्रितं च। अस्य पिबेति याज्येति।
॥ अथ द्वितीया॥ अस्य पिब यस्य जज्ञान इंद्र मदाय क्रत्वे अपिबो विरप्शिन्। तमु ते गावो नर आपो अद्रिरिंदुं समह्यन्पीतये सम्
अस्मै॥ हे इंद्र अस्य इमं सोमं पिब हे विरप्शिन् महन् जज्ञानो जायमान एव त्वं यस्य यं सोमं अपिबः पूर्वं पीतवानसि। किमर्थं मदाय ह
र्षाय क्रत्वे कर्मणे वृत्रवधादिलक्षणे वीर्यकर्मकरणाय च तमु तादृशमेवेंदुं सोमं गावः वृषभा विभक्ताः अयनसाधनाः नरो नेतारो ध्वर्यवः
आपो वसतीवर्याख्याः अद्रिरभिषवार्थो ग्रावा एते सर्वे अस्मै अस्येंद्रस्य नेतव्यपीतये पानार्थं समह्यन् संगमयन् हिगता विस्त्यैत
द्रूपं पुनः समिति पूरकः॥ अथ तृतीया॥ समिद्धे अग्नौ सुत इंद्र सोम आ त्वा वहंतु हरयो वहिष्ठाः। त्वायता मनसा जोहवीमींद्रा या
हि सुविताय महे नः॥ अग्नौ समिद्धे सम्यगिंधनैर्दीप्ते सोमे च सुते अभिषुते सति हे इंद्र त्वां वहिष्ठाः वोढृतमाः हरयोश्वाः आ
वहंतु इमं यज्ञं प्रत्यानयंतु अहं च त्वायता त्वां कामयमानेन मनसा जोहवीमि पुनःपुनराह्वयामि। हे इंद्र त्वं नोस्माकं महे महते सुवि
ताय कल्याणाय आ याहि आगच्छ॥ अथ चतुर्थी॥ आ याहि शश्वदुशता ययाथेंद्र महा मनसा सोमपेयं। उप ब्रह्माणि शृणव इमा
नो अथा ते यज्ञस्तन्वे वयो धात्॥ हे इंद्र पुरा शश्वत् बहु कृत्वो ययाथ सोमपानार्थं यज्ञं गतवानसि। अतः कारणात् उशता अस्मान्का

ऋ॰भा॰ मयमानेनमहामहतामनसासहसोमपेयसेन॰ [illegible] दशामस्मदीयंयज्ञंआयाहिअभिगछ। आगत्यचब्रह्माणिस्तोत्राणि
१२८ लिङ्गमाइदानींप्रयुज्यमानानिनोस्मदीयानिउपश्रृणवःउपशृणु। तथानंतरंयज्ञेषुयजमानस्तेतवतन्वेशरीरायत्वच्छरीरपोषार्थंवयो
न्नंसोमात्मकंधातदधातु॥ ॥अथपंचमी॥ ॥यदिंद्रदिविपार्येयदृधग्यद्वास्वेसदनेयत्रवासि॥ अतोनोयज्ञमवसेनियुत्वान्त्सजोषाः
पाहिगिर्वणोमरुद्भिः॥ ॥हेइंद्रपार्येपराग्दूरदेशेदिविद्युलोकेस्थयत्यदिवाऋधक्पृथक्एतत्पृथक्शब्देनसमानार्थंपृथगस्मिन्दे
शेवर्त्तसे। यद्वास्वेस्वकीयेसदनेगृहे। अथवाकिमनेनविशेषणेनयस्मिन्देशेअसिभवसिअतोस्मात्स्थानादागत्यहेगिर्वणः
गिरांसंभक्तरिंद्रनियुत्वान्नियुतोश्वाःतद्वान्मरुद्भिःसजोषाःसहप्रेर्यमाणस्त्वंनोस्माकमवसेरक्षणाययज्ञमस्मदीयंया
गंपाहिरक्षयद्वायज्ञंयजनसाधनंअस्मदीयंसोमंअवसेतर्पणायपाहिपिब॥ ॥इतिचतुर्थस्यसप्तमेद्वादशोवर्गः॥ ॥आहेलमा
नइतिपंचर्चंअष्टादशंसूक्तंभरद्वाजस्यार्षंत्रैष्टुभमैंद्रंअनुक्रांतंचाहेलमानइति। गतोविनियोगः॥ ॥तत्रप्रथमा॥ ॥आहेल
मानउपयाहियज्ञंतुभ्यंपवंतइंदवःसुतासः॥ गावोनवज्रिन्त्स्वमोकोअच्छेंद्रागहिप्रथमोयज्ञियानां॥ ॥हेइंद्रअहेलमानोऽ
क्रुध्यंस्त्वंयज्ञमस्मदीयंउपयाहिउपागच्छयतःकारणात्तुभ्यंत्वदर्थंसुतासःअभिषुताइंदवःसोमाःपवंतेप्रयुंतेदशापवित्रेणअ
ध्यंतेहेवज्रिन्वज्रवन्निंद्रगावोनस्वकीयंगोष्ठस्थानमिवस्वकीयमोकःस्थानंद्रोणकलशादिलक्षणंअच्छाभिमुख्येनप्राप्नुवंतीतिशेषः। राम १२८

रुजदरुग्णंविवलस्यसानुंपणींर्वचोभिरभियोधदिंद्रः॥ ॥अयमिंद्रःअद्रिंबलेनगोपिधानोपनिर्मितंशिलोच्चयंपर्यद्रिंपरितः
पर्वतसमीपेविद्यमानाउस्रागाःउशानःकामयमानःऋतधीतिभिःसत्यकर्मभिःअंगिरोभिःयुजानःसंगच्छमानःऋतयुक्तने
नक्तेनस्तोत्रेणचयुज्यमानःयुक्तश्चभूत्वावलस्यासुरस्यस्वभूतंसानुंसमुछ्रितंपर्वतंअरुग्णंअन्यैरभग्नंविरुजत्किंचप
णीन्बलानुचरानेतत्संज्ञानसुरांश्चवचोभिःस्तोत्रैरायुधैःसंतर्जनरूपैर्वाक्यैरेववायमिंद्रःप्रतियोधयत्अभ्ययुध्यत्॥ ॥अ
थतृतीया॥ ॥अयंद्योतयदद्युतोव्य१क्तून्दोषावस्तोःशरदइंदुरिंद्र॥ इमंकेतुमदधुर्नूचिदह्नांशुचिजन्मनउषसश्चकार॥ ॥
॥हेइंद्रत्वयानियम्यमानःपीयमानोवाइंदुःसोमःअद्युतःअद्योतमानान्अक्तून्अक्तिःरात्रिनामअत्ररचवत्सर्वंधातप
क्षमासादयोलक्ष्यंतेपक्षमासादीन्तथादोषारात्रिर्वस्तोर्दिवःशरदःसंवत्सरांश्चविद्योतयत्व्यदीपयत्कुतइत्यतआह। नूचि
दह्नांदेवाःइमंसोमंचंद्रात्मनानभसिवर्तमानंअक्तांदिवसानांकेतुंप्रज्ञापकंयस्माददधुःअकुर्वन्तस्मादनेनपक्षमासादयः
सर्वेप्रकाश्यंतेचंद्रगत्यधीनत्वात्तिथिविभागानांअपिचायंसोमःउषसःउषःकालान्शुचिजन्मनआसीयेनतेजसाशुभ्रोद
यान्चकारकरोति॥ ॥अथचतुर्थी॥ ॥अयंरोचयदरुचोरुचानोऽयंवासयद्व्यृ१तेनपूर्वीः॥ अयमीयतऋतयुग्भिरश्वैःस्वर्विदा
नाभिनाचर्षणिप्राः॥ ॥अयमिंद्रःरुचानोरोचमानःस्व[illegible]नादीप्यमानःप्रकाशरहितान्तमसामलीमसान्सर्वान्लोकान्

ऋ॰भा॰ तरः तथा चिकितुषे अभिज्ञायते तुभ्यं रणाय रमणीयाय [illegible] सन् श्रेष्ठो भवति सोमतिशयेन रमयतेत्यर्थः॥ हे तितिर्वः आतृणीत
१७९ रितारिंद्र यज्ञं साधनमेतं उपयाहि उपगतेन च सोमेन विश्वास्तविषीः सर्वाणि बलानि आपृणस्व आपूरय॥ ॥ अथ पंचमी॥ ॥
ह्वयामसि त्वेंद्र याह्यर्वाङरं ते सोमस्तन्वे भवाति॥ शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु॥ ॥ हे इंद्र त्वां ह्वयाम
सि आह्वयामः अतः कारणात् त्वं अर्वाङ् अस्मदभिमुखः सन् आयाहि आगच्छ अस्मदीयः सोमश्च ते तन्वे भवाति भवेत् शरीरा
य पर्याप्तो भवति भवतु त्वदीयं शरीरं यथाभिलषितं तर्पयत्वित्यर्थः॥ हे शतक्रतो बहुविधकर्मन्निंद्र त्वं सुतेषु अभिषुतेषु अस्मदीयेषु
सोमेषु मादयस्व तृप्यस्व मदस्तृप्तियोगे। तदनंतरं पृतनासु संग्रामेषु अस्मान् प्राव प्रकर्षेण रक्ष सर्वासु विक्षु अस्मान् प्राव प्ररक्ष॥ ॥
॥ इति चतुर्थस्य सप्तमे त्रयोदशो वर्गः॥ ॥ प्रत्यस्मा इति चतुर्ऋचं एकोनविंशं सूक्तं भरद्वाजस्यार्षमैंद्रं चतुर्थी बृहती शिष्टा अ
नुष्टुभः तथा चानुक्रांतं। प्रत्यस्मै चतुष्कमानुष्टुभं बृहत्यंतमिति। प्रातःसवने अच्छावाकस्येदमुन्नीयमानसूक्तं। सूत्रितं च। प्रत्यस्मा
इत्युन्नीयमानायानूच्येति॥ ॥ तत्र प्रथमा॥ ॥ प्रत्यस्मै पिपीषते विश्वानि विदुषे भर॥ अरंगमाय जग्मयेऽपश्चाद्दघ्वने नरे॥ ॥ हे अ
ध्वर्यो अस्मा इंद्राय प्रतिभर अभिहर सोमं प्रयच्छेत्यर्थः। कीदृशायेंद्राय पिपीषते पातुमिच्छते विश्वानि सर्वाणि विश्वानि विदुषे जानते राम
अरंगमाय अलं पर्याप्तगमनाय जग्मये यज्ञेषु गमनशीलाय अपश्चाद्दघ्वने दधिर्गतिकर्मा अपश्चाद्गमनाय सर्वेषामग्रगामिने न १७९

रे नेत्रे यज्ञानां॥ ॥ तृतीयसवने साम्नि निष्केवल्ये एमेनमिति स्तोत्रियस्तृचः। सूत्रितं च एमेनं प्रत्येतनेत्यादौ वा सर्वेषामिति॥ ॥ तत्र प्रथ
मा ऋक् द्वितीया॥ ॥ एमेनं प्रत्येतन सोमेभिः सोमपातमं॥ अमत्रेभिरृजीषिणमिंद्रं सुतेभिरिंदुभिः॥ ॥ हे अध्वर्यवः सोमेभिः सो
मैः करणभूतैः सोमपातमं अतिशयेन सोमस्य पातारमेनमिंद्रं आ अभिमुखं प्रत्येतन प्रतिगच्छत। नु ईमिति निपातो नर्थकः। कीदृश
मिंद्रं अमत्रेभिः अमत्रैः सोमपात्रैः ग्रहचमसादिभिः ऋजीषिणं ऋजीषं शत्रूणामुपार्जकं बलं तद्वंतं। यद्वा ऋजीषिणमित्यत्र
त्रसंबध्नीयं। सुतेभिरभिषुतैरिंदुभिः सोमैः ऋजीषिणं ऋजीषं गतसारः सोमऋजीषः तद्वंतं अथवा अमत्रैरमात्रैरपरिमितैः
अभिषुतैः सोमैः ऋजीषिणं ऋजेर्गत्यर्थः तद्भावसाधनो ऋजीषशब्दः ततो मत्वर्थीय इनिः सगतमित्यर्थः। एवंविधमिंद्रं प्रतिगच्छ
तेत्यन्वयः॥ ॥ अन्यस्त्वाह अमत्रैभिः सह चमसादिगतैः सोमैः ऋजीषिणं बलवंतमेनमिंद्रं प्रतिगच्छतेति॥ ॥ अथ तृतीया॥ ॥ यदी
सुतेभिरिंदुभिः सोमेभिः प्रतिभूषथ॥ वेदा विश्वस्य मेधिरो धृषत्तंतमिदेषते॥ ॥ हे अध्वर्यवः सुतैरभिषुतैः इंदुभिः रुंदनशी
लैः दीप्तैर्वा सोमेभिः सोमैः यदि प्रतिभूषथ इंद्रं प्रतिगच्छथ भूषालंकारे वित्यतस्येतद्रूपं। तदानीं मेधिरो मेधावी मेधायज्ञस्तद्वान्वा स
इंद्रः विश्वस्य विश्वं सर्वं भवदीयं कामं वेद जानाति ज्ञात्वा च धृषत् शत्रूणां धर्षकः सन् तं तमित् तं कामं एषते प्रापयति॥ ॥ अथ च
तुर्थी॥ ॥ अस्मा अस्मा इदंधसोऽध्वर्यो प्रभरा सुतं॥ [illegible] जेन्यस्य शर्धतोऽभिशस्तेरवस्परत्॥ ॥ अस्मा एवेंद्राय नान्यस्मै

ऋ०भा० हे अध्वर्यो ऽस्मै अंधसः सोमलक्षणस्यान्नस्य सुतं म [illegible] अहरप्रयच्छेति पावत्। स चेंद्रः समस्य सर्वस्य जेता अस्य शर्धतः उ
१९० त्साहमानस्य शत्रोः अभिशस्तेः अभिशंसनात् स्तुताद्धिंसनात् कुवित् बहुशः अवस्परत् अस्मान्पालयतु॥ इति चतुर्थस्य स
प्तमे चतुर्दशो वर्गः॥ ॥यस्य त्यदिति चतुर्ऋचं चतुर्विंशतितमं सूक्तं भरद्वाजस्यार्षं औष्णिहमैंद्रं। अनुक्रम्यते च। यस्योष्णिहमिति महा
व्रते निष्केवल्य औष्णिहतृचाशीतावेतत्सूक्तं तथैव पंचमारण्यके सूत्रितं। यस्य त्यच्छंबरं मद इति त्रयस्तृचा गायत्रा इति॥ ॥तत्र
प्रथमा॥ ॥यस्य त्यच्छंबरं मदे दिवोदासाय रंधयः॥ अयं स सोम इंद्र ते सुतः पिब॥ ॥हे इंद्र त्वं यस्य सोमस्य मदे पानेन जनिते हर्षे स
ति शंबरमसुरं दिवोदासाय राज्ञे रंधयः अहिंसीः यद्वा वशीकृतवानसि। रध्यतिर्वशगमने इति यास्कः। त्यदिति क्रियाविशेषणं त्य
त्तत् प्रसिद्धं यथा भवति तथा रंधय इत्यर्थः। हे इंद्र सोऽयं सोमस्ते त्वदर्थं सुतोऽभिषुतः अतस्तं पिब॥ ॥अथ द्वितीया॥ ॥यस्य ती
व्रसुतं मदं मध्यमंतं च रक्षसे॥ अयं स सोम इंद्र ते सुतः पिब॥ ॥हे इंद्र त्वं यस्य सोमस्य अवयवभूतं तीव्रसुतं तीक्ष्णं सतमभिषुतो य
स्यती व्रसुतं प्रातःसवनिकः तं मदं मदकरं सोमं सोमरसं मध्यं मध्यंदिनसवनगतं च सोमरसं रक्षसे रक्षसि सोऽयं सोमस्त्वदर्थ
मभिषुतः तं पिबेति॥ ॥अथ तृतीया॥ ॥यस्य गा अंतरश्मनो मदे दृल्हा अवासृजः॥ अयं स सोम इंद्र ते सुतः पिब॥ ॥यस्य सोमस्य म
दे सति अश्मनः अंतः गाः पणिभिरपहृता गाः दृल्हाः दृढं यथा भवति तथा निक्षिप्ताः अवासृजः मोचितवानसि। सिद्धमन्यत्॥ अथ चतुर्थी॥ ॥ राम १९०

यतः कारणात् हे इंद्र यज्ञियानां यज्ञार्हाणां देवानां मध्ये प्रथमो मुख्यः त्वं आगहि आगच्छ॥ ॥अथ द्वितीया॥ ॥या ते काकुत्सुकृता या
वरिष्ठा यया शश्वत्पिबसि मध्व ऊर्मिं॥ तया पाहि प्र ते अध्वर्युरस्थात् सं ते वज्रो वर्ततामिंद्र गव्युः॥ ॥हे इंद्र या ते तव काकुत् जिह्वा सुकृ
ता सुष्ठु धात्रा निर्मिता वरिष्ठा उरुतमा विस्तीर्णतमा यया त्वं मध्वो मधुनः सोमस्य ऊर्मिमूर्मिं शश्वद्बहुकृत्वः पिबसि पूर्वं तया जिह्व
या अस्मदीयं सोमं पाहि पिब तदर्थं अध्वर्युरध्वरस्य नेता ऋत्विक् गृहीतः सोमः सन् प्रास्थात् हविर्धानादुत्तरवेदिदेशं प्रत्यगमत् अ
पि च हे इंद्र गव्युः गाः शत्रुसंबंधीर्नीर्गा आत्मन इच्छन् ते त्वदीयो वज्रः संवर्ततां शत्रुभिः संगतो भवतु तान् हंत्वित्यर्थः॥ ॥अथ तृतीया॥ ॥
एष द्रप्सो वृषभो विश्वरूप इंद्राय वृष्णे समकारि सोमः॥ एतं पिब हरिवः स्थातरुग्र यस्येशिषे प्रदिवि यस्ते अन्नं॥ ॥द्रप्सो द्रवणशी
लो वृषभः कामानां वर्षिता विश्वरूपः बहुविधरूपोपेतः ईदृग्विध एष सोमः वृष्णे कामानां वर्षित्रे इंद्राय इंद्रस्य पानार्थं समकारि अ
भिषवादिभिः संस्कृतो भूत् हे हरिवः हरी अश्वौ तद्वन् हे स्थातः सर्वेषामधिष्ठातः उग्र उद्गूर्णबले इंद्र एतमीदृशं सोमं पिब यस्य सोम
स्य प्रदिवि जातावेकवचनं प्रतिभूतेषु दिवसेषु प्रगतेष्वहःसु वा ईशिषे त्वमेवेश्वरो भवसि। यश्च सोमस्ते तव अन्नं अन्नत्वेन परिकल्पि
तः एनं पिबेत्यन्वयः॥ ॥अथ चतुर्थी॥ ॥सुतः सोमो असुतादिंद्र वस्यानयं श्रेयांश्चिकितुषे रणाय॥ एतं तितिर्व उप याहि यज्ञं तेन
विश्वास्तविषीरापृणस्व॥ ॥हे इंद्र सुतोऽभिषुतो यः सोमः असुतात् अभिषुतात् सोमादन्यदीयात् वस्यान् वसीयान् वसुमत्तरः प्रशस्य

यैर्येन पीतेन प्रवृद्धो न प्रवृद्ध श्वसन् स्वाभिरूतिभिः आत्मीयैर्मरुद्भिः सार्धं शवसा बलेन तुरः शत्रूणां हिंसकश्च भवसि स सोमइ
त्यादि पूर्ववत् ॥ पृष्ठ्यषडहस्य चतुर्थेहनि प्रउगे शस्त्रे त्यमु वइत्यैंद्रस्तृचः सूत्रितं च ॥ त्यमु वो अप्रहणं अपस्यं हजिनं रिपुमिति ॥ तत्र प्रथ
मा सूक्ते चतुर्थी ॥ ॥ त्यमु वो अप्रहणं गृणीषे शवसस्पतिं । इंद्रं विश्वासाहं नरं मंहिष्ठं विश्वचर्षणिं ॥ ॥ हे ऋत्विग्यजमानाः वो युष्मद
र्थं त्यमु तमेवेंद्रं गृणीत स्तुवत वचनव्यत्ययः ॥ कीदृशमिंद्रं अप्रहणं अप्रहंतारं भक्तानामनुग्राहकं शवसो बलस्य पतिं पालकं विश्वा
साहं विश्वस्य शत्रोरभिभवितारं मंहिष्ठं दातृतमं नरं नेतारं विश्वचर्षणिं विश्वस्य द्रष्टारं ॥ ॥ अथ पंचमी ॥ ॥ यं वर्धयंतीद्गिरः पतिं तु
रस्य राधसः ॥ तमिन्वस्य रोदसी देवी शुष्मं सपर्यतः ॥ ॥ गिरः स्तुतयः इंद्रसंबंधिनं यमेव शुष्मं बलं वर्धयंति । कीदृशं पतिं ईश्वरं कस्य
तुरस्य हिंसकस्य शत्रोः राधसो धनस्य शत्रुधनानामपहर्तारमित्यर्थः । अस्येंद्रस्य तमित् तमेव शुष्मं शोषकं बलं देवी देवनशीले
रोदसी द्यावापृथिव्यौ नुक्षिप्रं सपर्यतः परिचरतः ॥ ॥ इति चतुर्थस्य सप्तमे षोडशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ तद्व उक्थस्य बर्हणेंद्रायोप
स्तृणीषणि ॥ विपो न यस्योतयो वि यद्रोहंति सक्षितः ॥ ॥ हे स्तोतारः वो युष्मदीयस्य उक्थस्य स्तोत्रस्य तद् बर्हणा वर्हणं माहात्म्यं इंद्राय
इंद्रार्थं उपस्तृणीषणि उपस्तरणीयं उपेत्य विस्तरणीयं इंद्रो यथा स्तोत्रस्य माहात्म्यं जानीयात् तथा विस्तार्यं तदित्यर्थः । यस्येंद्रस्य
ऊतयो रक्षाः विपो न मेधाविन इव भवंति सर्वकार्यकुशला इत्यर्थः । तद्वानिति पूर्वकः । विपो मेधाविनो यस्येंद्रस्येति योज्यं । यत् यस्मि

न्निंद्रे सक्षितः समानं निवासाः संहतयः तयः वि रोहंति प्रादुर्भवंति । तस्मादिंद्रायेत्यर्थः ॥ ॥ अथ सप्तमी ॥ ॥ अविदद्दक्षं मित्रो नवीयान्पपा
नो देवेभ्यो वस्यो अचैत् ॥ ससवान्स्तौलाभिर्धौतरीभिरुरुष्या पायुरभवत्सखिभ्यः ॥ ॥ स इंद्रः दक्षं कर्मसु समर्थं प्रवृद्धं वा यष्टारं अ
विदत् जानाति कीदृशः मित्रो मित्रं भूतः नवीयान् नवतरः कल्याणतरः स्तुत्यो वा सः पपानः सोमं पिबन् कीदृशः देवेभ्यः स्तोतृभ्यो
वस्यो वशीयः श्रेष्ठं धनं अचैत् चिनोति उपचितं करोति ददातीति यावत् । अपि च स ससवान् ससमित्यन्ननाम हविर्लक्षणान्नोपेतः सइं
द्रः स्तौलाभिः स्थूलाभिः प्रवृद्धाभिः धौतरीभिः कंपनकारिणीभिर्वज्रवाभिः ईदृशैर्मरुद्भिर्वायुक्तः सन् सखिभ्यः स्तोतृभ्यः उरुष्या रक्ष
णेच्छया गत्या पायुरभवत् रक्षको भवति । यद्वा ससवानिति सनतेः क्वसो रूपं । स्तौलाभिर्धौतरीभिः ससवान् संभजमान इति संबंधः ॥
॥ ॥ अथाष्टमी ॥ ॥ ऋतस्य पथि वेधा अपायि श्रिये मनांसि देवासो अक्रन् ॥ दधानो नाम महो वचोभिर्वपुर्दृशये वेन्यो व्यावः ॥ ॥ ऋत
स्य यज्ञस्य पथि मार्गे वेधाः विधाता सर्वस्य द्रष्टा सोमः अपायि इंद्रेण पीतो भूत् यद्वा वेधा विधाता इंद्रः अपायि सोमं पिबतु यस्य येन
कर्तरि चिण् । तस्मिन्सोमे इंद्रस्य मनांसि श्रिये आश्रयितुं देवासः स्तोतारः ऋत्विजः अक्रन् कर्माणि कुर्वंति स चेंद्रो नाम शत्रूणां नामकं महो
महः आत्मीयं च वपुः शरीरं दधानो धारयन् वचोभिः वेन्यो वननीयः संभजनीयः सदृशये दर्शनार्थं यावः विवृणोतु प्रकाशयतु
अनुकूले तेज इति शेषः । यद्वा वेन्य इति वेनतेः कांतिकर्मणो रूपं । वपुरिति रूपनाम । वेन्यः कमनीयः वपुर्भास्वरं रूपं दृशये दर्शनार्थं

ऋ०भा० त्वं व्यावः विवृणोतु वत्तोभिस्तूयमानः सन् ॥ ॥ अथ नवमी ॥ ॥ द्युमत्तमं दक्षं धेह्यस्मे सेधा जनानां पूर्वीररातीः ॥ वर्षीयो वयः कृणुहि
१८२ शचीभिर्धनस्य सातावस्माँ अविड्ढि ॥ ॥ हे इंद्र द्युमत्तमं दक्षं बलमस्मे अस्मासु धारय धेहि जनानां यजमानानां स्तोतॄणामस्माकं पूर्वीर्ब-
ह्वीररातीः शत्रुसेनाः सेध निषेध निवारय अपि च अस्मे अस्माकं वर्षीयः वृद्धतरं वयो अन्नं शचीभिरात्मीयाभिः प्रज्ञाभिः कृणुहि कु-
रुत । धनस्य सातौ संभजने अस्मान् अविड्ढि अव । यद्वा धनस्य संभजनार्थं अस्मान् रक्ष ॥ ॥ अथ दशमी ॥ ॥ इंद्र तुभ्यमिन्मघवन्नभूम
वयं दात्रे हरिवो मा वि वेनः ॥ नकिरापिर्ददृशे मर्त्यत्रा किमंग रध्रचोदनं त्वाहुः ॥ ॥ हे मघवन् धनवन्निंद्र दात्रे कामानां दात्रे तुभ्यमित् तुभ्य-
मेव वयं शेषभूता अभूम यद्वा तदर्थमेव दात्रे हविषां दात्रे वर्तमाना अभूम हे हरिवः हरिवन्निंद्र अतः कारणात् मा वि वेनः माविगतका-
मो भूः अस्मान् सर्वदा कामयस्वेत्यर्थः वेनतिः कांतिकर्मा । मर्त्यत्रा मर्त्येषु मनुष्येषु मध्ये आपिर्बंधुः त्वत्तोन्यः कश्चिदपि नकिर्ददृशे नैव दृश्य-
ते । किमन्येन विशेषकथनेन अंग हे इंद्र त्वां रध्रचोदनं रध्रस्य राधकस्य समृद्धस्य धनस्य चोदनं चोदयितारं आहुः कथयंति पुराणाः ।
॥ ॥ इति चतुर्थस्य सप्तमे सप्तदशो वर्गः ॥ ॥ अथैकादशी ॥ ॥ मा जस्वने वृषभ नो ररीथा मा ते रेवतः सख्ये रिषाम ॥ पूर्वीष्ट इंद्र निष्षि-
धो जनेषु जह्यसुष्वीन् प्र वृहापृणतः ॥ ॥ हे वृषभ कामानां वर्षितरिंद्र जस्वने जसिरुपक्षयकर्मा उपक्षयित्रे राक्षसाय नो अस्मान् मा र-
रीथाः मा दाः रेवतो धनवतः तव सख्ये सखित्वे वर्तमाना वयं मा रिषाम हिंसिता मा भूम हे इंद्र ते त्वदीयाः पूर्वीर्बह्वीः निष्षिधः निषेधाः राम
१८२

॥ यस्य मंदानो अंधसो माघोनं दधिषे शवः ॥ अयं स सोम इंद्र ते सुतः पिब ॥ ॥ हे इंद्र यस्य अंधसः सोमलक्षणस्यान्नस्य दानेन मंदा-
नो हृष्टः सन् माघोनं ऐंद्रं शवः आसाधारणं बलं दधिषे धारयसि येन सोमेन त्वमिंद्रत्वं जातमित्यर्थः । सोमयः सोमः सुतोभिषुतः त्वं
पिब ॥ ॥ इति चतुर्थस्य सप्तमे पंचदशो वर्गः ॥ ॥ इति षष्ठे मंडले तृतीयोनुवाकः ॥ ॥ चतुर्थेनुवाके षड् सूक्तानि ॥ ॥ तत्र यो रयिव इति
चतुर्विंशत्यृचं प्रथमं सूक्तं । बृहस्पतिपुत्रस्य शंयोरार्षमैंद्रं आदितः षडनुष्टुभः । सप्तम्यष्टमी नवम्यो विराजः । अष्टम्येके ववावि-
राट् । शिष्टास्त्रिष्टुभः । तथा चानुक्रांतं । यो रयिवः चतुर्विंशतिः शंयुर्बार्हस्पत्यो द्यादो षडनुष्टुभः । तिस्रश्च विराजो मध्यमे ववा-
सामिति गतः सूक्ते विनियोगः ॥ ॥ तत्र प्रथमा ॥ ॥ यो रयिवो रयिंतमो यो द्युम्नैर्द्युम्नवत्तमः ॥ सोमः सुतः स इंद्र तेस्ति स्वधापते मदः ॥
॥ हे रयिवो धनवन्निंद्र यः सोमः रयितमः अतिशयेन रयिमान् धनवान् यश्च द्युम्नैर्द्योतमानैर्यशोभिः द्युम्नवत्तमो तिशयेन यश-
स्वी हे स्वधापते स्वधायाः अन्नस्य सोमलक्षणस्य पालकेंद्र स सोमोभिषुतः यत्ते तव मदः मदकरः अस्ति भवति ॥ ॥ अथ द्वितीया ॥ ॥
॥ यः शग्मस्तुविशग्म ते रायो दामा मतीनां ॥ सोमः सुतः स इंद्र तेस्ति स्वधापते मदः ॥ ॥ हे तुविशग्म बहुसुखेंद्र यः शग्मः सुखक-
रः त्वदीयः सोमः मतीनां स्तोतॄणां रायो धनस्य दामा दाता भवति हे स्वधापते इंद्र सोमोभिषुतः यत्ते तव मदः मदकरः अस्ति भवति ॥
॥ ॥ अथ तृतीया ॥ ॥ येन वृद्धो न शवसा तुरो न स्वाभिरूतिभिः ॥ सोमः सुतः स इंद्र तेस्ति स्वधापते मदः ॥ ॥ इमो न शब्दो समुच्चये ।

॥ सैषा सूक्ते चतुर्दशी ॥ ॥ अस्य मदे पुरु [illegible] इंद्रो [illegible]ण्यप्रती जघान ॥ तमु प्र होषि मधुमंतमस्मै सोमं वीराय शिप्रिणे
पिबध्यै ॥ ॥ अस्य सोमस्य पानेन मदे हर्षे विद्वान् अभिज्ञः पुरु पुरूणि बहूनि वर्पांसि आवरकाणि वृत्राणि शत्रून् अप्रतिस्वयमन्ये
नप्रतिगतः सन् जघान हतवान् मधुमंतं माधुर्यवंतं तमु तमेव सोमं शिप्रिणे शोभनहनुकाय अस्मै वीराय शत्रूणां वीरयित्रे इंद्राय
पिबध्यै पातुं प्रहोषि हे अध्वर्यो जुहुधि ॥ ॥ द्वितीये रात्रिपर्याये मैत्रावरुणस्यैव पाता सुतमिति याज्या सूत्रितं च । पाता सुतमिंद्रो अस्तु
सोमं हंता वृत्रमिति याज्येति ॥ ॥ सैषा पंचदशी ॥ ॥ पाता सुतमिंद्रो अस्तु सोमं हंता वृत्रं वज्रेण मंदसानः ॥ गंता यज्ञं परावतश्चिदच्छा
वसुर्धीनामविता कारुधायाः ॥ ॥ अयमिंद्रः सुतमभिषुतं सोमं पाता अस्तु साधु पाता अस्तु वत् साधुकारिणि तृन् । अत एव न लोकाव्ययेति
षष्ठी प्रतिषेधात् द्वितीया । एवं हंतेत्यादावपि द्रष्टव्यं । तेन च सोमेन मंदसानः माद्यन् वज्रेण आयुधेन वृत्रमावरकं शत्रुं हंतास्तु भवतु । ए
तदुभयार्थं परावतश्चित् दूरदेशादपि यज्ञं अच्छ अस्मदीयं यज्ञमभिगंता भवतु दूरदेशस्थोपि शीघ्रमस्मद्यज्ञे सोमपानायागच्छत्वि
त्यर्थः । कीदृश इंद्रः वसुः सर्वेषां निवासयिता धीनां धातॄणां स्तोतॄणां यजमानानां कारुधायाः कर्मणां वा अविता रक्षिता कारुधायाः
कारूणां कर्तॄणां यजमानानां धारयिता ॥ ॥ इति चतुर्थस्य सप्तमेऽध्याये द्वादशो वर्गः ॥ ॥ तृतीये रात्रिपर्याये प्रशास्तुरिदं त्यदिति शास्त्र
याज्या सूत्रितं च । इदं त्यत्पात्रमिंद्रपानमिति याज्येति ॥ ॥ सैषा षोडशी ॥ ॥ इदं त्यत्पात्रमिंद्रपानमिंद्रस्य प्रियममृतमपायि ॥ मत्सद्

यथा सौमनसाय देवं व्यस्मद्द्वेषो युयवद्व्यंहः ॥ ॥ पात्रं पातव्यं इंद्रपानं इंद्रस्य पाता इंद्रस्य प्रियं अनुकूलं त्यत् तदिदं सोमात्मकममृतं
अपायि इंद्रः पिबतु व्यत्ययेन कर्तरि चिण् । यद्वा एतदमृतं अपायि इंद्रेण यथा येन प्रकारेण पीतः सोमः सौमनसाय सौमनस्याय दे
वमिंद्रं मत्सत् मादयेत् तथा पीयतामित्यर्थः । स पीतसोम इंद्रः द्वेषो द्वेष्टॄन् अस्मत् अस्मत्तः युयवत् वियोजयतु अंहः पापं च अस्मत्तो
वियोजयतु ॥ ॥ अथ सप्तदशी ॥ ॥ एना मंदानो जहि शूर शत्रून् जामिमजामिं मघवन्नमित्रान् ॥ अभिषेणाँ अभ्यादेदिशानान् पराच
इंद्र प्र मृणा जही च ॥ ॥ मघवन् धनवन् शूर शौर्यवन्निंद्र एना एनेन प्रकृतेन मानेन सोमेन मंदानो मोदमानो मघवन् जामिं ज्ञातिं अ
जामिं तद्विलक्षणमेव उभयविधानमित्रान् अस्मत्प्रतिकूलाचरणपरान् शत्रून् जहि हिंसितान् कुरु किं च अभिषेणान् अस्मान
त्यभिगताः सेना येषां तादृशान् अस्मदभिमुखं आदेदिशानान् आयुधानि पुनः पुनः आदिशतो विसृजतः शत्रून् हे इंद्र पराचः प्र
मृण । ते यथा पराङ्मुखा भवंति तथा बाधकस्त्वं अनंतरं तान् जहि च ॥ ॥ अथाष्टादशी ॥ ॥ आसु ष्मा णो मघवन्निंद्र पृत्स्व१स्मभ्यं महि
वरिवः सुगं कः ॥ अपां तोकस्य तनयस्य जेष इंद्र सूरीन् कृणुहि स्मा नो अर्धम् ॥ ॥ हे मघवन् धनवन्निंद्र नोस्मदीयासु आसु पृत
नासु संग्रामेषु अस्मभ्यं महि महत् सुगं सुप्राप्यं वरिवो धनं कः कृधि कुरुष्वेति यावत् । अपि च हे इंद्र अपां आप्यानां धनानां तोकस्य
पुत्रस्य तनयस्य पौत्रस्य वा जेषः जयार्थं सूरीन् [illegible] नोस्मान् अर्धं ऋद्धान् समृद्धान् कृणुहि कुरु । यद्वा अर्धकारिणः शत्रूणां र्धं

च॰भा॰ इ पित्वन्न कुरुस्वेति पूरणः॥ ॥अथैकोनविंशी॥ ॥आ [illegible] वृषणो युजाना वृषरथासो वृषरश्मयोऽत्याः॥ अस्मत्रांचो वृषणो वज्रवा
१८४ हो वृष्णे मदाय सुयुजो वहंतु॥ ॥हे इंद्र त्वा त्वां हरयः अश्वाः इमे वर्षित्रे मदाय मदकराय सोमाय इंद्रः सोमं पाययितुं आ वहंतु कीदृशा
अश्वाः वृषणः कामानां वर्षितारः युजानाः स्वयमेव रथे युज्यमानाः वृषरथासः वृषा कामाभिवर्षको रथो येषां ते तथोक्ताः वृषरश्मय
वर्षितारो रश्मयः प्रग्रहा येषां तादृशाः अत्याः सततगामिनः अस्मत्रांचः अस्मान्प्रत्यंचं तो गच्छंतः वृषणो नित्यतरुणाः वज्रवाहः
वज्रादीन्यायुधानि वहंतः सुयुजः शोभनयोजनाः॥ ॥अथविंशी॥ ॥आ ते वृषन्वृषणो द्रोणमस्थुर्घृतप्रुषो नोर्मयो मदंतः॥ इंद्र प्र तु
भ्यं वृषभिः सुतानां वृष्णे भरंति वृषभाय सोमं॥ ॥हे वृषन् कामानां वर्षितरिंद्र वृषणः सेक्तारो युवानः त्वदीयाः अश्वाः घृतप्रुषो नोर्मयः
घृतमुदकं सिंचंतः क्षरंतः सामुद्राः तरंगा इव मदंतः हृष्यंतः संतः ते त्वदीयं द्रोणं द्रुममयं रथं अस्थुः आस्थितवंतः अत त्वमागच्छेति
भावः कुत इत्यत आह। हे इंद्र त्वस्मै यूने नित्यतरुणाय वृषभाय कामानां वर्षित्रे तुभ्यं वृषभिः कामाभिवर्षकैः ग्रावभिः सुतानामभिषु
तानां सोमानां मध्ये त्वद्भागरूपं सोमं यस्माद् अध्वर्यवः प्रभरंति प्रहरंति होमार्थं प्रणयंति। तस्मादागच्छेत्यर्थः॥ ॥इति चतुर्थस्य सप्तमे
एकोनविंशो वर्गः॥ ॥अथैकविंशी॥ ॥वृषासि दिवो वृषभः पृथिव्या वृषा सिंधूनां वृषभः स्तियानां॥ वृष्णे त इंदुर्वृषभ पीपाय स्वादू रसो राम
मधुपेयो वराय॥ ॥हे इंद्र त्वं दिवो द्युलोकस्य वृषा वृषासि हविर्भिः सिंचसि सकामं वर्षसि पृथिव्या भूमेश्च वृषभः कामानां वर्षितासि सिंधूनां स्य १८४

निवारणानि जनेषु शत्रुषु निहिताः संति। यद्वा निषिधः निवेधनार्थो रज्जवः ताः शत्रुजनेषु बद्धा विद्यते अतः कारणात् असुषीन् अ
भिषो त्वान् अयजमानान् जहि मारय अप्रणतः हवींषि प्रयच्छतस्त्वं प्रवृह उत्मूलय। पृण दान इति धातुः॥ ॥अथ द्वादशी॥ ॥उदभ्रा
णीव स्तनयन्नियर्तींद्रो राधांस्यश्व्यानि गव्या॥ त्वमसि प्रदिवः कारुधाया मा त्वादामान आ दभन्मघोनः॥ ॥अभ्राणीव स्तनयन् गर्जयन्
पर्जन्यः यथा मेघान् उद्गमयति एवमिंद्रः अश्व्यानि अश्वसंबंधीनि गव्या गव्यानि गोसंबंधीनि एतत्समूहरूपाणि राधांसि धनानि
उदियर्ति उदीरयति उद्गमयति स्तोतृभ्यो दातुं। उत्तरार्धः प्रत्यक्षकृतः हे प्रदिवः पुराणस्त्वं कारुधायाः कारूणां स्तोतॄणां धारयिता
सि भवसि। त्वादामानः त्वां मघोनो धनवतः कृपणाः अदामानः हविषामदातारः मा आ दभन् मा हिंसिषुः। यद्वा वचनव्यत्ययः मघवान् ध
नवंतं त्वामिति संबंधः॥ ॥अथ त्रयोदशी॥ ॥अध्वर्यो वीर प्र महे सुतानामिंद्राय भर स ह्यस्य राजा॥ यः पूर्व्याभिरुत नूतनाभिर्गीर्भिर्वा
वृधे गृणतामृषीणां॥ ॥हे वीर हविषां विशेषण त्वेनरसयितरध्वर्यो महे महते अस्मा इंद्राय सुतानां कर्मणि षष्ठी॥ सुतानभिषुतान् सो
मान् प्रभर प्रहर प्रगमय स हि खलु इंद्रः अस्य सोमस्य राजा स्वामी भवति य इंद्रः पूर्व्याभिः पूर्वकाले कृताभिः उत अपि च नूतनाभिः
इदानीं क्रियमाणाभिः गृणतो स्तुवतामृषीणां संबंधिनीभिर्गीर्भिरुभयविधाभिः स्तुतिभिर्वावृधे वर्धते स इंद्रः सोमस्य राजा तस्मादस्मै
सोमः प्रदेय इत्यर्थः॥ ॥प्रथमे रात्रिपर्याये [illegible] इति शस्त्र्या याज्या। सूत्रितं च। अस्य मद पुरुवर्पासि विद्वानिति याज्येति॥

स्रुतत्वकारणं पीयूषं विंदत् अविंदत् अ[illegible]तहे इंद्र [illegible] देवमेवं सोमः कृतवानिति इंद्रस्य कृतिरधिगंतव्या। यद्वा इदं शब्देन
इंद्र एव परामृश्यते अयमिंद्रः उषसः शोभनपतिका अकरोत् अयमेव सूर्ये ज्योतिरदधात्। दिवि द्युलोके सवनेषु राजमानेषु त्रिषु त्रि
स्थानगतेषु देवेषु मध्ये अयमेवेंद्रः त्रिधातु सवनत्रयात्मना त्रिप्रकारं निगूढं पात्रैः संवृतं अमृतं अमरणहेतुभूतं सोमं अविंदत् अ
लभत॥ ॥ अथ चतुर्थी॥ ॥ अयं द्यावापृथिवी विष्कभायदयं रथमयुनक् सप्तरश्मिं॥ अयं गोषु शच्या पक्वमंतः सोमो दाधार दश
यंत्रमुत्सं॥ ॥ अयं सोमो द्यावापृथिवी दिवं च पृथिवीं च विष्कभायत् विविधमस्थापयत् अपि च अयं सोमः सूर्यस्य च रथं सप्तरश्मिं
यो सप्तरश्मिभिः किरणैरुपेतं सप्ताश्वं सप्तचक्रं वा अयुनक् अयोजयत् अयं सोमः गोषु धेनुषु अंतर्मध्ये पक्वं निष्पन्नं शच्या प्रज्ञया संकल्पा
पतया उत्सं उत्सरणशीलं पयो दाधार धारयति। दशयंत्रं उत्सस्य गर्भहेतुनिश्रोषणमेतत्। उत्सरणहेतुभूतैर्दशभिश्चक्षुः श्रोत्रादि
भिर्यंत्रैरुपायैर्युक्तं। इदं च पदं खे लिके न मंत्रांतरेण व्याख्यायते। चक्षुश्च श्रोत्रं च मनश्च वाक्च प्राणापानौ देह इदं शरीरं। द्वौ प्रत्ये
चावनुलोमौ विसर्गावेतं तमन्येदशयंत्रमुत्समिति॥ यद्वा अयमिंद्रः द्यावापृथिवी विष्कभायत् स्वे स्वे स्थाने स्थिते अकरोत् अयमेव
सप्तरश्मिः सूर्यस्य रथमयुनक् अयमेवेंद्रो गोषु अंतः शच्या आत्मीयेन कर्मणा पक्वं पयो धारयति एवंभूतेंद्रार्थं सोमः दशभिर्यंत्रैर्दशसं
ख्याकैरैंद्रवायवादिभिरयं त्रितैर्ग्रहीतैरुपेतं। उत्सं उत्सरणशीलं रसं दाधार प्रातःसवने ऐंद्रवायवादयो दश ग्रहा गृह्यंते। तथा च ब्रा राम १८५

ह्मणं। प्रातःसवने ग्रहान् गृह्णातीति तदभिप्रायेण दशयंत्रमिति विशेषणं॥ ॥ इति चतुर्थस्य सप्तमे विंशो वर्गः॥ ॥ य आनयदिति त्र
यस्त्रिंशदृचं द्वितीयं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षं पुरुतममिति एषा अतिनिचृत् त्रयः सप्तकाः पादनिचृत् मध्यमः षट्कश्चेदतिनिचृ
दित्युक्तलक्षणा त्रयस्त्रिंशी अनुष्टुप् शिष्टा गायत्र्यः। आद्ये वृबुः पणीनामित्यस्मिंल्लोके तं वेबुनाम तक्षा स्तूयते अतस्तत् तृच
देवताकः शिष्टास्त्रिंशदैंद्र्यः तथा चानुक्रांतं। य आनय त्रयस्त्रिंशदाद्या च पुरुतममतिनिचृदंत्यानुष्टुप् तृचं वृबुस्तक्षा देवतमिति।
महाव्रते निष्केवल्ये अयं तृचवर्जमेतत्सूक्तं तथैव पंचमारण्यके य आनयत्परावत इति निविद्धानमौध्वरतीति॥ ॥ तत्र प्रथमा॥ ॥
॥ य आनयत्परावतः सुनीती तुर्वशं यदुं॥ इंद्रः स नो युवा सखा॥ ॥ य इंद्रः तुर्वशं यदुं च एतन्नामकौ राजानौ शत्रुभिर्दूरदेशे प्रक्षिप्तौ
सुनीती सुनीत्या शोभनेन नयनेन परावतः तस्मात् दूरदेशात् आनयत् आनीतवान् युवा तरुणः स इंद्रः नोऽस्माकं सखा भवतु॥ ॥
॥ अथ द्वितीया॥ ॥ अविप्रे चिद्वयो दधदनाशुना चिदर्वता॥ इंद्रो जेता हितं धनं॥ ॥ अविप्रे चित् विप्रात् भिन्नलक्षणेऽपि पुरुषे वयोऽन्नं दध
त्। इंद्रो धारयसि। किमु वक्तव्यं स्तोतरि धारयतीति। इंद्रः अनाशुना चित् अक्षिप्रगमनेनापि अर्वताश्वेन हितं शत्रुषु निहितं स्थापितं
धनं जेता जयनशीलो भवति जयते स्ताच्छील्ये तृन् न लोकाव्ययेति षष्ठीप्रतिषेधः॥ ॥ अथ तृतीया॥ ॥ महीरस्य प्रणीतयः पूर्वीरु
त प्रशस्तयः॥ नास्य क्षीयंत ऊतयः॥ ॥ अस्येंद्रस्य प्रणीतयः प्रापणानि महीः महान्ति महत्यो भवंति। उतापि च प्रशस्तयः प्रकृष्टाः स्तु

तयः स्तोतृभिः क्रियमाणाः पूर्वीर्बह्व्यो भवंति तथा अस्येंद्रस्य ऊती ऊतयो रक्षाः न क्षीयंते नापचीयंते किंतु सर्वदा वर्धंत एव ॥ ॥अथ चतुर्थी ॥
॥सखायो ब्रह्मवाहसेऽर्चत प्र च गायत ॥ स हि नः प्रमतिर्मही ॥ ॥हे सखायः समानख्यानाः स्तोतार ब्रह्मवाहसे ब्रह्मभिर्मंत्रैर्वह-
नीयाय प्राप्तव्यायेंद्राय अर्चत शस्त्राणि शंसत प्रगायत च स्तोत्राणि स खल्विंद्रः नोऽस्माकं मही महती प्रमतिः प्रकृष्टा बुद्धिः इंद्र-
श्याबुधेः प्रदातेत्यर्थः ॥ ॥अथ पंचमी ॥ ॥त्वमेकस्य वृत्रहन्नविता द्वयोरसि ॥ उतेदृशे यथा वयं ॥ ॥हे वृत्रहन् वृत्राणां शत्रूणां
हंतरिंद्र त्वमेकस्यैकस्य स्तोतुर्द्वयोश्च स्तोत्रोरविता रक्षितासि सर्वेषां स्तोतॄणां रक्षको भवसीत्यर्थः ॥ उतापि च ईदृशे जनेऽप्यवितासि य-
था यादृशा वयं त्वया रक्षिता बहुविधपुत्रपौत्रा अभूम ॥ ईदृशस्यापि जनस्य त्वमेव रक्षको नान्य इत्यर्थः ॥ ॥इति चतुर्थस्य सप्तमे ए-
कविंशो वर्गः ॥ ॥अथ षष्ठी ॥ ॥नयसीद्वति द्विषः कृणोष्युक्थशंसिनः ॥ नृभिः सुवीर उच्यसे ॥ ॥इंद्र त्वमेव द्विषः द्वेष्टॄन् अति
नयसि अस्मान् अतिनयसि तारयसि ॥ उ इति पूरकः ॥ तथा उक्थशंसिनः उक्थानि शस्त्राणि शंसतः स्तोतॄन् अस्मान् कृणोषि समृद्धान्
करोषि यस्मात्त्वं नृभिः स्तोतॄणां नेतृभिः पुरुषैः सुवीरः शोभनवीरैः पुत्रपौत्रादिभिः स्तोतृभ्यो दातव्यैरुपेत इत्युच्यसे अतस्त्वान
स्मानुप्रयच्छेति शेषः ॥ ॥अथ सप्तमी ॥ ॥ब्रह्माणं ब्रह्मवाहसं गीर्भिः सखायमृग्मियं ॥ गां न दोहसे हुवे ॥ ॥ब्रह्माणं परिवृढं ब्रह्म-
वाहसं ब्रह्मभिः स्तुतिभिः स्तोत्रैर्मंत्रैर्वहनीयं सखायं अस्माकं सखिभूतं ऋग्मियं ऋग्मं ऋचं स्तुतिमर्हमित्यर्थः ॥ एवंभूतमिंद्रं दोहसे दोग्धा राम
१८६

स्नशीलानां च नदीनां वृषा वर्षेण पूरयितासि तथा स्तियानां संघीभूतानां स्थावरजंगमात्मनां प्राणिनां वृषभः कामानां वर्षिता भवसि यद्वा
स्तियाः संघीभूता आपः तासां वर्षितासि वृषभकामानां वर्षके इंद्र वराय श्रेष्ठाय वृषभे सेक्त्रे ते तुभ्यं त्वदर्थं स्वादुर्मधुः रसो रसनीयः प्रशस्यो
रसवान् चारसात्मको वा मधुपेयो मधुवत्पातव्यः इंदुः सोमः पीपाय प्यायते वर्धते अतस्त्वमागत्य तं सोमं पिबेति भावः ॥ ॥अथ द्वाविंशी ॥ ॥
अयं देवः सहसा जायमान इंद्रेण युजा पणिमस्तभायत् ॥ अयं स्वस्य पितुरायुधानींदुरमुष्णादशिवस्य मायाः ॥ ॥देवो द्योतमानः अय-
मिंदुः सोमः इंद्रेण युजा सख्या सह जायमानः प्रादुर्भवन् पणिं पणिर्जंगवामादातारं बलाख्यमसुरं यद्वा पणीनां स्वामिना सपणि-
रित्युच्यते तमसुरं सहसा बलेन अस्तभायत् अस्तभ्नात् न्यरुधत् अपि च स्वस्य साधनगोरूपस्य पितुः पालयितुः अशिवस्य असुखक-
रस्य बलस्य आयुधानि वज्रादीनि मुष्णात् अपाहरत् तदीया मायाश्चामुष्णात् ॥ हे इंद्र त्वं मत्सखस्य बलात् एतत्सर्वं सोमः कृतवान् अत-
स्य महिमा केनैव वर्णयितुं शक्यत इतींद्रस्योक्तिः ॥ ॥अथ त्रयोविंशी ॥ ॥अयमकृणोदुषसः सुपत्नीरयं सूर्ये अदधाज्ज्योतिरंतः ॥ अ-
यं त्रिधातु दिवि रोचनेषु त्रितेषु विंददमृतं निगूळ्हं ॥ ॥अयं सोमः उषसः उषःकालान् सुपत्नीः शोभनपतिः पालकः सूर्यो यासामुषसां
सदृशीरकृणोत् अकरोत् अयमेव सूर्ये सूर्यमंडले अंतर्मध्ये ज्योतिस्तेजः अदधात् निहितवान् त्रिधातु सवनत्रयरूपेण त्रिःप्रकारं अयं
लतारूपः सोमः दिवि द्युलोके रोचनेषु रोचमानेषु त्रितेषु त्रिस्थानेषु ततेषु विस्तृतेषु देवेषु निगूळ्हं नितरां गूढं अदृश्यतया वर्तमानम्

ऋ॰भा॰ त्वद्धि॒ष्याभिः॥ प्रीतेन त्वया अनुगृहीता वयं अर्वद्भिर[illegible]रश्वैः अर्वतः॥ शत्रुसंबंधिनोश्वान् अवाप्यान् अवलीयान् प्रशस्यान् वाजा
१८७ न्वा निवहितं शत्रुषु निहितं धनं त्वं जेषम त्वदनुग्रहाज्जयेम॥ ॥अथ त्रयोदशी॥ ॥अभूरु वीर गिर्वणो महाँ इंद्र धने हिते॥ भरे वितंत
साय्यः॥ ॥हे वीर विविधमीरयतः शत्रूणां हे गिर्वणो गीर्भिर्वननीयेंद्र हिते धने निमित्तभूते सति महान् अवृद्धस्त्वं भरे संग्रामे वितंतसा
य्यः॥ शत्रूणां जेता अभूत्। तस इति धातुर्जयार्थः। कंद्वादीपञ्चाते। तस्माद्व्युपसृष्टात् औणादिकः कर्तरि आय्यप्रत्ययः॥ ॥अथ चतुर्दशी॥ ॥
या त ऊतिरमित्रहन्मक्षूजवस्तमासति॥ तया नो हिनुही रथं॥ ॥हे मित्रहन् अमित्राणां शत्रूणां हंतरिंद्र ते त्वदीया मक्षुजवस्तमा अति
शयेन शीघ्रजवा या ऊतिर्गतिः असति अस्ति तया गत्या नोस्माकं रथं हिनु हि प्रेरय शत्रुजयार्थं शीघ्रं गमय॥ ॥अथ पंचदशी॥ ॥स र
थेन रथीतमोस्माकेनाभियुग्वना॥ जेषि जिष्णो हितं धनं॥ ॥हे जिष्णो जयनशीलेंद्र रथीतमो अतिशयेन रथी महारथः स त्वं अस्माके
न अभियुग्वना अतिशयोक्त्या शत्रूणामभिभवित्रा रथेन हितं शत्रुषु निहितं धनं जेषि अस्मदर्थं जय॥ ॥इति चतुर्थस्य सप्तमे त्रयोविं
शो वर्गः॥ ॥अथ षोडशी॥ ॥य एक इत्तमु ष्टुहि कृष्टीनां विचर्षणिः॥ पतिर्जज्ञे वृषक्रतुः॥ ॥विचर्षणिः विशेषेण सर्वस्य द्रष्टा वृष
क्रतुः वर्षककर्मा य इंद्रः एक इत् एक एव कृष्टीनां पतिरधिपतिर्जज्ञे अजायत नान्यः कश्चित् तमु तमेवेंद्रं हे स्तोतः स्तुहि॥ ॥अथ सप्तदशी॥ ॥
॥यो गृणतामिदासिथापिरूती शिवः सखा॥ स त्वं न इंद्र मृळय॥ ॥हे इंद्र त्वं ऊती ऊत्या रक्षया शिवः सुखकरः अत एव सखा मि राम १८७

त्रभूतश्च सन् गृणतां मित्रस्तुवतामस्माकमेव आपिर्बंधुरासिथ पुरा बभूविथ स तादृशस्त्वं नोस्मानिदानीं मृळय सुखय॥ ॥अथाष्टादशी॥ ॥
॥धिष्व वज्रं गभस्त्यो रक्षोहत्याय वज्रिवः॥ सासहीष्ठा अभि स्पृधः॥ ॥हे वज्रिवः वज्रवन्निंद्र गभस्त्योरात्मीययोर्हस्तयोः वज्रं कुलि
शं धिष्व धारय किमर्थं रक्षोहत्याय रक्षसां हननार्थं धृत्वा च स्पृधः स्पर्धमानाः अभिगंत्रीरासुरीः सेनाः सासहीष्ठाः असर्षमभिभव॥
॥ ॥अथैकोनविंशी॥ ॥प्रत्नं रयीणां युजं सखायं कीरिचोदनं॥ ब्रह्मवाहस्तमं हुवे॥ ॥प्रत्नं चिरंतनं सर्वदा माघं रयीणां धनानां युजं
योजयितारं सखायं मित्रभूतं कीरिचोदनं कीरीणां स्तोतॄणां चोदयितारं ब्रह्मवाहसं अतिशयेन ब्रह्मभिर्मंत्रैर्वहनीयं एवंविधमिंद्रं
हुवे आह्वयामि॥ ॥अथ विंशी॥ ॥स हि विश्वानि पार्थिवाँ एको वसूनि पत्यते॥ गिर्वणस्तमो अध्रिगुः॥ ॥स खल्विंद्रः विश्वानि सर्वाणि
पार्थिवा पृथिव्यां भवानि वसूनि धनानि एक एव पत्यते ईष्टे नान्यः कश्चित् पत्यतिरैश्वर्यकर्मा कीदृश इंद्रः गिर्वणस्तमः अतिशयेन
गीर्भिः स्तुतिभिः संभजनीयः अध्रिगुः अधृतगमनः अप्रतिहतगतिरित्यर्थः॥ ॥इति चतुर्थस्य सप्तमे चतुर्विंशो वर्गः॥ ॥अथैक
विंशी॥ ॥स नो नियुद्भिरा पृण कामं वाजेभिरश्विभिः॥ गोमद्भिर्गोपते धृषत्॥ ॥हे गोपते गवां पालयितः स त्वं नोस्माकं कामं नियु
द्भिर्वडवाभिः धृषत् धृष्टं दारिद्र्यनाशनसमर्थं यथा भवति तथा आपृण आपूरय। यद्वा धृषदितींद्रविशेषणं॥ शत्रूणां धर्षकस्त्व
मित्यर्थः। तथा गोमद्भिर्बहुभिर्गोभिर्युक्तैः अश्विभिः बहुभिरश्वैरुपेतैर्वाजैरन्नैश्च अस्मदीयं काममापूरय॥ ॥अथ द्वाविंशी॥ ॥

ऋ०भा०
१८८

॥तद्वोगायसुतेसचापुरुहूतायसत्वने॥शंयद्गवेनशाकिने॥ ॥हेस्तोतारोवोयूयंसुतेअभिषुतेसोमेसतिपुरुहूतायबहुभिर्यज
मानैराहूतायसत्वनेशत्रूणांवासयित्रेधनानांवासत्वनेदात्रेइंद्रायतत्स्तोत्रंसचसहसंहताभूत्वागायतयत्स्तोत्रंशाकिनेश
क्तिमतेइंद्रायशंसुखकरंभवतिगवेनयथागवेसुखकरंतद्वदित्यर्थः॥ ॥अथत्रयोविंशी॥ ॥नघावसुर्नियमतेदानंवाजस्यगो
मतः॥यत्सीमुपश्रवद्गिरः॥ ॥वसुर्वासयितासइंद्रःगोमतोबहुभिर्गोभिर्युक्तस्यवाजस्यान्नस्यबलस्यवादानंप्रदानंनघन
खलुनियमतेनियच्छतिउपरतंकरोतियद्यदिगिरःअस्मदीयास्तुतीःउपश्रवत्उपशृणुयात्स्तोत्रश्रवणेसतिसर्वदाददाती
त्यर्थः॥ ॥अथचतुर्विंशी॥ ॥कुवित्सस्यप्रहिव्रजंगोमंतंदस्युहागमत्॥शचीभिरपनोवरत्॥ ॥कुवित्सस्यकुवित्बहुशः
स्यतिहिनस्तीतिकुवित्सोनामकश्चित्तस्यभृतंगोमंतंबहुभिर्गोभिर्युक्तंव्रजंगोष्ठंदस्युहादस्यूनामुपक्षयिताहंतेंद्रःप्रगम
त्प्रकर्षेणगच्छतिहियस्मादेवंतस्मात्शचीभिरात्मीयैःकर्मभिःप्रज्ञाभिर्वानोस्माकंनागाःअपचरतनिगूढास्तोअपावृणोत॥
॥अथपंचविंशी॥ ॥इमाउत्वाशतक्रतोभिप्रणोनुवुर्गिरः॥इंद्रवत्संनमातरः॥ ॥हेशतक्रतोबहुविधकर्मन्बहुविधप्रज्ञातेइं
त्वामभिइमाअस्मदीयागिरस्तुतयःप्रणोनुवुःप्रकर्षेणपुनःपुनर्गच्छंतिनोतिरत्रगतिकर्मा।तत्रदृष्टांतः।वत्संनमातरः।यथा
मातरोगावोगृहेवर्तमानंवत्संशीघ्रमभिगच्छंतितद्वत्।यद्वाअस्मदीयावाचःअभिनोनुवुःअभितःशब्दयंतिस्तुवंति।यथागावो

राम
१८८

गांनगामिवगीर्भिःस्तुतिरूपाभिर्हुवेआह्वयामि।अस्मदीयाःकामानूदोग्धुं॥ ॥अथाष्टमी॥ ॥यस्यविश्वानिहस्तयोरूचुर्वसूनिनि
द्विता॥वीरस्यपृतनासहः॥ ॥वीरस्यवीर्यवतःपृतनासहःपृतनाःशत्रुसेनाःतासामभिभवितुःयस्येंद्रस्यहस्तयोर्बाह्वोःविश्वा
निसर्वाणिद्विताद्विव्यपार्थिवरूपेणद्वैधंवर्तमानानिवसूनिविद्यंतइत्यूचुः।ऋषयोनितरांवदंतितमिंद्रंहुवइतिपूर्वत्रसंबंधः॥ ॥
॥अथनवमी॥ ॥विदृह्लानिचिदद्रिवोजनानांशचीपते॥वृहमायाअनानत॥ ॥हेअद्रिवःआदृणात्येननेत्यद्रिर्वज्रःतद्वन्शची
पतेइंद्रजनानांशत्रूणांदृह्लानिचित्दृढानिस्थिराण्यपिपुराणिवलानिवाविवृहविभिंधिविविधमुन्मूलयेत्यर्थः।हेअनानतअ
प्रह्वीभूतसर्वोत्कृष्टेंद्रमायाश्चशत्रुभिर्निर्मिताःविवृहविनाशय॥ ॥अथदशमी॥ ॥तमुत्वासत्यसोमपाइंद्रवाजानांपते॥अहूमहि
श्रवस्यवः॥ ॥हेसत्यअवितथस्वभावसोमपाःसोमस्यपातःहेवाजानांपतेअन्नानांपालयितःएवंभूतहेइंद्रश्रवस्यवःश्रवोन्नंआत्म
नइच्छंतोवयंतमुत्वातादृशंत्वामेवअहूमहिआह्वयामइत्यर्थः॥ ॥इतिचतुर्थस्यसप्तमेद्वाविंशोवर्गः॥ ॥अथैकादशी॥ ॥तमु
त्वायःपुरासिथयोवानूनंहितेधने॥हव्यःसश्रुधीहवं॥ ॥हेइंद्रतमुत्वामेवत्वांस्तुमइतिशेषः।यःपुरापूर्वस्मिन्कालेहव्योह्वा
तव्यःअसिथबभूविथधनलाभार्थंयोवायश्चत्वंहितेशत्रुष्वनिहितेधनेनिमित्तभूतेसतिनूनमद्यापिहव्योह्वातव्योबभूथसत्वंमस्म
दीयंहवंस्तोत्रंश्रुधिशृणु॥ ॥अथद्वादशी॥ ॥धीभिरर्वद्भिरर्वतोवाजाँइंद्रश्रवाय्यान्॥त्वयाजेष्महितंधनं॥ ॥हेइंद्रधीभिःस्तुतिभिः

ऋ०भा० स्तोत्रं तेन वयं अनमः अतिकं नमो भूत् भवन्तु। तं चास्मान् महे महते राये धनाय हिनु प्रेरय॥ ॥अथैकत्रिंशी॥ ॥अधि बृबुः पणीनां व
१९२ र्षिष्ठे मूर्धन्नस्थात्। उरुः कक्षो न गांग्यः॥ ॥बृबुर्नाम पणीनां तक्षा तस्य काश्चित् लुब्धधनो भरद्वाजः तदीयं दानमनेन तृचेनास्तौत्
एतच्च मनुनास्मर्यते। भरद्वाजः क्षुधार्तस्तु सपुत्रो विजने वने। बह्वीर्गाः प्रतिजग्राह बृबोस्तक्ष्णो महायशा इति। पणीनां सघायो
वणिजः एतत्संज्ञा असुरा वा तेषां तक्षा बृबुः वर्षिष्ठे मूर्धन् मूर्धनि मूर्धवदुच्छ्रिते स्थले अध्यस्थात् अधिष्ठितो भूत्। गांग्यः गंगायाः
कूले उत्पन्ने भवः कक्षो न कक्ष इव उरुः विस्तीर्णः सन् ज्ञानतो हीनोपि दातृत्वात् सर्वत्र श्रेष्ठो भवतीत्यर्थः॥ ॥अथ द्वात्रिंशी॥ ॥यस्य
वायोरिव द्रवद्भद्रा रातिः सहस्रिणी॥ सद्यो दानाय मंहते॥ ॥वायोरिव द्रवत् क्षिप्रगामिनो यस्य बृबोः भद्रा कल्याणी सहस्रि
णी सहस्रसंख्यायुक्ता रातिर्दानं सद्यः क्षिप्रं समये एव दानाय दानकामाय याचमानाय मह्यं मंहते अपेक्षितं धनं ददातीति तं बृबु
मिति उत्तरस्यामृचि संबंधः॥ ॥अथ त्रयस्त्रिंशी॥ ॥तत्सु नो विश्वे अर्य आ सदा गृणंति कारवः॥ बृबुं सहस्रदातमं सूरिं स
हस्रसातमं॥ ॥तत् तं बृबुं नोस्मदीयाः विश्वे सर्वे अर्यः स्तुतीनामीरयितारः कारवः स्तोतारः सु सुष्ठु आगृणंति अभिष्टुवंति की
दृशं सहस्रदातमं अतिशयेन सहस्रसंख्यस्य धनस्य दातारं सूरिं प्राज्ञं यद्वा प्रेरयितारं सहस्रसातमं अतिसहस्रसंख्यस्य राम
स्तोत्रस्य संभक्तारं॥ ॥इति चतुर्थस्य सप्तमे षड्विंशो वर्गः॥ ॥त्वामिद्धीति चतुर्दशर्चं तृतीयं सूक्तं बृहस्पतिपुत्रस्य शंयोरार्षं १९६

ई। प्रथमा तृतीया द्या अयुजो बृहत्यः द्वितीया चतुर्थ्यौ युजः सतोबृहत्यः। तथा चानुक्रांतं। त्वामिद्धि पंचोना प्रागाथमिति सूक्तं वि
नियोगो लैंगिकः। यदि ज्योतिष्टोमो बृहत्पृष्ठः स्यात् तदानीं निष्केवल्यस्य आद्यः प्रगाथस्तोत्रियः। सूत्रितं च यद्यु वै बृहत् त्वामिद्धि ह
वामह इति महाव्रतेपि निष्केवल्ये अयं प्रगाथः शंसनीयः। तथैव पंचमारण्यके सूत्रितं। त्वामिद्धि हवामहे त्वं ह्येहि चेरव इति बृह
तस्तोत्रियानुरूपाविति॥ ॥तत्र प्रथमा॥ ॥त्वामिद्धि हवामहे साता वाजस्य कारवः॥ त्वां वृत्रेष्विंद्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः॥ ॥
कारवः स्तोतारो वयं वाजस्यान्नस्य साता सातौ संभजननिमित्तभूते सति हे इंद्र त्वामिद्धि त्वामेव हवामहे स्तुतिभिराह्वयामहे इंद्र
सत्पतिं सतां पालयितारं श्रेष्ठं त्वां नरः अन्ये मनुष्याः वृत्रे आवरके षु शत्रुषु सत्सु हवंते आह्वयंति। तज्जयार्थं अपि च स्वर्वतोश्व
स्य संबंधिनीषु काष्ठासु अश्वः क्रांत्वा तिष्ठतीति तासु काष्ठासु संग्रामेषु युद्धे का मा भूत् त्वामेव आह्वयंति अतो वयं त्वामेव आ
ह्वयामह इत्यर्थः॥ ॥अथ द्वितीया॥ ॥स त्वं नश्चित्र वज्रहस्त धृष्णुया मह स्तवानो अद्रिवः॥ गामश्वं रथ्यमिंद्र संकिर सत्रा वाजं न
जिग्युषे॥ ॥हे चित्र चायनीय इंद्र वज्रहस्त वज्रबाहो अद्रिवः वज्रवन् यद्वा आदृणात्यनेनेत्यद्रिः शनिः तद्वन् एवंभूत इंद्र धृष्णु
या धृष्णुः शत्रूणां धर्षयिता महो महान् सतादृशस्त्वं स्तवानो अस्माभिः स्तूयमानः सन् गामश्व्यं रथवाहनमश्वं च संकिर सम्यक्
प्रयच्छ जिग्युषे जितवते पुरुषाय भोगार्थं सत्रा महत् प्रभूतं वाजमन्नमिव यथा शत्रून् जितवते भोगार्थं बह्वन्नं प्रयच्छसि तद्वत्॥

च०भा० महाव्रते निष्केवल्ये यः सत्राहेत्यादि सूक्तशेषः शंस्[...]साहेति प्रगाथो वैकल्पिकोनुरूपः। सूत्रितं च। यः सत्राहा विचर्ष
णिः स्वादोरित्था विषूवत इति॥ ॥ प्रगाथे प्रथमा सूक्ते [...]तीया॥ ॥ यः सत्राहा विचर्षणिरिंद्रं तं हूमहे वयं॥ सहस्रमुष्क तुविनृम्ण सत्प
१६० ते भवा समत्सु नो वृधे॥ ॥ य इंद्रः सत्रासहा महतां शत्रूणां हंता विचर्षणिः विशेषेण सर्वस्य द्रष्टा तमिंद्रं वयं हूमहे स्तुतिपदे रा
ह्वयामः। उत्तरार्धः प्रत्यक्षकृतः हे सहस्रमुष्क सहस्रशेफ यौको वस्त्रियं संभवन्निंद्रः भोगलोलुपतया स्वशरीरे पर्वणि शेपान् सस
र्जेति कौषीतकिभिराम्नातं तदभिप्रायेणेदं संबोधनं हे तुविनृम्ण बहुविध धनवन् सत्पते सतां पालयितरिंद्र समत्सु संग्रामेषु नोस्मा
कं वृधे वर्धनाय भव॥ ॥ अथ चतुर्थी॥ ॥ बाधसे जनान्वृषभेव मन्युना घृषौ मीळ्ह ऋचीषम॥ अस्माकं बोध्यविता महाधने तनूष्वप्सु
सूर्ये॥ ॥ हे ऋचीषम ऋक्कृयादशं रूपं प्रतिपादयति तद्रूपेंद्र घृषौ शत्रूणां घर्षके बाधके मीळ्हे संग्रामे जनान् अस्मदीयान् शत्रून्
वृषभेव वृषभेणेव बलवता मन्युना क्रोधेन तथा महाधने महतो धनस्य निमित्तभूते संग्रामे च अस्माकमविता रक्षिता बोधि बुध्य
स्व रक्षितृत्वेनात्मानं जानीहि रक्षको भवेति यावत्। तनूषु तनयेषु अप्सु उदकेषु सूर्ये चलध्येषु सत्सु एतेषां लाभार्थे सूर्यस्य लाभः
संदर्शनार्थमित्यर्थः॥ ॥ चतुर्विंशाके हनि माध्यंदिनसवने ब्राह्मणाच्छंसिन इंद्र ज्येष्ठं प्रसस्य सूत्रितं। इंद्र ज्येष्ठं न आ भरा त्वा सहस्र
मा शतमिति॥ ॥ तत्र प्रथमा सूक्ते पंचमी॥ ॥ इंद्र ज्येष्ठं न आ भर ओजिष्ठं पपुरि श्रवः॥ येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः॥ राम १६०

वत्समभिलक्ष्याहंभारवं कुर्वंति तद्वत्॥ ॥ इति चतुर्थस्य सप्तमे पंचविंशो वर्गः॥ ॥ अथ षड्विंशी॥ ॥ इणः शंस रख्यं तव गोरसि वीर
गव्यते॥ अश्वो अश्वायते भव॥ ॥ हे इंद्र ते त्वदीयं सख्यं सखित्वं इणः शं दुर्नशं मापयितुमशक्यं अतिदृढमित्यर्थः॥ अतो हे वीर वीर
यितरिंद्र गव्यते गामात्मन इच्छते त्वं गोरसि गवां प्रदाता भवसि तदुपचारात्कारणे कार्यशब्दः। तथा अश्वायते अश्वानात्मन इच्छते अश्वो भ
वत्र अश्वप्रदो भवति॥ ॥ अथ सप्तविंशी॥ ॥ स मंदस्वा ह्यंधसो राधसे तन्वा महे॥ न स्तोतारं निदे करः॥ ॥ हे इंद्र स त्वादृशस्त्वं अंधसः
सोमस्य पानेन हृष्टतया तन्वा आत्मीयेन शरीरेण मंदस्व मोदस्व। किमर्थं महे महते राधसे धनार्थं हि पूरणः। अपि च त्वदीयं स्तो
तारं निदे निंदकाय तस्य वशं न करः न कुर्याः॥ ॥ अथाष्टाविंशी॥ ॥ इमा उ त्वा सुते सुते नक्षंते गिर्वणो गिरः। वत्सं गावो न धेनवः॥
॥ ॥ हे गिर्वणो गीर्भिर्वननीय इंद्र सुते सोमे अभिषुते सति इमा अस्मदीया गिरः स्तुतयः त्वा त्वां नक्षंते व्याप्नुवंति धेनवो दोग्ध्र्यो गावो नगा
व इव वत्सं यथा शीघ्रं व्याप्नुवंति तद्वत्॥ ॥ अथैकोनत्रिंशी॥ ॥ पुरूतमं पुरूणां स्तोतॄणां विवाचि॥ वाजेभिर्वाजयतां॥ ॥ हे इंद्र पुरू
तमं पुरूणां बहूनां शत्रूणां नमयितारं ग्लपयितारं त्वां पुरूणां बहूनां स्तोतॄणां अस्माकं स्तुतिः प्राप्नोतु इति शेषः। कीदृशानां वि
वाचि विविधाः स्तुतयः शस्त्रात्मिका वाचः अस्मिन्यज्ञे तस्मिन् वाजेभिः वाजैः हविर्लक्षणैरन्नैः वाजयतां वाजं बलं तं बलवंतं वा कुर्वतां॥
॥ ॥ अथ त्रिंशी॥ ॥ अस्माकमिंद्र भूतु ते स्तोमो वाहि[...]मः॥ अस्मान्राये महे हिनु॥ ॥ हे इंद्र वाहिष्ठो वोढृतमः अस्माकं स्तोमः

च०भा० तत्संते नृपे वृजने पत्सु ब्रन यत्किंचन दृढं वीर्यं विद्यते तत्सर्वं अस्मभ्यं स्तोतृभ्यः सम्यगारीहि। प्रयच्छ। कदा त्वं सह्ये नृभिर्योधृभिः सो
१९१ ढव्ये युधि प्रवर्तते किमर्थं पृत्सु पृतनासु संग्रामेषु अमित्रान् शत्रून् तुर्वणे तुर्वितुं हिंसितुं॥ ॥ चातुर्विंशिके हनि निष्केवल्ये इंद्र त्रिधा
त्विति वैरूपस्य साम प्रगाथः संशानीयः। सूत्रितं च। इंद्र त्रिधातु शरणं त्वमिंद्र प्रतूर्तिं विति॥ ॥ तत्र प्रथमा सूक्ते नवमी॥ ॥ इंद्र त्रि
धातु शरणं त्रिवरूथं स्वस्तिमत्॥ छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः॥ ॥ त्रिधातु त्रिप्रकारं त्रिभूमिकं त्रिवरूथं त्रयाणां
शीतातपवर्षाणां वारकं स्वस्तिमत् अविनाशयुक्तं छर्दिः दीप्तं आच्छादनयुक्तमेवंगुणविशिष्टं शरणं गृहं मघवद्भ्यश्च मह्यं च हवि
र्लक्षणं धनं एभ्यः अस्मदीयेभ्यः मह्यं च मरक्षाजाय च प्रयच्छ देहि। अपि च एभ्यः सकाशात् दिद्युं प्रकाशकं शकं द्योतमानमायु
धं यवय पृथक् कुरु॥ ॥ अथ दशमी॥ ॥ ये गव्यता मनसा शत्रुमादभुरभिप्रघ्नंति धृष्णुया॥ अधस्मा नो मघवन्निंद्र गिर्वणस्त
नूपा अंतमो भव॥ ॥ ये यजमानाः गव्यता शत्रूणां गा इच्छता मनसा युक्ताः संतः शत्रुं आततयितारं वैरिणं आदभुर् हिंसिषुः।
ये च धृष्णुया धृष्णवः धृष्टाः संतः अस्मान् अभिलक्ष्य प्रतिघ्नंति प्रकर्षेण हिंसंति हे मघवन् धनवन् गिर्वणः गिरां संभक्तः इंद्र अ
धस्म अस्मिन् काले तेभ्यः सकाशात् नः अस्मभ्यं तनूपाः तनूनां शरीराणां रक्षिता सन् अंतमः अंतिमः अंतिकतमो भव॥ ॥ इति च
तुर्थस्य सप्तमे ऽष्टाविंशो वर्गः॥ ॥ अथैकादशी॥ ॥ अधस्मा नो वृधे भवेंद्र नायमवा युधि॥ यदंतरिक्षे पतयंति पर्णिनो दिद्यवस्ति राम १९१

ग्ममूर्धानः॥ ॥ हे इंद्र अधस्म तदानीं नः अस्माकं वृधे वर्धनाय भव। अपि च नायं यो अस्माकं नेता युधि युद्धे तमपि अव। तदेतत्कृ क
देत्य तत्र आह यद्यदा पर्णिनः पक्षवंतः तिग्ममूर्धानः तीक्ष्णास्याः दिद्यवो दीप्ता बाणाः यद्यदा अंतरिक्षे व्योम्नि पतयंति शत्रुभिर्विसृ
ष्टाः पतयंति तदानीं वृधे भवेत्यन्वयः॥ ॥ अथ द्वादशी॥ ॥ यत्र शूरासस्तन्वो वितन्वते प्रिया शर्म पितृणां॥ अधस्मा यच्छ तन्वे
तने च छर्दिरचित्तं यावय द्वेषः॥ ॥ यत्र यस्मिन् शूरासः शूराः सूर्यवंतो योद्धारः तन्वः स्वकीयानि शरीराणि वितन्वते विस्तारयं
ति। स्वामिनो जयाय शत्रूणां पुरतो दर्शयंति तस्मिन् काले प्रिया प्रियाणि शर्मा शर्माणि स्थानानि पितृणां जनकानां संबंधीनि ते
र्जितानीति यावत् एतानि च वितन्वते शत्रूणां पुरस्तात् विस्तारयंति परित्यजंतीत्यावत्। अधस्म अस्मिन् काले तन्वे शरीराय तने
तने च तनयाय च छर्दिः स्थानं आयुधानां निवारकं कवचं अचित्तं शत्रुभिरविज्ञातं यथा भवति तथा प्रयच्छ शत्रुज्ञानात्पूर्वमेव दे
हीत्यर्थः। अपि च यः द्वेषो द्वेष्टॄन् शत्रून् यावय यातेभ्यो वियोजय॥ ॥ अथ त्रयोदशी॥ ॥ यदिंद्र सर्गे अर्वतश्चोदयासे महाधने॥ अस
मने अध्वनि वृजिने पथि श्येनाँ इव श्रवस्यतः॥ ॥ हे इंद्र महाधने जेतव्यस्य महतो धनस्य निमित्ते महति संग्रामे सर्गे उद्योगे
सति असमने विषमे अध्वनि मार्गे अर्वतो अस्मदीयान् अश्वान् यद्यदा चोदयासे प्रेरयसि वृजिने कुटिले पथि मार्गे अंतरिक्षलक्षणे
श्रवस्यतः श्रवो अन्नं आमिषरूपमात्मनः इच्छतः श्येनान् इव यथा आमिषार्थिनः श्येनाः अंतरिक्षे शीघ्रं गच्छंति तथास्मदीयान्

च॰भा॰ अश्वानू यदा त्वं शीघ्रं गमयसि तदानां [illegible] यच्छेति पूर्वस्यामृचि संबंधः॥ ॥अथ चतुर्दशी॥ ॥सिंधुं इव प्रवणमा
१९२ शुयायतो यदि क्रोशमनु ष्वणि॥ आ ये वयो न वर्वृतत्य[illegible] गृभीता बाह्वोर्गवि॥ ॥उक्तस्यैवार्थस्य अतिशयप्रतिपादनार्थेयं। प्रवणे
निम्नदेशे सिंधोरिव स्यंदमाना नदी इव आशुया आशु। शीघ्रं यतो गच्छतोऽश्वान् हे इंद्र यदि चोदयसे प्रेरयसे कदाचित् क्रोशमनु क्रोशत
इति भयमनुलक्ष्य स्वनिस्वरे आक्रोशे सति कीदृशास्ते अश्वाः बाह्वोः [illegible] गृहीताः कक्षयावबद्धा येऽश्वाः गविगोरूपधने जे
तव्ये सति आवर्तंते पुनः पुनरावर्तंते आमिषि आमिषे मांसे गृहीते सति वयो न यथा श्येनादयः पक्षिणः पुनः पुनरावर्तंते इत्य
र्थः तद्वत्। एवंभूतानश्वानू भक्ता क्रोशसति यदा त्वं प्रेरयसि तदानीमस्मदीयेभ्यः छर्दिः प्रयच्छेदिति संबंधः। यद्यपि ऋषेर्युधि
प्रसक्तिर्नास्ति तथा राजपुरोहितत्वेन राजकीयानां पुरुषाणां जयः प्रार्थ्यत इति न कश्चिद्विरोधः॥ ॥इति चतुर्थस्य सप्तमे एकोन
त्रिंशो वर्गः॥ ॥स्वादुरिति एकत्रिंशदृचं चतुर्थं सूक्तं भरद्वाजपुत्रस्य गर्गस्यार्षं प्रस्तोक इत्येषा त्रिष्टुप् आदशाश्वानित्यनुष्टुप्
दशरथानीति गायत्री महि राध इति द्विपदा एकादशा युजानो हरित इत्येषा बृहती दिवस्पृथिव्या इति जगती शिष्टास्त्रिष्टुभः
आदितः पंचानां ऋचां सोमो देवता। अग्न्यूतिष्वेत्रमित्यर्धर्चस्य प्रथमपादे देवा देवताः उत्तरस्य भूमिः तृतीयस्य बृहस्पतिः चतु राम
र्थस्य इंद्रः प्रस्तोक इत्याद्याश्चतस्रः संजयपुत्रस्य राज्ञो दानस्तुतिरूपत्वात् तद्देवताकाः वनस्पते वीड्वंग इत्यंत्योऽरथदेवस्य उप १९२

॥हे इंद्र ज्येष्ठं प्रशस्यतमं ओजिष्ठं ओजस्वितमं अतिशयेन बलकरं पपुरिः पूरकः श्रवो अन्नं नोऽस्मभ्यं आभर आहर प्रयच्छ हे चित्र चा
यनीय वज्रहस्त वज्रबाहो हे सुशिप्र शोभनहनुक एवंभूत हे इंद्र येनान्नेन इमे परिदृश्यमाने उभे रोदसी द्यावापृथिव्यौ आप्राः आ
पूरयसि तदन्नमाभरेत्यन्वयः॥ ॥इति चतुर्थस्य सप्तमे सप्तविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥त्वामुग्रमवसे चर्षणीसहं राजन् देवेषु
हूमहे॥ विश्वा सु नो विथुरा पिब्दना वसोऽमित्रान् सुषहान् कृधि॥ ॥हे राजन् राजमान इंद्र देवेषु देवानां मध्ये उग्रं उद्गूर्णबलं चर्षणी
सहं चर्षणीनां शत्रुभूतानां प्रजानामभिभवितारं त्वां अवसे रक्षणाय हूमहे आह्वयामः। त्वं विश्वा सर्वाणि पिब्दना पिब्दनाभिरक्षा
भिपिहितं अव्यक्तं यद्भवति तदिति पिब्दनानि पृषोदरादिः। तानि सु विथुरा सुष्ठु विथुराणि व्यथितानि बाधितानि कुरु॥ ॥अथ सप्तमी॥ ॥
यदिंद्र नाहुषीष्वाँ ओजो नृम्णं च कृष्टिषु॥ यद्वा पंच क्षितीनां द्युम्नमा भर सत्रा विश्वानि पौंस्या॥ ॥हे इंद्र नाहुषीषु नहुष इति
मनुष्यनाम तत्संबंधिनीषु कृष्टिषु प्रजासु आ कारः समुच्चये। यत् ओजो बलं नृम्णं धनं च विद्यते। यद्वा पंच क्षितीनां निषादपंचमा
श्चत्वारो वर्णाः तेषां स्वरूपं द्युम्नं द्योतमानमन्नं तत्सर्वमस्मभ्यं आभर आहर प्रयच्छ। तथा सत्रा महानि विश्वानि सर्वाणि पौंस्यानि पौं
स्यानि बलानि चास्मभ्यं आहर॥ ॥अथाष्टमी॥ ॥यद्वा तृक्षौ मघवन् द्रुह्यावा जने यत्पूरौ कच्च वृष्ण्यं॥ अस्मभ्यं तद्रिरीहि सं
नृषाह्येऽमित्रान् पृत्सु तुर्वणे॥ ॥हे मघवन् धनवन् इंद्र [illegible] जने यद्वा यत् बलं विद्यते द्रुह्यौ एतत्संज्ञे च जने यद्बलमस्ति पूरौ ए

ऋ॰भा॰ इत्यस्मात् इयं ताच्छुङि चङि रूपं अपि वा धीरो धीमा[illegible] षलुवीः पञ्चावी हस्यस्यां तु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौ
१९३ षधयश्चेति प्रतिष्ठास्ता द्युपृथिव्याः षट् अमिमीतान् निर्मितवान् याभ्य उर्वीभ्य आरे दूरे विप्रकृष्टे देशे कश्चन किंचन भुवनं भू
जातं न भवति अपि तु आभ्य एव सर्वं भूतजातं वर्तते तादृशी उर्वीर्निर्मितवान्॥ ॥अथ चतुर्थी॥ ॥अयं स यो वरिमाणं पृथिव्या व
र्ष्माणं दिवो अकृणोदयं सः। अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्वन्तरिक्षं॥ ॥स एव अयं सोमः यः पृथिव्याः वरिमाणं उरु
त्वं विस्तरत्वं अकृणोत् अकरोत्। अथायं सोमो दिवो द्युलोकस्य वर्ष्माणं महत्त्वं दृढत्वं अकृणोत् अकरोत् अयं सोमः स हि भव
ति अपि चायं सोमः तिसृषु ओषधीषु अप्सु गोषु च प्रवत्सु प्रकृष्टास्वेतासु पीयूषं रसं धारयति तथा उरु विस्तीर्णमन्तरिक्षं च धा
रयति। तथा च मंत्रान्तरं। त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः। त्वमाततन्थोर्वन्तरिक्षमिति॥ ॥अथ पंचमी॥ ॥
॥अयं विदच्चित्रदृशीकमर्णः शुक्रसद्मनामुषसामनीके॥ ॥अयं महान्महता स्कंभनेनोद्द्यामस्तभ्नाद्वृषभो मरुत्वान्॥ ॥चित्र
दृशीकं विचित्रदर्शनं यद्वा आश्चर्यत्वेन दर्शनीयं अर्णः सर्वस्य प्रेरकं सोमं ज्योतिः विदत् लंभयति कस्मिन् काले शुक्रसद्मनो
शुक्रं निर्मलमन्तरिक्षं सद्म सादनं यासां उषसां अनीके प्रमुखे उषःकाल इत्यर्थः। अपि च महान् प्रवृद्धो अयं सोमः महता स्कंभवि
धेन स्कंभनेन स्तंभनसाधनेन मध्यवर्तिना अन्तरिक्षेण द्यां द्युलोकं उदस्तभ्नात् ऊर्ध्वमस्थापयत् यथाधो न पतति तथा अन्तरिक्षं राम १९३

तस्याधारत्वेन कृतवानित्यर्थः। कीदृशः सोमो वृषभो वृष्टेर्जनयिता सोमाहुत्यादिवृष्टिर्जन्यते मरुत्वान् मरुद्भिर्युक्तः॥ ॥इति च
तुर्थस्य सप्तमे त्रिंशो वर्गः॥ ॥अथ षष्ठी॥ ॥धृषत्पिब कलशे सोममिंद्र वृत्रहा शूर समरे वसूनां॥ माध्यंदिने सवन आ वृषस्व र
यिस्थानो रयिमस्मासु धेहि॥ ॥हे शूर शौर्यवन् इंद्र वृत्रहा वृत्राणामावरकाणां हंता त्वं वसूनां धनानां समरे संग्रामे निमित्ते सति
कलशे द्रोणकलशे वस्थितं सोमं धृषत् धृष्टं यथा भवति तथा पिब अपि च माध्यंदिने सवने आवृषस्व आसिंच त्वं जठरं सोमेन
पूरय। सर्वं हि माध्यंदिनं सवनं किं च रयिस्थानः रयीणां धनानां स्थानभूतस्त्वं रयिं धनमस्मासु धेहि धारय॥ ॥अथ सप्तमी॥ ॥
॥इंद्र प्र णः पुरएतेव पश्य प्र नो नय प्रतरं वस्यो अच्छ॥ भवा सुपारो अतिपारयो नो भवा सुनीतिरुत वामनीतिः॥ ॥हे इंद्र त्वं पुरए
तेव पुरतो गंतेव नोऽस्मान् अपश्य प्रकर्षेण रक्षस्व। यथा मार्गरक्षकः स्वयं पुरतो गच्छन् अनुगच्छतो रक्षणीयान् पथिकान् पश्य
ति तथा पश्येत्यर्थः। तथा वस्यो वसीयः श्रेष्ठं धनं अच्छ आभिमुख्येन प्रतरं प्रकृष्टतरं अतिशयेन प्रणय अस्मान् प्रापय। तथा सुपा
रः सुपारयिता दुःखेभ्यस्तारयिता भव। तथा नोऽस्मान् स्तोतॄन् अतिपारयः शत्रून् अतिक्रमय सुनीतिः शोभननयनश्चास्माकं भव। उता
पि च वामनीतिः वामानां वामनीयानां धनानां नेता भव। यद्वास्मदर्थं प्रणः प्राणो भव। उरुं नो लोकमनु नेषि विद्वान्स्वससाहिष
पुरुहूत [illegible] नितिहोवाकः सदः प्रसर्पणसमये [illegible] ज्या सूचितं च। उरुं नो लोकमनु नेषि विद्वानिति व्रजं तदिति चानुविंद्रि

च०भा० षोळश्यहर्गणेषु च द्वितीयादिष्वहःसु माध्यंदिने सवने अछावाकस्यैषा चारंभणीया। सूत्रितं च। उरुं णो लोकमनु नेषि विद्वानि
तिकहस्य आरंभणीया इति॥ ॥सेषास्मत्के षष्ठी॥ ॥उरुं णो लोकमनु नेषि विद्वान्स्वर्वज्ज्योतिरभयं स्वस्ति॥ ऋष्वा त इंद्र स्थवि
१६४ रस्य बाहू उप स्थेयाम शरणा बृहंता॥ ॥हे इंद्र विद्वान् जानन् त्वं उरुं विस्तीर्णं लोकं स्थानं स्वर्गाख्यं नोस्मान् अनु नेषि अनुगम
य हे इंद्र स्थविरस्य स्थूलस्य बृहतस्तव संबंधिनो ऋष्वा दर्शनीयौ बृहंता महांतौ बाहू त्वदीयौ हस्तौ शरणा शरणौ रक्षकौ रक्ष
कतया उपस्थेयाम उपतिष्ठेम सेवेमहि॥ ॥अथ नवमी॥ ॥वरिष्ठे न इंद्र वंधुरे धा वहिष्ठयोः शतावन्नश्वयोरा॥ इषमा वक्षी
षां वर्षिष्ठां मा नस्तारीन्मघवन्रायो अर्यः॥ ॥हे इंद्र वरिष्ठे उरुतमे विस्तीर्णतमे वंधुरे आसीयरथे नोस्मान् धाः धेहि धारय॥
अपि च शतवन् शतसंख्यधनेंद्र वहिष्ठयोः वोढृतमयोः आकारः समुच्चये अश्वयोरस्मान् धाः तथा इषमन्नानां मध्ये वर्षिष्ठं वृद्ध
तममिषमन्नं आवक्षि। अस्मदर्थमावह आनय। हे मघवन् धनवन्निंद्र अर्यो धनस्य स्वामी अन्यः कश्चित् नोस्माकं रायो धना
नि मा तारीत् मा हिंसीत्॥ ॥अथ दशमी॥ ॥इंद्र मृळ मह्यं जीवातुमिछ चोदय धियमयसो न धारां॥ यत्किंचाहं त्वायुरिदं व
दामि तज्जुषस्व कृधि मा देववंतं॥ ॥हे इंद्र मृळ मृळय अस्मान् सुखय जीवातुं जीवनौषधं च मह्यं दातुमिछ तथा धियं बुद्धिं चोद राम
य स्तुतिविषयां चोदयेत्यर्थः॥ किं च त्वायुः कर्मविषयां वा प्रेरय तीक्ष्णीकुरु। अयसो न धारां अयसो अयोमयस्य खड्गादेः धारा १६४

भासयेति च। दुंदुभिर्देवस्यां चैंद्री स्वोऽर्धर्च्यां युजानो बृहती द्विकस्य पृथिव्या जगती। आग्निमारुते आदितश्चतस्रः शंसनीयाः। सूत्रितं
च। स्वादुष्किलायमिति चतस्रो मध्ये वाह्वानमिति॥ ॥तत्र प्रथमा॥ ॥स्वादुष्किलायं मधुमाँ उतायं तीव्रः किलायं रसवाँ उतायं॥
उतो न्वस्य पपिवांसमिंद्रं न कश्चन सहत आहवेषु॥ ॥अयमभिषुतः सोमः स्वादुः स्वादुतरो — दनीयः किल भवति उतापि च अ
यं सोमो रसवान् मधुररसयुक्तो भवति अनेन वाक्यचतुष्टयेन सोममाधुर्यातिशयत्वं च प्रतिपादितं। उतापि च अस्य सोमस्य द्वि
तीयार्थे षष्ठी। इमं सोमं पपिवांसं पीतवंतमिंद्रं आहवेषु संग्रामेषु न कश्चन न कोपि सहते अभिभवति नु इति पूरकः॥ ॥अथ द्वि
तीया॥ ॥अयं स्वादुरिह मदिष्ठ आस यस्येंद्रो वृत्रहत्ये ममाद॥ पुरूणि यश्च्यौत्ना शंबरस्य वि नवतिं नव च देह्यो हन्॥ ॥इ
ह अस्मिन्नु यज्ञे अयं सोमः स्वादुरास्वादितः पीतः सन् मदिष्ठः अतिशयेन मदयिता आस बभूव। यस्य पानेन इंद्रो वृत्रहत्ये
वृत्रहननकाले ममाद मत्तो बभूव यः शंबरस्यासुरस्य पुरूणि बहूनि च्यौत्ना च्यौत्नानि बलानि जघान तथा देह्यः दिग्धाः उपचि
ताः आसुरीः तदीयान् देहान् नवनवतिं नवनवतिसंख्याकाः याः वि हन्। अयं सोम इति प्रथमपादेन संबंधः॥ ॥अथ तृतीया॥ ॥
॥अयं मे पीत उदियर्ति वाचमयं मनीषामुशतीमजीगः॥ अयं षळुर्वीरमिमीत धीरो न याभ्यो भुवनं कच्चनारे॥ ॥अयं सोमः पी
तः सन् मे मम वाचं उदियर्ति उद्गमयति प्रथमे वसोमः उशतीं कांतां मनीषां बुद्धिं उदजीगः उद्गारयति प्रकाशयति। गृ निगरणे

ऋ०भा० १९५ यं स्याम तद्विषयभूतामवेम । तथा नं [illegible] पोसो [illegible] सुमनसो भावेपि तदीये स्याम भवेम स इंद्रोस्मासु अनु यहालिको बुध्निः से
मनस्यं चकरो विस्यर्थः ॥ सुत्रामा सुहृत्रातः [illegible] धनवान् स इंद्रः अस्मे अस्मत्तः आराच्चित् दूरदेशे अपि द्वेषो द्वेष्टॄन् सनुतः अं
तर्हितनामैतत् अंतर्हितान् युयोतु पृथक्करोतु ॥ ॥ अथ चतुर्दशी ॥ ॥ अव त्वे इंद्र प्रवतो नोर्मिर्गिरो ब्रह्माणि नियुतो धवंते ॥ उरू न राधः
सवना पुरूण्यपो गा वज्रिन्युवसे समिंदून् ॥ ॥ हे इंद्र ते त्वां नियुतः स्तोतुर्गिरः उक्थात्मिका वाचः ब्रह्माणि सामरूपाणि स्तोत्राणि
च अव धवंते अवगच्छंति । तत्र दृष्टांतः । ऊर्मिः जलसंघः प्रवणदेशानिव यथा उच्छ्रितात् स्थलान्निम्नदेशं शीघ्रं गच्छंति तद्वत् । न शब्दः
समुच्चये । उरू उरूणि बहूनि राधांसि च हविर्लक्षणानि धनानि पुरूणि बहूनि सवनानि सवनानि बहवो भिषुताः सोमाश्च त्वामेवावगच्छंति
हे वज्रिन् वज्रवन्निंद्र अपो वसतीवर्याख्या गाः गोविकारान् श्रितदध्यादीन् अयणार्थान् इंदून् सोमांश्च युवसे सम्यक् मिश्रयसि त्वं
युवसे वसतीवरीभिरभिषुत्यं तं सोमं माशिरादिभिः अयणद्रव्यैः संस्तुवंतीत्यर्थः ॥ ॥ अथ पंचदशी ॥ ॥ क ईं स्तवत्कः पृणात्को यजाते य
दुग्रमिन्मघवा विश्वहावेत् ॥ पादाविव प्रहरन्नन्यमन्यं कृणोति पूर्वमपरं शचीभिः ॥ ॥ ईं एनं इंद्रं कः स्तवत् स्तूयात् स्तोतुं श
क्नुयात् को वा पृणात् एनं प्रीणयेत् । कश्च यजाते एनं हविर्भिर्यजेत । यद्यस्मादयं मघवा धनवानिंद्रः उग्रमित् उग्रमेव विश्वहा सर्वदा अ
वेत् आत्मानं वेत्ति जानाति सर्वदा उग्र एव भवति तस्मात्कारणात् न कोप्येनं स्तोतुं प्रीणयितुं यष्टुं वा शक्नोतीति भावः ॥ इतोपि स्तुत्यादेर राम १९५

विषय इत्याह यस्मादयमिंद्रः शचीभिरात्मीयाभिः प्रज्ञाभिः पूर्वं प्रथमभाविनं संतं स्तोतारं पश्चाद्भाविनं च अन्यं परस्परव्यतिहारेण करो
ति । यः प्रथमभावी मुख्यस्तोता तं जघन्यं करोति यश्च जघन्यस्तोता तं मुख्यं करोतीति तत्र दृष्टांतः । प्रहरन् पादाविव यथा पादौ प्रहरन् मार्गे प्र
क्षिपन् पुरुषः पूर्वपादमनपरं करोति । अपरं पूर्वं तद्वत् । अतोपि कारणात् इंद्रः स्तुत्यादेरविषय इति भावः ॥ एतदादिकेन पंचर्चेनेंद्र
स्यातिस्वातंत्र्यं प्रतिपाद्यते ॥ ॥ इति चतुर्थस्य सप्तमे द्वात्रिंशो वर्गः ॥ ॥ अथ षोडशी ॥ ॥ शृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनी
राजा यमानः ॥ एधमानद्विळुभयस्य चोष्कूयते विश इंद्रो मनुष्यान् ॥ ॥ अयमिंद्रो वीरो वीर्यवानिति शृण्वे श्रूयते किं कुर्वन् उग्रमुग्रं बल
िनं शत्रुं प्रतिमादयन् दम उद्यमने बोधनमिच्छन् अन्यमन्यं प्रथमं नेतव्यमन्यं पश्चान्नेतव्यं वान्यं पूर्वत इत्येवं परस्परव्यतिहारेण
स्तोतॄन् अतिनेनीयमानः अत्यंतं पुनः पुनर्नयन् अपि च एधमानद्विट् एधमानानां अनुव्रतानां द्वेष्टा उभयस्य दिव्यस्य पार्थिवस्य धन
स्य राजा ईश्वरो यमिंद्रः विशः निवेशयितॄन् स्वस्य परिचारकान् मनुष्यान् चोष्कूयते रक्षणार्थं पुनः पुनराह्वयति ॥ ॥ अथ सप्तदशी ॥ ॥
परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति । अनानुभूतीरवधून्वानः पूर्वीरिंद्रः शरदस्तर्तरीति ॥ ॥ अयमिंद्रः पूर्वेषां पूर्वभावि
नां प्रज्ञानां कर्मणां सख्या सखित्वानि परावृणक्ति वर्जयति । अपि च वितर्तुराणः शत्रून् हिंसन् अपरेभिः परैः प्रतिमुखैरप्रज्ञानैरक
र्मानुष्ठातृभिः एति सख्यं प्राप्नोति । यथा [illegible] अपरि [illegible] ः प्रज्ञा अवधून्वानः परित्यजन् पूर्वीर्बह्वीः शरदः संवत्सरान् अयमिं

ऋ०भा० १९६

इन्द्रः तर्तरीति भृशमतिक्रामति स्तोतृभिः [illegible] रकाले वसतीत्यर्थः ॥ ॥ अथाष्टादशी ॥ ॥ रूपंरूपं प्रतिरूपो बभूव तदस्य रूपं प्रति
चक्षणाय ॥ इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥ ॥ अयमिन्द्रः प्रतिरूपः रूपाणां प्रतिनिधिः सन् रूपंरूपं तत्त
दग्न्यादिदेवतास्वरूपं बभूव प्राप्नोति । भू प्राप्ताविति धातुः । इन्द्रः स्वमाहात्म्येन तत्तद्देवतारूपो भवतीत्यर्थः ॥ अस्य चेन्द्रस्य तत्तत्सामग्र्या
दिदेवतास्वरूपं प्रतिचक्षणाय नियतदर्शनाय अयमग्निरयं विष्णुरयं रुद्र इत्यसंकीर्णदर्शनाय भवति । अपि चायमिन्द्रो मायाभिः ज्ञा
ननामैतत् ज्ञानैरात्मीयैः संकल्पैः पुरुरूपो बहुविधशरीरः सन् ईयते बहून् यजमानान् गच्छति । ननु द्वाभ्यामेकरथः कथ
मनेन युगपद्बहून् गच्छतीत्येतदाह अस्येन्द्रस्य हरयोऽश्वाः युक्ता रथे योजिताः शता दश सहस्रसंख्याः अपरिमिताः सन्तो हि य
स्मादेवं तस्माद्बहुशरीराणि स्वीकृत्य युगपद्धविष्मतो यजमानाननुगच्छतीत्यर्थः ॥ अन्यमन्यं इन्द्रः दि परमैश्वर्ये इत्यस्य धातोरर्था
नुगमादिन्द्रः परमात्मा स चाकाशवत्सर्वगतः सदानन्दरूपः स एवोपाधिभिरन्तःकरणैः प्रतिशरीरमवस्थितः सन् जीवात्मेति व्य
पदिश्यते स एवानादिमायाशक्तिभिः वियदादिजगदात्मना विस्तृतः शब्दादिविषयहरणशीलाः इन्द्रियवृत्तयश्चानेनैव सं
बद्धाः । एतत्सर्वं तस्य परस्य शरीरादि प्रतिशरीरं चिद्रूपः सर्वगतः परमात्मा प्रतिरूपः प्रतिबिंबरूपः सर्वाणि शरीराणि बभूव प्रा
प्नोति । तच्च प्राप्तं प्रतिबिंबरूपं परस्य परमात्मनः प्रतिचक्षणाय प्रतिनियताकारस्य दर्शनाय भवति स चेन्द्रः परमेश्वरः मायाभिः

२ परमात्मनो यद्वास्तवं रूपं तस्य दर्शनायेति अयमर्थोऽनया प्रतिपाद्यते । रूपंरूपमिति । रूपशरीरादि प्रतिबिंबरूपं बभूव २

राम १९६

मिवसाय यथा सूक्ष्मात्तदूर्ध्वं सूक्ष्मविषयां धियं चोदयेत्यर्थः । किं च त्वायुः त्वामात्मन इच्छन्नहमिदानीं य किं च नाहं वेदामि समीचीनं
वा तज्जुषस्व । मां च देववन्तं रक्षकं देवरूपं तं कृधि कुरु ॥ ॥ इति चतुर्थस्य सप्तमे एकत्रिंशो वर्गः ॥ ॥ आयुःकामेष्ट्यां इन्द्रस्य
त्रातेत्याद्या नारमित्यनुवाक्या सूत्रितं च । त्रातारमिन्द्रमवितारमिन्द्रं मा ते अस्मा सहसावन्परिष्टाविति ॥ ॥ सैषैकादशी ॥ ॥ त्राता
रमिन्द्रमवितारमिन्द्रं हवेहवे सुहवं शूरमिन्द्रं ॥ ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ॥ ॥ त्रातारं त्रातृभ्यः पालयिता
रमिन्द्रमाह्वयामि । तथाऽवितारं कामैश्वर्ययितारमिन्द्रमाह्वयामि । हवेहवे सर्वेषां हवने सुहवं सुखेनाह्वातुं शक्यं शूरं शौर्यवन्तं
शक्रं सर्वकार्येषु शक्तं पुरुहूतं पुरुभिर्बहुभिः पालनार्थमाहूतं एवंविधमिन्द्रं ह्वयामि । एवमाहूतो मघवा धनवान्स इन्द्रः स्वस्ति अ
विनाशं नोऽस्मभ्यं धातु ददातु । यद्वा अस्माकं विदधातु ॥ ॥ अथ द्वादशी ॥ ॥ इन्द्रः सुत्रामा स्ववाँ अवोभिः सुमृळीको भवतु विश्ववेदाः ॥
बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ॥ ॥ सुष्ठु त्राता स्ववान् धनवान्स इन्द्रः अवोभिः रक्षणैः सुमृळीकः सुष्ठु
सुखयिता भवतु । तथा विश्ववेदाः सर्वधनः सर्वविद्वा स इन्द्रः द्वेष्टॄन् शत्रून् बाधतां हिनस्तु अभयं भयरहितं चास्माकं कृणोतु
करोतु । वयं च तत्प्रसादात् सुवीर्यस्य पतयः स्याम भवेम ॥ ॥ अथ त्रयोदशी ॥ ॥ तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्या
म ॥ स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥ ॥ यज्ञियस्य यज्ञार्हस्य सुमतौ शोभनायामनुग्रहात्मिकायां बुद्धौ च

च॰भा॰ र्धंकृष्णा असेधदपसद्मनोजाः॥ अहंदासा वृषभो वस्नयंतोदव्रजे वर्चिनं शंबरं च॥ ॥अयमिंद्रः सद्मनः सदनात्स्वकीयादंतरिक्ष
देशात् स्थानात् जाः जायमानाः सूर्यात्मना प्रादुर्भवंतः सदृशीः तुल्यरूपाः कृष्णाः कृष्णवर्णा रात्रीः दिवेदिवे प्रति दिवसं अपसेधत्
१९७ निवर्तयति किमर्थं अन्यमर्धं अहरात्मकं परं भागं प्रकाशयितुं अहोरात्रात्मकस्य दिवसस्य हि रात्रिरेकोभागः॥ अपि च वृषभः वर्ष
यिता स इंद्रः दासा दासौ उपक्षपयितारौ यज्ञकर्मणां वस्नयंता वस्नं निवासहेतुभूतं धनं तदिच्छंतौ वर्चिनं शंबरं च एतत्संज्ञावसु
रो उदव्रजे उदकानि व्रजंत्यस्मिन्निति उदव्रजो देशविशेषः तस्मिन् अहन् हतवान्॥ ॥अथ द्वाविंशी॥ ॥प्रस्तोक इन्नु राधसस्त
इंद्र दश कोशयीर्दश वाजिनोदात्॥ दिवोदासादतिथिग्वस्य राधसः शांबरं वसु प्रत्यग्रभीष्म॥ ॥एतदाद्यास्तु चतस्रः सृंजयपु
त्रस्य प्रस्तोकस्य राज्ञो दानस्तुतिः सएव दिवोदासः अभ्यथः अतिथिग्व इत्याख्यायते हे इंद्र ते नव राधसा आराधयितुः चतुर्थ्य
र्थे षष्ठी॥ त्वां स्तुवते मह्यं गर्गाय प्रस्तोको राजा दश कोशयीः सुवर्णपूर्णपिण्डान् दशसंख्याकान् कोशान् दश वाजिनोश्वांश्च नु क्षिप्रं
प्रदात् प्रयच्छति इदिति पूरणः वयं तस्माद्दिवोदासादेतत्संज्ञात्प्रस्तोकात् वसु धनं प्रत्यग्रभीष्म प्रतिगृहीतवंतः कीदृशं अतिथिग्व
स्य तस्यैव प्रस्तोकस्य स्वभूतं राधो राधकं शांबरं शंबरादागतं शंबरं हत्वा त्वया दत्तं त्वदीयमित्यर्थः॥ ॥अथ त्रयोविंशी॥ ॥दशाश्वा राम
न्दश कोशान्दश वस्त्राधिभोजना॥ दशो हिरण्यपिंडान्दिवोदासादसानिषं॥ ॥दशाश्वान् दशसंख्याकानश्वान् हिरण्यपूर्णान् १९७

कोशान् अधिभोजना भोजनमिति धननाम अधिकं धनं येषां मूल्यं तादृशानि दशसंख्याकानि वस्त्राणि च दशो दश च दशसंख्या
कांश्च हिरण्यपिंडान् एतान्सर्वान् दिवोदासात् प्रस्तोकात् अहं असानिषं संभजनं लब्धवानस्मि॥ ॥अथ चतुर्विंशी॥ ॥दशरथा
न्प्रष्टिमतः शतं गा अथर्वभ्यः॥ अश्वथः पायवेदात्॥ ॥दशरथान् दशसंख्यकान् प्रष्टिमतः प्रतिस्त्रिपदः आधारः तद्वंतीति
प्रष्टयोश्वाः तद्युक्तान् रथान् शतं शतसंख्याकागाश्च अथर्वभ्यः अथर्वगोत्रेभ्य ऋषिभ्यः पायवे भरद्वाजपुत्राय एतत्संज्ञायास्म
द्वाते च अश्वथः अश्वथनामेतत्संज्ञः प्रस्तोकः अदात् दत्तवान्॥ ॥अथ पंचविंशी॥ ॥महि राधो विश्वजन्यं दधानान् भरद्वाजान्सा
र्ञयो अभ्ययष्ट॥ ॥विश्वजन्यं सर्वजनहितं महि महत् राधो धनं दधानान् धारयतः भरद्वाजान् भरद्वाजपुत्रानस्मान् सार्ञयः
सृंजयपुत्रः प्रस्तोकः अभ्ययष्ट अपूजयत्॥ ॥इति चतुर्थस्य सप्तमे चतुस्त्रिंशो वर्गः॥ ॥वनस्पत इत्येषा रथारोहणे विनियुक्ता
सूत्रितं च॥ वनस्पते वीड्वंगो हि भूया इत्येतया न्यान्यपि च वानस्पत्यानीति॥ ॥सेषा षड्विंशी॥ ॥वनस्पते वीड्वंगो हि भूया अस्मत्स
खा प्रतरणः सुवीरः॥ गोभिः संनद्धो असि वीळयस्वास्थाता ते जयतु जेत्वानि॥ ॥हे वनस्पते वनस्पतिविकार रथ त्वं वीड्वंगः
दृढावयवो भूयाः भव। अस्मत्सखा वयं सखायो यस्य तादृशश्च भव प्रतरणः प्रवर्धयिता सुवीरः शोभनवीरः शूरभटैः पुत्रादि
भिर्वा युक्तश्च भव। अपि च त्वं गोभिः गोविकारैश्चर्मभिः संनद्धोसि सम्यगवबद्धोसि तदीदृशस्त्वं वीळयस्व अस्मान्दृढीकुरु ते तव

ऋ०भा० १९९ स्थाता त्वय्यवस्थितो रथी जेता ॥ न ... नि जयतु ॥ ॥ अथ सप्तविंशी ॥ ॥ दिवस्पृथिव्याः पर्योज उद्भृतं वनस्पतिभ्यः प
र्याभृतं सहः ॥ अपामोज्मानं परिगोभिरावृतमिंद्रस्य वज्रं हविषा रथं यज ॥ ॥ दिवो द्युलोकात् पृथिव्याः भूमेश्च उद्भृतं सारं तेनोपात्तं
यदोजो बलमस्ति तद्रूपं वनस्पतिविकारत्वाद्रथस्य वनस्पतयो हि पृथिव्याः सारभूताः ते च द्युसंबंधिभिरुदकैः प्रवृद्धाः अतो रथस्य
लोकद्वयसारत्वमुपपन्नं परिः पंचम्यर्थानुवादी अपि च वनस्पतिभ्यो वृक्षेभ्यः परित आवृतं आवेष्टितं इंद्रस्य वज्रं वज्रैकदेशं भूय
ते हि इंद्रो वृत्राय वज्रं प्रहरत् स त्रेधा व्यभवत् । स स्फ्यस्तृतीयं रथस्तृतीयं यूपस्तृतीयमिति । एवं गुणविशिष्टं रथं हविषा पुरो
डाशादिना हे अध्वर्यो यज पूजय मेषा उत्तरा च रथदेवत्यस्य हविषो याज्यानुवाक्ये लिंगादवगंतव्ये ॥ ॥ अथाष्टाविंशी ॥ ॥ इंद्र
स्य वज्रो मरुतामनीकं मित्रस्य गर्भो वरुणस्य नाभिः ॥ सेमां नो हव्यदातिं जुषाणो देव रथ प्रति हव्या गृभाय ॥ ॥ यो रथः
इंद्रस्य वज्रः उक्तप्रकारेण वज्रैकदेशः मरुतां एतत्संज्ञानां देवगणानां अनीकं अग्रभूतं तद्वत् शीघ्रगामि मित्रस्य अहर
भिमानो देवस्य गर्भो गर्भवदंतर्वर्त्तमानः अहनि हि रथः संचरति वरुणस्य रात्र्यभिमानिदेवस्य नाभिः नाभिस्थानीयः नाभिर्य
था देहमध्ये नेम्यल्ये नावतिष्ठते तद्वत् रात्रौ कंचिदवस्थितः हे देव द्योतमान रथ उक्तलक्षण स त्वं इमां नोस्मदीयां हव्य
दातिं हविर्दानवतीं पाकक्रियां जुषाणः सेवमानः स च हव्या हव्यान्यस्मदीयानि हवींषि प्रतिगृभाय प्रतिगृहाण ॥ परेणात्वेन सं गा राम १९९

मायाशक्तिभिः पुरुरूपः वियदादिभिर्बहुरूपैः रूपेतः सन्नीयते चेष्टति एतदपि अस्य वास्तवरूपस्य दर्शनाय भवतीति । एवं स्थूलसूक्ष्म
शरीरयोर्विषयत्वादिमेयाप्रपंचस्य च तत्त्वज्ञानहेतुत्वमनया प्रत्यपादीति ॥ ॥ अथैकोनत्रिंशी ॥ ॥ युजानो हरिता रथे भूरि त्वष्टेह
राजति ॥ को विश्वाहा द्विषतः पक्ष आसत उतासीनेषु सूरिषु ॥ ॥ हरिता हरितवर्णौ अश्वौ रथे युजानो युंजन् त्वष्टा दीप्त इंद्रः इह त्रै
लोक्ये भूरि बहु यथा भवति तथा राजति दीप्यते उत अपि च सूरिषु स्तोतृषु अस्मादृशेषु आसीनेषु सत्सु विश्वाहा सर्वदा इंद्रादन्यः को नाम द्वि
षतः शत्रोः समीपे आसते आस्ते इंद्र एव निर्भयः सन् शत्रुसमीपे स्थातुं शक्नोतीति भावः ॥ ॥ अथ त्रिंशी ॥ ॥ अगव्यूति क्षेत्रमागन्म
देवा उर्वी सती भूमिरंहूरणाभूत् ॥ बृहस्पते प्र चिकित्सा गविष्टावित्था सते जरित्र इंद्र पंथां ॥ ॥ अत्रोक्तं । अरण्ये निर्जने गर्गो देवा
न्भूमिं बृहस्पतिं इंद्रं चास्तौत् स्वरक्षार्थम् मार्गच्युतो नयेति । अगव्यूतीत्यत्र देवान् पादे भूमिं तथोत्तरे । बृहस्पतिं तृतीये तु इं
द्रमेवात्र मेने तु इति । अगव्यूति अगोचरं गोसंचाररहितं निर्जनं क्षेत्रं देशं अगन्म आगताः स्मः अतो मां रक्षत्विति शेषः उर्वी पृ
थ्वी विस्तीर्णा सती भूमिश्च अंहूरणा अंहवः हंतारो दस्यवः तेषां रणारमयित्री अभूत् भवति । अस्मात्तु कारणात् हे बृहस्पते
त्वं गविष्टौ गवान्वेषणे प्रचिकित्स प्रवेदय ... अनेन प्रकारेण सते भवते दुःखमनुभवते जरित्रे स्तोत्रे मह्यं हे इंद्र पं
थां पंथानं प्रचिकित्स प्रज्ञापय ॥ ॥ इति ... त्रयस्त्रिंशो वर्गः ॥ ॥ अथैकत्रिंशी ॥ ॥ दिवेदिवे सदृशीरन्यम

ऋ०भा० २०१

नविस मुक्षिते उरुष्य देवयजने दमो जायते ... र्ति स त्वं सेव स्वस्त्यन्त्र यः॥ यद्वायः षप्रावित्य नयासीबंधः॥ ॥ इति चतुर्थस्याष्टमे प्रथ
मो वर्गः॥ ॥ अथ षष्ठी॥ ॥ आ यः पप्रौ भानुना रोदसी उभे धूमेन धावते दिवि॥ तिरस्तमो ददृश ऊर्म्यास्वा श्यावास्वरुषो वृषा श्यावा अरु
षो वृषा॥ ॥ यो अग्निः भानुना दीप्त्या उभे रोदसी द्यावापृथिव्यौ आ पप्रौ आपूरयति सः धूमेन दिवि अंतरिक्षे धावते गच्छति धूमो हि मे
घात्मना परिणतः सन् अंतरिक्षे गच्छति कार्यकारणयोरभेदविवक्षया तद्गमनमग्नावुपचर्यते अपि चायं पुरुषः आरोचमानः वृषा
वर्षिता कामानामेवंगुणकोग्निः श्यावा श्यामासु कृष्णवर्णासु रात्रिनामैतत् निशासु तमोंधकारं तिरस्कृत्य आसमंतात् ददृशे दृश्य
ते श्यावा श्यावर्णा रात्रिः अभ्यातिष्ठति। अरुषो वृषेति पुनरुक्तिरादरार्था पादपूरणार्था वा॥ ॥ अथ सप्तमी॥ ॥ बृहद्भिरग्ने अर्चिभिः शु
क्रेण देव शोचिषा॥ भरद्वाजे समिधानो यविष्ठ्य रेवन्नः शुक्र दीदिहि द्युमत्पावक दीदिहि॥ ॥ हे देव दानादिगुणयुक्त यविष्ठ्य युवत
म शुक्र दीप्ताग्ने शुक्रेण अतिनिर्मलेन शोचिषा तेजसा भरद्वाजे अस्मिन्नृषौ समिधानः समिध्यमानस्त्वं बृहद्भिर्महद्भिः अर्चिभिः ज्वालाभिः
नोस्मदर्थं रेवत् धनयुक्तं यथा भवति तथा दीदिहि दीप्यस्व। तथा पावक हे शोधकाग्ने द्युमत् द्योतमानेन च युक्तं यथा भवति तथा दीदिहि
दीप्यस्व। तथा पावक हे शोधकाग्ने द्युमत् द्योतमानेन च युक्तं यथा भवति तथा दीदिहि दीप्यस्व॥ ॥ अथाष्टमी॥ ॥ विश्वासां गृहपतिर्विशा राम
मसि त्वमग्ने मानुषीणां॥ शतं पूर्भिर्यविष्ठ पाह्यंहसः समेद्धारं शतं हिमाः स्तोतृभ्यो ये च ददति॥ ॥ हे अग्ने त्वं मानुषीणां मनोरपत्यभू २०१

तानां विश्वासां सर्वासां प्रजानां गृहपतिरसि गृहस्वामी भवति। हे यविष्ठ युवतमाग्ने अतस्त्वं शतं हिमाः शतहेमंतान् शतसंवत्सरान् समे
द्धारं सम्यगिद्धं कृतवंतं मां शतेन शतसंख्याकैः पूर्भिः पालकैः अंहसः पापात् शत्रोर्वा पाहि रक्ष। ये च ततः स्तोतृभ्यो ददति धनं नवस
मिंधनस्य कर्तारं प्रयच्छंति तांश्च पाहि॥ ॥ अथ नवमी॥ ॥ त्वं नश्चित्र ऊत्या वसो राधांसि चोदय॥ अस्य रायस्त्वमग्ने रथीरसि विदा गाधं
तुचे तु नः॥ ॥ हे वसो वासक अग्ने चित्र चोदर्शनीय त्वं ऊत्या रक्षया सह राधांसि धनानि नो अस्मभ्यं चोदय प्रेरय। सर्वस्य लोकस्य परिदृश्य
मानस्य रायो धनस्य त्वं रथीरसि। रंहिता नेता भवसि। अतः कारणात् अस्मभ्यं धनानि प्रेरयेत्यर्थः। अपि च नोस्माकं तुचे अपत्य
नामैतत्। अपत्याय अपतनहेतुभूताय पुत्रादये गाधं प्रतिष्ठां क्षिप्रं विदाः लंभय॥ ॥ अथ दशमी॥ ॥ पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धै
रप्रयुत्वभिः॥ अग्ने हेळांसि दैव्या युयोधि नोदेवानि ह्वरांसि च॥ ॥ हे अग्ने त्वं अदब्धैः केनाप्यहिंसितैः अप्रयुत्वभिः योतिरत्र पृथग्भा
वार्थः। अपृथग्भूतैः सहितैः पर्तृभिः पालकैः साधकैः तोकं पुत्रं तनयं पौत्रं च पर्षि पालय देव्या देवसंबंधिनीः हेळांसि क्रोधान् नोस्म
त्तो युयुधि पृथक्कुरु। अदेवानि मनुष्यसंबंधीनि ह्वरांसि हिंसनानि च अस्मत्तः पृथक्कुरु॥ ॥ इति चतुर्थस्याष्टमे द्वितीयो वर्गः॥ ॥ अथै
कादशी॥ ॥ आ सखायः सबर्दुघां धेनुमजध्वमुप नव्यसा वचः॥ सृजध्वमनपस्फुरं॥ ॥ हे सखायः समानख्यानाः अध्वर्यवः स
बर्दुघां सबरिति पयसो नाम अरणहेतुभूतस्य पयसो दोग्ध्रीं धेनुं गां आस्त्र अजध्वं अभिगच्छत। प्राप्नुत केन साधनेन नव्यसा नवीयसा

सं०भा० नवतरेण च। वचसा आह्वानरूपेण शब्देन ...नंतरं अनपस्फुरां। स्फुरतिर्वधकर्मा। अनपबाध्यां तां धेनुं उपसृजध्वं। वत्सेनोपसृष्टां कु
२०२ रुत। मरुद्देवत्यात् मरुतो यामाया पयो दुग्धमिति दोषः। अथवा मरुतां मातां पृश्न्यां मध्यमिकां धेनुं सखायः स्तोतारः सर्वे दुघां मरुज्जन
हेतुभूतस्य पयसो दोग्ध्रीं धेनुं पृश्निं नव्यसा नवतरेण वचसा स्तोत्रेण उपसृजध्वं उपागच्छत। अनपस्फुरां अनपबाधनीयां तां सृजध्वं
बंधनाद्विसृजत मुंचत। ईदृशीं महतीं धेनुं मरुतामतो किमु वक्तव्यं तेषां माहात्म्यमिति मरुतां स्तुतिः॥ ॥अथ द्वादशी॥ ॥या शर्धाय मा
रुताय स्वभानवे श्रवो मृत्यु धुक्षत॥ या मृळीके मरुतां तुराणां या सुम्नैरेवयावरी॥ ॥या धेनुः अमृत्यु अमरणहेतुभूतं श्रवोन्नं पयोलक्ष
णं मारुताय मरुत्संघाय धुक्षत। कीदृशाय शर्धाय प्रसहनशीलाय स्वभानवे स्वायत्तदीप्तये। या तुराणां क्षिप्रकारिणां मरुतां मृळीके सु
खे तत्परा वर्त्तते। या सुम्नैः सुखैर्हेतुभूतैः एवयावरी एवैर्गंतृभिरश्वैः मध्यमस्थाने रुदकैर्वा सह याति अन्येषामपि सुखार्थं वृष्टिजलैः
सहागच्छति तां धेनुमुपासृजध्वमिति पूर्वत्रान्वयः॥ ॥अत्रापि पूर्ववन्मरुतां स्तुतिरधिगंतव्या॥ ॥अथ त्रयोदशी॥ ॥भरद्वाजायाव
धुक्षत द्विता॥ धेनुं च विश्वदोहसमिषं च विश्वभोजसं॥ ॥हे मरुतः भरद्वाजाय अस्मदृषये द्विता द्वितये अवधुक्षत। किं तद्द्वितयं धेनुं गां
च इषमन्नं च। कीदृशीं धेनुं विश्वदोहसं विश्वस्य व्याप्तस्य बहुलस्य दोग्ध्रीं कीदृशमन्नं विश्वभोजसं सर्वेषां भोगपर्याप्तं॥ अथ चतुर्दशी॥ ॥ राम
तं व इंद्रं न सुक्रतुं वरुणमिव मायिनं॥ अर्यमणं न मंद्रं सृप्रभोजसं विष्णुं न स्तुष आदिशे॥ ॥हे मरुतः तादृशं वः तां स्तुषे स्तौमि किम
२०२

तनयानामस्मत्पुत्राणां च त्राता रक्षिता भवतु॥ ॥अथ तृतीया॥ ॥वृषा ह्यग्ने अजरो महान्विभास्यर्चिषा॥ अजस्रेण शोचिषा शोशुचच्छुचे
सुदीतिभिः सु दीदिहि॥ ॥हे अग्ने वृषा वर्षिता कामानां हि हेः कर्ता वा अजरो जरारहितः महान् गुणैरधिकः एवंभूतस्त्वं अर्चिषा दीप्त्या
विभासि हि विशेषेण प्रकाशसे खलु हे शुचे दीप्ताग्ने अजस्रेण अविच्छिन्नेन शोचिषा तेजसा शोशुचत् भृशं दीप्यमानस्त्वं सुदीतिभिः
सुदीप्तिभिः सुदीदिहि सुष्ठु अस्मान् दीपय प्रकाशय॥ ॥अथ चतुर्थी॥ ॥महो देवान्यजसि यक्ष्यानुषक्तव क्रत्वोत दंसना॥ अर्वाचः
सीं कृणुह्यग्नेवसे रास्व वाजोत वंस्व॥ ॥हे अग्ने त्वं महतो देवान् यजसि यजमानानां यज्ञे हविर्भिः पूजयसि अतोस्माकमपि यक्ष्या
नुषक् अनुषक्तं सततं यथा भवति तथा यक्षि याज्यान्देवान्यजनार्थं तव क्रत्वा प्रज्ञया उतापि च दंसना कर्मणा वसीमिति परिग्रहणार्थः
यः। तान् तान् सर्वान्देवान् अर्वाचः अस्मदभिमुखान् कृणुहि कुरु अवसे अस्मद्रक्षणार्थं। तथा वाजः हविर्लक्षणान्यन्नानि तेभ्यो
देहि उतापि च त्वमपि वंस्व तुभ्यं प्रदत्तानि हवींषि संभजस्व॥ ॥अथ पंचमी॥ ॥यमापो अद्रयो वना गर्भमृतस्य पिप्रति॥ सहसा यो मथि
तो जायते नृभिः पृथिव्या अधि सानवि॥ ॥आपो वसतीवर्याख्याः अद्रयो ग्रावाणः वना वनानि काष्ठानि च ऋतस्य यज्ञस्योदकस्य
गर्भो वा वृद्धा विद्युत्त तदंतर्वर्तमानं यमग्निं प्र[illegible]ति। यद्वा आपः समुद्रिया अद्रयो मेघा वना अरण्यानि च ऋतस्य गर्भस्य वा पैदक
तदा वह्निरूपेण वर्तमानं यमग्निं अतिप्र[illegible] र्त्विग्भिः सहसा बलेन मथितः स च पृथिव्या अधि भूमेरुपरि सा

च॰भा॰ ॥ ॥ इति चतुर्थस्याष्टमे तृतीयो वर्गः॥ ॥ च [illegible] ॥ ॥ मा काकंबीरमुद्वृहो वनस्पतिमशस्तीर्वि हि नीनशः॥ मोत सूरो अह एवा च
२०२ न ग्रीवा आदधते वेः॥ ॥ ऋषिः पुत्रपौत्रसहितमात्मानं वृक्षरूपस्याश्रयस्य वनस्पतित्वेन रूपेण तस्यानुग्रहमाशास्ते। हे पूषन् माकाकंबी
रं काकानां कर्तारं वनस्पतिं वृक्षं मा उद्वृहः उद्धर मा बाधस्व। पुत्रपौत्रादिभिः सखिभूतैरुपेतं अन्यैश्च बहुभिराश्रितं मा विहिनीनशः
मा हिंसीरित्यर्थः। अशस्तीः अशंसनीयाः अप्रशंसनीयस्य दुःखस्य कीर्तयित्रीर्वा शत्रुभूताः प्रजाः विनीनशो हि विनाशय च। मोत मा च
सूरः प्रेरकः शत्रुः एव एवं मा अहः अस्मान्मा हापीत्। एवमित्यभिसंधाय आख्यातत्वाच्च अश्रुतोपि पयेत्येतद्वाक्यं अध्याह्रियते। ग्रीवाः
गिरंति अंतरव स्थापयंति बध्नंतीति ग्रीवा दामानि यथा व्याधाः वेः पक्षिणो हरणार्थं ग्रीवाः दामानि जालरूपाणि आदधते। तेष्वनि
हिताः पक्षिणो हरंति। एवमस्मान् बंधनोपायैः शत्रुर्मा हापीदित्यर्थः॥ ॥ अथाष्टादशी॥ ॥ दृतेरिव तेऽवृकमस्तु सख्यं॥ अच्छिद्रस्य दध
न्वतः सुपूर्णस्य दधन्वतः॥ ॥ हे पूषन् ते तव सख्यं सखित्वं अवृकं बाधरहितं सर्वदैकरूपेण वर्तमानं अस्माकमस्तु सर्वदा भवतु। दृ
तेरिव यथा दृतस्य दीयं सख्यं अविच्छिन्नं तद्वत्। कीदृशो दृतिः अच्छिद्रस्य छिद्ररहितस्य संश्लिष्टस्य दधन्वतो दधिमतः संपूर्णस्य दध्ना
सुष्ठु पूरितस्य पुनर्दधन्वत इति दधोधिकत्वद्योतनार्थः। ईदृशो दृतिः सर्वदा पुरुषैरर्थ्यते। स इव वयमपि तव सखायो भवेमेति राम
पिराशास्ते॥ ॥ अथैकोनविंशी॥ ॥ परो हि मर्त्यैरसि समो देवैरुत श्रिया॥ अभि ख्यः पूषन् पृतनासु नस्त्वमवा नूनं यथा पुरा॥ ॥ हे पू २०२

षन् मर्त्यैर्मनुष्येभ्यः परः परस्तात् स्थितोसि। श्रिया संपदा देवैरुत देवैरपि समः समानोसि। अतस्त्वं पृतनासु संग्रामे पुनोस्मान् अभिख्यः
अभिपश्य अनुगृहाण दृष्ट्या विलोकय यथा पुरा येन प्रकारेण पूर्वकालीनान् मनुष्यान् अरक्षिषुः एवं नूनमद्य इदानीमव अस्मान् रक्ष॥
॥ ॥ अथ विंशी॥ ॥ वामी वामस्य धूतयः प्रणीतिरस्तु सूनृता॥ देवस्य वा मरुतो मर्त्यस्य वेजानस्य प्रयज्यवः॥ ॥ हे धूतयः कंपितारः
प्रयज्यवः प्रकर्षेण यष्टव्या मरुतः सा सूनृता प्रियसत्यात्मिका माध्यमिका युष्मदीया वाक् प्रणीतिरस्तु अस्मदर्थं धनानां प्रणेत्री भ
वतु देवस्य वा मर्त्यस्य मनुष्यस्य वा ईजानस्य इष्टवतः उभयविधस्य पुरुषस्य वामी प्रशस्ता या वाक् वामस्य वननीयस्य धनस्य प्रणी
तिः प्रणेत्री सा सूनृतेत्यन्वयः। प्रणीतिरस्तु अस्मदर्थे॥ ॥ अथैकविंशी॥ ॥ सद्यश्चिद्यस्य चर्कृतिः परि द्यां देवो नैति सूर्यः॥ त्वेषं श
वो दधिरे नाम यज्ञियं मरुतो वृत्रहं शवो ज्येष्ठं वृत्रहं शवः॥ ॥ यस्य च मरुद्गणस्य चर्कृतिः कर्म सद्यश्चित् सद्य एव द्यां पर्येति परिगच्छ
ति दिव्यंतरिक्षे च परिवर्तते देवो द्योतमानः सूर्य इव तादृशो मरुद्गणात्मको मरुतः त्वेषं नाम शत्रूणां नमयितृ यज्ञियं यष्टाहं शवो बलं द
धिरे अधारयन्। तच्च शवो बलं वृत्रहं वृत्रादेरसुरस्य हंतृ भवति। तच्च वृत्रहं शवो ज्येष्ठं सर्वेभ्यः प्रशस्ततमं भवति॥ ॥ अथ द्वाविंशी॥ ॥ सकृ
द्ध द्यौरजायत सकृद्भूमिरजायत॥ पृश्न्या दुग्धं सकृत्पयस्तदन्यो नानु जायते॥ ॥ सकृद्ध सकृदेव द्यौरजायत उत्पद्यत सकृदुत्पन्नैव
स्थितो भवति। न पुनस्तस्यां नष्टायां अन्यानुत्पद्यते [illegible] भूमिश्च सकृदेवाजायत पृश्न्याः मरुतां मातुर्गोः पयश्च सकृदेवोत्पद्यते

ऋ॰भा॰

२०४

एवं पृश्निरपि सकृद्दुग्धेन वपयसा मरुतो जाजनन्ततः परमन्यः पदार्थो नानुजायते तत्सदृशो नोत्पद्यते॥ ॥इति चतुर्थाष्टमे चतुर्थो
वर्गः॥ ॥स्तुषे जन इति पंचदशर्चं षष्ठं सूक्तं भारद्वाजस्य ऋजिश्वन आर्षं वैश्वदेवं अत्राद्या पंचदश्यौ शक्वरी। शिष्टास्त्रिष्टुभः।
तथा चानुक्रांतं। स्तुषे पंचोना ऋजिश्वा ह वैश्वदेवं ह शाक्वर्यंतमिति। पृष्ठ्ये दशरात्रे पंचमेहनि इदं वैश्वदेवं हविर्धाने सूत्रितं च। ऋभु
र्विभ्वा स्तुषे जनमिति वैश्वदेवमिति। आद्या महानाम्नीव्रते जप्या॥ ॥सैषा प्रथमा॥ ॥स्तुषे जनं सुव्रतं नव्यसीभिर्गीर्भिर्मित्रावरुणा
सुम्नयंता॥ त आगमंतु त इह श्रुवंतु सुक्षत्रासो वरुणो मित्रो अग्निः॥ ॥सुव्रतं सुकर्माणं जनं दैव्यं जनं देवसंघं नव्यसीभिर्नवतरा
भिर्गीर्भिः स्तुतिभिः स्तुषे अहं स्तुवे। तथा मित्रावरुणा मित्रः प्रमीतेस्त्रायकः वरुणः पापान्निवारयिता एतावपि देवौ स्तौमि। कीदृशौ
सुम्नयंता सुम्नं सुखं स्तोतॄणामिच्छंतौ सुक्षत्रासः शोभनबलास्ते वरुणादयः सर्वे देवाः इहास्मिन्यज्ञे आगमंतु ते तादृशाः श्रुवंतु
अस्मदीयाः स्तुतीः। अत्र एवं तु अग्निमित्रादीनां परिगणनमुपलक्षणार्थं सूक्तस्य सर्वदेवताप्रतिपादकत्वात् अत एव पूर्वं जनमिति सामा
न्यनिर्दिष्टाः॥ ॥अथ द्वितीया॥ ॥विशोविश ईड्यमध्वरेष्वदृप्तक्रतुमरतिं युवत्योः। दिवः शिशुं सहसः सूनुमग्निं यज्ञस्य केतुमरु
षं यजध्यै॥ ॥विशोविशः सर्वस्याः प्रजायाः अध्वरेषु यज्ञेषु ईड्यं ऋत्विग्भिः स्तुत्यं अदृप्तक्रतुं दर्परहितकर्माणं अमूढप्रज्ञं वायुव
त्योर्द्यावापृथिव्योः अरतिमभिगंतारं अर्थं स्वामिनं दिवः द्युलोकस्य शिशुं स्तनंधयवदिति। सहसो बलस्य सूनुं पुत्रं यज्ञस्य यागस्य

राम

२०४

र्थं आदिशे आदेशनाय धनानामतिसर्जनाय प्रदानाय। कीदृशं तं इंद्रं इंद्रमिव सुक्रतुं सुकर्माणं वरुणमिव मायिनं मायावंतं प्रज्ञावंतं प्र
ज्ञावंतं अर्यमणमिव ईड्यं स्तुत्यं विष्णुं न विष्णुमिव सृप्रभोजसं प्रसृतधनं। यद्वा चास्याः लिंगोक्तादेवता रुद्रादीनामेव शास्त्रार्थो द्रष्ट
व्यः॥ ॥अथ पंचदशी॥ ॥त्वेषं शर्धो न मारुतं तुविष्वण्यनर्वाणं पूषणं सं यथा शता॥ सं सहस्रा कारिषच्चर्षणिभ्य आँ आविर्गूळ्हा व
सू करत्सुवेदा नो वसू करत्॥ ॥नेति संप्रत्यर्थे संप्रति इदानीं त्वेषं दीप्तं तुविष्वणिं बहुस्वनं अनर्वाणं अप्रच्युतं शत्रुभिरनभिगतं मारु
तं मरुत्संघरूपमीदृशं शर्धो बलं स्तौमीति शेषः। स च मरुद्गणः यथा येन प्रकारेण शतसंख्याकानि धनानि संसं हैव चर्षणिभ्यो मनुष्ये
भ्योऽस्मभ्यं कारिषत्। कुर्यात् आकारः समुच्चये यथा वा सहस्रा सहस्रसंख्याकानि धनानि च संसहेव कारिषत् कुर्यात्। तथा स्तौमीति
पूर्वत्र संबंधः। अपि च मरुद्गणः गूढागूढानि संहृतानि वसूनि धनानि आविष्करत् आविष्करोतु तथा वसूनि धनानि सुवेदा सुलभानि
च नोऽस्माकं करत् करोतु यद्वानुलिंगाद्दिये पोष्णी तदा मारुतं शर्धो बलं त्वेषं पूषणं पोषकमेतत्संज्ञं देवं स्तौमीति योजनीयं॥ ॥अथ षोडशी॥ ॥
॥आ मा पूषन्नुप द्रव शंसिषं नु ते अपिकर्ण आघृणे॥ अघा अर्यो अरातयः॥ ॥हे पूषन् मामाद्रव रक्षणार्थमभिगच्छ हे आघृणे आ
गतदीप्ते अघाः आहंत्रीः अरातयः शत्रुभूताः प्रजाः उपद्रव बाधस्व। उपद्रवो द्रवतिर्बाधार्थो वर्तते यथा प्रजां पशून्यजमानस्योपद्रोष्टा
वोढास्य पुनरादधीत भागधेयेनैवेनं समर्धयतीति। अहं च ते तव अपिकर्णे वापि गते समीपदेशे स्थितः सन्नु क्षिप्रं शंसिषं प्रशंसामि॥

ऋ॰भा॰ वानामीश्वरः कविः क्रांतदर्शी एवंभूतः [illegible] तारं [illegible] सि धनेन सृजय ॥ ॥ अथ पंचमी ॥ ॥ स मे वपुश्छदयदश्विनो
र्यो रथो विरुक्मान्मनसा युजानः ॥ येन नरा ना[illegible]षयध्यै वर्तिर्याथस्तनयाय त्मने च ॥ ॥ अश्विनोः स्वभूतः सः रथः मे मदी
२०५ यं वपुः शरीरं छदयत् छादयतु । यो रथो विरुक्मान् [illegible]रोचनवान् विशेषेण दीप्यमानः मनसा मनोव्यापारमात्रेण युजानः अ
श्वैः संप्रयुज्यमानो भवति । हे नरा नेतारौ नासिकाप्रभवौ वा अश्विनौ येन रथेन वर्तिः स्तोतृगृहं तनयाय पुत्राय त्मने आत्मने पि
त्रे स्तोत्रे च इषध्यै कामान् प्रापयितुं याथो गच्छथः सः रथ इति पूर्वत्रान्वयः ॥ ॥ इति चतुर्थस्याष्टमे पंचमो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥
॥ पर्जन्यवाता वृषभा पृथिव्याः पुरीषाणि जिन्वतमप्यानि ॥ सत्यश्रुतः कवयो यस्य गीर्भिर्जगतः स्थातर्जगदा कृणुध्वं ॥ ॥
हे पर्जन्यवाता पर्जन्यवायू वृषभा वृष्टिकर्तारौ पृथिव्याः अंतरिक्षनामैतत् अंतरिक्षे अप्यानि आप्यानि पुरीषाणि पूरकाण्युद
कानि जिन्वतं प्रेरयतं उत्तरार्धर्चो मारुतः हे सत्यश्रुतः सत्यस्तोत्रस्य श्रोतारः कवयो मेधाविनः मरुतो यस्य स्तोतुर्गीर्भिः स्तुति
भिर्यूयं स्तुता भवथ तस्य स्तोतुः स्थावरजंगमात्मकं प्राणिजातं आ कृणुध्वं आभिमुख्येन कुरुत हे जगतः स्थातः गणाभिप्रायमे
कवचनं स्थावरजंगमात्मकस्य जगतः स्थापक हे मरुद्गणेति योज्यं ॥ ॥ अन्वारंभणीयायां सारस्वतस्य हविषो याज्या पावीरवी ये राम
षा सूत्रितं च । पावीरवी कन्या चित्रायुः पीपिवांसं सरस्वत इति एकादशिने सारस्वते पशौ तथैव पुरोडाशस्य याज्या सूत्रितं च । पावीर २०५

वी कन्या चित्रायुर्यस्ते स्तनः शशयो यो मयोभूरिति आग्निमारुते शस्त्रेऽप्येषा सूत्रितं च । राकामहमिति द्वे पावीरवी कन्या चित्रायुरि
ति ॥ ॥ सैषा सूक्ते सप्तमी ॥ ॥ पावीरवी कन्या चित्रायुः सरस्वती वीरपत्नी धियं धात् ॥ ग्नाभिरच्छिद्रं शरणं सजोषा दुराधर्षं गृणते श
र्म यंसत् ॥ ॥ पावीरवी शोधयित्री कन्या कमनीया चित्रायुश्चित्रगमना चित्रान्ना वा वीरपत्नी वीरः प्रजापतिर्यस्यास्तस्य स्त्री तादृशी
यद्वा वीराणां पालयित्री एवंभूता सरस्वती धियं अस्मदीयं कर्म यज्ञाख्यं धात् दधातु धारयतु वा शब्देन प्रतिपादितेऽर्थो नुष्ठी
यते । अपि च ग्नाभिर्देवपत्नीभिः सजोषाः सह प्रीयमाणा यद्वा ग्नाः गायत्र्यादीनि छंदांसि छंदांसि वै ग्ना इति श्रुतेः । तैः सह प्री
यमाणा गृणते स्तुवते मह्यं अच्छिद्रं छिद्ररहितं दुराधर्षं शत्रुभिः शीतवातादिभिश्च धर्षितुमशक्यं शरणं गृहं शर्म सुखं च यं
सत् प्रयच्छतु ॥ ॥ एकादशिने पौष्णे पशौ पथस्पथ इति हविषो याज्या । सूत्रितं च पथस्पथ इति सैषा सूक्तेऽष्टमी ॥ ॥ पथस्पथः
परिपतिं वचस्या कामेन कृतो अभ्यानळर्कं ॥ स नो रासच्छुरुधश्चंद्राग्रा धियंधियं सीषधाति प्र पूषा ॥ ॥ पथस्पथः सर्वस्य मार्ग
स्य परिपतिं अधिपतिं अर्कं अर्चनीयं पूषणं कामेन काम्यमानेन फलेन कृतो वशीकृतः स्तोता वचस्या वचसा स्तुत्या अभ्यानट् अभ्य
श्नुते प्राप्नोतु सः पूषा नोऽस्मभ्यं शुरुधः शुचो रोधयित्रीर्गाः चंद्राग्राः चंद्रमिति हिरण्यनाम हिरण्यप्रमुखाः यद्वा स्वर्णशृंगीः रा
सत् ददातु रा दाने अस्माल्लेटि रूपं । नश्च धियंधियं सर्वमस्मदीयं कर्म स पूषा प्र सीषधाति प्रसाधयतु ॥ ॥ त्वष्टृपशौ प्रथमभाजमिति

हविषो याज्यास्वित्तं वा प्रथमभाजं [illegible] त्वाजनना रयीणामिति ॥ ॥ सेषा सूक्ते नवमी ॥ ॥ प्रथमभाजं यशसं वयो
धां सुपाणिं देवं सुगभस्तिमृभ्वं ॥ होता यक्ष[illegible]स्त्यानामग्निस्त्वष्टारं सुहवं विभावा ॥ ॥ प्रथमभाजं प्रथमे उषःकाले एव वि
भक्तारं जंतूनां यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्रजायत इति श्रुतेः ॥ यशसं यशस्विनं वयोधां वयोन्न
स्य हविर्लक्षणस्य धातारं धारयितारं यद्वा स्तोतृभ्यो न्नप्रदं सुपाणिं हस्तस्य मणिबंधादूर्ध्वप्रदेशः पाणिः शोभनपाणिकं देवं दाना
दिगुणयुक्तं सुगभस्तिं गभस्तिरिति बाहुनाम सुगभस्तिं शोभनदोर्दंडं ऋभ्वं उरुभासमानं महांतं वा पस्त्यानां पस्त्यमिति गृहनाम
तत्स्थानां यजतं यष्टव्यं गृहस्थैर्यजनीयमित्यर्थः । सुहवं सुखेनाह्वातुं शक्यं एवंभूतं त्वष्टारं होता देवानामाह्वाता विभावा दीप्य
मानोग्निः यक्षत् यजतु अनेन हविषा यजतु ॥ ॥ अथ दशमी ॥ ॥ भुवनस्य पितरं गीर्भिराभी रुद्रं दिवा वर्धया रुद्रमक्तौ ॥ बृहंतमृ
ष्वमजरं सुषुम्नमृधग्घुवेम कविनेषितासः ॥ ॥ भुवनस्य भूतजातस्य पितरं पालयितारं रुद्रं रुतं दुःखं तद्द्रावयितारमाभिरा
भिर्गीर्भिः स्तुतिभिः दिवा अहनि स्तोतर्वर्धय अक्तौ रात्र्यां च तमेव रुद्रं स्तुतिभिर्वर्धय विनाशकेन रुद्रेण इषितासः प्रेरिताः संतः
बृहंतं महांतं ऋष्वं दर्शनीयं अजरं जरारहितं सुषुम्नं शोभनसुखमेवं गुणविशिष्टं रुद्रं ऋधक् समृद्धं यथा भवति तथा हुवेम स्त
वाम ॥ ॥ इति चतुर्थस्याष्टमे षष्ठो वर्गः ॥ ॥ अथैकादशी ॥ ॥ आ युवानः कवयो यज्ञियासो मरुतो गंत गृणतो वरस्यां ॥ अचित्रं चि

केतुं प्रज्ञापकं अरुषं रोचमानं एवंगुणमग्निं यजध्यै यष्टुं स्तुषे इत्यनुषज्यते स्तुषे स्तुवे ॥ ॥ अथ तृतीया ॥ ॥ अरुषस्य दुहितरा विरू
पे स्तृभिरन्या पिपिशे सूरो अन्या ॥ मिथस्तुरा विचरंती पावके मन्म श्रुतं नक्षत ऋच्यमाने ॥ ॥ इयमृग्होत्रायाः स्तुतिः अरुषस्य रोच
मानस्य सूर्यस्य दुहितरौ सूर्येण हि अहोरात्रयोर्विभागः क्रियते अतस्तदधीनात्मलाभत्वात् तस्य दुहितरौ विरूपे उच्येते । विरूपे शु
क्लकृष्णतया नानारूपे तयोरन्या एका रात्रिः स्तृभिर्नक्षत्रैः पिपिशे पिश्यते संश्लिष्यते पिश अवयवे इति धातुः । अन्या अहरात्मिका
दुहिता सूरः सूर्येण पिपिशे संश्लिष्यते तेन च नक्षत्रैः सूर्येण चालंकृते भवत इत्यर्थः । मिथस्तुरा परस्परं बाधयंत्यौ अह्ना रात्रिर्निव
र्त्यते रात्र्या चाहरिति परस्परं बाधः अत एव च विचरंती विविधं पृथक् चरंत्यौ पावके सर्वस्य शोधयित्र्यौ एवंभूते अहश्च रात्रिश्च ऋच्य
माने अस्माभिः स्तूयमाने सत्यौ श्रुतं श्रोतव्यं मननीयं स्तोत्रमस्मत्कृतं नक्षतः व्याप्नुतां ॥ ॥ अथ चतुर्थी ॥ ॥ प्र वायुमच्छा बृहती म
नीषा बृहद्रयिं विश्ववारं रथप्रां ॥ द्युतद्यामा नियुतः पत्यमानः कविः कविमियक्षसि प्रयज्यो ॥ ॥ बृहती महती मनीषा अस्मदीया स्तु
तिः वायुमच्छाभिमुख्येन प्र यच्छतु । उपसर्गश्रुतेर्योग्यक्रियाध्याहारः कीदृशं वायुं बृहद्रयिं महाधनं विश्ववारं विश्वैर्वरणीयं संभजनी
यं रथप्रां रथस्यात्मीयस्य प्रातारं पूरयितारं यद्वा स्तोतृणां रथं धनैः पूरयितारं अथ प्रत्यक्षस्तुतिः । हे प्रयज्यो प्रकर्षेण यष्टव्य वायो द्युत
द्यामा अग्नेर्दीप्यमानः नियुतः आत्मीयाः परस्यां ज्यः वडवाः ताः पत्यमानः अभिपतन् अभिगच्छन् यद्वा पत्यतिरैश्वर्यकर्मा तासां वड

मनायत्र॥ ॥यो विमृशु बधितादं [illegible] तयेतदर्थं पार्थिवानि पृथिवीसंबंधीनि रजांसि लोकान् त्रिलोकानि
तियावत्। त्रिविममे विदिस्यवधारणे त्रि [illegible] परिमितवान् देविष्णोस्तस्य तादृशस्य तेतव तृतीयार्थे षष्ठी ईदृशेन
त्वया उपदद्यमाने अस्मभ्यं दीयमाने शर्मन् शर्मणि सुखे वा वर्तमानाः संतो वयं रया धनेन तन्वा रोगादिरहितेन शरीरेण
तनातनयेन पुत्रेण च मदेम मोदेम हृष्टा भवेम॥ ॥अथ चतुर्दशी॥ ॥तन्नोहिर्बुध्न्यो अद्भिरर्कैस्तत्पर्वतस्तत्सविता च
नो धात्॥ तदोषधीभिरभिरातिषाचो भगः पुरंधिर्जिन्वतु प्रराये॥ ॥बुध्न्यः बुध्नमंतरिक्षं तत्र भवः अहिः अंतरिक्ष इत्या
उक्तं च। अहिरनादेव्यंतरिक्षइति एतत्सदृह्ययाभिधेयोपदेशः अर्चनसाधनैर्मंत्रैः स्तूयमानः सन् नोस्मभ्यं तत् लोके प्रसि
द्धं चनो अन्नं अद्भिः साधं धात् दधातु प्रयच्छतु पर्वतः पूरयिता पर्वपूरण इति धातुः यद्वा पर्ववान् वज्रः पर्वतः तद्वान् पर्वतस्य
गिरेः शातुरिति वा पर्वतः स च तत् अन्नं दधात् तथा सविता प्रेरको देवश्च तत् अन्नं दधातु। अपि च। रातिषाचः रातिर्दानं सचंते सेवं
त इति रातिषाचो विश्वेदेवाः ते च ओषधीभिः उषः पाके। आसु धीयत इति ओषधयस्तिलमाषाद्याः ताभिः साधं तदन्नम
भिप्रयच्छतु तथा पुरंधिः बहुधीः बहुप्रज्ञो वा बहुकर्मा वा भजनीय एतत्संज्ञो देवश्च राये धनार्थं प्रजिन्वतु अस्मान्प्रेरय
तु॥ ॥अथ पंचदशी॥ ॥नूनो रयिं रथ्यं चर्षणिप्रां पुरुवीरं मह ऋतस्य गोपां॥ क्षयं दाताजरं येन जनान्स्पृधो अदेवीरभि

च क्रमाम विश आदेवीरभ्यश्नवाम॥ ॥हे सर्वे देवाः नोस्मभ्यं रयिं धनं क्षयं गृहं च तत् दात प्रयच्छत कीदृशं रयिं रथ्यं रथसंबं
धिनं रथयुक्तमित्यर्थः चर्षणिप्रां चर्षणयो मनुष्याः तेषां पूरयितारं वीर्याज्जायंत इति वीराः पुत्रादयः बहुभिर्वीरैरुपेतं महो
महतः ऋतस्य यज्ञस्य गोपां रक्षकं दक्षिणारूपेण धनेन हि यज्ञो रक्ष्यते। मृतो यज्ञस्त्वदक्षिण इति वचनात् कीदृशं क्षयं अज
रं जरारहितं येन रयिणा रूपेण धनेन क्षयेण च जनान् शत्रून् स्पृधः स्पर्धमानाः अदेवीः अदेवसंबंधिनीरासुरीश्च अभि च
क्रमाम अभिभवेम। तथा अदेवीः अनागता देवा यासु हविःस्वीकारार्थं ता आदेव्यः तादृशाश्च विशः प्रजाः यज्ञानुष्ठायिनीः ये
न धनगृहेण वाभ्यश्नवाम अभिप्राप्नुवाम तादृशं गृहं धनं च दात इत्यन्वयः॥ ॥इति चतुर्थस्याष्टमे सप्तमो वर्गः॥ ॥इति ष
ष्ठे मंडले चतुर्थोनुवाकः॥ ॥पंचमेनुवाके द्वादश सूक्तानि। तत्र हुवे व इति पंचदशर्चं प्रथमं सूक्तं ऋजिश्वन आर्षं बहुदेवत
कं त्रैष्टुभं हुवे व इत्यनुक्रांतं गतः सूक्तविनियोगः॥ ॥तत्र प्रथमा॥ ॥हुवे वो देवीमदितिं नमोभिर्मृळीकाय वरुणं मित्रमग्निं॥
अभिक्षदामर्यमणं सुशेवं त्रातॄन्देवान्सवितारं भगं च॥ ॥हे देवा युष्माकं मातरं देवीं द्योतमानां अदितिं अखंडनीयां अदीनां
वा एतत्संज्ञां देवतां मृळीकाय सुखार्थं नमोभिर्नमस्कारैः स्तोत्रैर्वा हुवे ह्वयामि स्तौमि। तथा वरुणं वारकं मित्रं प्रमीतेस्त्रायकं
देवं अग्निं च एतान् देवान् नमोभिर्हुवे [illegible] दिर्हिंसाकर्मा अभिक्षत्तारं शत्रूणां हिंसितारं सुशेवं सुसुखं अर्यम

ऋ०भा० २०९ णं च नमोभिर्हुवे सवितारं [illegible] न्यालयितॄन् देवान्नमोभिस्तौ ते४ हुवे स्तौमि॥ अथ द्वितीया॥
॥सुज्योतिष४ सूर्य दक्षपितॄननागास्त्वे सुमहो वीहि देवान्॥ द्विजन्मानो य ऋतसाप४ सत्या४ स्वर्वंतो यजता अग्निजिह्वा४॥
हे सुमह४ शोभनदीप्ते४ सूर्यस्य प्रेरक दक्षपितॄन् दक्षः पितामहो येषां ते दक्षपितरः अपि तु श्रेष्ठा हि समत्वेन पूर्वपुरुषत्वमा
त्रं श्रूयते। यथा आहं पितॄन्त्सुविदत्रां अविसीति येषां दक्षपितृत्वं च अदितिर्ह्यजनिष्टेतिमंत्रादवगम्यते ईदृशान् सुज्योतिष४
शोभनज्योतिष्कान् देवान् अनागास्त्वे अनपराधत्वे वीहि कामयस्व। यथास्माकं अपराधं तेन कुर्वंति तथा कुर्या इत्यर्थः। ये
देवा द्विजन्मान४ द्वयोर्लोकयोर्जायमाना४ प्रादुर्भवंतः ऋतसाप४ ऋतं यज्ञं स्पृशंतः सत्याः अवितथ४ सत्यवादिनो वा स्वर्वं
तो धनवंत४ यजता४ यष्टव्या४ अग्निजिह्वा४ अग्निर्जिह्वास्थानीयो येषां ते एवंभूता४ एते देवा४ संति तान्देवान्वीहीत्यन्वय४॥
॥अथ तृतीया॥ ॥उत द्यावापृथिवी क्षत्रमुरु बृहद्रोदसी शरणं सुषुम्ने॥ महस्करथो वरिवो यथा नोऽस्मे क्षयाय धिषणे अने
ह४॥ ॥उत अपि च हे द्यावापृथिवी द्यावापृथिव्यौ। उरु विस्तीर्णं क्षत्रं बलं कुरथ४ कुरुतं। तथा हे रोदसी द्यावापृथिव्यौ सुषुम्ने सु
सुखे युवां बृहत् महत् शरणं गृहं चकरथ४ कुरुतं बृहत् महत् वरिवो धनं नोस्माकं यथा स्यात्तथा कुरुतमित्यर्थ४। अपि च हे राम
धिषणे धारयित्र्यौ द्यावापृथिव्यौ अनेह४ पापराहित्ये च अस्मे अस्माकं क्षयाय निवासार्थं कुरुतं॥ ॥अथ चतुर्थी॥ ॥आ नो २०९

धियं जिन्वथा रुधंतस्य कान क्षंतो नरो अंगिरस्वात्॥ ॥हे युवानो नित्यतरुणा४ कवय४ क्रांतप्रज्ञा४ यज्ञियासो यज्ञार्हा४ एवंभूता हे मरु
त४ गृणत स्तुवतो वरस्यां वरणीयां स्तुतिं प्रति आगत आगच्छत अपि च हे नरो नेतारो मरुत४ इन्द्र मनेन प्रकारेण वर्धंतो वर्धमाना४
यद्वा इत्था अमत्रां तरिक्षं नक्षंतो व्याप्नुवंत४ अंगिरस्वत् अंगिरसो गमनशीला रश्मय४ ते यथा शीघ्रं नभस्तलं व्याप्नुवंति तद्वत् य
द्वा मेधायं एवांगिरसः तद्वत् शीघ्रगामिन४। एवंभूता यूयं अविव्रं वित्त् ओषधिवनस्पतिभिर्निबिडो देशः श्वभ्र४ तद्विलक्षणं ओ
षध्यादिभिर्वियुक्तमर्यं देशं जिन्वथ। इष्ट्यातर्पयथ। हीति पूरण४॥ ॥अथ द्वादशी॥ ॥प्र वीराय प्रतवसे तुराया जा यूथेव पशुरक्षि
रस्तं। सा पिस्पृशति तन्विश्रुतस्याक्षिभिर्न नाकं वचनस्य विप४॥ ॥वीराय विक्रांताय विविधं शत्रूणां वारकाय वा मरुद्गणाय प्रा शं
हे स्तोत४ स्तुतिं प्रगमयत तवसे बलते तुराय क्षिप्रगामिने तस्मै गणाय प्रावाजत त्वदृष्टांत४ पशुरक्षि४ पशुपालक४ यूथेव यथा
गा यूथानि सायंकाले अस्तं गृहं शीघ्रं गमयति तद्वत् शीघ्रं स्तुतिं प्रेरयेत्यर्थ४। स च मरुद्गण४ वचनस्य विप४ विप्रस्य मेधाविनः स्तो
तु४ श्रुतस्य क्रियायहणमपि कर्तव्यमिति कर्मण४ संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। श्रुतं श्रोतव्यं स्तोत्रं तन्वि आत्मीये शरीरे पिस्पृश
ति स्पर्शयितु संश्लेषयतु तत्स्तोत्रं हृष्टं भवति इत्यर्थ४। स्पृशने दृष्टांत४ स्तृभिर्नाकं यथा नक्षत्रैर्नाकमंतरिक्षं स्पर्शयति संश्लेषय
ति तद्वत्॥ ॥अथ त्रयोदशी॥ ॥यो रजांसि विममे पार्थिवानि त्रिश्चिद्विष्णुर्मनवे बाधिताय॥ तस्य ते शर्मन्नुपदद्यमाने राया मदेम तन्वा३

ऋ०भा० उपश्रवदित् उपशृणुयादेव । अपि च गृणानः स्तूयमानः इंद्रः महो महतः प्रभूतान् वाजान् अन्नानि च उपरासत् प्रदेयात्
२०९ अत एवं करोतीत्यर्थः ॥ ॥ अथ सप्तमी ॥ ॥ ओमानमापो मानुषीरमृक्तं धात तोकाय तनयाय शं योः ॥ यूयं हि ष्ठा भिषजो मा-
तृतमा विश्वस्य स्थातुर्जगतो जनित्रीः ॥ ॥ हे आपः मानुषीर्मनुष्यहिताः यूयं अमृक्तमहिंसितं ओमानं अत्तिरक्षत्रीत्योमा
रक्षकमन्नं तोकाय पुत्राय तनयाय तत्पुत्राय च धात धत्त प्रयच्छत शं शमनमुपद्रवाणां योः यवनं पृथक्करणं च पृथक्क-
र्तव्यानां धत्त प्रयच्छत । कुत इत्यत आह । हि यस्माद्यूयं मातृतमाः मातृभ्योप्यधिकाः भिषजस्थ भवथ तस्माद्दातेत्यन्वयः ।
कथंभूतेभ्यो प्यधिकं भेषज्यमस्तीत्यत आह । विश्वस्य सर्वस्य स्थातुः स्थावरस्य जगतो जंगमस्य जनित्रीर्जनयित्र्यो भव-
थ अतो यूयं भिषजस्थः ॥ ॥ अथाष्टमी ॥ ॥ आ नो देवः सविता त्रायमाणो हिरण्यपाणिर्यजतो जगम्यात् ॥ यो दत्रवाँ उष-
सो न प्रतीकं व्यूर्णुते दाशुषे वार्याणि ॥ ॥ त्रायमाणो रक्षन् हिरण्यपाणिः सुवर्णहस्तः हितरमणीयपाणिर्वा यजतो य-
ष्टव्यः एवंभूतः सविता प्रेरको देवः नः अस्मान् आजगम्यादागच्छतु । यो देवः दत्रवान् धनवान् उषसो न प्रतीकं उषसः प्रत्यु-
खमिव दाशुषे हवींषि दत्तवते यजमानाय वार्याणि वरणीयानि धनानि व्यूर्णुते वृणोति प्रकाशयति स सवितेत्यन्वयः ॥ ॥ राम
॥ अथ नवमी ॥ ॥ उत त्वं सूनो सहसो नो अद्या देवाँ अस्मिन्नध्वरे ववृत्याः ॥ स्यामहं ते सदमिद्राता तव स्यामग्ने अवसा सुवीरः ॥ २०९

॥ उत अपि च हे सहसः सूनो बलस्य पुत्राग्ने त्वमद्यास्मिन्काले नोस्मदीयेस्मिन्नध्वरे यागे देवान्यष्टव्यानिंद्रादीन् आववृत्याः आ-
वर्तय आगमय अपि चाहं ते तव रातौ धनस्य दाने सदमित् सर्वदैव वर्तमानः स्यां भवेयं । तथाग्ने तवावसा त्वदीयेन रक्षणेन
सुवीरः शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेतश्च स्यां भवेयं ॥ ॥ अथ दशमी ॥ ॥ उत त्या मे हवमा जगम्यातं नासत्या धीभिर्यु-
वमंग विप्रा ॥ अत्रिं न महस्तमसोमुमुक्तं तूर्वतं नरा दुरितादभीके ॥ ॥ उत अपि च हे विप्रा विप्रौ प्राज्ञौ नासत्या सत्यस्वभावौ स-
त्यस्य नेतारौ वा हे अश्विनौ त्या तौ प्रसिद्धौ युवं युवां धीभिः परिचारकैः कर्मभिरुपेतं मेमदीयं हवं स्तोत्रं अंग क्षिप्रं आजगम्यातं
आगच्छतं आगत्य च महो महतस्तमसः असुरकृतादंधकारात् अत्रिं न यथात्रिमृषिं मुमुक्तं मोचितवंतौ स्थः हे नरा नेताराव-
श्विनौ तथास्मानपि अभीके अभ्यक्के प्राप्ते संग्रामे दुरिताद्दुःखात् शत्रुकृतात् तूर्वतमस्मान्तारयतं ॥ ॥ इति चतुर्थस्याष्ट-
मे नवमो वर्गः ॥ ॥ अथैकादशी ॥ ॥ ते नो रायो द्युमतो वाजवतो दातारो भूत नृवतः पुरुक्षोः ॥ ॥ दशस्यंतो दिव्याः पार्थिवा-
सो गोजाता अप्या मृळता च देवाः ॥ ॥ हे देवास्ते यूयं द्युमतो दीप्तिमतः वाजवतो बलयुक्तस्य नृवतः नृभिः पुत्रादिभिरुपेतस्य
पुरुक्षोर्बहुभिः कीर्तनीयस्य रायो धनस्य नोस्मभ्यं दातारो भूत भवत । अपि च दशस्यंतः कामान्प्रयच्छंतः दिव्याः दिवि भवाः
आदित्याः पार्थिवासः पृथिव्यां भवाः वसवः गोजाताः गोः पृश्निर्माध्यमिका वाक् तत्र जाता मरुतः अप्याः अप्सु अंतरिक्षे भवाः सं-

ऋ॰भा॰ ऽश्वते देवाः॰ सर्वे यूयं अस्मान् मृळत सुखयत ॥ ॥ अथ द्वादशी ॥ ॥ ते नो रुद्रः॰ सरस्वती सजोषा मीळ्हुष्मंतो विष्णुर्मृळयंतु वायुः॥
ऋभुक्षा वाजो दैव्यो विधाता पर्जन्यावाता पिप्यतामिषं नः॰ ॥ ॥ मीळ्हुष्मंतो वर्षणवंतः तद्देवा नोऽस्मान् मृळयंतु के त इति चेदुच्य
२१० ते रुद्रः॰ सरस्वती च सजोषाः सह प्रियमाणाः॰ विष्णुर्वायुः॰ ऋभुर्विभ्वा वाज इति त्रयः॰ सौधन्वनाः॰ तेषामाद्यो ऋभुक्षा वाजो ति म
ध्यम उपलक्षणमेतत् विभ्वा च दैव्यो देवेभ्यो हितः॰ विधाता प्रजापतिश्च अपि च पर्जन्यावाता पर्जन्यश्च वातश्च उभौ नोऽस्मभ्यमि
षमन्नं पिप्यतां वर्धयतं ॥ ॥ अथ त्रयोदशी ॥ ॥ उत त्यं देवः सविता भगो नोऽपां नपादवतु दानु पप्रिः॰ ॥ त्वष्टा देवेभिर्जनिभिः सजोषा
द्यौर्देवेभिः पृथिवी समुद्रैः॰ ॥ ॥ उतापि च त्यः॰ सः यः प्रेरकतया सर्वत्र प्रख्यातः सविता देवः भगश्च अपां नपाच्च अपां मेघस्था
नां पुत्रो माध्यमिको ऽग्निः॰ स च नोऽस्मान् रक्षतु । कीदृशोऽपां नपात् दानु दातव्यं धनं पप्रिः॰ पूरयिता पृ पूरण इत्यस्मादादृगमहन
इति किनालिड्वद्भावान्न लोकाव्ययेति षष्ठीप्रतिषेधः॰ । तथा देवेभिर्देवैः॰ जनिभिस्तत्पत्नीभिश्च सजोषाः सह प्रीतियुक्तः त्वष्टा
च सह देवेभिर्देवैः॰ सह प्रियमाणा द्यौश्च समुद्रैः॰ सह प्रीयमाणा पृथिवी च एताः॰ सर्वा देवता अस्मान् अवंतु ॥ अग्निमारु
त उत नोऽहिरित्येषा सूत्रिते च । उत नोऽहिर्बुध्न्यः॰ शृणोतु देवानां पत्नीरुशतीरवंतु न इति ॥ ॥ सेयमृक् चतुर्दशी ॥ ॥ उत नो राम
ऽहिर्बुध्न्यः॰ शृणोत्वज एकपात्पृथिवी समुद्रः॰ ॥ विश्वे देवा ऋतावृधो हुवानाः॰ स्तुता मंत्राः॰ कविशस्ता अवंतु ॥ ॥ उत अपि च २१०

रुद्रस्य सूनवो नमंतामद्याहूतासो वसवोऽधृष्टाः॰ ॥ यदीमर्भे महति वा हितासो बाधे मरुतो अह्वाम देवान् ॥ ॥ रुद्रस्य सूनवः॰
पुत्रा मरुतः॰ अद्यास्मिन् काले आहूतासः॰ आहूताः॰ संतः नोऽस्मान् प्रति आनमंतो अनता भवंतु । कीदृशाः॰ वसवो वासयितारः॰
अधृष्टाः अन्यैरहताः॰ यद्यदा ईमेनं नो मरुतो देवाः॰ अर्भे अल्पे महति प्रभूते वा बाधे संग्रामे हितासो निहिताः॰ स्थिताः॰ संतो वयं
अह्वाम आह्वयाम तदानीमयं स्वेच्छयः॰ ॥ ॥ अथ पंचमी ॥ ॥ मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा ॥ श्रुत्वा ह
वं मरुतो यद्ध याथ भूमा रेजंते अध्वनि प्रविक्ते ॥ ॥ येषु मरुत्सु रोदसी रुद्रस्य पत्नी देवी द्योतमाना माध्यमिका वाक् मिम्यक्ष नु
क्षिप्रं संगच्छते । अभ्यर्धयज्वा स्तोतॄन् अभ्यर्धयन् समृद्धान् कुर्वन् यो जयति धनेन पूजयति तादृशः॰ पूषा प्रेरको देवश्च सिषक्ति
यान्मरुतः॰ सचते अभ्यर्धयन् यजतीति यास्कः॰ । हे मरुतः॰ ते यूयं हवमस्मदीयमाह्वानं श्रुत्वा यद्ध यदा खलु याथ गच्छथ तदानीं
अध्वनि मार्गे प्रविक्ते गमनार्थं पृथक्कृते सति तत्र विद्यमाना निम्नाः भूतजातानि रेजंते कंपंते । तथा च मंत्रांतरं । प्रवेपयंति पर्वता
न्विविंचंति वनस्पतीनिति ॥ ॥ इति चतुर्थस्याष्टमे अष्टमो वर्गः॥ ॥ अथ षष्ठी ॥ ॥ अभि त्यं वीरं गिर्वणसमर्चेंद्रं ब्रह्मणा जरितर्नवेन ॥
श्रवदिद्धवमुप च स्तवानो रासद्वाजाँ उप महो गृणानः॥ ॥ हे जरितः स्तोतः त्यं तं प्रसिद्धं वीरं वीर्यविशेषेण शत्रूणां मारकं गिर्व
णसं गिरां संभक्तारं एवंविधमिंद्रं नवेन अभिनवेन ब्रह्मणा स्तोत्रेण अभ्यर्च अभिष्टुहि । स्तवानः॰ स्तूयमानः सन् हवमस्मदीयं स्तोत्रं

रक्षोभिरहिंसितं शुचिं शुद्धं निर्म... दर्शनीयं एवंभूतं ऋतस्यादित्यस्थानीकं तेजः आ सर्वेषामभिमुखं उदेति उद्गच्छति। उ
दिताः उदितौ सूर्यस्योदये सति उदितं तत्तेजः दिवो अंतरिक्षस्य रुक्मान् भूषणमिव व्यद्योत विद्योततः प्रकाशते॥ ॥अथ द्वितीया॥॥
॥वेदयस्त्रीणि विदथान्येषां देवानां जन्म सनुतरा च विप्रः॥ ऋजु मर्तेषु वृजिना च पश्यन्नभि चष्टे सूरो अर्य एवान्॥ ॥यः सूर्य
स्त्रीणि त्रिसंख्यानि विदथानि वेदितव्यानि स्थानानि त्रीन् लोकान् वेद वेत्ति जानाति एषां तत्तल्लोकत्रयवर्तिनां देवानां च सुरुद्रा
दित्यानां सनुतरं तर्हितनामैतत्। अंतर्हितं अप्रज्ञायमानं जन्म जननं च यः विप्रो मेधावी सूर्यो वेत्ति आकारः पूरकः स सूरः
सूर्यः मर्त्येषु मनुष्येषु विद्यमानानि कर्माणि ऋजिना वृजिनानि शोभनानि कर्माणि च पश्यन् साक्षितया जानन् अभिचष्टे अ
भितः सर्वं जगत्प्रकाशयति तथा अर्यः स्वामिभूतः एवान् प्राप्तव्यान् कामांश्च मनुष्येभ्यः प्रकाशयति॥ ॥अथ तृतीया॥ ॥स्तुष
उवो मह ऋतस्य गोपानदितिं मित्रं वरुणं सुजातान्। अर्यमणं भगमदब्धधीतीनच्छा वोचे सधन्यः पावकान्॥ ॥हे देवा महो
महतः ऋतस्य यज्ञस्य गोपान् रक्षकान् वो युष्मान् स्तुषे स्तुवे उ इति पूरणः इति तानेव देवानाह। अदितिमदीनां देवमा
तरं मित्रं वरुणं च एतान् सुजातान् शोभनजननान् अर्यमणं भगं च अदब्धधीती नहिंसितकर्मणः सधन्यः धनसहिता
न् पावकान् विश्वस्य शोधकान् ईदृशान् सर्वान् देवान् अच्छा वोचे अभिप्रब्रवीमि स्तर्यः॥ ॥अथ चतुर्थी॥ ॥रिशादसः सत्प

तीरदब्धान्महो राज्ञः सुवसनस्य दातॄन्॥ यूनः सुक्षत्रान्क्षयतो दिवो नॄनादित्यान्याम्यदितिं दुवोयु॥ ॥रिशादसः रिशतां
हिंसकानां असितॄन् क्षेप्तॄन् यद्वा रिशानां हिंसकानां अत्तॄन् भक्षयितॄन् सत्पतीन् सतां पालयितॄन् अदब्धानहिंसितान् म
हो महतः राज्ञो राजमानान् ईश्वरान् वा सुवसनस्य शोभननिवासस्य दातॄन् यूनो नित्यतरुणान् सुक्षत्रान् शोभनधनान् शोभन
बलान् वा क्षयतः सर्वत्र निवसतः। यद्वा क्षयतिरैश्वर्यकर्मा। ईशानान् दिवो द्युलोकस्य नॄन् नेतॄन् आदित्यान् अदितेः पुत्रान्
ईदृशान् सर्वान् देवान् दुवोयु दुवस्युः विभक्तिमेतत्। दुवोयु दुवोऽस्मदीयं परिचरणं कामयमानानां अदितिं देवमातरं यामि या
चामि यद्वा यामि प्राप्नवामि॥ ॥अथ पंचमी॥ ॥द्यौ ३ ष्पितः पृथिवि मातरध्रुगग्ने भ्रातर्वसवो मृळता नः। विश्व आदित्या अदि
ते सजोषा अस्मभ्यं शर्म बहुलं वि यंत॥ ॥हे पितः पितृस्थानीय द्यौः द्युलोकादहमागः मातृस्थानीयः अध्रुगद्रोग्ध्रि पृथिवि
हे भ्रातः भ्रातृस्थानीयाग्ने हे वसवः निवासयितारो देवाः ते सर्वे यूयं नोऽस्मान् मृळत सुखयत हे विश्वे आदित्याः सर्वे अदि
तिपुत्रा देवाः हे अदिते यूयं सजोषाः संगता भूत्वा अस्मभ्यं बहुलमधिकं शर्म सुखं विस्तृतं वा गृहं वियंत प्रयच्छत॥ ॥इति च
तुर्थस्याष्टमे एकादशो वर्गः॥ ॥अथ षष्ठी॥ ॥मा नो वृकाय वृक्ये समस्मा अघायते रीरधता यजत्राः॥ यूयं हि ष्ठा रथ्यो नस्तनू
नां यूयं दक्षस्य वचसो बभूव॥ ॥हे यजत्रा यष्टव्या देवाः नोऽस्मान् वृकाय हिंसकाय स्तेनाय वृक्ये तस्य स्त्रियै च मारीरधत माव शो

नेहमावनीकुरुतयंद्वा हक्राद्द... ...ातस्य ... ... अपिच समस्मै सर्वस्मै अघायते अघमनर्थः अस्माकमिच्छते शत्रुजना
यअस्मा आवृश्चीनयत। यूयं हि यूयं खलु नोस्म ... ...न्नां शरीराणां रथ्यो नेतारस्थः भवथ। यूयमेव दक्षस्य अस्मदीयस्य
बलस्य वचसो वाक्यस्य च नेतारो बभूव अतःकारणात् अस्मान्मा रीरधत तेत्यर्थः॥॥ अथ सप्तमी॥ ॥मा व एनो अन्यकृ
तं भुजेम मा तत्कर्म वसवो यच्चयध्वे॥ विश्वस्य हि क्षयथ विश्वदेवाः स्वयं रिपुस्तन्वं रीरिषीष्ट॥ ॥हे देवा वो युष्माकं स्वभूता
वयं अन्यकृतं अन्यैः शत्रुभिः कृतमुत्पादितं एनः पापं मा भुजेम मा भुंक्ष्महि हे वसवो वासयितारो देवा यत् येन कृतेन पापेन
चयध्वे अस्मान्बाधध्वे। चयतिर्हिंसाकर्मा तच्च पापकर्म मा कार्ष्म करोतेर्लुङि मंत्रे घसेति च्लेर्लुक्। हे विश्वे देवाः सर्वे देवाः वि
श्वस्य सर्वस्य जगतो यूयं हि क्षयथ ईश्वरा भवथ। अतः कारणात् अस्मदीयो रिपुः शत्रुः तन्वं शरीरं स्वयमेव मा रीरिषीष्ट हिं
स्यात्। यथैवं भवति तथा कुरुतेति भावः॥ ॥अथाष्टमी॥ ॥नम इदुग्रं नम आ विवासे नमो दाधार पृथिवीमुत द्याम्। नमो दे
वेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे॥ ॥आस्तां तावत् देवानां माहात्म्यं तदीयो नमस्कारो पि इदं च महाभाग इति श्रु
ताणः कृत्स्नुतिकन्यायेन देवान् स्तौति। नम इत् नमस्कार एव उग्रं उद्गूर्णबलं सर्वोत्कृष्टं तेन हि सर्वं लभ्यते अतो नमः नमस्कारं
आ विवासे परिचरामि। नमः नमस्कार एव पृथिवीं उत द्यां द्युलोकं च धारयति द्यावापृथिव्यो प्राणिभिः नमस्क्रियमाणे सत्योतद्रुप भो

अहिर्बुध्न्यो नोस्माकं स्तोत्रं शृणोतु अजः अजो जननरहितः एक असहाय एव पद्यते गच्छतीत्येकपात् एकं पदं द्वाभ्यामा हू
यमानः पूर्वैः ऋषिभिश्च स्तोत्रैः स्तुताः मंत्राः मंत्रणीया गुप्तभाषितव्याः मंत्रप्रतिपाद्या वा कविशस्ताः कविभिर्मेधाविभिः ऋ
त्विग्भिः शास्त्रैः शंसिताः ईदृशा विश्वेदेवाः अवंतु अस्मान्रक्षंतु॥ ॥अथ पंचदशी॥ ॥एवा नपातो मम तस्य धीभिर्भरद्वा
जा अभ्यर्चंत्यर्कैः॥ ग्नाहुतासो वसवोधृष्टा विश्वे स्तुतासो भूता यजत्राः॥ ॥एव एवं यो हे देवान् स्तुतवान् तस्य मम ऋजिश्वनो
नपातः नप्तारः भरद्वाजगोत्रकाः सुहोत्रादयः धीभिः स्तोत्रैः अर्कैः अर्चनसाधनैः अभ्यर्चंति अभिष्टुवंति। हे यजत्रा यष्टव्या देवाः
ग्नाहुतासः पुरोडाशादिभिर्हविर्भिः हुतास्तर्पिताः वसवो निवासयितारः अधृष्टाः केनाप्यहिंसिताः एवंभूता विश्वे सर्वे यूयं ग्नाः देव
पत्न्यश्च स्तुतासो स्तुताः संतः सुहोत्रादिभिः स्तुता भवत॥ ॥इति चतुर्थस्याष्टमे दशमो वर्गः॥ ॥उदु त्यमिति षोडशर्चं द्वितीयं
सूक्तं ऋजिश्वन आर्षं वैश्वदेवं त्रयोदश्याद्यास्तिस्र उष्णिक् षोडश्यनुष्टुप् शिष्टास्त्रिष्टुभः। तथा चानुक्रांतं। उदु षोळश्यनु
ष्टुबंतमिति गतः सूक्तविनियोगः॥ ॥तत्र प्रथमा॥ ॥उदु त्यच्चक्षुर्महि मित्रयोरां एति प्रियं वरुणयोरदब्धं॥ ऋत
स्य शुचि दर्शतमनीकं रुक्मो न दिव उदिता व्यद्यौत्॥ ... त्यत् तत् प्रसिद्धं चक्षुः प्रकाशकं महि महत् दीप्तं मित्रयोर्वरुणमित्रयोः
प्रियं मित्रयोः प्रियमित्रयोः ... शाश्वतं ... मित्रावरुणाभ्यामपि त्राचष्टे मित्रावरुणयोरिति प्रियमलब्धं

ऋ०भा० यजत्राः॥ सुशर्माणः॥ स्ववसः॥ सुनीथाः॥ भवंतु नः॥ सुत्रात्रासः॥ सुगोपाः॥ ॥ ते देवा नोस्माकं क्षामा निवासभूमिं वर्धयन् वर्धयंतु के ते इंद्र
पृथिवी च पूषा च भगश्च अदितिर्देवीनां देवमाता पंच जना देवमनुष्या गंधर्वाप्सरसः सर्पा इत्यादि प्राण्युत्पत्तिकादेवमनुष्यादयश्च तेनोस्मा
२१३ दर्थं सुशर्माणः सुसुखाः स्ववसः शोभनान्नाः सुनीथाः सुप्रापणाश्च भवंतु अस्मभ्यं शोभनसुखादिकं च प्रयच्छंत्विति भावः॥ सु
त्रात्रासः सुष्ठु त्रातारः सुगोपाः शोभनगोपायितारश्च भवंतु उपस्थितेभ्यः शत्रुभ्यो रक्षणं तेषां उत्पत्तिनिरोधनेन रक्षणं गोपनं॥
॥॥ अथ द्वादशी॥॥ नू सद्मानं दिव्यं नंशि देवा भारद्वाजः सुमतिं याति होता॥ आसानेभिर्यजमानो मियेधैर्देवानां जन्म वसूयुर्व
वंद॥ ॥ अनया ऋषिरात्मानं परोक्षतयाह। हे देवा भारद्वाजः भरद्वाजगोत्रजः होता स्तोता यमृषिः दिव्यं दिवि भवं सद्मानं सदनं
स्थानं नु क्षिप्रं नंशि व्याप्नोतु। तथा सुमतिं शोभनां मतिं युष्मदीयामनुग्रहबुद्धिं च याति याचते॥ ॥ याचतिर्याच्ञाकर्मा। तदर्थं
आसानेभिः आसीनेभिः आसीनैः सत्रासनैः सत्रासनं कुर्वद्भिः मियेधैः मेध्यैर्मेधार्हैः अन्ययजमानैः सार्धं यजमानः यागं
कुर्वन्नु यद्यमृषिः वसूयुः वसूनि धनान्यात्मन इच्छन् देवानां जन्म जननं सर्वं च वंद स्तौति॥ ॥ दशरात्रस्य चतुर्थेहनि प्रउगशा
स्त्रे अपत्यं वृजिनमित्येषा वैश्वदेवस्य तृचः सूत्रितं च। अपत्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यं इत्यानुष्टुभं प्रउगमिति। तच प्रथमा राम
सूक्ते त्रयोदशी॥ ॥ अपत्यं वृजिनं रिपुं स्तेनमग्ने दुराध्यं॥ दविष्ठमस्य सत्पते कृधी सुगं॥ ॥ हे अग्ने त्वं अपत्यं प्रतिषिद्धं वृजिनं कुटिलं २१३

रिपुं पापकारिणं दुराध्यं दुःखस्याध्यातारं दुष्टाभिप्रायं एवंभूतं स्तेनं हिंसकं दविष्ठं दूरतमं अपास्य अभिक्षिप अस्तु क्षेपणे इति धातुः
हे सत्पते सतां पालयितरग्ने अस्माकं सुगं शोभनेन गंतव्यं सुखं च कृधि कुरु। अत्र सर्वदेवतात्मकस्याग्नेः स्तवनाद्वैश्वदेवत्वं॥ ॥ अथ च
तुर्दशी॥॥ ग्रावाणः सोम नो हि कं सखित्वनाय वावशुः॥ जही न्यत्रिणं पणिं वृको हि षः॥ ॥ हे सोम नोस्मदीया इमे ग्रावाणः अभिष
वार्थाः पाषाणाः त्वत्सखित्वनाय सख्यार्थं वावशुः कामयंते कमिति पूरकः हि यस्मादेवं तस्मात् पणिं वणिजं अदातारं अत्रिणं
दर्शनशीलं राक्षसादिकं विजहि विनाशय। स पणिर्वृको हि आपानपरः खलु सर्वदा अस्माच्च अस्मत्तोपहरणशीलं अन्नस्तेजही
त्यर्थः॥ ॥ कुकृ वृक आदान इति धातुः॥ ॥ अथ पंचदशी॥ ॥ यूयं हि ष्ठा सुदानव इंद्रज्येष्ठा अभिद्यवः॥ कर्ता नो अध्वन्ना सुगं गो
पा अमा॥ ॥ हे सुदानवः शोभनदाना देवाः यूयं खलु स्थ भवथ समृद्ध्य स्थ इंद्रज्येष्ठाः इंद्रो ज्येष्ठो मुख्यो येषां ते अभिद्यवो भिगत
दीप्तयः ते यूयं अध्वन् अध्वनि मार्गे नोस्माकं अमा सहैव गोपाः गोपायितारो रक्षिताः संतः सुगं सुखं आकारः समुच्चये। सुखं च
कर्ता कुरुत तत्॥ प्रवासादागमने पि पंथामित्येषा यजमानेन जप्या सूत्रितं च। अपि पंथामगन्महीति प्रत्येत्य समित्पाणिरिति। सेषा
सूक्ते षोडशी॥ ॥ अपि पंथामगन्महि स्वस्तिगामनेहसं॥ येन विश्वाः परि द्विषो वृणक्ति विंदते वसु॥ ॥ पंथां पंथानं मार्गं अपि अगन्म
हि अपिर्गताः प्राप्ताः स्म। कीदृशं स्वस्तिगां सुखेन गंतव्यं अनेहसं पापरहितं येन पथा गच्छन् विश्वाः सर्वाः द्विषो द्वेष्ट्रीः प्रजाः परिवृणक्ति

ऋ॰भा॰
२१४

परिहृत्याक्रि परिवर्जयति। [illegible] वैदतेल [illegible] यानमित्यर्थ॰॥ ॥इति चतुर्थस्याष्टमे त्रयोदशो वर्गः॥ ॥नतद्दिवे
ति सप्तदशर्चं तृतीयं सूक्तं ऋजिश्वन आर्षं [illegible] तं॰ षष्ठी त्रिष्टुभ॰ सप्तम्याद्याः षड्गायत्र्य॰ त्रयोदशी त्रिष्टुप् चतुर्दशी
जगती शिष्टास्तिस्रस्त्रिष्टुभ॰ तथा चानुक्रांतं। नतद्दूना सप्तम्याद्याः षड्गायत्र्यश्चतुर्दशी जगती गतो विनियोगः॥ ॥तत्र प्रथमा॥ ॥
॥नतद्दिवा न पृथिव्यानुमन्ये न यज्ञेन नो शमीभिराभि॰ उब्जंतु तं सुभ्व१ः पर्वतासो निहीयतामतियाजस्य यष्टा॥ ॥अतियाजो ना
म कश्चिदृषि॰ अस्मादृजिश्वनाधुत्कृष्ट॰ स्याहमिति बुध्या देवानियष्टुराह ऋषि॰ तदीयं यजनं निराष्टाय जानत अतियाजस्य ऋषे
स्तद्यजनं दिवा द्युलोको न तत्रस्थेन देवगणेन युक्तमित्यहं नानुमन्ये। अनुमतिं न करोमि न च पृथिव्या पार्थिवेनापि देवगणेनायु
क्तमित्यनु अनुमन्ये च यज्ञेन मयानुष्ठितेन सदृशं न दित्यहमनुमन्ये उतापि च आभिः शमीभि॰ अन्येनापि मयाकृतैभि॰ कर्मभि॰
सदृशमित्यपि नानुमन्ये मया वशीकृता देवास्तदीयं यजनं नोरीकुर्वंति। स चानभिज्ञत्वात्। सम्यगयष्टुमपि न च केन करोतीति भा
व॥ अपि च तमृषिं सुभ्व॰ सुष्टु भवंत॰ पर्वतास॰ पर्वताः इंद्रेण प्रहिताः उब्जंतु हिंसंतु उब्जिर्हिंसाकर्मा। तथा तस्यापियाजस्य ऋ
जिश्वनोप्यतिशयेनाहं देवान्यजामीति बुध्या युक्तस्य ऋषे॰ यो यष्टा याजक॰ स नीहीयतां नितरां हीनो भवतु॥ ॥अथ द्वितीया॥ ॥ राम
॥अति वा यो मरुतो मन्यते नो ब्रह्म वा य॰ क्रियमाणं निनित्सात्॥ तपूंषि तस्मै वृजिनानि संतु ब्रह्मद्विषमभि तं शोचतु द्यौ॰॥ ॥हे मरु २१४

गाय चिरकालमवतिष्ठते अतो देवेभ्य॰ ईदृशं नमस्करोमि एषां देवानां नमो नमस्कार॰ ईशे ईष्टे यतस्तेन ते वशीकृता॰ कृतं
चित् कृतमपि आचरितमप्येन॰ पापं नमसा नमस्कारेण विवासे विवासो वर्जनं वर्जयामि विनाशयामि॥ ॥अथ नवमी॥ ॥ऋत
स्य वो रथ्य॰ पूतदक्षानृतस्य पस्त्यसदो अदब्धान्॥ तां आ नमोभिरुरुचक्षसो नॄन्विश्वान्व आ नमे महो यजत्रा॰॥ ॥हे यजत्रा
यष्टव्या देवा॰ वो युष्मदीयस्य ऋतस्य यज्ञस्य रथ्यो रंहितॄन् नेतॄन् पूतदक्षान् शुद्धबलान् ऋतस्य यज्ञस्य पस्त्यसदः यज्ञसंबं
धिनि पस्त्ये देवयजनलक्षणे गृहे सीदंतो निषण्णान् अदब्धान् रक्ष॰ प्रभृतिभिरहिंसितान् उरुचक्षसो बहुदृष्टेर्नॄन् नेतॄन्म
हो महत॰ तान् विश्वान् सर्वान् वो युष्मान् आभिमुख्येन क्रियमाणैर्नमोभिर्नमस्कारैः आ नमे आनतोस्मि॥ ॥अथ दशमी॥ ॥
॥ते हि श्रेष्ठवर्चसस्त उ नस्तिरो विश्वानि दुरिता नयंति॥ सुक्षत्रासो वरुणो मित्रो अग्निर्ऋतधीतयो वक्मराजसत्या॰॥ ॥ये देवा॰
वक्ष्यमाणसुक्षत्रास॰ ते हि ते खलु श्रेष्ठवर्चस॰ प्रशस्यतमदीप्तयो भवंति। अत॰ त एव नोस्माकं विश्वानि सर्वाणि दुरिता दुरितानि
पापानि तिर॰ तिरोहितानि यथा भवंति तथा नयंति नयंतु विनाशयंत्वित्यर्थः। ये वरुणादयो देवा॰ सुक्षत्रास॰ शोभनधना वा ऋ
तधीतय॰ सत्यकर्माण॰ वक्मराजसत्या॰ वक्म [illegible] तस्य राजान ईशानाः वक्मराजानः स्तोतारः ते पुसत्या॰ अवितथाः एवं
भूतास्ते हीत्यन्वय॰॥ ॥इति [illegible] अथैकादशी॥ ॥ते न इंद्रः पृथिवी क्षाम वर्धन्पूषा भगो अदितिः पं

च०भा०
२१५

दानीं सुमनसः स्याम पश्येम नु सू[illegible] ॥ [illegible] तेन सूनो देवों ऽहानो वसागमिष्ठः ॥ ॥ हे देवा विश्वदानीं सर्वदा
वयं सुमनसः स्याम शोभनमनस्का भवेम नु [illegible] समुच्चये। उच्चरंतं उद्यंतं सूर्यं सर्वदा पश्येम च वसूनां वसुपतिः उत्कृष्टध
नानामधिपतिरग्निर्देवानवसा अस्मदीयेन हविषा ओहानो वहन्नूपा एयन् आगमिष्ठः आगंततमः एवंगुणविशिष्टः सन्
तथाकरत् तथाविधानुकंपकारान् करोतु ॥ ॥ इति चतुर्थस्याष्टमे चतुर्दशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ इडो अग्ने दिष्ठमवसागमिष्ठः
सरस्वती सिंधुभिः पिन्वमाना ॥ पर्जन्यो न ओषधीभिर्मयोभुरग्निः सुशंसः सुहवः पितेव ॥ ॥ अयमिंडोग्ने दिष्ठमंतिकतमं
यथा भवति तथा अवसा रक्षणेन सार्धं आगमिष्ठः आगंततमोस्तु। सिंधुभिः स्यंदनैरुदकैः पिन्वमाना वर्धमाना नदीरूपा
सरस्वती च आगंततमा भवतु ओषधीभिः सार्धं पर्जन्यश्च नोस्माकं मयोभूः सुखस्य भावयिता भवतु। अग्निश्च पितेव पुत्र
स्य जनकः सुशंस इव सुखेन शंसनीयः सुहवः सुखेनाह्वातव्यश्च भवतु। आग्रयणे वैश्वदेवस्य चरोः विश्वे देवास आगत
त्यनुवाक्या। सूत्रितं च। विश्वे देवास आगत ये के च ज्मा महिनो अहिमाया इति ॥ सैषा सूक्ते सप्तमी ॥ ॥ विश्वे देवास आगत शृ
णुता म इमं हवं। एदं बर्हिर्निषीदत ॥ ॥ हे विश्वे देवासः सर्वे देवाः आगत आगच्छत। आगत्य च मम दीयं इमं हवं इदमाह्वानं शृ राम
णुत श्रुत्वा च इदमास्तीर्णं बर्हिरा निषीदत। उपविशत ॥ ॥ अथाष्टमी ॥ ॥ यो वो देवा घृतस्नुना हव्येन प्रतिभूषति। तं विश्व उपग २१५

च्छथ ॥ ॥ हे देवाः वो युष्मान् यो जनः घृतस्नुना घृतप्रक्षरणेन हव्येन हविषा प्रतिभूषति परिचरति तं जनं विश्वे सर्वे यूयं उपागच्छथ
उपागता भवथ ॥ ॥ अथ नवमी ॥ ॥ उप नः सूनवो गिरः शृण्वंत्वमृतस्य ये ॥ सुमृळीका भवंतु नः ॥ ॥ अमृतस्य मरणरहितस्य प्र
जापतेः सूनवः पुत्राः ते देवाः नोस्माकं गिरः स्तुतीः उप शृण्वंतु नोस्माकं सुमृळीकाः सुष्ठु मृडयितारश्च भवंतु ॥ ॥ अथ दशमी ॥
॥ विश्वे देवा ऋतावृध ऋतुभिर्हवनश्रुतः ॥ जुषंतां युज्यं पयः ॥ ॥ ऋतावृधः ऋतस्य यज्ञस्य वर्धकाः ऋतुभिः कालविशेषैः
हवनश्रुतः हवनस्य श्रोतारः तस्मिन्यागकाले स्तूयमाना इद्धा विश्वे सर्वे देवाः युज्यं योग्यं पयः आमिक्षारूपं जुषंतां से
वंतां। श्रूयते हि। तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षेति ॥ ॥ इति चतुर्थस्याष्टमे पंचदशो वर्गः ॥ ॥ अथैकादशी ॥ ॥
॥ स्तोत्रमिंद्रो मरुद्गणस्त्वष्टृमान्मित्रो अर्यमा ॥ इमा हव्या जुषंत नः ॥ ॥ मरुद्गणः मरुतो गणभूताः परिजनभूता यस्य तादृ
श इंद्रः त्वष्टृमान् त्वष्ट्रा सहितो मित्रो अर्यमा च नोस्माकं स्तोत्रं इमा हव्या इमानि च हवींषि जुषंतां सेवतां ॥ ॥ अथ द्वादशी ॥ ॥ इ
मं नो अग्ने अध्वरं होतर्वयुनशो यज ॥ चिकित्वान्दैव्यं जनं ॥ ॥ हे होतर्देवानामाह्वातरग्ने दैव्यं देवसंबंधिनं जनसंघं यज चेयं
चिकित्वान् जानंस्त्वं नोस्मदीयमिममध्वरं [illegible] हितं यत्तैव युनशः ज्ञानमात्रेण यथानुपूर्व्या देवाः बुद्धिस्थाः तथा यजयाग
कुरु। वैश्वदेवशास्त्रस्य विश्वे देवा इति याज्यास्[illegible] ति शास्त्रा जपेत् विश्वे देवाः शृणुतेमं हवं म इति याज्येति। वैश्वदेवे

पशो एषैव याज्या सूक्तिं तं च। विश्वेदेवाः शृणुतेमं हवं मे [illegible] ज्मा महिनो अहिमाया इति॥ सेषा सूक्ते त्रयोदशी॥ ॥ विश्वेदेवाः शृणुते
मं हवं मे ये अंतरिक्षे य उप द्यवि ष्ठ। ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वं॥ ॥ हे विश्वेदेवा मम मदीयं हवमाह्वा
नं शृणुत ये यूयमंतरिक्ष लोके वर्त्तमाना भवथ ये च उपस्मी पृष्ठे लोके भूलोके भवथ। ये च दिवि द्युलोके स्थ ये अग्निजिह्वाः अग्नि
जिह्वास्थानीया येषां पक्षे अग्ने जिह्वा तया पोष्यमाणत्वात् जिह्वेत्युच्यते उत वा अपि वा ये यजत्राः यजनीयाः ते सर्वे यूयं आ आस्ती
र्णे बर्हिषि आसाद्योपविश्य मादयध्वं सोमेनात्मानं तर्पयथ॥ ॥ अथ चतुर्दशी॥ ॥ विश्वेदेवा मम शृण्वंतु यज्ञिया उभे रोदसी अ
पां नपाच्च मन्म। मा वो वचांसि परिचक्ष्याणि वोचं सुम्नेष्विद्वो अंतमा मदेम॥ ॥ ये यज्ञिया यज्ञार्हा विश्वेदेवा मम मदीयं मन्म मननी
यं स्तोत्रं शृण्वंतु। चित्ते वधारयंतु। तथा उभे रोदसी द्यावापृथिव्यौ अपां नपातं मध्यमस्थानो अग्निश्च अस्मदीयं स्तोत्रं शृण्वंतु। अथ प्र
त्यक्षकृतः हे देवाः वो युष्मभ्यं परिचक्ष्याणि वर्जनीयानि वचांसि स्तोत्राणि मा वोचं मा ब्रवाम। अपि तु समीचीनानि अतो वा युष्माकमं
तमा अंतिकतमाः संतो वयं सुम्नेषु युष्माभिर्दत्तेषु सुखेषु वर्त्तमाना मदेम मोदेम॥ ॥ आग्रयणे वैश्वदेवस्य ये के च ज्मेति याज्या।
सूक्तिं तं च। विश्वेदेवास आगत ये के च ज्मा महिनो अहिमाया इति वैश्वदेवपुरोडाशस्यैषैव याज्या सूक्त मुदाहृतं॥ सेषा सूक्ते पंच
दशी॥ ॥ ये के च ज्मा महिनो अहिमाया दिवो जज्ञिरे अपां सधस्थे॥ ते अस्मभ्यमिषये विश्वमायुः क्षप उस्रा वरिवस्यंतु देवाः॥ ॥

तः यः पुरुषो नोस्मान् मन्यते अत्यतीत्य स्वाधिक्यं मन्यते। अस्मत्तोपि स्वयमधिक इति बुध्यते। अस्माभिः क्रियमाणं ब्रह्म स्तोत्रं च यो नि
त्सान्नुनिंदितुमिच्छेत् तस्मै पुरुषायतपूंषि तेजांसि वृजिनानि संतु भवंतु ब्रह्मद्विषं तं शत्रुं द्यौरादित्यश्च अभिशोचतु अभितपतु द
हतु॥ ॥ अथ तृतीया॥ ॥ किमंग त्वा ब्रह्मणः सोम गोपां किमंग त्वाहुरभिशस्तिपां नः। किमंग नः पश्यसि निद्यमानान्ब्रह्मद्विषे त
पुषिं हेतिमस्य॥ ॥ किमंगेति प्रसिद्धिद्योतको निपातो हे सोम त्वां खलु ब्रह्मणो मंत्रस्य कर्मणो वा ब्रह्मजातेर्वा गोपां गोपायितार
माहुः शाकथयंति पुराविदः तथा नोस्माकमभिशस्तिपां अभिशंसकेभ्यः पालयितारं त्वामेव खल्वाहुः। यद्वा अंगेत्यभिमुखीकरणे
अंग हे सोम किं कारणं त्वां ब्रह्मणो गोपानाहुः। किं कारणं त्वां अस्माकमभिशस्तिपामाहुः निद्यमानान्नूपरैर्हिंस्यमानान्नोस्मा
न् हे सोम किं कारणं पश्यसि त्वामेव सर्वे ब्रह्मणो रक्षकं शत्रुभ्यः पालकं च कथयंति अतोस्मान्सुपरैर्निद्यमाने उदासीन्यं त्वानुचि
तं अतो ब्रह्मद्विषो ब्राह्मणद्वेष्टुः तस्मै तपुषिं तापकं हेतिमायुधं अस्यक्षिप प्रेरय॥ ॥ अथ चतुर्थी॥ ॥ अवंतु मामुषसो जायमाना अ
वंतु मा सिंधवः पिन्वमानाः। अवंतु मा पर्वतासो ध्रुवासो वंतु मा पितरो देवहूतौ॥ ॥ जायमानाः प्रादुर्भवंत्य उषसः मामवंतु रक्षंतु
तथा पिन्वमानाः वर्धमानाः सिंधवः स्यंदनशीलाः नद्यश्च मामवंतु तथा ध्रुवासो निश्चलाः पर्वतासः पर्वताश्च मामवंतु तथा दे
वहूतौ देवानां हूतिराह्वानं यस्मिन्स देवहूतिर्यागः तस्मिन् [illegible] मानाः पितरः पितृदेवताश्च मामवंतु॥ ॥ अथ पंचमी॥ ॥ विश्व

र्वं चतुर्थसूक्तं भरद्वाजस्यार्षं गायत्रं। पूषन्नित्यनुष्टुप् ... भागाय ... तथा चानुक्रांतं। वयमु षोडशांत्य त्रायत्र्यैवेयां पूषणमनु
ष्टुबिति॥ अथार्थैर्भिः प्रवसद्भिरेतज्जप्यं। सूत्रितं च। वयमु त्वा पथस्पत इत्यर्थं चर्यां चरिष्यन्निति जपेदिति शेषः॥ ॥तत्र प्रथमा॥
॥वयमु त्वा पथस्पते रथं न वाजसातये॥ धिये पूषन्नयुज्महि॥ ॥हे पथस्पते मार्गस्य पालयितः पूषन् धिये कर्मार्थं वाजसा
तये अन्नस्य च लाभाय वयं रथं न युद्धे रथमिव त्वा त्वां अयुज्महि अस्मदभिमुखं कर्मः। उ इति पूरकः॥ ॥अथ द्वितीया॥ ॥अ
भि नो नर्यं वसु वीरं प्रयतदक्षिणं॥ वामं गृहपतिं नय॥ ॥हे पूषन् अर्यं नृभ्यो हितं वसु धनं अभि अस्मान् वीरं दारिद्र्यस्य विशेषेण वि
दारयितारं गमयितारं प्रयतदक्षिणं पूर्वमन्येभ्यो दत्तधनं यद्वा प्रयतं सुष्ठु दक्षिणं धनं यस्य तादृशं वामं वननीयं एवं गृहपतिं गृहस्थं
नो अस्मान्नय प्रापय॥ ॥अथ तृतीया॥ ॥अदित्सन्तं चिदाघृणे पूषन्दानाय चोदय॥ पणेश्चिद्वि म्रदा मनः॥ ॥हे आघृणे आगत
दीप्ते पूषन् अदित्सन्तं चित् अदातुमिच्छंतमपि पुरुषं दानाय अस्मद्दानार्थं प्रेरय चोदय पणेश्चित् वणिजोपि वार्धुषिकस्य
लुब्धस्यापि मनो हृदयं विम्रद त्वद्दानार्थं मृदु कुरु॥ ॥अथ चतुर्थी॥ ॥वि पथो वाजसातये चिनुहि वि मृधो जहि॥ साधन्तामु
ग्र नो धियः॥ ॥हे उग्र उद्गूर्णबल पूषन् पथो मार्गान् वाजसातये अन्नलाभाय वि चिनुहि शोधितान् कुरु। ये पथिभिर्गताः धनं राम
लभेमहि तादृशान् पथः पृथक् कुर्वित्यर्थः। मृधो बाधकान् तस्करादींश्च विजहि वधस्व। तथा नोस्माकं धियः कर्माणि अन्नला २२७

भार्थं क्रियमाणानि साधन्तां सिध्यन्तु सफलानि भवन्तु॥ ॥अथ पंचमी॥ ॥परि तृंधि पणीनामारया हृदया कवे॥ अथेमस्मभ्यं
रंधय॥ ॥हे कवे प्राज्ञ पूषन् पणीनां वणिजां लुब्धानां हृदया हृदयानि कठिनानि आरया सूक्ष्मलोहाग्रो दंडः प्रतोदः आरा इति
चाख्यायते तया परितृंधि परिछिंधि घातय हृद्गतं काठिन्यमनयेत्यर्थः। अथानंतरं इमान्पणीन् अस्मभ्यं रंधय वशीकुरु॥ ॥इति
चतुर्थस्याष्टमे सप्तदशो वर्गः॥ ॥अथ षष्ठी॥ ॥वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियं॥ अथेमस्मभ्यं रंधय॥ ॥हे पूषन् आ
रया प्रतोदेन पणेर्वणिजो हृदयं वितुद विविध्य ततस्य पणेर्हृदि हृदये प्रियमस्मभ्यमनुकूलं धनमिच्छ। दातव्यमितीच्छां जनय।
अथ अनंतरमस्मभ्यं इमान् रंधय वशीकुरु॥ ॥अथ सप्तमी॥ ॥आ रिख किकिरा कृणु पणीनां हृदया कवे॥ अथेमस्मभ्यं
रंधय॥ ॥हे कवे प्राज्ञ पूषन् पणीनां वणिजां हृदयानि आरिख आलिख आलिख्य च किकिराकीर्णानि शिथिलानि कृणु कुरु॥
मृदूनि कुर्वित्यर्थः। अन्यद्गतं॥ ॥अथाष्टमी॥ ॥यां पूषन्ब्रह्मचोदनीमारां बिभर्ष्याघृणे॥ तया समस्य हृदयमारिख किकिरा
कृणु॥ ॥हे आघृणे आगतदीप्ते पूषन् ब्रह्मचोदनीं ब्रह्मणो अन्नस्य दात्रीं प्रेरयित्रीं यां आरां बिभर्षि धारयसि तया समस्य सर्वस्य लु
ब्धस्य जनस्य हृदयं आरिख आलिख। किकिराकीर्णानि शिथिलानि कुरु॥ ॥अथ नवमी॥ ॥या ते अष्ट्रा गोओपशाघृणे पशु
साधनी॥ तस्यास्ते सुम्नमीमहे॥ ॥हे आघृणे आगतदीप्त पूषन् तव दीयाया अष्ट्रा आरा गो ० पशा उपशेरत इत्योपशाः गावः ०

च०भा० पशूनां यस्यामीदृश्यां अनु[illegible] पू[illegible]नि पशूनां स[illegible] ॥ ते तस्यास्त्वदीयायाः ते संबधि सुम्नं सुखमीमहे याचामहे ॥ ॥
॥ अथ दशमी ॥ ॥ उत नो गोष[illegible] धियमश्वसां वाजसामुत । नृवत्कृणुहि वीतये ॥ ॥ उतापि च हे पूषन् नो गोषणिं गवां सनित्रीं अश्व
२२८ सां अश्वानां सनित्रीं वाजसां वाजानामन्नानां सानित्रीं उतापि च नृवत् नृवतीं यद्वा नृणां वनित्रीं एवंभूतां धियं बुद्धिं कर्म वा नोस्मा
कं वीतये स्वादनाय उपभोगार्थं कृणुहि कुरु ॥ ॥ इति चतुर्थस्याष्टमे द्वादशो वर्गः ॥ ॥ संपूषन्निति दशर्चं पंचमं सूक्तं भरद्वाज
स्यार्षं पौष्णं गायत्रं संपूषन्नित्यनुक्रांतं । नष्टधनमन्विच्छता पुरुषेणैतज्जप्यं सूत्रितं च । संपूषन्विदुषेति नष्टमधिजिगमिष
मृढो न्नेकं ह्वा वेति ॥ ॥ तत्र प्रथमा ॥ ॥ संपूषन्विदुषा नय यो अंजसानुशासति । य एवेदमिति ब्रवत् ॥ ॥ हे पूषन् पूषक देव विदुषा जा
नता तेन जनेन संनय अस्मान् संगमय यो विद्वान् अंजसा ऋजुमार्गेण अनुशासति अनुशास्ति नष्टद्रव्यप्राप्त्युपायमुपदिशति ।
यश्च एव एवं नष्टं भवदीयं धनमिति ब्रवत् ब्रवीतु नष्टधनं दर्शयतीत्यर्थः । तेन विदुषेत्यन्वयः ॥ ॥ अथ द्वितीया ॥ ॥ समु पूष्णा ग
मेमहि यो गृहाँ अभिशासति । इम एवेति च ब्रवत् ॥ ॥ पूष्णानुगृहीता वयं संगमेमहि तेन जनेन संगच्छेमहि । यो जनो गृहान्
येषु गृहेष्वस्मदीया नष्टाः पशवस्तिष्ठंति तान् गृहान् अभिशासति अभिशास्ति आभिमुख्येन बोधयति । यश्च इमे त्वदीया नष्टाः राम
पशवः एव एवं तिष्ठंतीति च ब्रवत् ब्रूयात् ॥ ॥ अथ तृतीया ॥ ॥ पूष्णश्चक्रं न रिष्यति न कोशोव पद्यते । नो अस्य व्यथते पविः ॥ ॥ पूष्णः पोष २२८

॥ महिनो महतः अहिमायाः प्रज्ञानाम आहंतृप्रज्ञाः एवंभूता ये के च न देवाः ज्मा पृथिवी नामैतत् ज्मायां पृथिव्यां जज्ञिरे प्रादुर्ब
भूवुः ये के च न दिवो द्युलोकात् जज्ञिरे ये के च न अपां सधस्थे सहांतरिक्षे जज्ञिरे ते सर्वे देवाः अस्मभ्यं इषयेदृष्यत इति इषिः
पुत्रादिः तस्मै च विश्वं सर्वं आयुरन्नं जीवनं वा क्षपः सर्वा रात्रीः उस्राः सर्वाण्यहानि च सर्वदा नैरंतर्येण वरिवस्यंतु प्रयच्छंतु ॥ ॥
॥ अथ षोडशी ॥ ॥ अग्नीपर्जन्याववतं धियं मेस्मिन्हवे सुहवा सुष्टुतिं नः । इळामन्यो जनयद्गर्भमन्यः प्रजावतीरिष आ ध
त्तमस्मे ॥ ॥ हे अग्नीपर्जन्यौ मे मदीयं धियं कर्म यज्ञलक्षणं अवतं रक्षतं युवयोर्मध्ये अन्यः पर्जन्यः इळामन्नं जनयत् जनयति ।
वृष्ट्या ह्योषधिवनस्पतयो जायंते तेभ्यो ह्यन्नानि जायंते अन्नेभ्योग्निर्गर्भं जनयति पुरुषेणान्नं भुक्तं जाठरेणाग्निना पक्वं सत् रेतो
रूपेण परिणमते तत् देवयोषित्सु गर्भो भवति अतो युवां प्रजावतीः प्रजाभिर्युक्ताः इषोन्नानि अस्मे अस्मासु आधत्तं अवस्थापय
तं ॥ ॥ अथ सप्तमी ॥ ॥ स्तीर्णे बर्हिषि समिधाने अग्नौ सूक्तेन महा नमसा विवासे ॥ अस्मिन्नो अद्य विदथे यजत्रा विश्वे देवा ह
विषि मादयध्वं ॥ ॥ हे विश्वेदेवाः बर्हिषि दर्भे स्तीर्णे वेद्यां स्तीर्णे सति अग्नौ समिधाने समिध्ये सति अनेन सूक्तेन स्तोत्रेण च महा
महता नमसा नमस्कारेण च आविवासे [illegible] ये अद्य यजनीया विश्वेदेवाः अद्यास्मिन्दिने अस्मदीये स्मिन् विदथे यज्ञे
हविषि नीयार्थे सप्तमी ॥ ह[illegible] तेना[illegible] मादयध्वं ॥ ॥ इति चतुर्थस्याष्टमे षोडशो वर्गः ॥ ॥ वयमु त्वेति द

ऋ०भा०
२१९

॥ अस्मत्स्तोत्राणि स्पृहयंतं [illegible]स्य प्रेरकं अनष्टवेद[illegible] अनष्टधनं ईशानं सर्वस्येश्वरं एवंविधं पूषणं देवं वयं रायो धनानि ई-
महे याचामहे ॥ ॥ चातुर्मास्येषु वैश्वदेवे पर्वणि पौष्णस्य हविषः पूषन्तव व्रत इत्येषानुवाक्या ॥ सूत्रितं च । वाममद्य सवितर्वाममु श्वः
पूषन्तव व्रते वयमिति सैषा सूक्ते नवमी ॥ ॥ पूषन्तव व्रते वयं न रिष्येम कदा चन ॥ स्तोतारस्त इह स्मसि ॥ ॥ हे पूषन् पोषक ते त्वदीये व्र-
ते कर्मणि वर्तमाना वयं कदाचिदपि न रिष्येम मा हिंसिता भवेम । तादृशाश्च वयं इहास्मिन् कर्मणि ते तव स्तोतारः स्मसि स्मः भवामः ॥
॥ ॥ अथ दशमी ॥ ॥ परि पूषा परस्ताद्धस्तं दधातु दक्षिणं ॥ पुनर्नो नष्टमाजतु ॥ ॥ पूषा पोषको देवः परस्तात् परस्मिन् देशे संचारा-
न्यस्मिन् चोरव्याघ्रादिरूषिते देशे गच्छतो गोधनस्य स्वकीयं दक्षिणं हस्तं परिदधातु । परिधानं निवारकं करोतु । नोस्मभ्यं नष्टं च गो-
धनमाजतु आगच्छतु । आगमयतु ॥ ॥ इति चतुर्थस्याष्टमे विंशो वर्गः ॥ ॥ एहि वामिति षळृचं षष्ठं सूक्तं भरद्वाजस्यार्षं गायत्रं पौ-
ष्णं । अनुक्रम्यते च । एहि वां षळिति ॥ ॥ गतो विनियोगः ॥ ॥ तत्र प्रथमा ॥ ॥ एहि वां विमुचो नपादाघृणे संसचावहै ॥ रथीर्ऋतस्य
नो भव ॥ ॥ हे विमुचो नपात् विमुचति सृष्टिकाले स्वसकाशात् सर्वाः प्रजाः विसृजतीति विमुक् प्रजापतिः तस्य पुत्रः आघृणे आग-
तदीप्ते पूषन् वा वा रिगच्छति स्तुतिभिः प्राप्नोतीति वा स्तोता वा गतिगंधनयोरित्यस्मादातो मनिन्निति विच् । वां गंतारं स्तोतारं मां एहि आ-
गच्छतु । आवां च संसचावहे समर्गच्छामहे । यद्वा आवामित्यस्याद्याक्षरलोपे वामिति भवति आवां सचावहे इति संबंधः यादृसंगच्छा

राम
२१९

वहे तादृशस्त्वं नोस्माकं ऋतस्य यज्ञस्य रथीः रंहिता नेता भव । तथा सति तत्र त्वं हविस्त्वया पिलभ्यत इत्यर्थः ॥ ॥ अथ द्वितीया ॥ ॥ रथीत-
मं कपर्दिनमीशानं राधसो महः ॥ रायः सखायमीमहे ॥ ॥ रथीतमं अतिशयेन रथिनं यद्वा अतिशयेन रंहितारं नेतारं कपर्दिनं कप-
र्दश्चूडा तद्वंतं । राध्नोत्यनेनेति राधो धनं महो महतो राधसो धनस्य ईशानं स्वामिनं सखायं अस्माकं मित्रं एवंविधं पूषणं रायो ध-
नानि ईमहे याचामहे ॥ ॥ अथ तृतीया ॥ ॥ रायो धारास्याघृणे वसो राशिरजाश्व ॥ धीवतोधीवतः सखा ॥ ॥ हे आघृणे आगतदी-
प्ते पूषन् रायो धनस्य धारासि प्रवाहो भवसि स्तोतृभ्यो बहुधनेरं तर्पेण प्रयच्छसीत्यर्थः ॥ अजाश्व अजाः छागा एव अश्वाः अश्व-
कार्योपन्नायस्य तादृश पूषन् वसो वसुनो धनस्य राशिः संघश्च भवसि धनसंघस्त्वय्येव निवसतीत्यर्थः । धीवतोधीवतः सर्व-
स्य स्तोत्रवतः पुरुषस्य सखा मित्रभूतश्च भवति ॥ ॥ अथ चतुर्थी ॥ ॥ पूषणं न्व१जाश्वमुप स्तोषाम वाजिनं ॥ स्वसुर्यो जार उच्यते ॥ ॥
॥ अजाश्वं अजाः छागा वाहनं वाजिनं अन्नवंतं बलवंतं वा पूषणं पोषकं देवं नु क्षिप्रं उपस्तोषाम उपस्तवाम यः पूषा स्वसुरुषसो
जारः उपपतिरित्युच्यते पूषणमित्यन्वयः ॥ ॥ अथ पंचमी ॥ ॥ मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः ॥ भ्रातेंद्रस्य सखा मम ॥ ॥
मातुर्निर्मात्र्या रात्रेः दिधिषुं उपपतिं पूषणं अब्रवं स्तौमि । स्वसुरुषसो जारश्च पूषा नोस्माकं स्तोत्राणि शृणोतु । इंद्रस्य भ्राता सहजातः
पूषा मम स्तोतुः सखा मित्रं [illegible] ॥ ॥ अथ षष्ठी ॥ ॥ आ[illegible] पूषणं रथे निशृंभास्ते जनश्रियं ॥ देवं वहंतु बिभ्रतः ॥ ॥ आजासः अ-

 जाः छागाः निम्नगाः निश्चयस्य संबध्य हर्तारः तेपूष्णो वाहनं तस्य प्रसिद्धाः अजनं स्तोत संघं अयति गच्छतीति जनश्रीः तं पूषणं देवं रथे
 बिभ्रतो धारयतः। आ वहंतु आनयंतु॥ ॥इति चतुर्थस्याष्टमे एकविंशो वर्गः॥ ॥यएनमिति षळृचं सप्तमं सूक्तं भरद्वाजस्यार्षं पौ
ष्णं अंत्यानुष्टुप्। आदौ पंच गायत्र्यः। तथा चानुक्रांतं। यएनमंत्यानुष्टुबिति गतो विनियोगः॥ ॥तत्र प्रथमा॥ ॥यएनमादिदेशति
करंभादिति पूषणं॥ नतेन देव आदिशे॥ ॥यस्तोता एनं पूषणं पोषकं करंभात् करंभ इति मिश्राणां यव सक्तूनां अत्र अग्नि आदि
देशति आदिशति अभिष्टौति। पुनः पुरुषेण अन्योपि देवः न आदिशे आदेष्टव्यः स्तोतव्यो न भवति। पूषा एव सर्वस्याभिमतस्य ध
नस्य लाभात् देवांतरं न स्तौतीत्यर्थः॥ ॥अथ द्वितीया॥ ॥उत घा स रथीतमः सख्या सत्पतिर्युजा॥ इंद्रो वृत्राणि जिघ्नते॥ ॥अ
पि च सः यः शत्रूणां हंतृत्वेन प्रसिद्धः तादृशः रथीतमः अतिशयेन रथी महारथः सत्पतिः सतां पालयिता एवं गुणः इंद्रः सख्या
मित्रभूतेन पूष्णा युजा सहायभूतेन युक्तः सन् वृत्राणि शत्रून् जिघ्नते हंति इंद्रस्यापि अयमेव सहाय्यकारीत्यर्थः॥ ॥अथ तृतीया॥ ॥
॥उतादः परुषे गवि सूरश्चक्रं हिरण्ययं॥ न्यैरयद्रथीतमः॥ ॥उतापि च सूरः प्रेरकः रथीतमः अतिशयेन रथी नेतृतमो वा पूषा प
रुषे परुष्मति पर्ववति भास्वति वा गच्छतीति गौः आदित्यः तस्मिन् हिरण्ययं स्वर्णनिमित्तं अदः रथस्य चक्रं न्यैरयत् नितरां प्रेरयति स्म॥
॥ ॥अथ चतुर्थी॥ ॥यदद्य त्वा पुरुष्टुत ब्रवाम दस्र मंतुमः॥ तत्सु नो मन्म साधय॥ ॥हे पुरुष्टुत बहुभिर्यजमानैः स्तुत दस्र दर्शनीय

कस्य देवस्य चक्रमायुधं न रिष्यति न विनश्यति। अस्य चक्रस्य कोशश्च नावपद्यते न हीयते अस्य पविर्धारा च नो नैव व्यथते कुंठी भ
वति। तेन चक्रेण चोरान् हत्वा अस्मदीयं धनं प्रकाशयेति भावः॥ ॥अथ चतुर्थी॥ ॥यो अस्मै हविषाविधन्न तं पूषापि मृष्यते॥ प्र
थमो विंदते वसु॥ ॥यो यजमानः अस्मै पूष्णे हविषा चरुपुरोडाशादिना अविधत् परिचरति तं यजमानं पूषा नापि मृष्यते। अपि तु
ईषदर्थः। ईषदपि न हिनस्ति स च प्रथमो मुख्यः सन् वसु धनं विंदते लभते॥ ॥अथ पंचमी॥ ॥पूषा गा अन्वेतु नः पूषा रक्षत्वर्व
तः॥ पूषा वाजं सनोतु नः॥ ॥पूषा पोषको देवो नोस्मदीया गाः अन्वेतु रक्षणार्थमनुगच्छतु। स च पूषा अर्वतोश्वान् रक्षतु चोरेभ्यः।
तथा वाजमन्नं च नोस्मभ्यं पूषा सनोतु प्रयच्छतु॥ ॥इति चतुर्थस्याष्टमे एकोनविंशो वर्गः॥ ॥अथ षष्ठी॥ ॥पूषन्ननु प्र गा इहि य
जमानस्य सुन्वतः॥ अस्माकं स्तुवतामुत॥ ॥हे पूषन् सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य गाः पश्वन् अनु प्रेहि रक्षणार्थमनु
गच्छ। उतापि च। स्तुवतां स्तुतिविषयं स्तोत्रं कुर्वतामस्माकं अनुगच्छ॥ ॥अथ सप्तमी॥ ॥माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे॥
अथारिष्टाभिरा गहि॥ ॥हे पूषन् अस्मदीयं गोधनं माकिर्नेशत् मा नश्यतु। माकिर्माकीमित्येतौ प्रतिषेधमात्रे वर्तेते। माकीं रिषत्
मा व्याघ्रादिभिर्हिंस्यतां माकीं मा च केवटे कूपे दिसं शारि संकीर्णभूतं क्वापि याते नापि हिंसितं मा भवतु। अथ एवं सति अरिष्टाभि
रहिंसिताभिर्गोभिः सह आगहि सायंकाले आगच्छ॥ ॥अथाष्टमी॥ ॥शृण्वंतं पूषणं वयमिर्यमनष्टवेदसं॥ ईशानं राय ईमहे॥ ॥

ऋ०भा० पूषा करंभं घृतमिश्रं सक्त्वात्मकं हविर्भक्षयितुमिच्छति॥ ॥अथ तृतीया॥ ॥अजा अन्यस्य वह्नयो हरी अन्यस्य संभृता॥ ता
२२१ भ्यां वृत्राणि जिघ्नते॥ ॥अनयोरिंद्रापूष्णोः अन्यस्य एकस्य पूष्णः अजाः छागाः वह्नयो वाहकाः अश्वाः अन्यस्यापरस्येंद्रस्य
संभृता संभृतौ सम्यक्पुष्टौ हरी एतत्संज्ञावश्वौ वाहकौ स च इंद्रस्ताभ्यां वृत्राणि शत्रून् जिघ्नते हंति॥ ॥अथ चतुर्थी॥ ॥यदिं
द्रो अनयद्रितो महीरपो वृषंतमः॥ तत्र पूषाभवत्सचा॥ ॥यद्यदा इंद्रो वृषंतमः अतिशयेन वर्षिता इंद्रः परितो गंत्री मही र्महतीर
पः वृष्ट्युदकानि अनयत् इमं लोकं प्रापयति। तत्र तदानीं पूषा पोषको देवः सचाभवत् अस्येंद्रस्य सहायो भवति॥ ॥अथ पं
चमी॥ ॥तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव॥ इंद्रस्य चा रभामहे॥ ॥पूष्णः पोषकस्य देवस्य च तां प्रसिद्धां सुमतिं कल्याणीं
मतिं अनुग्रहबुद्धिं वृक्षस्य महीरुहस्य प्रवयां प्रकृष्टां दृढां शाखामिव वयं आरभामहे। अवलंबामहे आश्रयामहे इत्यर्थः॥ ॥
॥अथ षष्ठी॥ ॥उत्पूषणं युवामहेऽभीशूँरिव सारथिः॥ मह्या इंद्रं स्वस्तये॥ ॥पूषणं पोषकं देवमिंद्रं च मह्यै च महत्यै स्वस्तये
रक्षार्थं उद्युवामहे उद्योजयामः उद्योजनमाकर्षणं। तत्र दृष्टांतः। सारथिः सूतः अभीशूनिव अभीशून् रश्मीन् अश्वबोधनार्थं
कर्षति॥ ॥इति चतुर्थस्याष्टमे त्रयोविंशो वर्गः॥ ॥शुक्रं त इति चतुर्ऋचं नवमं सूक्तं भरद्वाजस्यार्षं पौष्णं। द्वितीया जगती शिष्टा राम
स्त्रिष्टुभः तथा चानुक्रांतं। शुक्रं चतुष्कं द्वितीया जगतीति वैश्वदेव पर्वणि पौष्णस्य हविषः शुक्रं त इति याज्या। सूत्रितं च। शुक्रं ते अ २२१

न्यद्यजतं ते अन्यत्समपषे पथामज निष्पूषा इति सोमापौष्णे वेथेषा। सूत्रितं च। शुक्रं ते अन्यद्यजतं ते अन्यदपश्यं गोपामनिपद्य
मानमिति॥ सैषा प्रथमा॥ ॥शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवासि॥ विश्वा हि माया अवसि स्वधावो भद्रा ते पू
षन्निह रातिरस्तु॥ ॥हे पूषन् ते तव शुक्रं शुक्लवर्णं अन्यदेकमहर्भवति वासरात्मकं तथा ते तव संबंधि यजतं यजिरत्र संगति
करणे वर्तते यजनीयं प्रकाशेन संगमनीयं स्वहः कृष्णवर्णं अन्यदेकमहर्भवति। रात्र्याख्यमित्यर्थः। विषुरूपे शुक्लकृष्णतया नानारू
पे अहनी तव महिम्ना निष्पद्येते यद्वा हे पूषन् त्वदीयमन्यदेकं रूपं यजतं केवलं यजनीयं न प्रकाशेन रात्रेरूपाहकं अत एव विषुरूपे वि
षमरूपे अहनी अहश्च रात्रिश्च भवतः। अहोरात्रयोर्निर्माणे सूर्य एव कर्ता कथमस्य प्रसक्तिरित्याह। द्यौरिवासि यथा द्यौ
रादित्यः प्रकाशयति तथा त्वं प्रकाशयसि कुत इत्यत आह। हे स्वधावो अन्नवन् पूषन् विश्वाः सर्वा मायाः प्रज्ञाः हि यस्मात्कारणा
त् अवसि रक्षसि। अतः कारणात् सूर्य इव भासीत्यर्थः। तादृशस्य तव भद्रा रातिर्दानं इह अस्मासु अस्तु भवतु यास्कस्त्वाह। शु
क्रं ते अन्यल्लोहितं ते अन्यत् यजतियं ते अन्यदिति वा विषमरूपे अहनी कर्म द्यौरिव चासि सर्वाणि च प्रज्ञानान्यवस्यन्नवृत्ति
ति॥ ॥अथ द्वितीया॥ ॥अजाश्वः पशुपा वाजपस्त्यो धियंजिन्वो भुवने विश्वे अर्पितः॥ अष्ट्रां पूषा शिथिरामुद्वरीवृजत्संचक्षा
णो भुवना देव ईयते॥ ॥अजाश्वः छागवाहनः पशुपाः पशूनां पालयिता वाजपस्त्यः वाजा अन्नानि पस्त्ये गृहे यस्य तादृशोऽधि

ऋ०भा० येजिन्वः धियः स्तोतारः कर्माणि वा [illegible] भुवने लोके अर्पितः प्रजापतिना पोषकत्वेन स्थापितः अतएव
२२२ भूतः यः पूषा पोषको देवः अजाश्वः आरां च [illegible] शिथिलां सतीं उद्वरीवृजत् उद्वरीवृजत् उद्गच्छन् भुवना भुवनानि
सर्वान् लोकान् भूतजातानि सं चक्षाणः संपश्यन् सूर्यात्मना प्रकाशयन् ईयते तेन भूमिं गच्छति ॥ यो ऽस्य पञ्चर्चस्य पुरोडाशस्य
याज्या पूषन्नित्यादिके द्वे ते अनुवाक्ये सूत्रितं च यास्ते पूषन्नावो अन्तः समुद्र इति द्वे पूषेमा आशा अनुवेद सर्वा इति तयोः प्रथ
मा सूक्ते तृतीया ॥ ॥ यास्ते पूषन्नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति ॥ ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमा
नः ॥ ॥ हे पूषन् ते त्वदीयाः हिरण्ययीः हिरण्मय्यः हितरमणीया नावः समुद्रे उदधौ अन्तर्मध्ये अन्तरिक्षे नभसि संचरन्ति ता
भिर्नौभिः सूर्यस्य दूत्यां यासि गच्छसि । कस्मात् [illegible] दाचिद् देवैः सार्धं सूर्ये असुरवधार्थं प्रस्थिते सति तस्य भार्या स्वभर्त्रे रिरंसिजा
तोत्कका बभूव । तां प्रति सूर्यः पूषणं प्राहैषीत् तेन चात्र पूषा स्तूयते । अपि च त्वं श्रवो हविर्लक्षणमन्नं इच्छमानः इच्छन् कामेन
पश्वादिविषयेण स्तोतृभिः कृतः वशीकृतोसि ॥ ॥ अथ चतुर्थी ॥ ॥ पूषा सुबंधुर्दिव आ पृथिव्या इळस्पतिर्मघवा दस्मवर्चाः ॥ ॥ यं
देवासो अददुः सूर्यायै कामेन कृतं तवसं स्वंचं ॥ ॥ पूषा पोषको देवः दिवः द्युलोकस्य पृथिव्याश्च बंधुः शोभनबंधुर्भवति तथा इळ राम
स्पतिः इळाया अन्नस्य पतिः मघवा मघमिति धननाम तद्वान् यद्वा मंहतेर्दानकर्मणो भावसाधनो मघशब्दः । दानवान् दस्मवर्चाः २२२

मंतुमः ज्ञानवन् पूषन् अद्य इदानीं यदुद्दिश्य अवाम स्तवाम नोस्माकं मन्म मननीयं तद्धनं साधय उत्पादय ॥ ॥ अथ पंचमी ॥ ॥ इमे
चनो गवेषणं सातये सीषधो गणं ॥ आरात्पूषन्नसि श्रुतः ॥ ॥ हे पूषन् नोस्माकं सातये लाभाय इमं च गणं मनुष्यसंघं गवेषणं गवा
मेषयितारं सीषधः साधय हे पूषन् आरात् दूरदेशेपि त्वं श्रुतो विश्रुतः प्रख्यातो भवसि ॥ ॥ अथ षष्ठी ॥ ॥ आ ते स्वस्तिमीमह आ
रेअघामुपावसुं ॥ अद्या च सर्वतातये श्वश्च सर्वतातये ॥ ॥ हे पूषन् ते त्वदीयां स्वस्तिं कल्याणीं रक्षां आरेअघां आरे दूरे अघं
पापं यस्याः तादृशीं उपावसुं उपगतधनं ईदृशीं स्वस्तिं अद्य च अस्मिंश्च काले सर्वतातये सर्वैर्ऋत्विग्भिस्तायत इति सर्वतातिर्यज्ञः
तदर्थं यद्वा सर्वेषां भोगानां विस्ताराय श्वश्च परश्मिन्नपि दिने सर्वतातये सर्वदा यज्ञार्थं आईमहे अभियाचामहे ॥ ॥ इति चतुर्थ
स्याष्टमे द्वाविंशो वर्गः ॥ ॥ इंद्रानु पूषणेति षळृचं अष्टमं सूक्तं भरद्वाजस्यार्षं गायत्रमैंद्रापौष्णं । अनुक्रांतं च इंद्रान्वेंद्र वीताग
तो विनियोगः ॥ ॥ तत्र प्रथमा ॥ ॥ इंद्रा नु पूषणा वयं सख्याय स्वस्तये ॥ हुवेम वाजसातये ॥ ॥ इतरेतरयोगात् इंद्रपूषन्शब्दयोरु
भयत्र द्विवचनं । इंद्रापूषणौ देवौ अद्य च वयं स्वस्तये सख्याय शोभनाय सखित्वाय वाजसातये वाजस्यान्नस्य बलस्य वा सातये
संभजनाय च हुवेम आह्वयामः स्तवामः ॥ ॥ अथ द्वितीया ॥ ॥ सोममन्य उपासदत्पातवे चम्वोः सुतं ॥ करंभमन्य इच्छति ॥ ॥ चम्वोः
अधिषवणफलकयोः सुतं अभि[illegible]षुतं सोमं अन्यः [illegible] एकतर इंद्रः पातवे पातुमुपासत । उपसीदति उपगच्छति अन्यः एकतरः

ऋ०भा० ववां युवयोर्जनिता अतो युवं युवां भ्रातरा भ्रातरौ स्थः अग्नि... यमलौ सहोत्पन्नौ इह हे मातराः इहेह च सर्वत्र माता ययोस्ता
दृशौ स्थः अदितिर्धनयोर्माता सेवां वयं स्तीर्णा भूमिरदितिरिह हे मातरा वितिष्ठ्यते ॥ ॥ अथ तृतीया ॥ ॥ ओकिवांसा सुते सचाँ अश्वा
२२३ सप्ती इवादने ॥ इंद्रान्वग्नी अवसेह वज्रिणा वयं देवा हवामहे ॥ ॥ हे इंद्राग्नी सुते अभिषुते सोमे युवां सचा सह ओकिवांसो सम
वेतौ भवतं षच समवाये इत्यस्यैतद्रूपं । तत्र दृष्टांतः आदने भक्षणीय घासे सप्ती इव सर्पणशीले अश्व इव तु अद्य वयं तादृशौ
इंद्राग्नी इहास्मिन्यज्ञे अवसा रक्षणेन हेतुना हवामहे इतरेतरयोगात् इंद्रशब्दोग्निशब्दो च द्विवचनौ । कीदृशाविंद्राग्नी वज्रिणौ
वज्रिणौ आयुधोपेतौ देवा दानादिगुणयुक्तौ ॥ ॥ अथ चतुर्थी ॥ ॥ य इंद्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा ॥ जोषवाकं वदतः पज्रहोषि
णा न देवा भसथश्चन ॥ ॥ हे ऋतावृधा ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारा विंद्राग्नी सुतेष्वभिसुतेषु सोमेषु यस्तोता वां क्वचनु कु
त्सितं स्यात् तेषु सोमेषु मध्ये जोषवाकं वदतः जोषयितव्यं प्रीतिहेतुत्वेन कर्तव्यं स्वयमप्रीतिकरं जोषस्तादृशं वाक्यं वदतस्तस्य
स्तोतुः सोमं हे पज्रहोषिणा पज्रैः प्रार्जितैः प्रसिद्धैः होषै घोषैः स्तोत्रं ययोस्तादृशौ हे देवौ युवां न भसथः न भक्षयथः चनइ
ति पादपूरणार्थः ॥ अत्र निरुक्तं जोष इत्यविज्ञातनामधेयं जोषयितव्यं भवति य इंद्राग्नी सुतेष्वित्यादि ॥ ॥ अथ पंचमी ॥ ॥ इंद्रा
ग्नी को अस्य वां देवौ मर्तश्चिकेतति ॥ विषूचो अश्वान्युयुजान ईयत एकः समान आरथे ॥ ॥ हे देवौ द्योतमानाविंद्राग्नी वां युवयोः अ राम
२२३

स्येंद्रस्येदं कर्म को मर्तो मनुष्यः चिकेतति जानीयात् । न कोपीत्यर्थः । किं तत्कर्म विषूचः विष्वक् नाना अंचंतः गच्छंतो श्वान् समाने उ
भयार्थे एकस्मिन्रथे युवयोरेक इंद्रः सूर्यात्मना वर्तमानः युयुजानः तादृशान् अश्वान्योजयन् आईयते सर्वं जगदभिगच्छति यद्वा
विषूचो विषूचो नानारूपानश्वान्व्यस्य समाने एकरूपे रथे संवत्सरात्मके युयुजानो योजयन् युवयोरेकः सूर्यात्मा इंद्रः आ
ईयते आगच्छति एतद्युवयोः कर्म को यथा वज्जानीयादित्यर्थः ॥ ॥ इति चतुर्थस्याष्टमे पंचविंशो वर्गः ॥ ॥ अथ षष्ठी ॥ ॥ इंद्राग्नी अ
पादियं पूर्वागात्पद्वतीभ्यः ॥ हित्वी शिरो जिह्वया वावदच्चरत्त्रिंशत्पदा न्यक्रमीत् ॥ ॥ इंद्राग्नी अपात् पादरहिता इयमुषाः पद्वतीभ्यः
पादयुक्ताभ्यः सुप्ताभ्यः प्रजाभ्यः पूर्वा प्रथमभाविनी सती आगात् ॥ आगच्छति तथा प्राणिनां शिरो हित्वी प्रेरयित्री यद्वा शिरो हित्वा
त्यक्त्वा स्वयमशिरस्का सती जिह्वया प्राणिस्थया तदीयेन वागिंद्रियेण वावदत् शब्दं कुर्वती चरत् एवं चरंती उषाः त्रिंशत्पदानि
चनभूता त्रिंशन्मुहूर्तान्यक्रमीत् एकेन दिवसेनातिक्रामति ॥ ॥ अथ सप्तमी ॥ ॥ इंद्राग्नी आहि तन्वते नरो धन्वानि बाह्वोः ॥ मा
नो अस्मिन्महाधने परा वर्क्तं गविष्टिषु ॥ ॥ हे इंद्राग्नी एतद्युवयोर्धन्वानि धनूंषि आतन्वते हि आततज्यानि कुर्वंति हि । युवां वा
अस्मिन्महाधने जेतव्ये न महाधनोपेते संग्रामे गविष्टिषु गवामन्वेषणेषु नोस्मान्मा परा वर्क्तं मा त्यजतं ॥ ॥ अथाष्टमी ॥ ॥ इंद्राग्नी
तपंति माघा अर्यो अरातयः ॥ अप द्वेषांस्या कृतं युयुतं सूर्यादधि ॥ ॥ हे इंद्राग्नी अघाः आहंत्र्यः अर्यः माभेत्र्यः अरातयः शत्रुसे

ऋ०भा० नः मातपंतिमाबाधंते। ता अपाहृतं अपाकुरुतं तथा द्वेषांसि द्वेष्टॄन् शत्रून् सूर्यादधि अधिः पंचम्यर्थानुवादकः सूर्यदर्शनात् यु
युतं पृथक्कुरुतं च यथा ते सूर्यं न पश्यंति तथा कुरुतं मारयतमित्यर्थः॥ ॥अथ नवमी॥ ॥इंद्राग्नी युवोरपि वसु दिव्यानि पार्थिवा॥
२२४ आ न इह प्रयच्छतं रयिं विश्वायुपोषसं॥ ॥हे इंद्राग्नी युवोर्युवयोः दिव्यानि दिवि भवानि पार्थिवा पार्थिवानि पृथिव्यां भवानि द्वयसंबं
धीनि वसूनि अपिहितानि युवयोरेव वर्तंते अतः कारणात् इहास्मिन् यज्ञे नोस्मभ्यं रयिं धनं आ अभि प्रयच्छतं कीदृशं रयिं विश्वा
युपोषसं आयव इति मनुष्यनाम सर्वेषां मनुष्याणां पोषणार्थं वपुर्धार्यां। यद्वा सर्वस्यायुषः पोषणशक्तं छांदसो वर्णलोपः॥ ॥
॥अथ दशमी॥ ॥इंद्राग्नी उक्थवाहसा स्तोमेभिर्हवनश्रुता। विश्वाभिर्गीर्भिरागतमस्य सोमस्य पीतये॥ ॥हे उक्थवाहसा उक्थैः
स्तुतिभिर्वाहनीयौ हे हवनश्रुता हवनस्याह्वानस्य श्रोतारौ एवंभूतौ हे इंद्राग्नी स्तोमेभिः स्तोत्रैः सर्वाभिर्गीर्भिः स्तुतिरूपाभिर्वाग्भि
श्च हेतुभूताभिरागच्छतं। किमर्थमस्मदीयस्य सोमस्य पीतये पानार्थं॥ ॥इति चतुर्थस्याष्टमे षड्विंशो वर्गः॥ ॥अथ वृत्रमिति पंच
दशर्चमेकादशं सूक्तं भरद्वाजस्यार्षमैंद्राग्नं। आद्यास्तिस्रस्त्रिष्टुभः चतुर्थ्याद्या नव गायत्र्यः त्रयोदशी त्रिष्टुप् चतुर्दशी बृहती
पंचदश्यनुष्टुप्। तथा चानुक्रांतं। अथ यत्पंचोना गायत्रं तु त्रिष्टुबादि त्रिष्टुब्बृहत्यनुष्टुबंतमिति। गतः सूक्तविनियोगः। वरुण राम
प्रघासेष्वैंद्राग्नस्य हविषः श्नथदित्येषा याज्या। सूत्रितं च। इंद्राग्नी अवसागतं श्नथद्वृत्रमुतसनोति वाजमिति॥ सैषा प्रथमा॥ २२४

वर्चः इति रूपनाम दस्म दर्शनीयं वर्चो यस्य तादृशः यं पूषणं देवासः सर्वे देवाः सूर्यायै सूर्यस्य पत्न्यै यद्वा सावित्र्यै सूर्याख्यायै अ
स्येव रूपादयोः ददुः दत्तवंतः पुत्रः पितराववृणीत पूषेति हि श्रूयते। कीदृशं पूषणं कामेन पश्वादिविषयेण कृतं स्तोत्रैर्भिर्वन्नीकृतं
तवसं बलवंतं प्रहर्षं स्वं च सुष्टु गच्छंतं एवंविधं पूषणं ददुः स एषा सुबंधुरित्यन्वयः॥ ॥इति चतुर्थस्याष्टमे चतुर्विंशो वर्गः॥ ॥
॥प्र नु वोचेति दशर्चं दशमं सूक्तं भरद्वाजस्यार्षमैंद्राग्नं देवताकं समम्याद्याश्च तस्रोनुष्टुभः त्रिष्टुपः षड् बृहत्यः। तथा चानु
क्रांतं प्र नु दशैंद्राग्नं नु बार्हतं चतुरनुष्टुबंतमिति॥ गतो विनियोगः॥ ॥तत्र प्रथमा॥ ॥प्र नु वोचा सुतेषु वां वीर्या यानि चक्रथुः॥
हतासो वां पितरो देवशत्रव इंद्राग्नी जीवथो युवं॥ ॥हे इंद्राग्नी यानि वीर्या वीर्याणि वीरकर्माणि चक्रथुः कृतवंतौ युवां सुतेषु अ
भिषुतेषु सोमेषु अस्मद्यज्ञे वां युवयोः तानि वीर्याणि नु क्षिप्रं प्र वोचं प्रब्रवीमि। तदेव वीर्यं दर्शयति। हे इंद्राग्नी देवशत्रवः
देवाः शत्रवः शातयितारो येषां तादृशा असुराः पितरः हिंसकाः पीयतिर्हिंसाकर्मा। तस्यैतद्रूपं। ईदृशा असुराः वां युवाभ्यां ह
तासो हताः आसन् वां युवां तु जीवथः जीवनवंतौ भवथः। असुरैर्न बाधिता इति यावत्॥ ॥अथ द्वितीया॥ ॥बळित्था महिमा वामिं
द्राग्नी पनिष्ठ आ॥ समानो वां जनिता भ्रातरा युवं यमाविहेहमातरा॥ ॥हे इंद्राग्नी वां युवयोः महिमा महत्त्वं इत्था इत्थं अनेन प्रका
रेण बट् सत्यं युष्मद्विषयं यज्जन्म महत्त्वं अभिधीयते तत्सत्यं यथार्थमित्यर्थः। पनिष्ठः पानिष्ठः स्तुत्यतमः प्रजापतिः समानः एकः

ऋ॰भा॰ भवतमुत्तमेभिः॥ ॥हे वृत्रहणा वृत्रस्यासुरस्य हंतारौ हे इंद्र हे अग्ने वृत्रहभिः वृत्रहनननिमित्तैः शुष्मैर्बलैः नमोभिरस्मभ्यं द
२२५ त्तैरन्नैश्च सार्धं अर्वाक् अस्मदभिमुखं आयातमागच्छतं हे इंद्र हे अग्ने युवां अर्केभिः अकुत्सितैर्महद्भिरुत्तमेभिरुत्कृष्टत
मै राधोभिर्धनैः सह अस्मे अस्मासु भवतमाविर्भवतं॥ ॥चतुर्विंशाकेहनि प्रातःसवनेऽच्छावाकशस्त्रे ताहुव इति षळह स्तोत्रिय
स्तृचः सूत्रितं च। ताहुवे ययोरिदमित्यं वामस्य मन्मन इत्येकादशेति॥ ॥तत्र प्रथमा सूक्ते चतुर्थी॥ ॥ताहुवे ययोरिदं पप्ने वि
श्वं पुराकृतं॥ इंद्राग्नी न मर्धतः॥ ॥तावेतावहमिंद्राग्नी हुवे आह्वये ययोरिंद्राग्न्योः पुरा पूर्वस्मिन्काले कृतं विश्वं सर्वं पूर्वस्तु
स्तुकीर्तितं वीर्यं पप्ने पन्यते ऋषिभिः स्तूयते तावेतावींद्राग्नी हुव इत्यन्वयः तौ चेंद्राग्नी न मर्धतः स्तोतॄन् न हिंस्तः। अतोस्मानप्याह
तो रक्षतामिति भावः। मर्धतिर्हिंसाकर्मा॥ ॥अथ पंचमी॥ ॥उग्रा विघनिना मृध इंद्राग्नी हवामहे॥ ता नो मृळात ईदृशे॥ ॥उ
ग्रौ उद्गूर्णबलौ अत एव मृधः शत्रून् विघनिनो विशेषेण हंतारौ तौ इंद्राग्नी हवामहे आह्वयामहे तौ चेंद्राग्नी ईदृशे अस्मिन्संग्रामे नो
स्मान् मृळतं सुखयतां। यद्वा मृळतिरुपदयाकर्मा॥ नोस्माकं मृळतं उपदयं कुरुतं॥ ॥इति चतुर्थस्याष्टमे सप्तविंशो वर्गः॥ ॥अथ
षष्ठी॥ ॥हतो वृत्राण्यार्या हतो दासानि सत्पती॥ हतो विश्वा अप द्विषः॥ ॥ताविंद्राग्नी आर्या कर्मानुष्ठातृभिः कृतानि वोपद्रव राम
जातानि हतः अपि च विश्वाः सर्वा द्विषः द्वेष्ट्रीः शत्रुभूताः प्रजाः अप हतः विनाशयतः। अतोस्माकमप्येवमेव कुरुतामिति भा २२५

वः। चतुर्विंशाकेहनि प्रातःसवने अच्छावाकशस्त्रे इंद्राग्नी युवामिति षळह स्तोत्रियस्तृचः। सूत्रितं च। इंद्राग्नी युवामिमे यज्ञस्य हि
ऋत्विजेत्यच्छावाकस्येति। तत्र प्रथमा सूक्ते सप्तमी॥ ॥इंद्राग्नी युवामिमे ऽभि स्तोमा अनूषत॥ पिबतं शंभुवा सुतं॥ ॥हे इंद्राग्नी यु
वां स्तोमाः स्तोतारः अभ्यनूषत। अभिष्टुवंति। हे शंभुवा सुखस्य भावयितारा विंद्राग्नी सुतमभिषुतमस्मदीयं सोमं पिबतं॥ ॥
॥अथाष्टमी॥ ॥या वां संति पुरुस्पृहो नियुतो दाशुषे नरा॥ इंद्राग्नी ताभिरागतं॥ ॥हे नरा नेतारा विंद्राग्नी वां युवयोः स्वभूताः
पुरुस्पृहः पुरुभिर्बहुभिः स्पृहणीयाः दाशुषे हविर्दत्तवते यजमानार्थं उन्नताः या नियुतोश्वाः संति हे इंद्राग्नी ताभिर्नियु
द्भिरागतमागच्छतं॥ ॥अथ नवमी॥ ॥ताभिरागतं नरोपेदं सवनं सुतं॥ इंद्राग्नी सोमपीतये॥ ॥हे नरौ नेतारा विंद्राग्नी सूयत अ
भिषूयत इति सवनः सोमः इदं सवनं इमं सोमं सुतमभिषुतं उपप्रति यद्वा इदं प्रातःसवनं उप अस्मिन्सवने सुतमभिषुतं
सोमं प्रति ताभिर्नियुद्भिरागच्छतं किमर्थं सोमपीतये तस्य सोमस्य पानार्थं॥ ॥अथ दशमी॥ ॥तमीळिष्व यो अर्चिषा वना वि
श्वा परिष्वजत्॥ कृष्णा कृणोति जिह्वया॥ ॥हे स्तोतारस्तमग्निमीळिष्व स्तुहि योग्निः अर्चिषा ज्वालारूपेण तेजसा विश्वा सर्वाणि
वनान्यरण्यानि परिष्वजत परिष्वजति। परितो व्याप्यति। यश्च तानि वनानि जिह्वया दग्ध्वा कृष्णानि करोति तमीळिष्वेति संबंधः॥
॥ ॥इति चतुर्थस्याष्टमे ऽष्टाविंशो वर्गः॥ ॥अथैकादशी॥ ॥य इद्ध आविवासति सुम्नमिंद्रस्य मर्त्यः॥ द्युम्नाय सुतरा अपः॥ ॥

ऋ०भा०
२२६

॥यो मर्त्यो मनुष्य इद्धे दीप्ते ऽग्नौ सुम्नं सुखकरं हविः इन्द्रस्य इंद्राय आविवासति परिचरति प्रयच्छति। चतुर्थ्यर्थे षष्ठी॥ तस्य मर्त्यस्य द्यु
म्नाय द्योतमानाय अन्नाय तदर्थं सुतराः सुखेन तरणीया अपः उदकानि कृस्यात् व्यक्तानि इंद्रः करोतीति शेषः॥ ॥अथ द्वादशी॥ ॥
॥ता नो वाजवतीरिष आशून् पिपृतमर्वतः॥ इंद्रमग्निं च वोळ्हवे॥ ॥हे इंद्राग्नी तौ तौ वाजिनीः अन्नवतीः इषः इष्यमाणाः भूमीः
यद्वा वाजो बलं तद्वती रिषो ऽन्नानि आशून् शीघ्रगामिनः अश्वान् अस्मभ्यं पिपृतं पूरयतं प्रयच्छतं किमर्थं इंद्रमग्निं च युवां वोळ्हवे वोढुं ह
विर्भिः आपयितुं॥ ॥ऐंद्राग्नस्य पशोर्हविषोनुवाक्या। उभा वामिति एषा। सूत्रितं च। उभा वामिंद्राग्नी आहुवध्यै शुचिं नु स्तोमं नवजा
तमद्येति॥ सैषा सूक्ते त्रयोदशी॥ ॥उभा वामिंद्राग्नी आहुवध्या उभा राधसः सह मादयध्यै॥ उभा दातारा विषां रयीणामुभा
वाजस्य सातये हुवे वां॥ ॥हे इंद्राग्नी उभा उभौ संहत्य वर्तमानौ वां हुवे आह्वयामि किमर्थं आहुवध्यै आभिमुख्येन होतुं तथा
उभा उभौ युवामाह्वये राधसः राधकेन हविषा सह युगपदेव मादयध्यै मादयितुं दर्पयितुं सर्वेषु सत्सु आवयोराह्वाने किं कारण
मिति चेत् उच्यते। उभा उभौ वां युवां अन्नस्य सातौ संभजनाय हुवे आह्वयामहे इषां अन्नानां रयीणां धनानां च दातारौ स्थः। अतः
कारणात् उभा उभौ वां युवां वाजस्य अन्नस्य सातये संभजनाय हुवे आह्वये॥ ॥अथ चतुर्दशी॥ ॥आ नो गव्येभिरश्व्यैर्वसव्यै३रुप
गच्छतं॥ सखायौ देवौ सख्याय शंभुवेंद्राग्नी ता हवामहे॥ ॥हे इंद्राग्नी गव्येभिर्गोसमूहैः वसव्यैर्वसुसमूहैश्च साधनैरस्मानभि

राम
२२६

॥श्नथद्वृत्रमुत सनोति वाजमिंद्रा यो अग्नी सहुरी सपर्यात्॥ इरज्यंता वसव्यस्य भूरेः सहस्तमा सहसा वाजयंता॥ ॥स पुरु
षः वृत्रमावरकं शत्रुं श्नथत् हिनस्ति। उतापि च वाजमन्नं सनोति लभते यः पुरुषः सहुरी शत्रूणामभिभवितारा विंद्राग्नी सप
र्यात् परिचरत् इतरेतरयोगात् उभयत्र पूर्ववत् द्विवचनं। कीदृशाविंद्राग्नी भूरेः प्रभूतस्य वसव्यस्य वसुसमूहस्य। यद्वा रः स्वार्थिको यत् धन
स्य इरज्यंता ईशानौ स्वामिनौ इरज्यतिरैश्वर्यकर्मा। सहस्तमा सहसा बलेन सहस्तमा अतिशयेनाभिभवितारौ शत्रूणां वाजयंता वाजं
हविर्लक्षणमन्नं आत्मन इच्छंतौ यद्वा वाजं स्तोतृभ्यो दातव्यमन्नं कामयमानौ॥ ॥अथ द्वितीया॥ ॥ता यो धिष्टमभि गा इंद्र नू
नमपः स्वरुषसो अग्न ऊळ्हाः॥ दिशः स्वरुषस इंद्र चित्रा अपो गा अग्ने युवसे नियुत्वान्॥ ॥हे इंद्र हे अग्ने तौ तौ युवां गाः अपः
उदकानि स्वः सूर्यं उषसः उषःकालान् च ऊळ्हाः पणिभिरपहृताः एतान् गवादीन् अभिलक्ष्य योधिष्टं तैरसुरैर्युद्धं कृतवंतौ नूनमिति
पदपूरणार्थः॥ हे इंद्र त्वं दिशः प्राच्याद्याः स्वः सूर्यं उषसश्च चित्राः चायनीयाः अपः उदकानि गाश्च पणिभिरपहृतानेतान् अव स
अनेन लोकेन योजयः यद्वा असुरैरावृतान् दिगादीन् असुरवधेनावरणमपनीय पृथक्कृतवानसीत्यर्थः॥ हे अग्ने नियुद्भि
रश्वैर्युक्तः सन् त्वमप्येवमकार्षीरित्यर्थः॥ ॥ऐंद्रस्य पशोर्वपाया आ वृत्रहणेत्यनुवाक्या। सूत्रितं च। आ वृत्रहणा आ भरतं शि
क्षतमिति॥ ॥सैषा तृतीया॥ ॥आ वृत्रहणा वृत्रहभिः शुष्मैरिंद्र यातं नमोभिरग्ने अर्वाक्॥ युवं राधोभिरकवेभिरिंद्राग्ने अस्मे

मुख्येन उपगच्छतं। शेषः परोक्षकृतः। सखायौ समानख्यानौ देवौ दानादिगुणयुक्तौ शंभुवा शंभुवौ सुखस्य भावयितारौ ताविद्रा
विंद्राग्नी सख्याय सखित्वार्थं वयं हवामहे आह्वयामहे॥ ॥अथ पंचदशी॥ ॥इंद्राग्नी शृणुतं हवं यजमानाय सुन्वतः॥ वीतं हव्यान्या
गतं पिबतं सोम्यं मधु॥ ॥हे इंद्राग्नी सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य हवमाह्वानं स्तोत्रं शृणुतं श्रुत्वा च तदीयानि हव्यानि ह
वींषि वीतं कामयेथां कामयित्वा च आगतमागच्छतं आगत्य च सोम्यं सोमात्मकं मधु पिबतं॥ ॥इति चतुर्थस्याष्टमे एकत्रिंशो वर्गः॥ ॥इयम
ददादिति चतुर्दशर्चं द्वादशं सूक्तं भरद्वाजस्यार्षं सरस्वतीदेवताकं आदितस्तिस्रो जगत्यः त्रयोदश्यपि जगती चतुर्दशी त्रिष्टुप् शिष्टा गा
यत्र्यः। तथा चानुक्रांतं। इयं षळूना सारस्वतं त्रिजगत्यादि जगती त्रिष्टुबंतमिति। अत्र शौनकः। इयमित्येतदाद्यं तु सूक्तं सारस्वतं ज
पेत्। द्विजः प्रातः शुचिर्भूत्वा वाग्मी भवति बुद्धिमानिति। आधेयपक्षे हविःप्रयोगे इयमददादिति सारस्वतस्तृचः। सूत्रितं च। इयमददादिति प्र
कुगमिति॥ ॥तत्र प्रथमा॥ ॥इयमददाद्रभसमृणच्युतं दिवोदासं वध्र्यश्वाय दाशुषे॥ या शश्वंतमाचखादावसं पणिं ता ते दात्राणि त
विषा सरस्वति॥ ॥इयं सरस्वती रभसं वेगवंतं ऋणच्युतं वैदिकस्य देवऋषिपितृसंबंधिनो लौकिकस्य च ऋणस्य च्यावयितारं दिवोदासमेतत्सं कि
ज्ञं पुत्रं दाशुषे हवींषि दत्तवते वध्र्यश्वाय एतत्संज्ञकाय ऋषये अददात् दत्तवती या सरस्वती शश्वंतं बहुकालं पणिं पणनशीलं वणिजं अददा
त। जनमवसं केवलं स्वात्मन एव तर्पकं आचखाद आजघान सेयमददादित्यन्वयः। अथ प्रत्यक्षं स्तुत्यन्ता। हे सरस्वति देवि तानि ते पूर्वदाना
दीनि त्वदीयानि दात्राणि दानानि तविषाणि महांति भवंति॥ ॥अथ द्वितीया॥ ॥इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः।

ऋ०वे०भा० पारावतघ्नीमवसे सुवृक्तिभिः स[illegible]सरस्वती देवीरूपेण वर्त्तते देवतारूपा स्तुता ऽधुना नदीरूपां सरस्वतीं स्तौति।
इयं नदीरूपा सरस्वती शुष्मेभिः [illegible] वद्भिर्महद्भिरूर्मिभिस्तरंगैर्गिरीणां पर्वतानां तीरसंबंधानां सानुसानू-
२२७ नि अवारुजत् भुनक्ति। बिसखा इव बिसं खनन्तीति बिसखाः यथा बिसार्थं पंकं रुजति तद्वत्तां सरस्वतीं पारावतघ्नीं दूरदेशे विद्यमानस्यापि
कूलस्य हंत्रीं सुवृक्तिभिः स्तुतिभिर्धीतिभिः कर्मभिश्च अवसे रक्षणार्थमा विवासेम परिचरेम। यद्वा पारावतघ्नीं पारावारोपरावर्ती घाती
रेतयोर्घातिनीं। उक्तं च। पारावतघ्नी पारावारघातिनीमिति॥ ॥अथ तृतीया॥ ॥सरस्वति देवनिदो नि बर्हय प्रजां विश्वस्य बृसयस्य मा-
यिनः॥ उत क्षितिभ्यो ऽवनीरविंदो विषमेभ्यो अस्रवो वाजिनीवती॥ ॥हे सरस्वति देवनिदो देवानां निंदकान् असुरान् निबर्हय न्यवधर्षय॥ त-
था विश्वस्य व्याप्तस्य मायिनः मायाविनो बृसयस्य बृसय इति त्वष्टुर्नामधेयं त्वष्टुः प्रजां पुत्रं वृत्रासुरं न्यवधीः त्वत्साहाय्याद्देव इंद्रो हतवानित्य-
र्थः। उतापि च हे वाजिनीवति अन्नवति सरस्वति त्वं क्षितिभ्यो मनुष्येभ्यो ऽवनीः भूमीः अविंदः लब्धवानसि। तान् हत्वा एभ्यश्चासुरेभ्यः वि-
षं मृतिहेतुभूतं गरलं अस्रवः॥ ॥अथ चतुर्थी॥ ॥प्र णो देवी सरस्वती वाजेभिर्वाजिनीवती॥ धीनामवित्र्यवतु॥ ॥देवी दानादिगुणयुक्ता
वाजिनीवती वाजो ऽन्नं यस्याः सा वाजिनीवती क्रिया। धीनां ध्यातॄणां स्तोतॄणां अवित्री रक्षित्री एवंभूता सरस्वती वाजेभिरन्नैः नो ऽस्मान् प्राव-
तु प्रकर्षेण तर्पयतु॥ ॥अथ पंचमी॥ ॥यस्त्वा देवि सरस्वत्युपब्रूते धने हिते॥ इंद्रं न वृत्रतूर्ये॥ ॥हे देवि सरस्वति यस्त्वा त्वां वृत्रतूर्ये संग्रामे राम
धने हिते निहिते निमित्तभूते सति इंद्रं इंद्रमिव त्वामुपब्रूते स्तौमि॥ तं त्वं रक्षेति शेषः॥ ॥इति चतुर्थस्याष्टमे त्रिंशो वर्गः॥ ॥अथ षष्ठी॥ २२७

॥ त्वं देवि सरस्वत्यवा वाजेषु वाजिनि ॥ रदा पूषेव नः सनिं ॥ ॥ हे देवि दानादिगुणयुक्ते हे वाजिनीवति वाजो बलमन्नं वा तद्वति । हे सरस्वति त्वं
नो वाजेषु संग्रामेषु अव अस्मान् रक्ष । अपि च नोस्मभ्यं पूषेव पोषको देव इव सनिं संभजनीयं धनं रद विलिख प्रयच्छेति यावत् ॥ ॥ अथ स
प्तमी ॥ ॥ उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः ॥ वृत्रघ्नी वष्टि सुष्टुतिं ॥ ॥ उतापि च स्या सा प्रसिद्धा सरस्वती घोरा शत्रूणां भयकारिणी
हिरण्यवर्तनिः वर्तते अनेनेति वर्तनिः हिरण्मयो वर्तनिर्यस्याः सा तथोक्ता । वृत्रघ्नी शत्रूणां हंत्री एवंभूता सरस्वती नोस्मदीयां सुष्टुतिं
शोभनां स्तुतिं वष्टि कामयतां ॥ ॥ अथाष्टमी ॥ ॥ यस्या अनंतो अह्रुतस्त्वेषश्चरिष्णुरर्णवः ॥ अमश्चरति रोरुवत् ॥ ॥ यस्याः सरस्वत्याः
अमः बलमनंतः अपर्यंतः अपरिमितः अह्रुतः अहिंसितः अकुटिलो वा । त्वेषो दीप्तः चरिष्णुः चरणशीलः सर्वत्राप्रतिहतगतिरित्यर्थः ।
अर्णवत् उदकवान् उदकप्रद इत्यर्थः । एवंभूतः सन् रोरुवत् भृशं शब्दं कुर्वन् चरति वर्तते सा नो विश्वा इत्युत्तरत्र संबंधः ॥ ॥ अथ नवमी ॥ ॥
सा नो विश्वा अति द्विषः स्वसॄरन्या ऋतावरी ॥ अतन्नहेव सूर्यः ॥ ॥ ऋतावरी उदकवती सरस्वती नोस्मान् विश्वाः सर्वाः द्विषो द्वेष्ट्रीः प्र
जाः प्रजा अतिनयतु अतितारयतु । यद्वा जस्येव वा छंदसीति पूर्वसवर्णदीर्घः ॥ उदकवत्यः स्वसारो भगिन्यो अन्या गंगाद्या नद्यश्च अ
स्मान् शत्रून् अतिनमयंतु । तत्र दृष्टांतः । सूर्यः सर्वस्य प्रेरक आदित्यः अतन् सततं गच्छन् अहेव अहानीव यथा हनि शीघ्रमतिनमयति
तद्वत् ॥ ॥ दशरात्रे तृतीयेऽहनि प्रउगे उत नः प्रियेति सारस्वतस्तृचः । सूचितं च । उत नः प्रिया प्रियास्विमा उद्धा नायुष्प्रदानमोभिः
तृचे प्रथमा सूक्ते दशमी ॥ ॥ उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा ॥ सरस्वती स्तोम्या भूत् ॥ ॥ उतापि च नोस्माकं प्रिया सुप्रियाणां

मध्येप्रियतमासप्तस्वसासागायत्र्यादीनिसप्तछंदांसिस्वसारोयस्याःसातादृशीनदीरूपासुगंगाद्याःसप्तनद्यःस्वसारःसुजुष्टासुसुपुरात
नैर्ऋषिभिःसेविताएवंभूतासरस्वतीदेवी[illegible]पाभ्यःतस्मात्त्राताभवतु ॥ ॥ इतिचतुर्थस्याष्टमेएकत्रिंशोवर्गः ॥ ॥ अथैकादशी ॥ ॥ आ
 पप्रुषीपार्थिवान्युरुरजोअंतरिक्षं ॥ सरस्वतीनिदस्पातु ॥ ॥ पार्थिवानिपृथिव्याःसंबंधीनिउरूणिविस्तीर्णानिरजांसिलोका
न्अंतरिक्षंअंतरिक्षंतेनचआपप्रुषीस्वतेजसापूरितवतीसरस्वतीदेवीनिदोनिंदकात्त्रातुःशत्रोःपातुरक्षतु ॥ ॥ अथद्वादशी ॥ ॥
॥ त्रिषधस्थासप्तधातुःपंचजातावर्धयंती ॥ वाजेवाजेहव्याभूत् ॥ ॥ त्रिषधस्थात्रिषुलोकेषुसहावतिष्ठमानात्रिलोकव्यापिनीसप्त
धातुःसप्तधातवोवयवागायत्र्याद्यागंगाद्यावायस्याःसातथोक्तापंचजाताजातानिनिषादपंचमांश्चतुरोवर्णान्गंधर्वादीन्वावर्ध
यंतीअभिवृद्धाकुर्वतीईदृशीसरस्वतीवाजेवाजेयुधेयुधेसर्वेषुयुधेषुहव्याभूत्होतव्याभवति ॥ ॥ अथत्रयोदशी ॥ ॥ प्रयामहिम्नाम
हिनासुचेकितेद्युम्नेभिरन्याअपसामपस्तमा ॥ रथइवबृहतीविभ्वनेकृतोपस्तुत्याचिकितुषासरस्वती ॥ ॥ महिम्नामाहात्म्येनमहिना
महतीद्युम्नेभिःद्योतमानैःपशुभिरन्नैर्वायुक्तासतीआसुआसांनदीनांदेवतानांवामध्येयासरस्वतीप्रचेकितेप्रकर्षेणज्ञायतेसाचअ
न्याःअन्यासांसुपांसुलुगितिषष्ठी ॥ बहुवचनस्यजस् । अपसांवेगवतीनांनदीनांमध्येअपस्तमावेगवत्तमायारथइवविभ्वनेविभु
त्वायबृहतीपरिवृढागुणैरधिकाकृताप्रजापतिनानिर्मितासरस्वतीचिकितुषाज्ञानतास्तोत्राउपस्तुत्याउपस्तोतव्याभवति ॥ ॥ अथच राम
तुर्दशी ॥ ॥ सरस्वत्यभिनोनेषिवस्योमापस्फरीःपयसामानआधक् ॥ जुषस्वनःसख्यावेश्याचमात्वत्क्षेत्राण्यरणानिगन्म ॥ ॥ हेसरस्वति

नोस्मान्वस्योवसीयः८ प्रशास्तवसुधनंअभिनेषि अभिप्रापय। मापस्फरीः८ अपहृत्यान्माकार्षीः स्फारोवृद्धिः उपसर्गवशात्तद्विपरीतेवर्त्
ते। तथापयसाउदकेन अधिकेननोस्मान्मा आधक्नाभिदहन बाधस्व। अपिचनोस्माकंसख्यासख्यानिसखिकर्माणि वेद्याप्र
वेशनानिजुषस्वसेवस्व। वयंचत्वत्सकाशात् अरणानिरत्नेष्टानि क्षेत्राणिमागन्म माशाप्रवाम अपितुरमणीयान्येवप्राप्नवाम॥ ॥
॥ ॥इतिचतुर्थस्याष्टमेष्टात्रिंशोवर्गः॥८॥ ॥वेदार्थस्यप्रकाशेनतमोहार्दंनिवारयन्॥ पुमर्थांश्चतुरोदेयाद्विद्यातीर्थमहेश्वरः॥१॥ ॥
॥ ॥छ॥ ॥इतिश्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणश्रीसायणाचार्यविर
चितेमाधवीयेवेदार्थप्रकाशेऋक्संहिताभाष्ये चतुर्थाष्टकेऽष्टमोध्यायः॥८॥ ॥छ॥ ॥श्रीरस्तु॥ ॥छ॥ ॥स्वस्तिश्रीनृप
शालिवाहनशाके१६०९ दुर्मतिवर्षेनिजआश्विनशुद्धदशम्यांसौम्यवासरे शततारानक्षत्रेदशममुहूर्तेयालिगीभीमण
भट्टस्यलिखितंसमाप्तं॥ ॥छ॥ ॥ऋक्संहितावेदभाष्यचतुर्थाष्टकग्रंथसंख्य ॥ ५८०० ॥ ॥इत्येकोषमतिर्मिगच्छे॥ ॥छ॥ ॥

८२००

ऋक्संहिता चतुर्थाके भाष्य पुस्तकं



